
विश्वेश्वरानन्द-वैदिकशोध-संस्थान-प्रकाशनम् —२७८
V. V. Research Institute Publication —278



विश्वेश्वरानन्द-भारतभारती-ग्रन्थमाला-२१
Vishveshvaranand Indological Series—21

संपादकः — विश्वबन्धुः

Editor — VISHVA BANDHU



भारते होशिआरपुरे वि. वै. शो. सं. मुद्रणालये ।
शास्त्रिणा देवदत्तेन संमुद्र्य प्रकाशितम् ॥

Printed and Published by DEV DUTTA SHASTRI
at the V. V. R. I. Press, Hoshiarpur (Pb., India)

V. I. Series—21

ṚGVEDA

with

The Padapāṭha and the available portions of the Bhāṣya-s
by Skandasvāmin and Udgītha, the Vyākhyā
by Veṅkaṭamādhava and Mudgala's Vṛtti
based on Sāyaṇa-bhāṣya

Edited,

Critically, and annotated with text-comparative
data from original manuscripts and
other available materials

By

VISHVA BANDHU

In collaboration with

BHĪM DEV, AMAR NĀTH, K. S. RĀMASWĀMI SĀSTRĪ
AND PĪTĀMBAR DATTA

PART III
(Maṇḍala-s II, III and IV)

HOSHIARPUR
Vishveshvaranand Vedic Research Institute
1963

वि. भा. ग्रन्थमाला—२१

ऋग्वेदः

स च

पदपाठेन च यथोपलम्भं स्कन्दस्वाम्युद्गीथीये भाष्ये, वेङ्कटमाधवीया व्याख्या, सायणभाष्यानुसारिणी मुद्गलीया वृत्तिर् इत्येतैश्च पाठविमर्शोपयिकैः पाठभेदादिटिप्पणैश्च संयोज्य

भीमदेवः, अमरनाथः, के. एस्. रामस्वामिशास्त्री, पीताम्बरदत्त इत्येषां साहाय्यभाजा

विश्वबन्धुना

संपादितः

तत्र चाऽयं

द्वितीय-तृतीय-चतुर्थ-मण्डलात्मकः

३यो भागः

होशिआरपुरम्

विश्वेश्वरानन्द-वैदिकशोध-संस्थानम्

२०२० वि.


प्रथमं संस्करणम्, २०२० वि.

प्रकाशकम् — विश्वेश्वरानन्द-वैदिकशोध-संस्थानम्,
साधु-आश्रमः (प.ऑ.), होशियारपुरम् (पं., भारतम्)।

FIRST EDITION, 1963

Publishers :

Vishveshvaranand Vedic Research Institute,
Sadhu Ashram (P.O.), Hoshiarpur (Pb. India)



Prepared and Published under the Patronage of the Government of India in the erstwhile Ministry of Scientific Research and Cultural Affairs, the Government of Panjab, the University Grants Commission, the University of Panjab, the Dayanand Anglo-Vedic College Management, New Delhi and the Trusts and Charities of Shri Vishva Bandhu, Shri Moolchand Khairaitiram and other donors.

अथ

ऋग्वेदे सभाष्ये

द्वितीय-तृतीय-चतुर्थ-मण्डलात्मकः

तृतीयो भागः

अथ

ऋग्वेदे सभाष्ये

द्वितीयं मण्डलम्

[१]

[1]गृत्समदो (पूर्वम् आङ्गिरसः शौनहोत्रः) भार्गवः शौनकः ऋषिः । अग्निर्देवता । जगती छन्दः[1] ।

त्वम॑ग्ने द्युभि॒स्त्वमा॑शुशु॒क्षणि॒स्त्वम॒द्भ्यस्त्वमश्म॑न॒स्परि॑ ।
त्वं वने॑भ्य॒स्त्वमोष॑धीभ्य॒स्त्वं नृ॒णां नृ॑पते जायसे॒ शुचि॑ः ॥ १ ॥

त्वम् । अ॒ग्ने॒ । द्युऽभिः॑ । त्वम् । आ॒शु॒ऽशु॒क्षणिः॑ । त्वम् । अ॒त्ऽभ्यः । त्वम् । अश्म॑नः । परि॑ ।
त्वम् । वने॑भ्यः । त्वम् । ओष॑धीभ्यः । त्वम् । नृ॒णाम् । नृ॒ऽप॒ते॒ । जा॒य॒से॒ । शुचिः॑ ॥ १ ॥

वेङ्क० 'य[2] आङ्गिरसः[3] शौनहोत्रो[4] भूत्वा भार्गवः शौनकोऽभवत्, स गृत्समदो द्वितीयं मण्डलमपश्यत्' (अनु २,१,१) । त्वम् अग्ने! द्युभ्यः जायसे । 'दिवस्परि प्रथमं जज्ञे' (ऋ १०,४५,१) इत्युक्तम्† । त्वम् आशु शुष्का दारून् इन्धि । त्वम् अन्तरिक्षस्थाभ्यः अद्भ्यः वैद्युतः, त्वम् अश्मनः च आहन्यमानात्, त्वम् ओषधिवनस्पतिभ्यश्च जायसे नृपते! शुचिः[6] ॥ १ ॥

तवा॑ग्ने हो॒त्रं तव॑ पो॒त्रमृ॒त्वियं॒ तव॑ ने॒ष्ट्रं त्वम॒ग्निदृ॑ताय॒तः ।
तव॑ प्रशा॒स्त्रं त्वम॑ध्वरीयसि ब्र॒ह्मा चासि॑ गृ॒हप॑तिश्च नो॒ दमे॑ ॥ २ ॥

तव॑ । अ॒ग्ने॒ । हो॒त्रम् । तव॑ । पो॒त्रम् । ऋ॒त्वियम् । तव॑ । ने॒ष्ट्रम् । त्वम् । अ॒ग्नित् । ऋ॒त॒ऽय॒तः ।
तव॑ । प्र॒ऽशा॒स्त्रम् । त्वम् । अ॒ध्व॒रि॒ऽय॒सि॒ । ब्र॒ह्मा । च॒ । असि॑ । गृ॒हऽप॑तिः । च॒ । नः॒ । दमे॑ ॥ २ ॥

वेङ्क० तव अग्ने! होतृकर्म पोतृकर्म[5] च कार्यं भवति आर्त्विजम् आर्त्विज्यम् । त्वम् आग्नीध्रश्च यज्ञमिच्छतः । त्वम् एव अध्वरं नेष्यसि, यथाऽध्वर्युरध्वरं कामयते । गृहपतिः यजमानः च भवसि अस्मदायतने । शिष्टं स्पष्टम् ॥ २ ॥

त्वम॑ग्न॒ इन्द्रो॑ वृष॒भः स॒ताम॑सि॒ त्वं विष्णु॑रुरुगा॒यो न॑म॒स्य॑ः ।
त्वं ब्र॒ह्मा र॑यि॒विद्ब्र॑ह्मणस्पते॒ त्वं वि॑धर्तः सचसे॒ पुर॑न्ध्या ॥ ३ ॥

१-१. नास्ति मूको. २. नास्ति वि अ१. ३. आङ्गिरसः वि[1] अ[1] अपं. ४. शौन[1] वि[1] अपं; शैन[1] वि[1] अ[1]. ५-५. नास्ति वि[1] अपं. † 'त्युक्त वि[1] अ[1]. ६. नास्ति वि[1] अ[1].

त्वम् । अ॒ग्ने॒ । इन्द्रः॑ । वृ॒ष॒भः । स॒ताम् । अ॒सि॒ । त्वम् । विष्णुः॑ । उ॒रु॒ऽगा॒यः । न॒म॒स्यः॑ ।
त्वम् । ब्र॒ह्मा । र॒यि॒ऽवित् । ब्र॒ह्म॒णः॒ । प॒ते॒ । त्वम् । वि॒ध॒र्त॒रिति॑ विऽधर्तः । स॒च॒से॒ । पुर॑म्ऽध्या ॥ ३ ॥

वेङ्कट॰ त्वम् अग्ने! इन्द्रः वृषभ च देवः भवसि 'सताम्[1]। त्वम्' विष्णुः च उरुगमनः नमस्कार्यः। त्वम्[2] बृहस्पतिश्च भवसि धनस्य लम्भयिता ब्रह्मणस्पते!। त्वम् विधातः! सङ्गच्छसे प्रज्ञया[3] ॥ ३ ॥

त्वम॑ग्ने॒ राजा॒ वरु॑णो धृ॒तव्र॑त॒स्त्वं मि॒त्रो भ॑वसि द॒स्म ईड्यः॑ ।
त्वम॑र्य॒मा सत्प॑ति॒र्यस्य॑ सं॒भुजं॒ त्वमंशो॑ वि॒दथे॑ देव भाज॒युः ॥ ४ ॥

त्वम् । अ॒ग्ने॒ । राजा॑ । वरु॑णः । धृ॒तऽव्र॑तः । त्वम् । मि॒त्रः । भ॒व॒सि॒ । द॒स्मः । ईड्यः॑ ।
त्वम् । अ॒र्य॒मा । सत्ऽप॑तिः । यस्य॑ । स॒म्ऽभुज॑म् । त्वम् । अंशः॑ । वि॒दथे॑ । दे॒व॒ । भा॒ज॒युः ॥ ४ ॥

वेङ्कट॰ त्वम् अग्ने! राजा वरुणः[4] धृतकर्मा[4] च भवसि। त्वम्[5] मित्रः च भवसि[6] दर्शनीयः स्तोतव्यः। त्वम् अर्यमा सतां पतिः, यस्य सम्भोजनं भवति। 'यः खलु वै ददाति[7] सोऽर्यमा' (तै २,३,४,१) इति ब्राह्मणम्। त्वम् एव अंशः देव! 'यज्ञे[8] अंशभाजो' देवान् 'स्वांशभागान् भाजयन्'[8] ॥ ४ ॥

त्वम॑ग्ने॒ त्वष्टा॑ विध॒ते सु॒वीर्यं॒ तव॒ ग्नावो॑ मित्रमहः सजा॒त्य॑म् ।
त्वमा॑शु॒हेमा॑ ररिषे॒ स्वश्व्यं॒ त्वं न॒रां शर्धो॑ असि पुरू॒वसुः॑ ॥ ५ ॥

त्वम् । अ॒ग्ने॒ । त्वष्टा॑ । वि॒ध॒ते । सु॒ऽवीर्य॑म् । तव॑ । ग्नावः॑ । मि॒त्र॒ऽम॒हः॒ । स॒ऽजा॒त्य॑म् ।
त्वम् । आ॒शु॒ऽहेमा॑ । र॒रि॒षे॒ । सु॒ऽअश्व्य॑म् । त्वम् । न॒राम् । शर्धः॑ । अ॒सि॒ । पु॒रु॒ऽवसुः॑ ॥ ५ ॥

वेङ्कट॰ त्वम् अग्ने! त्वष्टा च भवसि परिचरते पुत्रं प्रयच्छन्। तव देवपत्न्यः, मित्राणां पूजयितः! बन्धुता[9]। त्वम् आशुगन्ता ददासि शोभनाश्वसमूहम्। त्वम् नृणां बलम् असि बहुधनः ॥ ५ ॥

[10]इति द्वितीयाष्टके पञ्चमाध्याये सप्तदशो वर्गः[11] ॥

त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वस्त्वं शर्धो॒ मारु॑तं पृ॒क्ष ई॑शिषे ।
त्वं वातै॑ररु॒णैर्या॑सि शंग॒यस्त्वं पू॒षा वि॑ध॒तः पा॑सि॒ नु त्मना॑ ॥ ६ ॥

त्वम् । अ॒ग्ने॒ । रु॒द्रः । असु॑रः । म॒हः । दि॒वः । त्वम् । शर्धः॑ । मारु॑तम् । पृ॒क्षः । ई॒शि॒षे॒ ।
त्वम् । वातैः॑ । अ॒रु॒णैः । या॒सि॒ । श॒म्ऽग॒यः । त्वम् । पू॒षा । वि॒ध॒तः । पा॒सि॒ । नु । त्मना॑ ॥ ६ ॥

१. सता। त्वम् वि' अ', सता त्व सता वि' मूको. २. तु वि' मूको. ३. नास्ति वि' अ'. ४. वरुणः वि' अ'; धृतव्रतकर्मा वि' मूको. ५. नास्ति मूको. ६. नास्ति वि' मूको. ७. नास्ति मूको. ८-८. यष्ठाशभाजः वि', यज्ञभा° वि' अ'. ९-९. त्वात् भाज वि'; यथा…नशाजयन्ति अ'. १०. ऋद्धता मूको. ११-११. नास्ति मूको.

वेङ्कट० त्वम् अग्ने! रुद्रः च भवसि बलवान् महान्। द्योः! त्वम् मरुतो वेगः अन्नस्य च ईशिषे। त्वम् वातैः अरुणैः याति सुखाश्वः। त्वम् पोषकः परिचरतः स्वयम् एव पासि ॥ ६ ॥

त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि ।
त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत् ॥ ७ ॥

त्वम् । अग्ने । द्रविणःऽदाः । अरम्ऽकृते । त्वम् । देवः । सविता । रत्नऽधाः । असि ।
त्वम् । भगः । नृऽपते । वस्वः । ईशिषे । त्वम् । पायुः । दमे । यः । ते । अविधत् ॥ ७ ॥

वेङ्कट० त्वम् अग्ने! धनस्य दाता भवसि अलङ्कुर्वते। त्वम् देवः सविता रत्नानां धाता च भवसि। त्वम् एव भगः नृपते! धनस्य ईशिषे। त्वम् रक्षकः गृहे यः त्वा परिचरति ॥ ७ ॥

त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृञ्जते ।
त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ॥ ८ ॥

त्वाम् । अग्ने । दमे । आ । विश्पतिम् । विशः । त्वाम् । राजानम् । सुऽविदत्रम् । ऋञ्जते ।
त्वम् । विश्वानि । सुऽअनीक । पत्यसे । त्वम् । सहस्राणि । शता । दश । प्रति ॥ ८ ॥

वेङ्कट० त्वाम् अग्ने! गृहे साधयन्ति विशां पतिम् मनुष्याः। त्वाम् ईश्वरम् शोभनधनम् प्रसाधयन्ति। त्वम् विश्वानि† धनानि प्रति ईश्वरो भवसि हे शोभनज्वालानीक! त्वम् सहस्राणि च ‡प्रति भवसि‡ शतानि दश च वीतवान् ॥ ८ ॥

त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम् ।
त्वं पुत्रो भवसि यस्तेऽविधत् त्वं सखा सुशेवः पास्याधृषः ॥ ९ ॥

त्वाम् । अग्ने । पितरम् । इष्टिऽभिः । नरः । त्वाम् । भ्रात्राय । शम्या । तनूऽरुचम् ।
त्वम् । पुत्रः । भवसि । यः । ते । अविधत् । त्वम् । सखा । सुऽशेवः । पासि । आऽधृषः ॥ ९ ॥

वेङ्कट० त्वाम् अग्ने! पालयितारम् इष्टिभिः कुर्वन्ति ऋत्विजः। त्वाम् एव च भ्रातृत्वाय च कर्मणा शरीराणां रोचयितारम्। त्वम् पुत्रः च भवसि यः ते परिचरति। त्वम् सखा च सुमुखः रक्षसि आधर्षणात् ॥ ९ ॥

त्वमग्न ऋभुराके नमस्यस्त्वं वाजस्य क्षुमतो राय ईशिषे ।
त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः ॥ १० ॥

१. नास्ति वि॰ अ॰ लपे. २. महा॰ वि॰ अ॰ लपे. ३-३. नास्ति वि॰ अ॰; ४. पोष॰ लप. ५. ... वि॰ अ॰. ६. ... वि॰ अ॰ लपे. ७-७. नास्ति वि॰ अ॰. † ... लप. †‡ प्रभवसि ल. ८. पाल॰ वि॰ अ॰ लपे. ९. रोचयितं न वि॰. १०. नास्ति मूको.

त्वम् । अग्ने । ऋभुः । आके । नमस्यः । त्वम् । वाजस्य । क्षुऽमतः । रायः । ईशिषे ।
त्वम् । वि । भासि । अनु । धक्षि । दावने । त्वम् । विऽशिक्षुः । असि । यज्ञम् । आऽतनिः ॥

वेङ्कट० त्वम् अग्ने! ऋभुः अन्तिके नमस्यः च भ. । त्वम् अन्नस्य धनस्य च शब्दवतः प्रतिवहस्य ईशिषे । त्वम् दीप्यसे अनु दहसि च दातुम् । प्रयच्छते त्वम् विविधस्य दाता असि यज्ञस्य विस्तारयिता ॥ १० ॥

'इति द्वितीयाष्टके पञ्चमाध्याये अष्टादशो वर्गः' ॥

त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा ।
त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ॥ ११ ॥

त्वम् । अग्ने । अदितिः । देव । दाशुषे । त्वम् । होत्रा । भारती । वर्धसे । गिरा ।
त्वम् । इळा । शतऽहिमा । असि । दक्षसे । त्वम् । वृत्रऽहा । वसुऽपते । सरस्वती ॥ ११ ॥

वेङ्कट० त्वम् अग्ने! अदितिः देव! भवसि यजमानाय । त्वम् एव होत्रा भारती च देवपत्न्यौ स्तुत्या । त्वम् एव इळा देवी शतसंवत्सरा भवसि दक्षाय प्रजापतये । त्वम् वृत्रहा वसूनां पते! सरस्वती च ॥ ११ ॥

त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः ।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥ १२ ॥

त्वम् । अग्ने । सुऽभृतः । उत्ऽतमम् । वयः । तव । स्पार्हे । वर्णे । आ । सम्ऽदृशि । श्रियः ।
त्वम् । वाजः । प्रऽतरणः । बृहन् । असि । त्वम् । रयिः । बहुलः । विश्वतः । पृथुः ॥ १२ ॥

वेङ्कट० त्वम् अग्ने! सुष्ठु सम्भृतः सन् उत्तमम् अन्नं भव । तव स्पृहणीये वर्णे सन्दर्शने च पश्यमानानाम् श्रियः आ गच्छन्ति । त्वम् अन्नवान् प्रकर्षेण तारयिता महान् असि । त्वम् एव धनम् असि बहु सर्वतः पृथु ॥ १२ ॥

त्वामग्न आदित्यास आस्यं त्वां जिह्वां शुचयश्चक्रिरे कवे ।
त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम् ॥ १३ ॥

त्वाम् । अग्ने । आदित्यासः । आस्यम् । त्वाम् । जिह्वाम् । शुचयः । चक्रिरे । कवे ।
त्वाम् । रातिऽसाचः । अध्वरेषु । सश्चिरे । त्वे इति । देवाः । हविः । अदन्ति । आऽहुतम् ॥ १३ ॥

१-१. नास्ति मूको. २. यजमानाय वि० क स्त्रे. ३. [illegible] वि० क०. ४. भवत वि० सां. ५. पृथु वि० अ०.

वेङ्कट० अग्ने! त्वाम् आदित्या आस्यम् चक्रिरे, त्वाम् एव जिह्वाम् च शुचे! दीप्ताः[1] । त्वाम्[2] यजन्त यज्ञकाराः यज्ञेषु सेवन्ते । त्वयि देवा आहुतम् हविः भक्षयन्ति ॥ १३ ॥

त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्याहुतम् ।
त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः ॥ १४ ॥

त्वे इति । अग्ने । विश्वे । अमृतासः । अद्रुहः । आसा । देवाः । हविः । अदन्ति । आऽहुतम् ।
त्वया । मर्तासः । स्वदन्ते । आऽसुतिम् । त्वम् । गर्भः । वीरुधाम् । जज्ञिषे । शुचिः ॥ १४ ॥

वेङ्कट० त्वयि अग्ने! सर्वे देवाः न द्रुह्यन्ति, आस्येन च देवाः हविः भक्षयन्ति आहुतम् । त्वया एव मर्ताः च अन्नम् स्वदन्ते । त्वम् गर्भः वीरुधाम् जायसे दीप्तः[1] ॥ १४ ॥

त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे ।
पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे ॥ १५ ॥

त्वम् । तान् । सम् । च । प्रति । च । असि । मज्मना । अग्ने । सुऽजात । प्र । च । देव । रिच्यसे ।
पृक्षः । यत् । अत्र । महिना । वि । ते । भुवत् । अनु । द्यावापृथिवी इति । रोदसी इति । उभे इति ॥ १५ ॥

वेङ्कट० त्वम् सूक्तेऽनुक्रान्तान् देवान् बलेन समम् न भवसि प्रति च, यत् सर्वे देवाः सह कुर्वन्ति, यत् च प्रत्येकम्, तदुभयं कर्तुं शक्नोषि । अग्ने! शोभनजनन![4] देवान् प्र रिच्यसे च । यस्मात् तव महत्त्वेन हव्यदानमात्रमपि कृतम् सत् वि भवति, सर्वस्य रोधयित्र्यौ द्यावापृथिव्यौ उभे अपि अनु भवतः । 'यावदेका[5] देवता कामयते यावदेका तावदाहुतिः प्रथते' (तैब्रा ३,२,६,४) इति ब्राह्मणात् । '[6]अथो गरिमाणं[6] गच्छति अथोऽपरम्' (शु. मान्त १,५,१,१०) इति च ॥ १५ ॥

ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥ १६ ॥

ये । स्तोतृऽभ्यः । गोऽअग्राम् । अश्वऽपेशसम् । अग्ने । रातिम् । उपऽसृजन्ति । सूरयः ।
अस्मान् । च । तान् । च । प्र । हि । नेषि । वस्यः । आ । बृहत् । वदेम । विदथे । सुऽवीराः ॥

वेङ्कट० ये स्तोतृभ्यः गोमुखाम् अश्वरूपाम् अग्ने! दानम् धनम् सूरयः प्रयच्छन्ति तान्, अस्मान् च धनम् अभ्युदयं प्रति प्रणयसि । यज्ञे वयम् सुपुत्रवामिति बृहत् वचनम् वदेम सुपुत्राः ॥ १६ ॥

[7]इति द्वितीयाष्टके पञ्चमाध्याये एकोनविंशो वर्गः[7] ॥

---

१. दीप्तानु वि॰ अ॰. २. नास्ति वि॰ अ॰. ३. नास्ति अ॰. ४. °जनने वि॰ अ॰ कर्म.
५. °देवता मूको. ६-६. °दोऽभ्यास वि॰ अ॰. ७-७. नास्ति मूको.

[२]

¹गृत्समदो (पूर्वम् आङ्गिरसः शौनहोत्रः) भार्गवः शौनकः ऋषिः । अग्निर्देवता । जगती छन्दः¹ ॥

यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा ।
समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदम् ॥ १ ॥

यज्ञेन । वर्धत । जातऽवेदसम् । अग्निम् । यजध्वम् । हविषा । तना । गिरा ।
समिऽधानम् । सुऽप्रयसम् । स्वःऽनरम् । द्युक्षम् । होतारम् । वृजनेषु । धूःऽसदम् ॥ १ ॥

वेङ्कट० यज्ञेन वर्धयत जातवेदसम् । अग्निम् यजध्वम् हविषा धनेन स्तुत्या च दीप्यमानं स्वन्न सर्वमनुष्यम् दीप्तम् होतारम् यज्ञेषु धुरि सीदन्तम् ॥ १ ॥

अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः ।
दिव इवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः ॥ २ ॥

अभि । त्वा । नक्तीः । उषसः । ववाशिरे । अग्ने । वत्सम् । न । स्वसरेषु । धेनवः ।
दिवःऽइव । इत् । अरतिः । मानुषा । युगा । आ । क्षपः । भासि । पुरुऽवार । सम्ऽयतः ॥ २ ॥

वेङ्कट० शब्दं कुर्वन्ति त्वा रात्रयः उषसः च अग्ने! वत्सम् इव गोष्ठेषु धेनवः । दिवः ²आदित्य इव मानुषाणि युगानि अहानि, त्वं रात्रीः आभासयसि स्वया संगच्छमानः² बहुभिः स्तुत्यमान! ॥ २ ॥

तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्येरिरे ।
रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यम् ॥ ३ ॥

तम् । देवाः । बुध्ने । रजसः । सुऽदंससम् । दिवः । पृथिव्योः । अरतिम् । नि । एरिरे ।
रथम्ऽइव । वेद्यम् । शुक्रऽशोचिषम् । अग्निम् । मित्रम् । न । क्षितिषु । प्रऽशंस्यम् ॥ ३ ॥

वेङ्कट० द्यावापृथिव्योरुभयोः गन्तारम् अग्निम् देवाः लोकस्य मूले पृथिव्यां निहितवन्तः, सुकर्माणम् रथम् इव धनलाभहेतुं शुक्लं दीप्तम् अग्निम् मित्रम् इव मनुष्यैः प्रशंसनीयं वेदिषु ॥ ३ ॥

तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः ।
पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु ॥ ४ ॥

तम् । उक्षमाणम् । रजसि । स्वे । आ । दमे । चन्द्रम्ऽइव । सुऽरुचम् । ह्वारे । आ । दधुः ।
पृश्न्याः । पतरम् । चितयन्तम् । अक्षऽभिः । पाथः । न । पायुम् । जनसी इति । उभे इति । अनु ॥

१-१. नास्ति मूको. २. नास्ति वि' अ सर्व ३. नास्ति मूको. ४. °मानः ऋ.

वेङ्कट० तम् सिञ्चन्तम् अस्यां भूमौ स्वे गृहे वत्सम् इव [illegible] आ वपुः दिवः गम्भीरं प्रजापयन्तं तेजोभिः अश्वम् इव [illegible] उभयोः द्यावापृथिव्योः ॥ ४ ॥

स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष ऋञ्जते गिरा ।
हिरिशिप्रो वृधसानासु जर्भुरद् द्यौर्न स्तृभिश्चितयद् रोदसी अनु ॥ ५ ॥

सः । होता । विश्वम् । परि । भूतु । अध्वरम् । तम् । ऊं इति । हव्यैः । मनुषः । ऋञ्जते । गिरा ।
हिरिऽशिप्रः । वृधसानासु । जर्भुरत् । द्यौः । न । स्तृऽभिः । चितयत् । रोदसी इति । अनु ॥५॥

वेङ्कट० स होता सर्वं यज्ञं परितः[1] भवतु । तम् एव हव्यैः मनुष्याः च मनुष्याः प्रसाधं[2] कुर्वन्ति । हरितवर्णशिप्रः वर्धमानासु प्रजासु भरणं कुर्वन् तेजोभिः चेतयति द्यावापृथिव्योरन्तम् आदित्य इव ॥ ५ ॥

[3]इति द्वितीयाष्टके पञ्चमाध्याये विंशो वर्गः[3] ॥

स नो रेवत् समिधानः स्वस्तये संददस्वान् रयिमस्मासु दीदिहि ।
आ नः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये ॥ ६ ॥

सः । नः । रेवत् । सम्ऽइधानः । स्वस्तये । सम्ऽददस्वान् । रयिम् । अस्मासु । दीदिहि ।
आ । नः । कृणुष्व । सुविताय । रोदसी इति । अग्ने । हव्या । मनुषः । देव । वीतये ॥ ६ ॥

वेङ्कट० [4]स अस्माकं धनपूर्णः[4] दीप्यमानः अविनाशाय प्रयच्छन् [5]रयिम्[5] धनम् अस्मासु दीपयस्व । द्यावापृथिवी च अस्माकम् आ कृणुष्व अभ्युदयाय । अग्ने ! देव ![6] हवींषि मनुष्यस्य देवानां भक्षणाय[7] कुरु ॥ ६ ॥

दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि ।
प्राची द्यावापृथिवी ब्रह्मणा कृधि स्वर्ण शुक्रमुषसो वि दिद्युतः ॥ ७ ॥

दाः । नः । अग्ने । बृहतः । दाः । सहस्रिणः । दुरः । न । वाजम् । श्रुत्यै । अप । वृधि ।
प्राची इति । द्यावापृथिवी इति । ब्रह्मणा । कृधि । स्वः । न । शुक्रम् । उषसः । वि । दिद्युतः ॥

वेङ्कट० अग्ने ! महत् धनम् अस्मभ्यं देहि शतसहस्रसङ्ख्यायुक्तम्[8] । द्वाराणि इव[9] अन्नम् अस्माकं श्रवणाय अपावृतं[10] कुरु । प्राङ्मुखे च द्यावापृथिव्यौ मन्त्रेण कुरु । आदित्यम् इव ज्योतिः उषसः वि द्योतयन्ति ॥ ७ ॥

---

१. नास्ति वि° अ°. २. °मकं मूको. ३-३. नास्ति मूको. ४-४. [illegible] वि°, [illegible] अ°. ५. नास्ति वि° अ°. ६. नास्ति मूको. ७. [illegible] वि° अ° [illegible]. ८. [illegible] अ°. ९. [illegible] वि° अ°. १०. [illegible] मूको.

स इ॑धा॒न उ॒षसो॒ राम्या॒ अनु॒ स्व१॒॑र्ण दी॑देदरु॒षेण॑ भा॒नुना॑ ।
होत्रा॑भिर॒ग्निर्मनु॑षः स्वध्व॒रो राजा॑ वि॒शामति॑थि॒श्चारु॑रा॒यवे॑ ॥ ८ ॥

सः । इ॒धा॒नः । उ॒षसः॑ । राम्याः॑ । अनु॑ । स्वः॑ । न । दी॒दे॒त् । अ॒रु॒षेण॑ । भा॒नुना॑ ।
होत्रा॑भिः । अ॒ग्निः । मनु॑षः । सु॒ऽअ॒ध्व॒रः । राजा॑ । वि॒शाम् । अति॑थिः । चारुः॑ । आ॒यवे॑ ॥ ८ ॥

वेङ्कट० रमणीयासु उषःसु दीप्यमानः अग्निः आदित्य इव दीप्यते आरोचमानेन तेजसा । होत्राभिः अग्निः मनुष्यः सुयष्टा भवति, राजा मनुष्याणाम्, उर्वशीपुत्राय च शोभनः अतिथिः[1] ॥ ८ ॥

ए॒वा नो॑ अग्ने अ॒मृते॑षु पूर्व्य॒ धीष्पी॑पाय बृ॒हद्दि॑वेषु॒ मानु॑षा ।
दुहा॑ना धे॒नुर्वृ॒जने॑षु का॒रवे॒ त्मना॑ श॒तिनं॑ पुरु॒रूप॑मि॒षणि॑ ॥ ९ ॥

ए॒व । नः॒ । अ॒ग्ने॒ । अ॒मृते॑षु । पू॒र्व्य॒ । धीः । पी॒पा॒य॒ । बृ॒हत्ऽदि॑वेषु । मानु॑षा ।
दुहा॑ना । धे॒नुः । वृ॒जने॑षु । का॒रवे॑ । त्मना॑ । श॒तिन॑म् । पु॒रु॒ऽरूप॑म् । इ॒षणि॑ ॥ ९ ॥

वेङ्कट० एवम् अस्माकम् अग्ने! देवेषु अग्ने! स्तोतव्या बुद्धिः वर्धते महादीप्तिषु मनुष्याणाम् । दुहाना स्तुतिः उपद्रवेषु स्तोत्रे स्वयमेव शतसङ्ख्याकं बहुरूपम् एषणीयं धनं[2] भवति ॥ ९ ॥

व॒यम॑ग्ने॒ अर्व॑ता वा सु॒वीर्यं॒ ब्रह्म॑णा वा चितयेमा॒ जनाँ॒ अति॑ ।
अ॒स्माकं॑ द्यु॒म्नमधि॒ पञ्च॑ कृ॒ष्टिषू॒च्चा स्व१॒॑र्ण शु॑शुचीत दु॒ष्टर॑म् ॥ १० ॥

व॒यम् । अ॒ग्ने॒ । अर्व॑ता । वा॒ । सु॒ऽवीर्य॑म् । ब्रह्म॑णा । वा॒ । चि॒त॒ये॒म॒ । जना॑न् । अति॑ ।
अ॒स्माक॑म् । द्यु॒म्नम् । अधि॑ । पञ्च॑ । कृ॒ष्टिषु॑ । उ॒च्चा । स्वः॑ । न । शु॒शु॒ची॒त॒ । दु॒स्तर॑म् ॥ १० ॥

वेङ्कट० वयम् अग्ने! अश्वेन वा शोभनवीर्यं धनं चिन्तयेम[3] मन्त्रेण वा शत्रुजनान् । अस्माकम् धनं पञ्चसु जनेषु अधि[4] भवतु । उच्चैः आदित्य इव अस्माकं दीप्यतां शत्रुभिः दुस्तरम् ॥ १० ॥

स नो॑ बोधि सहस्य प्र॒शंस्यो॒ यस्मि॑न्त्सुजा॒ता इ॒षय॑न्त सू॒रयः॑ ।
यम॑ग्ने य॒ज्ञमु॒पय॑न्ति वा॒जिनो॒ नित्ये॑ तो॒के दी॑दि॒वांसं॒ स्वे दमे॑ ॥ ११ ॥

सः । नः॒ । बो॒धि॒ । स॒ह॒स्य॒ । प्र॒ऽशंस्यः॑ । यस्मि॑न् । सु॒ऽजा॒ताः । इ॒षय॑न्त । सू॒रयः॑ ।
यम् । अ॒ग्ने॒ । य॒ज्ञम् । उ॒प॒ऽयन्ति॑ । वा॒जिनः॑ । नित्ये॑ । तो॒के । दी॒दि॒ऽवांस॑म् । स्वे । दमे॑ ॥ ११ ॥

१. नास्ति मूको. २. °दः भवति मूको. ३. नास्ति मूको. ४. भोगाय मेधिका मे° मूको. ५. नास्ति मूको.

वेङ्कट० सः अस्मान् धनस्य महते हित! प्रकर्षेण धनसमीपे। यस्मिन् त्वयि सोमम् अभिषुण्वन्तः स्तोतारः अवर्धयन्। यम् अग्ने! यजनीयम् उपगच्छन्ति हविष्मन्तः 'औशिजस्य पुत्रस्य' रक्षणार्थम् आहवनीये दीप्यमानम् ॥ ११ ॥

उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि ।
वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः ॥ १२ ॥

उभयासः । जातऽवेदः । स्याम । ते । स्तोतारः । अग्ने । सूरयः । च । शर्मणि ।
वस्वः । रायः । पुरुऽचन्द्रस्य । भूयसः । प्रजाऽवतः । सुऽअपत्यस्य । शग्धि । नः ॥ १२ ॥

वेङ्कट० हे जातवेदः! तव वयम् उभयासः स्याम स्तोतारः हविषां प्रदातारः च गृहे। अग्ने! अस्मभ्यं वासयितृ धनं देहि बहूनां ह्लादकं बहुमत्वात् पुत्रपौत्रादियुक्तम् ॥ १२ ॥

ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥ १३ ॥

ये । स्तोतृऽभ्यः । गोऽअग्राम् । अश्वऽपेशसम् । अग्ने । रातिम् । उपऽसृजन्ति । सूरयः ।
अस्मान् । च । तान् । च । प्र । हि । नेषि । वस्यः । आ । बृहत् । वदेम । विदथे । सुऽवीराः ॥

वेङ्कट० ऋ २, १, १६ इ. ॥ १३ ॥

इति द्वितीयाष्टके पञ्चमाध्याये एकविंशो वर्गः ॥

[३]

गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः। एकादशानामृचां क्रमेण १ इध्मः समिद्धो वाऽग्निः, २ नराशंसः, ३ इळः, ४ बर्हिः, ५ देवीर्द्वारः, ६ उषासानक्ता, ७ दैव्यौ होतारौ प्रचेतसौ, ८ तिस्रो देव्यः सरस्वतीळाभारत्यः, ९ त्वष्टा, १० वनस्पतिः, ११ स्वाहाकृतयो देवता। त्रिष्टुप् छन्दः, सप्तमी जगती।

समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भुवनान्यस्थात् ।
होता पावकः प्रदिवः सुमेधा देवो देवान् यजत्वग्निरर्हन् ॥ १ ॥

सम्ऽइद्धः । अग्निः । निऽहितः । पृथिव्याम् । प्रत्यङ् । विश्वानि । भुवनानि । अस्थात् ।
होता । पावकः । प्रऽदिवः । सुऽमेधाः । देवः । देवान् । यजतु । अग्निः । अर्हन् ॥ १ ॥

वेङ्कट० समिद्धः अग्निः देवैरस्माभिः पृथिव्याम् निहितः। सोऽयं सम्यक् स्थितः सर्वाणि भूतानि प्रत्यङ् तिष्ठति। होता शोधकः पुराणः शोभनप्रज्ञः सोऽयम् देवः देवान् यजतु पूजाम् अर्हन् ॥ १ ॥

१-१. औशिजस्य पुत्रस्य वि²; °स्य पुत्रस्य मूको. २. तं वि. ३. मे वि. ४. °तिष्ठन् मूको. ५-५. नास्ति मूको. ६. मत्स्य वि².

नराशंसः प्रति धामान्यञ्जन् तिस्रो दिवः प्रति मह्ना स्वर्चिः ।
घृतप्रुषा मनसा हव्यमुन्दन् मूर्धन् यज्ञस्य समनक्तु देवान् ॥ २ ॥

नराशंसः । प्रति । धामानि । अञ्जन् । तिस्रः । दिवः । प्रति । मह्ना । सुऽअर्चिः ।
घृतऽप्रुषा । मनसा । हव्यम् । उन्दन् । मूर्धन् । यज्ञस्य । सम् । अनक्तु । देवान् ॥ २ ॥

वेङ्कट० नराशंसः स्वतेजसा देवस्थानानि प्रत्येकम् अञ्जन् त्रीन् लोकान् प्रति भवति महत्त्वेन सुदीप्तिः ।
घृतबिन्दुना बुद्धिपूर्वेण हव्यम् क्लेदयन् यज्ञस्यार्ध्वे देवान् आज्येन सम् अनक्तु ॥ २ ॥

ईळितो अग्ने मनसा नो अर्हन् देवान् यक्षि मानुषात् पूर्वो अद्य ।
स आ वह मरुतां शर्धो अच्युतमिन्द्रं नरो बर्हिषदं यजध्वम् ॥ ३ ॥

ईळितः । अग्ने । मनसा । नः । अर्हन् । देवान् । यक्षि । मानुषात् । पूर्वः । अद्य ।
सः । आ । वह । मरुताम् । शर्धः । अच्युतम् । इन्द्रम् । नरः । बर्हिःऽसदम् । यजध्वम् ॥ ३ ॥

वेङ्कट० स्तुतः 'अग्ने! त्वं' 'मनसा अस्माकं पूजयन् देवान् यज' मानुषात् होतुः पूर्वः अद्य ।
स त्वं मरुतां वेगम् अच्युतम् आ वह' । अस्मिन्नवसरे हे मनुष्याः! बर्हिषदम् इन्द्रम् यजध्वम् ॥ ३ ॥

देवं बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्याम् ।
घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियासः ॥ ४ ॥

देवम् । बर्हिः । वर्धमानम् । सुऽवीरम् । स्तीर्णम् । राये । सुऽभरम् । वेदी । अस्याम् ।
घृतेन । अक्तम् । वसवः । सीदत । इदम् । विश्वे । देवाः । आदित्याः । यज्ञियासः ॥ ४ ॥

वेङ्कट० हे देवाः! बर्हिः 'त्वं पुत्रपौत्र...' शोभनवीरम् आस्तीर्णम् । सुष्ठु भ्रियमाणम् अस्याम् वेद्याम् स्तीर्णम् राये घृतेन अक्तम् इदम् बर्हिः हे वसवः! आसीदत, विश्वे देवाः! रुद्राः! यूयम् आदित्याः! च यज्ञार्हाः ॥ ४ ॥

वि श्रयन्तामुर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः ।
व्यचस्वतीर्वि प्रथन्तामजुर्या वर्णं पुनाना यशसं सुवीरम् ॥ ५ ॥

वि । श्रयन्ताम् । उर्विया । हूयमानाः । द्वारः । देवीः । सुप्रऽअयनाः । नमःऽभिः ।
व्यचस्वतीः । वि । प्रथन्ताम् । अजुर्याः । वर्णम् । पुनानाः । यशसम् । सुऽवीरम् ॥ ५ ॥

---

१. नराशंस वि॰ ... २. ... ३-३. ... ४-४. नास्ति वि॰ ... ५. ... ६. ... ७. ...

वेङ्कट० दक्षिणेन विस्तीर्णाः भवन्तु हूयमानाः[1] द्वारः देव्यः सुप्रगमना हविर्भिः । अवकाशवत्यश्च वि प्रथन्ताम् अजराः रूपं प्रयच्छन्त्यः यजमानाय[2] शोभनपुत्रम् ॥ ५ ॥

'इति द्वितीयाष्टके पञ्चमाध्याये द्वाविंशो वर्गः' ॥

साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते ।
तन्तुं ततं संवयन्ती समीची यज्ञस्य पेशः सुदुघे पयस्वती ॥ ६ ॥

साधु । अपांसि । सनता । नः । उक्षिते इति । उषसानक्ता । वय्याऽइव । रण्विते इति ।
तन्तुम् । ततम् । संवयन्ती इति सम्ऽवयन्ती । समीची इति सम्ऽईची । यज्ञस्य । पेशः ।
सुदुघे इति सुऽदुघे । पयस्वती इति ॥ ६ ॥

वेङ्कट० साधूनि सम्प्रति कर्माणि पुराणानीव अस्माकम् उक्षिते उषासानक्ते सम्भुवाते इव शाले रमयित्री कल्याण्यौ[3] तन्तुम् ततम् संवयन्त्यौ[4] सङ्गते यज्ञस्य रूपभूते शोभनदोहने सारयुक्ते । 'वृ'[5] इत्येतौ वयतः[6] तन्तुमेतत्[7] । सनातनं त्रिवृतं[8] यज्ञयुतम् । अवान्योऽन्यन्नृतं[9] ... अन्यात् । नावरज्यातै[11] न नमाते अन्नद[12] (तैत्रा २,५,५,३) इति मन्त्रः ॥ ६ ॥

दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः समृचा वपुष्टरा ।
देवान्यजन्तावृतुथा समञ्जतो नाभा पृथिव्या अधि सानुषु त्रिषु ॥ ७ ॥

दैव्या । होतारा । प्रथमा । विदुःऽतरा । ऋजु । यक्षतः । सम् । ऋचा । वपुःऽतरा ।
देवान् । यजन्तौ । ऋतुऽथा । सम् । अञ्जतः । नाभा । पृथिव्याः । अधि । सानुषु । त्रिषु ॥

वेङ्कट० दैव्यौ होतारौ प्रथमौ विद्वत्तरौ ऋजुतया यज्ञम् यक्षतः मन्त्रेण रूपवत्तरौ देवान् यजन्तौ स्वस्थे काले आज्येन सम् अञ्जतः पृथिव्याः नाभौ त्रिषु धिष्ण्येषु गार्हपत्यादिषु इति ॥ ७ ॥

सरस्वती साधयन्ती धियं न इळा देवी भारती विश्वतूर्तिः ।
तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पान्तु शरणं निषद्य ॥ ८ ॥

सरस्वती । साधयन्ती । धियम् । नः । इळा । देवी । भारती । विश्वऽतूर्तिः ।
तिस्रः । देवीः । स्वधया । बर्हिः । आ । इदम् । अच्छिद्रम् । पान्तु । शरणम् । निऽसद्य ॥ ८ ॥

वेङ्कट० विश्वं यया[13] तूर्णम् आदित्यप्रभया सा[14] सरस्वती च अस्माकं कर्म साधयन्ती भवति[14] । ता इमाः तिस्रः देव्यः स्वधया सह आगत्य इदम् अच्छिद्रम् बर्हिः आवासस्थानम् निषद्य अस्मान् रक्षन्तु इति ॥ ८ ॥

1. हूयमाना वि[10] क. कर्प. 2. 'नाय कर्प. ३-३. नास्ति मूको. ४. कल्याण्य वि[1] अ[1]. ५. समवं वि[1] अ[1], तुवं कर्प. ६. से कर्प. ७. 'तत् मूको. ८. 'मेतेन कर्प. ९. नास्ति मूको. १०. 'न्यस्तनूत् कर्प. ११. नावरक्त्वाते वि[1] कर्प; नाचय वि[1] अ[1] क. १२. नदा मूको. १३. 'स्थिन ब्रोको. १४. स्थानि वि[1] अ[1].

पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः ।
प्रजां त्वष्टा वि ष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः ॥ ९ ॥

पिशङ्गऽरूपः । सुऽभरः । वयःऽधाः । श्रुष्टी । वीरः । जायते । देवऽकामः ।
प्रऽजाम् । त्वष्टा । वि । स्यतु । नाभिम् । अस्मे इति । अथ । देवानाम् । अपि । एतु । पाथः ॥ ९ ॥

वेङ्कट० 'अनेकरूपः शोभनवर्णः'[1] अन्नस्य दाता क्षिप्रकारी पुत्रः त्वष्टुः प्रसादात् जायते देवान् कामयमानः । ताम् प्रजाम् त्वष्टा वि ष्यतु[2] विमुञ्चतु[3] सन्नहनम् अस्माकम् । अथ तथा कृत्वा देवानाम् स्थानम् अपि एतु[4] ॥ ९ ॥

वनस्पतिरवसृजन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः ।
त्रिधा समक्तं नयतु प्रजानन्देवेभ्यो दैव्यः शमितोप हव्यम् ॥ १० ॥

वनस्पतिः । अवऽसृजन् । उप । स्थात् । अग्निः । हविः । सूदयाति । प्र । धीभिः ।
त्रिधा । सम्ऽअक्तम् । नयतु । प्रऽजानन् । देवेभ्यः । दैव्यः । शमिता । उप । हव्यम् ॥ १० ॥

वेङ्कट० वनस्पतिः देवेभ्यो हवींषि यथाकालम् अवसृजन् उपतिष्ठतु । अग्निः हविः प्रेरयति कर्मभिः । उपस्तरणाद् द्विरभिघारणाच्च त्रिधा[5] समक्तम् नयतु जानन् हविः प्रकर्षेण जानन् । देवेभ्यः च दैव्यः शमिता एषः हविः उप नयतु ॥ १० ॥

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ ११ ॥

घृतम् । मिमिक्षे । घृतम् । अस्य । योनिः । घृते । श्रितः । घृतम् । ऊँ इति । अस्य । धाम ।
अनुऽस्वधम् । आ । वह । मादयस्व । स्वाहाऽकृतम् । वृषभ । वक्षि । हव्यम् ॥ ११ ॥

वेङ्कट० घृतम् प्रति सिञ्चति । घृतम् अस्य योनिः । यस्माद् घृतस्रुचाद् उत्पद्यते तदर्थम् असौ घृते श्रितः 'घृतम् अस्य स्थानम्'[6] स्वधाम् अनु प्रति देवान् आ वह हविः मादयस्व च । स्वाहाकृतम्[7] कामानाम् वर्षितः! हव्यम् वह ॥ ११ ॥

[8]इति द्वितीयाष्टके पञ्चमाध्याये त्रयोविंशो वर्गः[8] ॥

१-१. 'रूपवान्' वि' अ'. २. ष्यति मूको. ३. ष्यति वि' अ' लपं. ४. 'तु एते वि' अ', ५. त्रिधाविधा वि' अपं. ६-६. घृ ''' स्था वि' अ'. ७. स्वाहाकृतं वि' अ'. ८-८. नास्ति मूको.

[४]

'सोमाहुतिर्भार्गव ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः'[१] ।

हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसम् ।
मित्रइव यो दिधिषाय्यो भूद् देव आदेवे जने जातवेदाः ॥ १ ॥

हुवे । वः । सुऽद्योत्मानम् । सुऽवृक्तिम् । विशाम् । अग्निम् । अतिथिम् । सुऽप्रयसम् ।
मित्रःऽइव । यः । दिधिषाय्यः । भूत् । देवः । आऽदेवे । जने । जातऽवेदाः ॥ १ ॥

वेङ्कट० सोमाहुतिर्भार्गवः । ह्वयामि युष्माकं सुदीप्तिं सुस्तुतिम्[२] विशाम् अतिथिम्[३] अग्निम् स्वन्नम् । यः मित्रः इव धारयितव्यो भवति, स देवः दीप्यमान आगतदेवजने[४] यजमाने जातवेदाः ॥ १ ॥

इमं विधन्तो अपां सधस्थे द्विताद्धुर्भृगवो विक्ष्वायोः ।
एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः ॥ २ ॥

इमम् । विधन्तः । अपाम् । सधऽस्थे । द्विता । अदधुः । भृगवः । विक्षु । आयोः ।
एषः । विश्वानि । अभि । अस्तु । भूम । देवानाम् । अग्निः । अरतिः । जीरऽअश्वः ॥ २ ॥

वेङ्कट० इमम् परिचरन्तः अन्तरिक्षे भृगवः 'प्रथमं द्वैधं'[५] निहितवन्तो गार्हपत्यमाहवनीयं च मनुष्येषु उर्वशीपुत्रस्य । सोऽयं विश्वानि 'भूतानि अभि भवतु देवानाम् अग्निः'[६] अधिगन्ता क्षिप्राश्वः ॥ २ ॥

अग्निं देवासो मानुषीषु विक्षु प्रियं धुः क्षेष्यन्तो न मित्रम् ।
स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ ॥ ३ ॥

अग्निम् । देवासः । मानुषीषु । विक्षु । प्रियम् । धुः । क्षेष्यन्तः । न । मित्रम् ।
सः । दीदयत् । उशतीः । ऊर्म्याः । आ । दक्षाय्यः । यः । दास्वते । दमे । आ ॥ ३ ॥

वेङ्कट० अग्निम् देवाः[७] मानुषीषु प्रजासु प्रियं निदधुः 'यथा निवासमिच्छन्तो'[८] सर्वे मित्रम् सम्पादयन्ति । एवम् सः अग्निः आत्मानं कामयमाना रात्रीः आ द्योतयति वर्धनीयो यः यजमानाय गृहे ॥ ३ ॥

अस्य रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य दक्षोः ।
वि यो भरिभ्रदोषधीषु जिह्वामत्यो न रथ्यो दोधवीति वारान् ॥ ४ ॥

१-१ नास्ति मूको. २. सुस्तुतिम् वि'; सस्तुतिम् कपं. ३ नास्ति वि' अ'. ४. देवजने वि' अ' कपं. 'देवे जने अ'. ५. प्रथम द्वै' मूको. प्रथमं द्वैधं च शोधः ६-६. नास्ति वि' कपं. ७. देवता वि' कपं. ८-८. यथा नि वासं' वि कपं.

अस्य । रण्वा । स्वस्यऽइव । पुष्टिः । सम्ऽदृष्टिः । अस्य । हियानस्य । धक्षोः ।
वि । यः । भरिभ्रत् । ओषधीषु । जिह्वाम् । अत्यः । न । रथ्यः । दोधवीति । वारान् ॥ ४ ॥

वेङ्कट० अस्य रमणीया धनस्येव पुष्टिः । सर्वं सन्दृश्यमाना अस्य गच्छतः वनं दग्धुमिच्छतः । यः ओषधीषु ज्वालां भरति[2] सोऽश्वम् अश्वो रथे युक्तो यथा वालान् पुनःपुनरेव[3] ज्वालाः प्रेरयति ॥ ४ ॥

आ यन्मे अभ्वं वनदः पनन्तोशिग्भ्यो नामिमीत वर्णम् ।
स चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत् ॥ ५ ॥

आ । यत् । मे । अभ्वम् । वनदः । पनन्त । उशिक्ऽभ्यः । न । अमिमीत । वर्णम् ।
सः । चित्रेण । चिकिते । रम्ऽसु । भासा । जुजुर्वान् । यः । मुहुः । आ । युवा । भूत् ॥ ५ ॥

वेङ्कट० आ पनन्त अकम्पयन् मम यस्य वनादः अरण्यस्य भक्षयितुः महिमानम् । स सर्वं वनं दहति उशिग्भ्यः कामयमानेभ्यः अस्मत्केभ्यो[4] मन्यमानेभ्यः स्ववर्णं[5] ज्वालालक्षणं न चकार । सः चित्रेण भासा प्रज्ञायते रमणीयेषु अरण्येषु, यः जीर्णो मुहुर्मुहुः युवा च भवति ॥ ५ ॥

[6]इति द्वितीयाष्टके पञ्चमाध्याये चतुर्विंशो वर्गः[6] ॥

आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत् ।
कृष्णाध्वा तपू रण्वश्चिकेत द्यौरिव स्मयमानो नभोभिः ॥ ६ ॥

आ । यः । वना । ततृषाणः । न । भाति । वाः । न । पथा । रथ्याऽइव । स्वानीत् ।
कृष्णऽअध्वा । तपुः । रण्वः । चिकेत । द्यौःऽइव । स्मयमानः । नभःऽभिः ॥ ६ ॥

वेङ्कट० यः काष्ठानि प्रति पिपासुरिव आ भाति, सोऽश्वयुक्तमिव पथा गच्छन् रथचक्रमिव च स्वनति । कृष्णवर्त्मा तापयिता रमणीयः प्रज्ञायते द्यौः इव नक्षत्रैः तेजोभिः स्मयमानः ॥ ६ ॥

स यो व्यस्थादभि दक्षदुर्वीं पशुर्नैति स्वयुरगोपाः ।
अग्निः शोचिष्माँ अतसान्युष्णन्कृष्णव्यथिरस्वदयन्न भूम ॥ ७ ॥

सः । यः । वि । अस्थात् । अभि । दक्षत् । उर्वीम् । पशुः । न । एति । स्वऽयुः । अगोपाः ।
अग्निः । शोचिष्मान् । अतसानि । उष्णन् । कृष्णऽव्यथिः । अस्वदयत् । न । भूम ॥ ७ ॥

---

१. नास्ति मूको. २. दिव्यदाति वि[1] अ[1]. ३. पुनःपुनरेव वि[1]. ४. 'धनदेभ्यो वि[1]; 'धनदेभ्यो वि[2] कर्प; 'वनदेभ्यो अ[1]; 'न धनेभ्यो ड. ५. स्व वर्णं वि[1] कर्प; स्वकर्ण वि[3] ६-६. नास्ति मूको.

वेङ्कट० सः यः अग्निः[1] वि जिहीते अभि महत् उर्वीम्, स पशुः यव इव गच्छति [illegible] आरुह्यमाणः[2] [illegible] गच्छन् । अग्निः [illegible] एतत् कृष्णवर्त्मा भूमिम् [illegible] स्वादयति, सर्वम् अन्नम् भक्षयति ॥ ७ ॥

नू ते पूर्वस्यावसो अधीतौ तृतीये विदथे मन्म शंसि ।
अस्मे अग्ने संयद्वीरं बृहन्तं क्षुमन्तं वाजं स्वपत्यं रयिं दाः ॥ ८ ॥

नु । ते । पूर्वस्य । अवसः । अधिऽइतौ । तृतीये । विदथे । मन्म । शंसि ॥ अस्मे इति ।
अग्ने । संयत्ऽवीरम् । बृहन्तम् । क्षुऽमन्तम् । वाजम् । सुऽअपत्यम् । रयिम् । दाः ॥ ८ ॥

वेङ्कट० सम्प्रति तव पुरातनस्य [illegible] स्मरणे तृतीये सवने स्तोत्रम् [illegible] । [illegible] अग्ने ! संयन्ति यत्र वीराः तत् महत् [illegible] सोमवत् [illegible] देहि, [illegible] ॥ ८ ॥

त्वया यथा गृत्समदासो अग्ने गुहा वन्वन्त उपराँ अभि ष्युः ।
सुवीरासो अभिमातिषाहः स्मत् सूरिभ्यो गृणते तद्वयो धाः ॥ ९ ॥

त्वया । यथा । गृत्सऽमदासः । अग्ने । गुहा । वन्वन्तः । उपरान् । अभि । स्युरिति स्युः ।
सुऽवीरासः । अभिमातिऽसहः । स्मत् । सूरिऽभ्यः । गृणते । तत् । वयः । धाः ॥ ९ ॥

वेङ्कट० त्वया यथा एते गृत्समदकुलजाताः[3] अग्ने[4] गुहायां स्थितानपि [illegible][5] शत्रून् [illegible] ऽभिभवेयुः[6] सुपुत्राः[7] शत्रून् सहमानाः । तथा शोभनं [illegible] स्तुवते [illegible] देहि ॥ ९ ॥

[8]इति द्वितीयाष्टके पञ्चमाध्याये पञ्चविंशो वर्गः[9] ॥

[५]

[8]सोमाहुतिर्भार्गव ऋषिः । अग्निर्देवता । अनुष्टुप् छन्दः[9] ।

होताजनिष्ट चेतनः पिता पितृभ्य ऊतये । प्रयक्षञ्जेन्यं वसु शकेम वाजिनो यमम् ॥ १ ॥

होता । अजनिष्ट । चेतनः । पिता । पितृऽभ्यः । ऊतये ।
प्रऽयक्षन् । जेन्यम् । वसु । शकेम । वाजिनः । यमम् ॥ १ ॥

वेङ्कट० होता [illegible] पालयिता [illegible] प्रयच्छन् [illegible] । [illegible] वाजिनः [illegible] ॥ १ ॥

---

1. [illegible] वि[1] कपे. 2. [illegible] वि[2] कपे; [illegible] वि[1] क[2]. 3. [illegible] वि[1] कपे; [illegible] वि[2]; [illegible] क[1]. 4. [illegible] क[1]. 5. [illegible] वि[1] कपे. 6. [illegible] वि[2] क[1]. 7. [illegible] क[1]; [illegible] वि[2]. 8-9. नास्ति मूको.

आ यस्मिन्त्सप्त रश्मयस्तता यज्ञस्य नेतरि ।
मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वति ॥ २ ॥

आ । यस्मिन् । सप्त । रश्मयः । तताः । यज्ञस्य । नेतरि ।
मनुष्वत् । दैव्यम् । अष्टमम् । पोता । विश्वम् । तत् । इन्वति ॥ २ ॥

वेङ्कट० यस्मिन् आदित्ये सप्त रश्मयः आ तताः यज्ञस्य नेतरि, मनुरिव सः दिवि भवे [illegible] अष्टमम् पोता [illegible] सर्वमेतत् प्रीणाति [illegible] च ॥ २ ॥

दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत् ।
परि विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥ ३ ॥

दधन्वे । वा । यत् । ईम् । अनु । वोचत् । ब्रह्माणि । वेः । ऊं इति । तत् ।
परि । विश्वानि । काव्या । नेमिः । चक्रम्ऽइव । अभवत् ॥ ३ ॥

वेङ्कट० 'यदं एवं [illegible] अनु [illegible]', [illegible] वा स्तोत्राणि, वेत्ति तत् सर्वम् [illegible], परि भवति च विश्वानि स्तोत्राणि नेमि इव चक्रम् ॥ ३ ॥

साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि ।
विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते ॥ ४ ॥

साकम् । हि । शुचिना । शुचिः । प्रऽशास्ता । क्रतुना । अजनि ।
विद्वान् । अस्य । व्रता । ध्रुवा । वयाःऽइव । अनु । रोहते ॥ ४ ॥

वेङ्कट० शुचिना कर्मणा [illegible] प्रशास्ता [illegible] प्रादुर्भवति । विद्वान् अस्य कर्माणि ध्रुवाणि, शाखाः इव वृक्षस्य, तानि अनु रोहते ॥ ४ ॥

ता अस्य वर्णमायुवो नेष्टुः सचन्त धेनवः ।
कुवित्तिसृभ्य आ वरं स्वसारो या इदं ययुः ॥ ५ ॥

ताः । अस्य । वर्णम् । आऽयुवः । नेष्टुः । सचन्त । धेनवः ।
कुवित् । तिसृऽभ्यः । आ । वरम् । स्वसारः । याः । इदम् । ययुः ॥ ५ ॥

वेङ्कट० ताः अस्य नेष्टुः धेनवः [illegible] [illegible] वरणीयं हविः सेवन्ते । [illegible] तिसृभ्यः धेनुभ्यो बहु [illegible] वरणीयम् । स्वसारः [illegible][2] [illegible] [illegible] प्राप्नुवन्ति । "इदम्' (निघ १, १२) इत्युदकनाम'॥ ५ ॥
[illegible] [illegible] [illegible]—

---

१. [illegible] [illegible] [illegible] मूको. २. नास्ति मूको. ३. नास्ति [illegible].
४-४ [illegible] [illegible].

यदी मातुरुप स्वसा घृतं भरन्त्यस्थित । तासामध्वर्युरागतौ यवो वृष्टीव मोदते ॥६॥

यदि । मातुः । उप । स्वसा । घृतम् । भरन्ती । अस्थित ।
तासाम् । अध्वर्युः । आऽगतौ । यवः । वृष्टीऽइव । मोदते ॥ ६ ॥

वेङ्कट० 'यदि पृथिव्याः स्वसा द्यौः उदकम् भरन्ती उप तिष्ठति । ततः तासाम् [illegible] आगमने [illegible] अस्ति, यवः इव वृष्ट्या, मोदते' ॥ ६ ॥

स्वः स्वाय धायसे कृणुतामृत्विगृत्विजम् । स्तोमं यज्ञं चादरं वनेमा ररिमा वयम् ॥७॥

स्वः । स्वाय । धायसे । कृणुताम् । ऋत्विक् । ऋत्विजम् ।
स्तोमम् । यज्ञम् । च । आत् । अरम् । वनेम । ररिम । वयम् ॥ ७ ॥

वेङ्कट० 'महीयोऽयम् ऋत्विक् आत्मनो धारणार्थम् ऋत्विजम् महीयस् कृणुताम्' । अथ अस्मै वयम् स्तोमम् यज्ञम् च पर्याप्तं वनेम दद्याम च इति ॥ ७ ॥

यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः । अयमग्ने त्वे अपि यं यज्ञं चकृमा वयम् ॥८॥

यथा । विद्वान् । अरम् । करत् । विश्वेभ्यः । यजतेभ्यः ।
अयम् । अग्ने । त्वे इति । अपि । यम् । यज्ञम् । चकृम । वयम् ॥ ८ ॥

वेङ्कट० यथा प्राज्ञः अलङ्करोति विश्वेभ्यः देवेभ्यः, अयम् अपि त्वयि तथा अग्ने! भवति, यम् यज्ञम् कृतवन्तः वयम् विद्वांसोऽपि ॥ ८ ॥

'इति द्वितीयाष्टके पञ्चमाध्याये षड्विंशो वर्गः' ॥

[६]

'सोमाहुतिर्भार्गव ऋषिः । अग्निर्देवता । गायत्री छन्दः' ।

इमां मे अग्ने समिधमिमामुपसदं वनेः । इमा उ षु श्रुधी गिरः ॥ १ ॥

इमाम् । मे । अग्ने । सम्ऽइधम् । इमाम् । उपऽसदम् । वनेरिति वनेः ।
इमाः । ऊं इति । सु । श्रुधि । गिरः ॥ १ ॥

वेङ्कट० इमाम् मे अग्ने! समिधम् भजेथाः, एवम् इमाम् उपसत्तिं च । स्तुतीश्च सुष्ठु शृणु इमाः ॥ १ ॥

१-१. नास्ति वि॰ अ॰. † नास्ति मू॰. २-२. नास्ति वि॰ अ॰. ३. [illegible] वि॰ अ॰. ४. भजाम वि॰. ५. दधाम मू॰. ६. ऊः वि॰ मू॰. ७. नास्ति मूको. ८-८. नास्ति मूको.

अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे । एना सूक्तेन सुजात ॥ २ ॥

अया । ते । अग्ने । विधेम । ऊर्जः । नपात् । अश्वम्ऽइष्टे । एना । सुऽउक्तेन । सुऽजात ॥२॥

वेङ्कट० अनया समिधा परिचरामः अग्ने! अन्नस्य पुत्र!, यस्त्वं गमनार्यम् अश्वम् इच्छसि। शोभनजनन! अनेन सूक्तेन विधेम ॥ २ ॥

तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः । सपर्येम सपर्यवः ॥ ३ ॥

तम् । त्वा । गीःऽभिः । गिर्वणसम् । द्रविणस्युम् । द्रविणःऽदः । सपर्येम । सपर्यवः ॥ ३ ॥

वेङ्कट० तम् त्वा गीर्भिः गीर्भिर्वननीयं धनेच्छुं धनस्य दातः! इत्यादि परिचरेम परिचरणेच्छवः ॥ ३ ॥

स बोधि सूरिर्मघवा वसुपते वसुदावन् । युयोध्यस्मद् द्वेषांसि ॥ ४ ॥

सः । बोधि । सूरिः । मघऽवा । वसुऽपते । वसुऽदावन् । युयोधि । अस्मत् । द्वेषांसि ॥ ४ ॥

वेङ्कट० सः त्वं बुध्यस्व प्राज्ञो धनवान् धनपते! धनदातः!, पृथक् कुरु च अस्मत्तः शत्रून् ॥ ४ ॥

स नो वृष्टिं दिवस्परि स नो वाजमनर्वाणम् । स नः सहस्रिणीरिषः ॥ ५ ॥

सः । नः । वृष्टिम् । दिवः । परि । सः । नः । वाजम् । अनर्वाणम् । सः । नः । सहस्रिणीः । इषः ॥ ५ ॥

वेङ्कट० सः त्वम् अस्मभ्यम् दिवः वृष्टिम् देहि, सः नः बलम् अप्रतिहतम्, सः नः सहस्रसंख्यानि अन्नानि ॥ ५ ॥

ईळानायावस्यवे यविष्ठ दूत नो गिरा । यजिष्ठ होतरा गहि ॥ ६ ॥

ईळानाय । अवस्यवे । यविष्ठ । दूत । नः । गिरा । यजिष्ठ । होतः । आ । गहि ॥ ६ ॥

वेङ्कट० स्तुवते हविरिच्छते युवतम! दूत! अस्माकं होत्रे स्तोत्रेण प्रीतस्त्वं यष्टृतम! होतः! आ गच्छ ॥ ६ ॥

अन्तर्ह्यग्न ईयसे विद्वान् जन्मोभया कवे । दूतो जन्येव मित्र्यः ॥ ७ ॥

---

१ १. रे…अस्य कों; रे…श्चेत्र वि॰. २. गमनकामाश्वम् वि॰ अ॰. ३. नास्ति मूको. ४. नास्ति वि॰. ५. सहः वि॰ अ॰. ६. नास्ति वि॰ अ॰.

अन्तः । हि । अग्ने । ईयसे । विद्वान् । जन्म । उभया । कवे । दूतः । जन्याऽइव । मित्र्यः ॥ ७ ॥

वेङ्कट० द्यावापृथिव्योः अन्तः हि अग्ने! गच्छसि[1] विद्वान् जन्मानि उभयानि मानुषाणि दैव्यानि च कवे!, दूतः इव जनपदात् मित्रहितः ॥ ७ ॥

स विद्वाँ आ च पिप्रयो यक्षि चिकित्व आनुषक् । आ चास्मिन्त्सत्सि बर्हिषि ॥८॥

सः । विद्वान् । आ । च । पिप्रयः । यक्षि । चिकित्वः । आनुषक् । आ । च । अस्मिन् । सत्सि । बर्हिषि ॥

वेङ्कट० सः विद्वान् अग्ने! देवान् आ च यज च प्रीणय, प्राज्ञ! अनुषक्तम् । आ सीद च अस्मिन् बर्हिषि ॥ ८ ॥

[2]इति द्वितीयाष्टके पञ्चमाध्याये सप्तविंशो वर्गः[2] ॥

[७]

[2]सोमाहुतिर्भार्गव ऋषिः । अग्निर्देवता । गायत्री छन्दः[2] ॥

श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर । वसो पुरुस्पृहं रयिम् ॥ १ ॥

श्रेष्ठम् । यविष्ठ । भारत । अग्ने । द्युऽमन्तम् । आ । भर । वसो इति । पुरुऽस्पृहम् । रयिम् ॥ १ ॥

वेङ्कट० श्रेष्ठम् युवतम! भारत! इत्याह 'एष हि देवेभ्यो हव्यं भरति' (तैसं २,५,९,१; ५,१,८) इति ब्राह्मणम्, अग्ने! दीप्तिमन्तम् आ भर वासयितः! बहुभिः स्पृहणीयम् रयिम् । [3]वयमेव धनवन्तः स्याम[3] ॥ १ ॥

मा नो अरातिरीशत देवस्य मर्त्यस्य च । पर्षि तस्या उत द्विषः ॥ २ ॥

मा । नः । अरातिः । ईशत । देवस्य । मर्त्यस्य । च । पर्षि । तस्याः । उत । द्विषः ॥ २ ॥

वेङ्कट० मा अस्माकम् ईशिष्ट अरातिः देवमनुष्ययोः । पारय अस्मान् तस्याः[1], शत्रोश्च पारय ॥ २ ॥

विश्वा उत त्वया वयं धारा उदन्या इव । अति गाहेमहि द्विषः ॥ ३ ॥

विश्वाः । उत । त्वया । वयम् । धाराः । उदन्याःऽइव । अति । गाहेमहि । द्विषः ॥ ३ ॥

वेङ्कट० अपि चाग्ने! त्वया वयम् उदकभवाः धाराः इव सर्वान् अति गाहेमहि ॥ ३ ॥

शुचिः पावक वन्द्योऽग्ने बृहद् वि रोचसे । त्वं घृतेभिराहुतः ॥ ४ ॥

शुचिः । पावक । वन्द्यः । अग्ने । बृहत् । वि । रोचसे । त्वम् । घृतेभिः । आऽहुतः ॥ ४ ॥

---

१. °ति नद्यन्याम वि² अ². २-२. नास्ति मूको (मू. वि १). ३ °न्या., तमैव धनवन्तः स्याम मूको. स्यामवहः दाव: अ. ।

वेङ्कट० मित्रमित्रा ॥ ४ ॥

त्वं नो॑ असि भारता॒ग्ने॑ व॒शाभि॑रु॒क्षभिः॑ । अ॒ष्टाप॑दीभि॒राहु॑तः ॥ ५ ॥

त्वम् । नः॒ । अ॒सि॒ । भा॒र॒त॒ । अग्ने॑ । व॒शाभिः॑ । उ॒क्षऽभिः॑ । अ॒ष्टाऽप॑दीभिः । आऽहु॑तः ॥ ५ ॥

वेङ्कट० त्वम् अस्माकम् भरत ! अग्ने ! वशाभिः उक्षभिः अष्टापदीभिः गर्भिणीभिश्च आहुतः भवसि ॥ ५ ॥

द्र्व॑न्नः स॒र्पिरा॑सुतिः प्र॒त्नो होता॒ वरे॑ण्यः । सह॑सस्पु॒त्रो अद्भु॑तः ॥ ६ ॥

द्रुऽअ॑न्नः । स॒र्पिःऽआ॑सुतिः । प्र॒त्नः । होता॑ । वरे॑ण्यः । सह॑सः । पु॒त्रः । अद्भु॑तः ॥ ६ ॥

वेङ्कट० द्रुमान्नः घृताहुतिः पुराणः होता वरेण्यः सहसः पुत्रः महान् ॥ ६ ॥

"इति द्वितीयाष्टके पञ्चमाध्याये अष्टाविंशो वर्गः" ॥

[८]

"गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
अग्निर्देवता । गायत्री छन्दः, षष्ठी अनुष्टुप्" ॥

वा॒ज॒यन्नि॑व॒ नू रथा॒न्योगाँ॑ अ॒ग्नेरुप॑ स्तुहि । य॒शस्त॑मस्य मी॒ळ्हुषः॑ ॥ १ ॥

वा॒ज॒यन्ऽइ॑व । नु । रथा॑न् । योगा॑न् । अ॒ग्नेः । उप॑ । स्तु॒हि॒ । य॒शःऽत॑मस्य । मी॒ळ्हुषः॑ ॥ १ ॥

वेङ्कट० गृत्समदः । वाजमिच्छन् इव रथान् क्षिप्रम् अग्नेः योगान् उप स्तुहि यशस्वितमस्य सेक्तुः ॥ १ ॥

यः सु॒नीथो॑ ददा॒शुषे॑ऽजु॒र्यो ज॒रय॑न्न॒रिम् । चारु॑प्रतीक॒ आहु॑तः ॥ २ ॥

यः । सु॒ऽनी॒थः । द॒दा॒शुषे॑ । अ॒जु॒र्यः । ज॒रय॑न् । अ॒रिम् । चारु॑ऽप्रतीकः । आऽहु॑तः ॥ २ ॥

वेङ्कट० यः सुनयनो यजमानाय स्वयं जरयितुमशक्यः सर्वम् जरयन् च अरिम् चारुरूप आहुतः ॥ २ ॥

य उ॑ श्रि॒या दमे॒ष्वा दो॒षोष॑सि प्रश॒स्यते॑ । यस्य॑ व्र॒तं न मीय॑ते ॥ ३ ॥

यः । ऊँ॒ इति॑ । श्रि॒या । दमे॑षु । आ । दो॒षा । उ॒षसि॑ । प्र॒ऽश॒स्यते॑ । यस्य॑ । व्र॒तम् । न । मीय॑ते ॥

वेङ्कट० यः "श्रिया सहितो" गृहेषु रात्रौ अहनि च स्तूयते । यस्य व्रतम् न कश्चिदपि हिंसति ॥ ३ ॥

आ यः स्व१॒॑र्ण भा॒नुना॑ चि॒त्रो वि॒भात्य॒र्चिषा॑ । अ॒ञ्जा॒नो अ॒जरै॑र॒भि ॥ ४ ॥

आ । यः । स्वः॑ । न । भा॒नुना॑ । चि॒त्रः । वि॒ऽभाति॑ । अ॒र्चिषा॑ । अ॒ञ्जा॒नः । अ॒जरैः॑ । अ॒भि ॥

---

१. अग्नि वि' मू'. २-२. नास्ति मूको. ३. गृत्समदः अ'. ४. नास्ति वि' अर्प. ५. स्त्रा वि' अर्प.

वेङ्कट० आ बिभाति यः[1] आदित्य इव[2] तेजसा विश्वः अग्निः। सोऽयम् अग्निः आत्मतेजोभिः सर्वम् अभि प्रभानः भवति ॥ ४ ॥

अग्निमनु स्वराज्यमग्निमुक्थानि वावृधुः । विश्वा अधि श्रियो दधे ॥ ५ ॥

अग्निम् । अनु । स्वऽराज्यम् । अग्निम् । उक्थानि । ववृधुः । विश्वाः । अधि । श्रियः । दधे ॥ ५ ॥

वेङ्कट० अग्निम् स्वामिनम् अनु स्थितानि उक्थानि स्वराज्यम् अग्निम् अवर्धयन् । विश्वाः च श्रियः अग्निः अधि धारयति ॥ ५ ॥

अग्नेरिन्द्रस्य सोमस्य देवानामूतिभिर्वयम् ।
अरिष्यन्तः सचेमह्यभि ष्याम पृतन्यतः ॥ ६ ॥

अग्नेः । इन्द्रस्य । सोमस्य । देवानाम् । ऊतिऽभिः । वयम् ।
अरिष्यन्तः । सचेमहि । अभि । स्याम । पृतन्यतः ॥ ६ ॥

वेङ्कट० अग्न्यादीनां रक्षणैः वयम् सङ्गच्छेमहि अहिंस्यमानाः । शत्रून् च 'अभि भवेम' ॥ ६ ॥

'इति द्वितीयाष्टके पञ्चमाध्याये एकोनत्रिंशो वर्गः' ॥

अष्टकस्य द्वितीयस्य भाष्यम् सुन्दरीसुतः ।
व्याकरोत् पञ्चमेऽध्याये वेङ्कटार्यो विचक्षणः ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने
द्वितीयाष्टके पञ्चमोऽध्यायः ॥

— ❀ —

इति ऋग्वेदे सभाष्ये द्वितीयाष्टके पञ्चमोऽध्यायः ॥



१. एव वि॰ अ॰. २. नास्ति वि॰ अ॰. ३-३. अभिभवसाः वि॰ अ॰ मूको. ४-४. नास्ति मूको. ५. वय क. ६. च मन्दिताः क.

अथ द्वितीयाष्टके षष्ठोऽध्यायः

वेङ्कट०　'नि होता होतृषदने'[1] व्याचिख्यासति माधवः ।
लट् यदर्थंयत् ब्रूमि लुटश्च तदनन्तरम् ॥ १ ॥

लट्[2] 'स्तुषेय्यं पुरुवर्पसम्'[3], 'न जामये न [illegible]'[4]
'[illegible] [illegible]'[5], 'अभि [illegible] [illegible]'[6] ॥ २ ॥

'[illegible] [illegible]'[7], 'प्र [illegible]'[8] '[illegible]'[9] ।
'[illegible] [illegible]'[10], '[illegible] [illegible]'[11] ॥ ३ ॥

एषो लुङ् प्रयोगोऽस्मो [illegible][12] ।
[illegible] [illegible] तस्य[13] '[illegible]'[14] '[illegible]'[15] [illegible][16] ॥ ४ ॥

'[illegible] [illegible] [illegible]'[17] '[illegible] [illegible]'[18] च ।
[illegible] '[illegible]'[19] [illegible] [illegible][20] ॥ ५ ॥

लुङो [illegible] विषये [illegible] च [illegible] ।
'[illegible] [illegible]'[21], '[illegible] [illegible]'[22] ॥ ६ ॥

'[illegible] [illegible] [illegible] [illegible]'[23] [illegible] [illegible] ।
[illegible] वा लङ् वर्तमानसामीप्येऽस्मं[24] [illegible][25] ॥ ७ ॥

हेतुहेतुमद्भावे च '[26]प्रयुङ्क्ते लृटो'[27] क्वचित् ।
'[illegible] [illegible] [illegible]'[28] तत्र [illegible][29] ॥ ८ ॥

[illegible] लिङ्निमित्ते लृङ् क्रिया [illegible][30] ।
'[illegible] [illegible] [illegible]'[31] भूतकाले तु[32] [illegible] ॥ ९ ॥

क्रियातिपत्तिहेतुको [illegible] [illegible] ।
[illegible][33] सर्वे लकाराः [illegible] ॥ १० ॥ इति ॥

1. ऋ २, ९, १.　2. नास्ति वैङ्कटः.　3. ऋ १, ४४, ५.　4. ऋ १, ७१, ५.
5. ऋ १,११३,१.　6. ऋ १,१,६.　7. ऋ १,११५,१　8. ऋ ९,९०,१.　9. ऋ ९,८६,७५.
10. ऋ ७,१८,११.　11. ऋ ६, ७५, १.　12. °र [illegible] वैङ्कट.　13 [illegible] वैङ्कट.
14-15 [illegible] वैङ्कट　15 तैब्रा १,६,६,४.　16. तै २,६,२,१　17. तैआ ४,६,७.　18. [illegible] वैङ्कट.　19 तु. जैमि ३,१२४ [illegible] इति पठे [illegible] [illegible]!　20. ऋ १ १६७, १०.
21. ऋ १,५८,९.　22. ऋ १०, १०८,४.　23. तु. पा ३,३,१३१.　24. [illegible] वि° लप.　25-25.
"[illegible]" वि° लपं; [illegible] वैङ्कट.　26. ऋ १,१६१,२　27. [illegible] वैङ्कट.　28 तु. पा ३,३,
१३९.　29 आ २,१०,२.　30. ध° वि° लपं.　31. [illegible] वा°.　32. [illegible] वि° लपं वैङ्कट.

[९]

'गृत्समदः (आङ्गिरसः शौनहोत्रः) भार्गवः शौनकः ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः।'

नि होता॑ होतृ॒षद॑ने॒ विदा॑नस्त्वे॒षो दी॑दि॒वाँ अ॑सदत् सु॒दक्षः॑ ।
अद॑ब्धव्रतप्रमति॒र्वसि॑ष्ठः सहस्रम्भ॒रः शुचि॑जिह्वो अ॒ग्निः ॥ १ ॥

नि । होता॑ । होतृ॒ऽसद॑ने । विदा॑नः । त्वे॒षः । दी॒दि॒ऽवान् । अ॒स॒द॒त् । सु॒ऽदक्षः॑ ।
अद॑ब्धव्रतऽप्रमतिः । वसि॑ष्ठः । स॒ह॒स्र॒म्ऽभ॒रः । शुचि॑ऽजिह्वः । अ॒ग्निः ॥ १ ॥

वेङ्कट० गृत्समदः । नि षीदतु अग्निः होतृसदने विद्वान् प्रवृद्धः दीप्यमानः सुबलः । यस्योपक्रान्तानि व्रतानि कर्माणि प्रमतयश्च येन न दब्धाः सः अदब्धव्रतप्रमतिः, वसिष्ठः वासयितृतमः तेजसा, सर्वं हि भरति । 'सहस्रम्भरः शुचिजिह्वो अग्निः' इति (ऐब्रा ६, ४, २, ५) इति ब्राह्मणेषु ॥ १ ॥

त्वं दू॒तस्त्वमु॑ नः पर॒स्पास्त्वं वस्य॒ आ वृ॑षभ प्रणे॒ता ।
अग्ने॑ तो॒कस्य॑ न॒स्तने॑ त॒नूना॒मप्र॑युच्छ॒न् दीद्य॑द् बोधि गो॒पाः ॥ २ ॥

त्वम् । दू॒तः । त्वम् । ऊं॒ इति॑ । नः॒ । प॒रः॒ऽपाः । त्वम् । वस्यः॑ । आ । वृ॒ष॒भ॒ । प्र॒ऽने॒ता ।
अग्ने॑ । तो॒कस्य॑ । नः॒ । तने॑ । त॒नूना॑म् । अप्र॑ऽयुच्छन् । दीद्य॑त् । बो॒धि॒ । गो॒पाः ॥ २ ॥

वेङ्कट० अग्ने! त्वम् दूतः, त्वम् एव अस्माकं परः पालयिता, त्वम् एव अस्माकम् श्रेयः प्रति प्रणेता वर्षितः! अग्ने! अस्माकं पुत्रस्य महात्मनाम् अप्रमाद्यन् दीप्यमानः भव गोप्ता इति पुत्रस्य, तथा तनयस्य चेति ॥ २ ॥

वि॒धेम॑ ते पर॒मे जन्म॑न्नग्ने वि॒धेम॒ स्तोमै॒रव॑रे स॒धस्थे॑ ।
यस्मा॒द् योने॑रु॒दारि॑था॒ यजे॒ तं प्र त्वे ह॒वींषि॑ जुहुरे॒ समि॑द्धे ॥ ३ ॥

वि॒धेम॑ । ते॒ । प॒र॒मे । जन्म॑न् । अ॒ग्ने॒ । वि॒धेम॑ । स्तोमैः॑ । अव॑रे । स॒धऽस्थे॑ ।
यस्मा॑त् । योनेः॑ । उ॒त्ऽआरि॑थ । यजे॑ । तम् । प्र । त्वे इति॑ । ह॒वींषि॑ । जु॒हु॒रे॒ । सम्ऽइ॑द्धे ॥ ३ ॥

वेङ्कट० परिचरेम ते परमे जन्मनि द्युस्थानमिति । तत्र ब्राह्मणमेवमाह—'विधेम ते परमे जन्मन्' इति द्यौर्वा अस्य परमं जन्म विधेम स्तोमैरवरे सधस्थ इत्यन्तरिक्षं वा अवरम् सधस्थम् ।

१-१. नास्ति मूको. २. होतृसद्मे स. ३. नास्ति वि'' अ'. ४-४. 'स्मरः '' मूको. ५. 'वन् । शुचिजिह्वः नास्ति मूको. ६. परः मूको. ७. नास्ति मूको.

[illegible] इति ॥ ३ ॥

अग्ने यजस्व हविषा यजीयाञ्छ्रुष्टी देष्णमभि गृणीहि राधः ।
त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥ ४ ॥

अग्ने । यजस्व । हविषा । यजीयान् । श्रुष्टी । देष्णम् । अभि । गृणीहि । राधः ।
त्वम् । हि । असि । रयिऽपतिः । रयीणाम् । त्वम् । शुक्रस्य । वचसः । मनोता ॥ ४ ॥

वेङ्कट० अग्ने देवान् हविषा यज [illegible] क्षिप्रकारी भवन् धनम् अभि प्रयच्छ । त्वम् हि धनानां पतिः, त्वम् दीप्तस्य स्तोत्रस्य मनोता [illegible] ॥ ४ ॥

उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ।
कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः ॥ ५ ॥

उभयम् । ते । न । क्षीयते । वसव्यम् । दिवेऽदिवे । जायमानस्य । दस्म ।
कृधि । क्षुऽमन्तम् । जरितारम् । अग्ने । कृधि । पतिम् । सुऽअपत्यस्य । रायः ॥ ५ ॥

वेङ्कट० [illegible] उभयम् [illegible] ते [illegible] न कदाचित् अपि [illegible] ॥ ५ ॥

सेनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद् दिदीहि ॥ ६ ॥

सः । एना । अनीकेन । सुऽविदत्रः । अस्मे इति । यष्टा । देवान् । आऽयजिष्ठः । स्वस्ति ।
अदब्धः । गोपाः । उत । नः । परःऽपाः । अग्ने । द्युऽमत् । उत । रेवत् । दिदीहि ॥ ६ ॥

वेङ्कट० 'स त्वम् अग्ने ! अनेन' [illegible] अनीकेन सुधनः । अस्माकं देवानां यजनशील [illegible] स्वस्ति भव । अहिंसितः त्वं गोपायिता अपि च अस्माकं परः पाता अग्ने ! दीप्तियुक्तं धनयुक्तं च दीप्यस्वेति ॥ ६ ॥

"इति द्वितीयाष्टके पञ्चाध्याये प्रथमो वर्गः" ॥

---

१. नास्ति वि° [illegible]. २. [illegible] वि°. ३. [illegible]. ४-४. [illegible] वि° [illegible]; [illegible]. ५-५. [illegible] मूको. [illegible] ६. नास्ति [illegible]. ७. [illegible] वि° अ°. ८. [illegible]. ९-९. नास्ति वि° अ°. १०. [illegible]. ११-११. नास्ति मूको.

[१०]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः' ।

जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्समिद्धः ।
श्रियं वसानो अमृतो विचेता मर्मृजेन्यः श्रवस्यः स वाजी ॥ १ ॥

जोहूत्रः । अग्निः । प्रथमः । पिताऽइव । इळः । पदे । मनुषा । यत् । सम्ऽइद्धः ।
श्रियम् । वसानः । अमृतः । विऽचेताः । मर्मृजेन्यः । श्रवस्यः । सः । वाजी ॥ १ ॥

वेङ्कट० आह्वातव्यः प्रथमः पितेव आह्वातव्यः आप्तः, 'यज्ञा इळायाः' आस्पदे उत्तरवेदिनाभौ मनुष्येण समिद्धः । तेजोरूपां वसानः अमृतः प्राज्ञः, अन्नवान् इव गाणिका मार्जनीयः अन्नवान् स वेगवान् इति ॥ १ ॥

श्रूया अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो विचेताः ।
श्यावा रथं वहतो रोहिता वोतारुषाह चक्रे विभृत्रः ॥ २ ॥

श्रूयाः । अग्निः । चित्रऽभानुः । हवम् । मे । विश्वाभिः । गीःऽभिः । अमृतः । विऽचेताः ।
श्यावा । रथम् । वहतः । रोहिता । वा । उत । अरुषा । अह । चक्रे । विऽभृत्रः ॥ २ ॥

वेङ्कट० शृणोतु अग्निः चित्रदीप्तिः मदीयम् आह्वानं धनादिविषयं सर्वाभिः सह स्तुतिभिः अमृतः विप्रचेताः । श्यावर्णौ अश्वौ तस्य रथम् वहतः रोहितवर्णौ अपि च, कदाचित् आरोचमानौ एव अश्वौ करोति स्वरथे विविधं ह्रियमाणः सर्वेषु यज्ञेषु वा ॥ २ ॥

उत्तानायामजनयन्त्सुषूतं भुवदग्निः पुरुपेशासु गर्भः ।
शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेताः ॥ ३ ॥

उत्तानायाम् । अजनयन् । सुऽसूतम् । भुवत् । अग्निः । पुरुऽपेशासु । गर्भः ।
शिरिणायाम् । चित् । अक्तुना । महःऽभिः । अपरिऽवृतः । वसति । प्रऽचेताः ॥ ३ ॥

वेङ्कट० उत्तानायाम् अरण्याम् अन्त्याकर्षे शोभनं देवाः अजनयन् । भवति च अग्निः बहुरूपासु ओषधीषु गर्भः । शिरिणा शृणातेः हिंसाकर्मणः, रात्र्याम् अपि अक्तुना अञ्जनेन सम्यक्कान्तेन तेजोभिः अपरिवृतः वसति प्राज्ञः ॥ ३ ॥

१-१. नास्ति मूको. २. नास्ति मूको. ३-३. ... वि° ... ; ... वि° ... ४. ... ५. ... ; ... .

जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम् ॥ ४ ॥

जिघर्मि । अग्निम् । हविषा । घृतेन । प्रतिऽक्षियन्तम् । भुवनानि । विश्वा ।
पृथुम् । तिरश्चा । वयसा । बृहन्तम् । व्यचिष्ठम् । अन्नैः । रभसम् । दृशानम् ॥ ४ ॥

वेङ्कट० जुहोमि अग्निम् हविषा च घृतेन च । अत्र वाजसनेयकम्— "प्रत्यङ् ह्येष सर्वाणि भुवनानि विभाति । 'पृथुं तिरश्चा वयसा बृहन्तम्' इति पृथुर्वा एष तिर्यङ् वयसो बृहन् भूमैव 'व्यचिष्ठमन्नै रभसं दृशानम्' इत्याकाशायतनम् अत्रैव यजमानं दर्शयति" (माश ६,८,१,१९) इति । पक्षिणोऽपि पृथुम् (?) इत्यर्थो भवति । एवं हि श्रीभगवानग्निः[1] इत्याह[2] इति ॥ ४ ॥

आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्भुराणः ॥ ५ ॥

आ । विश्वतः । प्रत्यञ्चम् । जिघर्मि । अरक्षसा । मनसा । तत् । जुषेत ।
मर्यऽश्रीः । स्पृहयत्ऽवर्णः । अग्निः । न । अभिऽमृशे । तन्वा । जर्भुराणः ॥ ५ ॥

वेङ्कट० वाजसनेयकम्— 'आ विश्वतः प्रत्यञ्चं जुहोमि' इति[3] 'अरक्षसा[4] मनसा तज्जुषेत[5]' इत्यद्रोहभावेन मनसा [illegible] 'मर्यश्रीः स्पृहयद्वर्णो अग्निः' इति मर्यश्रीरेव स्पृहयद्वर्णोऽग्निः[6] 'नाभिमृशे तन्वा[7] जर्भुराणः' इति न हीदमभिमृशे तन्वा[8] दीप्यमानो भवति" (माश ६,८,१,२०) इति । मनुष्यस्येव श्रीः स्पृहणीयवर्ण इति ॥ ५ ॥

ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम ।
अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि ॥ ६ ॥

ज्ञेयाः । भागम् । सहसानः । वरेण । त्वाऽदूतासः । मनुऽवत् । वदेम ।
अनूनम् । अग्निम् । जुह्वा । वचस्या । मधुऽपृचम् । धनऽसाः । जोहवीमि ॥ ६ ॥

वेङ्कट० ज्ञातव्याः स्म भागं वरेण[9] [illegible] सहमानः[10] । त्वं[11] दूतो येषां ते वयं [illegible] यथा मनुरुवाच तथा वदेम । परिपूर्णम् अग्निम् जुह्वा च वचनेन च[12] मधुना सम्पृक्तं धनस्य दाता[13] पुनःपुनः आह्वयामि ॥ ६ ॥

[15]इति द्वितीयाष्टके पञ्चमाध्याये द्वितीयो वर्गः[15] ॥

---

१. 'दद् वि' छपे. २. °व्यचिष्ठम वि' अ', व्यच° म° छपे. ३. °योश्या° वि' अ'. ४. °यत्तः वि' छपे. ५. °अक्षरसा वि' अ' छपे. ६. न जु° वि' छपे. ७. पुष्ट° वि' छपे. ८. शा छपे. ९. हवा वि'' अ' छपे. १०. °केन वि' छपे. ११. °मानम् वि' अ'; °मान. छपे. १२. नास्ति वि' अ'. १३. नास्ति अ'. १४. धन पञ्चदा वि' छपे. १५-१५. नास्ति मूको.

[११]

¹गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । इन्द्रो देवता ।
विराट्स्थाना छन्दः, एकविंशी त्रिष्टुप् ।

श्रुधी हवमिन्द्र मा रिषण्यः स्याम ते दावने वसूनाम् ।
इमा हि त्वामूर्जो वर्धयन्ति वसूयवः सिन्धवो न क्षरन्तः ॥ १ ॥

श्रुधि । हवम् । इन्द्र । मा । रिषण्यः । स्याम । ते । दावने । वसूनाम् ।
इमाः । हि । त्वाम् । ऊर्जः । वर्धयन्ति । वसुऽयवः । सिन्धवः । न । क्षरन्तः ॥ १ ॥

वेङ्कट० शृणु हवम् इन्द्र! मा अस्मान् हिंसीः । भवेम तव प्रयच्छतो धनानां दानाय आश्रिताः जनाः । इमाः हि त्वाम् ऊर्जः हवींषि वर्धयन्ति स्तोतॄन्¹ धनकामाः धनम् इच्छन्त्यः नद्यः इव क्षरन्त्यः ॥ १ ॥

सृजो महीरिन्द्र या अपिन्वः परिष्ठिता अहिना शूर पूर्वीः ।
अमर्त्यं चिद् दासं मन्यमानमवाभिनदुक्थैर्वावृधानः ॥ २ ॥

सृजः । महीः । इन्द्र । याः । अपिन्वः । परिऽस्थिताः । अहिना । शूर । पूर्वीः ।
अमर्त्यम् । चित् । दासम् । मन्यमानम् । अव । अभिनत् । उक्थैः । ववृधानः ॥ २ ॥

वेङ्कट० सृष्टवान् असि त्वम् महतीः अपः इन्द्र! यैः पूर्ण इव, याः अपिन्वः परिवेष्टिताः अहिना हे शूर! पूर्वीः² पुराणीः । दुर्मरम् अपि सन्तम् असुरम् अभिमन्यमानम् अव³ अभिनत् इन्द्रः⁴ स्तोत्रैः वर्धमानः ॥ २ ॥

उक्थेष्विन्नु शूर येषु चाकन्स्तोमेष्विन्द्र रुद्रियेषु च ।
तुभ्येदेता यासु मन्दसानः प्र वायवे सिस्रते न शुभ्राः ॥ ३ ॥

उक्थेषु । इत् । नु । शूर । येषु । चाकन् । स्तोमेषु । इन्द्र । रुद्रियेषु । च ।
तुभ्य । इत् । एताः । यासु । मन्दसानः । प्र । वायवे । सिस्रते । न । शुभ्राः ॥ ३ ॥

वेङ्कट० शूर! येषु शस्त्रेषु कामयसे स्तोत्रेषु⁵ च इन्द्र!⁶ रुद्रियेषु । 'चाकन्' (निघ ३.१४) इति स्तोतृनाम । तुभ्यम् एव एताः स्तुतयः, यासु त्वम् मन्दसानः भवसि, वायवे इव सिस्रते इव शोभना । स्वदर्शनम् एव निःसरन्तीति स्तुतीनां शोभया वदति ॥ ३ ॥

शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वोर्दधानाः ।
शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ॥ ४ ॥

१-१. नास्ति मूको. २. मतो मूको. ३. नास्ति वि¹. ४. नास्ति अ¹. ५. इन्द्र वि¹ अ¹. ६. स्तोत्रेषु वि¹ अ¹. ७. नास्ति मूको.

शुभ्रम् । नु । ते । शुष्मम् । वर्धयन्तः । शुभ्रम् । वज्रम् । बाह्वोः । दधानाः ।
शुभ्रः । त्वम् । इन्द्र । ववृधानः । अस्मे इति । दासीः । विशः । सूर्येण । सह्याः ॥ ४ ॥

वेङ्कट० स्तुतिभिः शोभनं बलम् वर्धयन्तः शोभनम् वज्रम् तव बाह्वोः दधानाः भवामः[1]। स्तुतः सन्धारणे वज्रम् इति। दीप्यमानः त्वम् इन्द्र! वर्धमानः अस्माकम् उपक्षयस्थितो[2] प्रजाः शोभनेन वीर्येण अभिभवति ॥ ४ ॥

गुहा हितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियन्तम् ।
उतो अपो द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येण ॥ ५ ॥

गुहा । हितम् । गुह्यम् । गूळ्हम् । अप्ऽसु । अपिऽवृतम् । मायिनम् । क्षियन्तम् ।
उतो इति । अपः । द्याम् । तस्तभ्वांसम् । अहन् । अहिम् । शूर । वीर्येण ॥ ५ ॥

वेङ्कट० गुहायां निहितम् अदृश्यम् अत्र निगूढम् अद्भिः प्रच्छाद्यमानम् मायिनम् निवसन्तम्, अपि च आदित्यम् 'अपः च'[3] स्तम्भितवन्तं हे शूर! वीर्येण अहिम् हतवान् असि ॥ ५ ॥

'इति द्वितीयाष्टके प्रथमाध्याये तृतीयो वर्गः'[4] ॥

स्तवा नु त इन्द्र पूर्व्या महान्युत स्तवाम नूतना कृतानि ।
स्तवा वज्रं बाह्वोरुशन्तं स्तवा हरी सूर्यस्य केतू ॥ ६ ॥

स्तवै । नु । ते । इन्द्र । पूर्व्या । महानि । उत । स्तवाम । नूतना । कृतानि ।
स्तवै । वज्रम् । बाह्वोः । उशन्तम् । स्तवै । हरी इति । सूर्यस्य । केतू इति ॥ ६ ॥

वेङ्कट० हे इन्द्र! तव पूर्वकालभावीनि माहात्म्यानि अधुना स्तवाम। अपि च स्तवाम सम्प्रतितनानि कृतानि। स्तवाम वज्रम् बाह्वोः दीप्यमानम्। स्तवाम च अश्वौ सूर्यस्य प्रज्ञापकौ ॥ ६ ॥

हरी नु त इन्द्र वाजयन्ता घृतश्चुतं स्वारमस्वार्ष्टाम् ।
वि समना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन् ॥ ७ ॥

हरी इति । नु । ते । इन्द्र । वाजयन्ता । घृतऽश्चुतम् । स्वारम् । अस्वार्ष्टाम् ।
वि । समना । भूमिः । अप्रथिष्ट । अरंस्त । पर्वतः । चित् । सरिष्यन् ॥ ७ ॥

वेङ्कट० इन्द्र! तव अश्वौ शब्दं कुर्वन्तौ उदकस्य क्षारकं 'शब्दं कारितवन्तौ'। तथा तव भयात् समरूपा भूत्वा भूमिः विप्रथिता आसीत्। तथा निलीयमानः[5] सरिष्यन् स्वस्थाने रमते ॥ ७ ॥

---

१. भवन्ति वि'' मूको. २. °पक्षयिके वि'' मूको. ३-३. नास्ति मूको; अपरम् च प्रस्ताव: ४-४. नास्ति मूको. ५-५. कुटिलम् वि'' मूको.

नि पर्वतः साद्यप्रयुच्छन्त्सं मातृभिर्वावशानो अक्रान् ।
दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिं पप्रथन्नि ॥ ८ ॥

नि । पर्वतः । सादि । अप्रऽयुच्छन् । सम् । मातृऽभिः । वावशानः । अक्रान् ।
दूरे । पारे । वाणीम् । वर्धयन्तः । इन्द्रऽइषिताम् । धमनिम् । पप्रथन् । नि ॥ ८ ॥

वेङ्कट० नि षसाद पर्वतः[1] †अस्मिन् स्थाने अप्रमाद्यन्‡ । तथा मरुतः पवमानो वायुश्च मातृभिः§ पुनः सम् अक्रान् सङ्गतो भवति कामयमानः । तथा दूरे[2] पारे देशे[3] ... अवर्धयन्त इति ॥ ८ ॥

इन्द्रो महां सिन्धुमाशयानं मायाविनं वृत्रमस्फुरन्निः ।
अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ॥ ९ ॥

इन्द्रः । महाम् । सिन्धुम् । आऽशयानम् । मायाऽविनम् । वृत्रम् । अस्फुरत् । निः ।
अरेजेताम् । रोदसी इति । भियाने इति । कनिक्रदतः । वृष्णः । अस्य । वज्रात् ॥ ९ ॥

वेङ्कट० इन्द्रः[1] महान्तम् सिन्धुम् आवृत्य शयानम् मायावन्तम् वृत्रम् निः जघान । अकम्पेतां द्यावापृथिवी भियाने[1] शब्दं कुर्वतः वर्षितुः अस्य वज्रात् ॥ ९ ॥

अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वात् ।
नि मायिनो दानवस्य माया अपादयत्पपिवान्त्सुतस्य ॥ १० ॥

अरोरवीत् । वृष्णः । अस्य । वज्रः । अमानुषम् । यत् । मानुषः । निऽजूर्वात् ।
नि । मायिनः । दानवस्य । मायाः । अपादयत् । पपिऽवान् । सुतस्य ॥ १० ॥

वेङ्कट० वर्षितुः अस्य[1] वज्रः शब्दं चकार । यदा[2] 'मनुष्याणाम् अहितम्[3] मनुष्यहितः निहतवान्, तदा[4] मायाविनः[5] दानवस्य मायाः स नि अपादयत् सोमम् पपिवान् इति ॥ १० ॥

'इति द्वितीयाष्टके पञ्चमाध्याये चतुर्थो वर्गः' ॥

पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः ।
पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव ॥ ११ ॥

पिबऽपिब । इत् । इन्द्र । शूर । सोमम् । मन्दन्तु । त्वा । मन्दिनः । सुतासः ।
पृणन्तः । ते । कुक्षी इति । वर्धयन्तु । इत्था । सुतः । पौरः । इन्द्रम् । आव ॥ ११ ॥

---

१. पर्वतस्य मूको. २-२. नास्ति वि[1] अप. † अस्मिन् वि[3] मू[2] क. ‡ अप्रमाद्यन् वि[1] मू[2] क. § मातृभिः च सङ्गताः. ३-३. नास्ति वि[3] अ[2]. ४. °रत न वि[3] अ[2]. ५-५. 'मानुषम् अहितम् वि[1] अप; 'मानुषम् अहितम् वि[3] अ[2]; 'अभिहितम् क. ६. ततः वि[1] अप. ७. मुदितम् वि[3] अ[2]. ८-८ नास्ति मूको.

वेङ्कट० इन्द्र ! शूर ! सोमम् पिब पुत्र । मन्दन्तु त्वां मदकराः सोमाः । पृणन्तः तव कुक्षी वर्धयन्तु । मन्यस् एव पुनः पूर्वदिता सोमः इन्द्रम् रक्षति ॥ ११ ॥

त्वे इन्द्राप्यभूम विप्रा धियं वनेम ऋतया सपन्तः ।
अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम ॥ १२ ॥

त्वे इति । इन्द्र । अपि । अभूम । विप्राः । धियम् । वनेम । ऋतऽया । सपन्तः ।
अवस्यवः । धीमहि । प्रऽशस्तिम् । सद्यः । ते । रायः । दावने । स्याम ॥ १२ ॥

वेङ्कट० हे इन्द्र ! वयं त्वयि विप्राः स्याम मेधाविनः कर्म च भजेम सत्यया वाचा त्वां स्तुवन्तः । रक्षेच्छवो वयं धारयाम प्रशस्तिम् । सद्य च तुभ्यं धनस्य दाने स्याम इति ॥ १२ ॥

स्याम ते त इन्द्र ये त ऊती अवस्यव ऊर्जं वर्धयन्तः ।
शुष्मिन्तमं यं चाकनाम देवास्मे रयिं रासि वीरवन्तम् ॥ १३ ॥

स्याम । ते । ते । इन्द्र । ये । ते । ऊती । अवस्यवः । ऊर्जम् । वर्धयन्तः ।
शुष्मिन्ऽतमम् । यम् । चाकनाम । देव । अस्मे इति । रयिम् । रासि । वीरऽवन्तम् ॥ १३ ॥

वेङ्कट० हे इन्द्र ! तव रक्षणेन ये रक्षणकामाः हविषा वर्धयन्तः बलवत्तमम्[1] । यम् कामयामहे[2] वयम् देव ! तम् अस्मभ्यम् रयिम् प्रयच्छसि पुत्रयुक्तम् इति ॥ १३ ॥

रासि क्षयं रासि मित्रमस्मे रासि शर्ध इन्द्र मारुतं नः ।
सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम् ॥ १४ ॥

रासि । क्षयम् । रासि । मित्रम् । अस्मे इति । रासि । शर्धः । इन्द्र । मारुतम् । नः ।
सऽजोषसः । ये । च । मन्दसानाः । प्र । वायवः । पान्ति । अग्रऽनीतिम् ॥ १४ ॥

वेङ्कट० देहि निवासम्, मित्रम् च अस्मभ्यम् रासि च मारुतवेगम् । तथा त्वया सहिताः ये मन्दमानाः ते वायवो वीराः प्रकर्षेण रक्षन्तु अग्रणीतिम् संग्रामम् इति ॥ १४ ॥

व्यन्त्विन्नु येषु मन्दसानस्तृपत्सोमं पाहि द्रह्यदिन्द्र ।
अस्मान्सु पृत्स्वा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः ॥ १५ ॥

---

१. मिम लिम वि॰ अ॰. २. मा वि॰ अ॰. ३. कुशित वि॰ सर्व, कुशितम् वि॰ अ॰. ४. °ब्र°/ वि॰ अ॰ ५. कामयानो वि॰ क सर्व, कामयानाः कामयमाना वा क प्रस्तावः.

ध्यन्नु । इत् । नु । येषु । मन्दसानः । तृपत् । सोमम् । पाहि । द्रह्यत् । इन्द्र ।
अस्मान् । सु । पृत्ऽसु । आ । तरुत्र । अवर्धयः । द्याम् । बृहत्ऽभिः । अर्कैः ॥ १५ ॥

वेङ्कट० गच्छन्तु एव[1] क्षिप्रं मरुतः, येषाम् तेषु त्वम् मन्दसानः भवसि । ततः तृप्यन् इन्द्र ! सोमम् पिब आत्मानं दृंहयन् । अथ अस्मान् तारयितः[2] सुष्टु संग्रामेषु अवर्धयः दिवं च महद्भिः अर्कैः ॥ १५ ॥

[3]इति द्वितीयाष्टके पञ्चमाध्याये पञ्चमो वर्गः[3] ॥

बृहन्त इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान् ।
स्तृणानासो बर्हिः पस्त्यावत्त्वोता इदिन्द्र वाजमग्मन् ॥ १६ ॥

बृहन्तः । इत् । नु । ये । ते । तरुत्र । उक्थेभिः । वा । सुम्नम् । आऽविवासान् ।
स्तृणानासः । बर्हिः । पस्त्याऽवत् । त्वाऽऊताः । इत् । इन्द्र । वाजम् । अग्मन् ॥ १६ ॥

वेङ्कट० महान्तः एव ते भवन्ति, ये नु 'तव सम्बन्धि' इह तरत्र[4] शस्त्रैः च त्वां सुखकरं परिचरन्ति स्तृणन्तः बर्हिः । दृषैः विदन्ति यद्वत् त्वया रक्षिताः एव ते इन्द्र ! अन्नम् आप्नुवन् ॥ १६ ॥

उग्रेष्विन्नु शूर मन्दसानस्त्रिकद्रुकेषु पाहि सोममिन्द्र ।
प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम् ॥ १७ ॥

उग्रेषु । इत् । नु । शूर । मन्दसानः । त्रिऽकद्रुकेषु । पाहि । सोमम् । इन्द्र ।
प्रऽदोधुवत् । श्मश्रुषु । प्रीणानः । याहि । हरिऽभ्याम् । सुतस्य । पीतिम् ॥ १७ ॥

वेङ्कट० उद्गूर्णेषु सुतेषु हे शूर ! मोदमानः "अभिप्लवस्याद्यं पूर्वं त्र्यहं त्रिकद्रुक इत्याचक्षते" (आश्वश्रौ ११, ७,११) तेषु पिब सोमम् इन्द्र ! प्रकम्पयन् श्मश्रुस्थितं सोमम् प्रीयमाणः याहि अश्वाभ्यां सोमस्य पानम् इति ॥ १७ ॥

धिष्वा शवः शूर येन वृत्रमवाभिनद्दानुमौर्णवाभम् ।
अपावृणोर्ज्योतिरार्याय नि सव्यतः सादि दस्युरिन्द्र ॥ १८ ॥

धिष्व । शवः । शूर । येन । वृत्रम् । अवऽअभिनत् । दानुम् । और्णऽवाभम् ।
अप । अवृणोः । ज्योतिः । आर्याय । नि । सव्यतः । सादि । दस्युः । इन्द्र ॥ १८ ॥

---

1. एवम् वि[1] अ[2] कपं. २-२. नास्ति मूको. ३ ३. ना[4] वि[1] अ[2] अ[2] क. ४. तस्त्र वि[1] अ[2], ५-५. प्रकम्पय आह पूर्वं वि[1] कपं; "भजनाख्य पूर्वं वि[1] अ[2], "प्रकम्पय" क.

वेङ्कट० 'धारय वज्रम्'[1] वज्रम् शूर! येन त्वम् अवनिनयथाः दानुम् और्णवाभम् च असुरं, मोसत्वोति आर्तीनां प्रकाशार्थम् जप 'अघृणे'[2] इति। तव स्तोतुः सम्याद् अवे दस्युः असुरः नि सर्वान् निर्पादयति विजह्यति। अथवा तव मध्यादपि इस्ताद निर्गच्छति ॥ १८ ॥

सनेम ये त ऊतिभिस्तरन्तो विश्वाः स्पृध आर्येण दस्यून् ।
अस्मभ्यं तत् त्वाष्ट्रं विश्वरूपमरन्धयः साख्यस्य त्रिताय ॥ १९ ॥

सनेम । ये । ते । ऊतिऽभिः । तरन्तः । विश्वाः । स्पृधः । आर्येण । दस्यून् ।
अस्मभ्यम् । तत् । त्वाष्ट्रम् । विश्वऽरूपम् । अरन्धयः । साख्यस्य । त्रिताय ॥ १९ ॥

वेङ्कट० भजेम तान् वयम् अपि, ये तव रक्षणैः स्वया च आर्येण सर्वान् स्पर्धमानान् उपक्षयिष्णून् शत्रून् तरन्ति। अस्मभ्यम् तदानीं त्वष्टुः पुत्रम् विश्वरूपम् वशमनयः सख्यमिच्छन्तम्[3] त्रिताय इति। माद्भ्यं चतुर्थी व्यत्ययेन[4] ॥ १९ ॥

अस्य सुवानस्य मन्दिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः ।
अवर्तयत् सूर्यो न चक्रं भिनद् वलमिन्द्रो अङ्गिरस्वान् ॥ २० ॥

अस्य । सुवानस्य । मन्दिनः । त्रितस्य । नि । अर्बुदम् । ववृधानः । अस्तरित्यस्तः ।
अवर्तयत् । सूर्यः । न । चक्रम् । भिनत् । वलम् । इन्द्रः । अङ्गिरस्वान् ॥ २० ॥

वेङ्कट० अस्य सोमं सुन्वतः सुवानस्य स्तोतुः त्रितस्य, अर्बुद इति विश्वरूपस्य नामान्तरम्, वर्धमानः नि अस्तः हिंसितवान् असि। अवर्तयत् सूर्य इव रथचक्रम्[5] आत्मीयम्, अभिनत् वलम् चासुरम् अङ्गिरोभिः सहितः[6] इन्द्रः ॥ २० ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः ॥ २१ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ २१ ॥

वेङ्कट० नूनम् इति पदपूरणः। 'सा तव' मघवती[7] दक्षिणा स्तोत्रे मह्यं वरणीयम् अभिकाङ्क्षितं प्रति दुह्यताम्। देहि स्तोतृभ्यः कामान्। मा अस्मान् अति धाक्षीत् भजनीय इन्द्रः। बृहत् वदेम यज्ञे कल्याणवीराः[8] ॥ २१ ॥

'इति द्वितीयाष्टके पञ्चमाध्याये षष्ठो वर्गः'[9] ॥

1-1. धारय वि[1] मूको. धारय वि[1] अ[2] ल; धारय वज्रम् प्रसादः. 2. अघृणोति वि[1] मूको. अघृणोति वि[1] अ[1] क. 3. सख्यम् अनुसृतम् वि[1] अ[2]. 4. तीरुत वि[1]. 5-5. नास्ति वि[1] अ[1]. 6. सङ्गतानि वि[1] अ[1]; सङ्गति वि[1] मूको. 7. महत् वि[1] अ[1]. 8. कल्याणाः वि[1] अ[1]. 9-9. नास्ति मूको.

[१२]

[1](गृत्समदो भार्गवः शौनकः पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः [1] ।

यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत् ।
यस्य शुष्माद् रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥ १ ॥

यः । जातः । एव । प्रथमः । मनस्वान् । देवः । देवान् । क्रतुना । परिऽअभूषत् ।
यस्य । शुष्मात् । रोदसी इति । अभ्यसेताम् । नृम्णस्य । मह्ना । सः । जनासः । इन्द्रः ॥ १ ॥

वेङ्कट० शौनकः— 'भृगुः[2] [illegible] ऐन्द्रं [illegible] ।
असुरान् [illegible] दिवि च व्योम्नि चैव च ॥
[illegible] तु दैत्यौ [illegible] ।
धुनिश्च चुमुरिश्चोभौ[3] [illegible][4] ॥
जिघांसन्तौ [illegible] पार्श्वे [illegible] ।
यो जात इति सूक्तेन [illegible]' ॥ (बृहद्दे ४.६६-६८) इति ॥

'यः जातः' एव प्रथमः मनस्वी देवो देवान् क्रतुना कर्मणा [illegible][5] [illegible] [illegible] [6] इति[7] यास्कः (१०.१०)। यस्य [illegible] द्यावापृथिव्यौ [illegible] [illegible] बलस्य च महत्त्वेन सः जनाः [illegible], [illegible] इति ॥ १ ॥

यः पृथिवीं व्यथमानामदृंहद् यः पर्वतान् प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात् स जनास इन्द्रः ॥ २ ॥

यः । पृथिवीम् । व्यथमानाम् । अदृंहत् । यः । पर्वतान् । प्रऽकुपितान् । अरम्णात् ।
यः । अन्तरिक्षम् । विऽममे । वरीयः । यः । द्याम् । अस्तभ्नात् । सः । जनासः । इन्द्रः ॥ २ ॥

वेङ्कट० यः पृथिवीं चलन्तीम् अदृंहत् । यः च पर्वतान् [illegible] प्रकुपितान् अरम्णात्[8] [illegible][9] [illegible], [illegible] [illegible] । [10]"यः च" अन्तरिक्षम् विस्तीर्णं चकार । यः च [illegible] [illegible] दिवं धारयति ॥ २ ॥

यो हत्वाहिमरिणात् सप्त सिन्धून् यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजान संवृक् समत्सु स जनास इन्द्रः ॥ ३ ॥

१-१. नास्ति मूको. २. भृगुः वि[1] अ[4]. ३. [illegible] अ[4]. ४. [illegible] वि[1] अ[4]. ५. [illegible] वि[1] अ[4], [illegible] वि[1] स. ६. नास्ति वि[1] अ[4]. ७. नास्ति अ[4]. ८. नास्ति मूको. ९. [illegible] अ[4]; [illegible] वि[1] स. १०-१०. [illegible] वि[1] अ[4] [illegible].

यः । हृत्वा । अहिम् । अरिणात् । सप्त । सिन्धून् । यः । गाः । उत्ऽआजत् । अपऽधा । वलस्य ।
यः । अश्मनोः । अन्तः । अग्निम् । जजान । सम्ऽवृक् । समत्ऽसु । सः । जनासः । इन्द्रः ॥ ३ ॥

वेङ्कट० यः च अहिम् हत्वा निरगमयत् सप्त नदीः । यः च गाः उदाजत्[1] [illegible] । [illegible] वलस्य असुरस्य । यः च मेघयोः मध्ये [illegible] वैद्युतम् अग्निम् जनयति । स इन्द्रः [illegible] ॥ ३ ॥

येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँल्लक्षमाददर्यः पुष्टानि स जनास इन्द्रः ॥ ४ ॥

येन । इमा । विश्वा । च्यवना । कृतानि । यः । दासम् । वर्णम् । अधरम् । गुहा । अकरित्यकः ।
श्वघ्नीऽइव । यः । जिगीवान् । लक्षम् । आदत् । अर्यः । पुष्टानि । सः । जनासः । इन्द्रः ॥ ४ ॥

वेङ्कट० येन कृतानि सर्वाणि[2] च्यवनानि[3] कृतानि । यः च असुरं [illegible] गुहायां करोति । श्वघ्नी इव यः[4] जिगीवान् [illegible] भक्षयति [illegible] पोषणानि [illegible] ॥ ४ ॥

यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनास इन्द्रः ॥ ५ ॥

यम् । स्म । पृच्छन्ति । कुह । सः । इति । घोरम् । उत । ईम् । आहुः । न । एषः । अस्ति । इति । एनम् ।
सः । अर्यः । पुष्टीः । विजःऽइव । आ । मिनाति । श्रत् । अस्मै । धत्त । सः । जनासः । इन्द्रः ॥ ५ ॥

वेङ्कट० पुरे प्रविशन्तं यम् इन्द्रम् पृच्छन्ति घोरम् क सः इन्द्रः इति । अपि च एनम् आहुः न एषः[5] अस्ति । [illegible] प्रविश्य [illegible] इति । सः ईश्वरः शत्रूणाम् पुष्टीः हिनस्ति, यथा [illegible] हिनस्ति । अस्मै श्रत् धत्त[6] इति ॥ ५ ॥

'इति द्वितीयाष्टके षष्ठाध्याये सप्तमो वर्गः'[6] ॥

यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्राव्णो योऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः ॥ ६ ॥

यः । रध्रस्य । चोदिता । यः । कृशस्य । यः । ब्रह्मणः । नाधमानस्य । कीरेः ।
युक्तऽग्राव्णः । यः । अविता । सुऽशिप्रः । सुतऽसोमस्य । सः । जनासः । इन्द्रः ॥ ६ ॥

वेङ्कट० यः समृद्धस्य कृशस्य च धनं चोदयति, यः च ब्राह्मणस्य याचमानस्य स्तोतुः । यः च युक्तग्राव्णः सुतसोमस्य रक्षकः सुहनुः[7] ॥ ६ ॥

---

१. उदाजत् वि° मू°. २. [illegible] वि° मू°; [illegible] वि° लपं. ३. [illegible] वि°° लपं. ४. नास्ति वि° मू°. ५. [illegible] वि° मू°; [illegible] वि° लपं. ६-६. नास्ति मूको. ७. सुशिप्रम् मू°; [illegible] वि°.

यस्याश्वा॑सः प्र॒दिशि॒ यस्य॒ गावो॒ यस्य॒ ग्रामा॒ यस्य॒ विश्वे॒ रथा॑सः ।
यः सूर्यं॒ य उ॒षसं॑ ज॒जान॒ यो अ॒पां नेता॒ स ज॑नास॒ इन्द्रः॑ ॥ ७ ॥

यस्य॑ । अश्वा॑सः । प्र॒ऽदिशि॑ । यस्य॑ । गावः॑ । यस्य॑ । ग्रामाः॑ । यस्य॑ । विश्वे॑ । रथा॑सः ।
यः । सूर्य॑म् । यः । उ॒षस॑म् । ज॒जान॑ । यः । अ॒पाम् । नेता॑ । सः । ज॒ना॒सः॒ । इन्द्रः॑ ॥ ७ ॥

वेङ्कट० यस्य प्रदेशने ... अश्वादयो वर्तन्ते । शिष्टं स्पष्टमिति ॥ ७ ॥

यं क्रन्द॑सी संय॒ती वि॒ह्वये॑ते॒ परेऽव॑र उ॒भया॑ अ॒मित्राः॑ ।
स॒मा॒नं चि॒द्रथ॑मातस्थि॒वांसा॒ नाना॑ हवेते॒ स ज॑नास॒ इन्द्रः॑ ॥ ८ ॥

यम् । क्रन्द॑सी॒ इति॑ । सं॒य॒ती इति॑ स॒म्ऽय॒ती । वि॒ह्वये॑ते॒ इति॑ वि॒ऽह्वये॑ते । परे॑ । अव॑रे । उ॒भयाः॑ ।
अ॒मित्राः॑ ॥ स॒मा॒नम् । चि॒त् । रथ॑म् । आ॒त॒स्थि॒ऽवांसा॑ । नाना॑ । ह॒वे॒ते॒ इति॑ । सः । ज॒ना॒सः॒ । इन्द्रः॑ ॥ ८ ॥

वेङ्कट० यम् संक्रन्दमाने सेने व्यामामायन्त्यां सामागच्छन्त्यावाह्वयत इति । तथा देवोपहतम् — उभयत्र
यथाराजान उभये ज्ञात्वा आह्वयन्ते । एकम् एव इन्द्ररथम् आतस्थिवांसौ युयुत्सू राजानौ नाना
ह्वयेते तम् इन्द्रम् इति ॥ ८ ॥

यस्मा॒न्न ऋ॒ते वि॒जय॑न्ते॒ जना॑सो॒ यं युध्य॑माना॒ अव॑से॒ हव॑न्ते ।
यो विश्व॑स्य प्रति॒मानं॑ ब॒भूव॒ यो अ॑च्युत॒च्युत्स ज॑नास॒ इन्द्रः॑ ॥ ९ ॥

यस्मा॑त् । न । ऋ॒ते । वि॒ऽजय॑न्ते । जना॑सः । यम् । युध्य॑मानाः । अव॑से । हव॑न्ते ।
यः । विश्व॑स्य । प्र॒ति॒ऽमान॑म् । ब॒भूव॑ । यः । अ॒च्यु॒त॒ऽच्युत् । सः । ज॒ना॒सः॒ । इन्द्रः॑ ॥ ९ ॥

वेङ्कट० निगदव्याख्याता ॥ ९ ॥

यः शश्व॑तो॒ मह्येनो॒ दधा॑ना॒नम॑न्यमाना॒ञ्छर्वा॑ ज॒घान॑ ।
यः शर्ध॑ते॒ नानु॒ददा॑ति शृ॒ध्यां यो दस्यो॑र्ह॒न्ता स ज॑नास॒ इन्द्रः॑ ॥ १० ॥

यः । शश्व॑तः । महि॑ । एनः॑ । दधा॑नान् । अम॑न्यमानान् । शर्वा॑ । ज॒घान॑ ।
यः । शर्ध॑ते । न । अ॒नु॒ऽददा॑ति । शृ॒ध्याम् । यः । दस्योः॑ । ह॒न्ता । सः । ज॒ना॒सः॒ । इन्द्रः॑ ॥ १० ॥

---

१. [illegible] २. [illegible]

वेङ्कट० यः बहून् महत् पापं दधानान् इन्द्रम् अमन्यमानान् हिंसकेन वज्रेण जघान । 'यः च' शर्धम् आचरते दस्यवे[1] न अनुप्रयच्छति, ... यः असुरस्य हन्ता इति ॥ १० ॥

'इति द्वितीयाष्टके षष्ठाध्यायेऽष्टमो वर्गः' ।

यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥ ११ ॥

यः । शम्बरम् । पर्वतेषु । क्षियन्तम् । चत्वारिंश्याम् । शरदि । अनुऽअविन्दत् ।
ओजायमानम् । यः । अहिम् । जघान । दानुम् । शयानम् । सः । जनासः । इन्द्रः ॥ ११ ॥

वेङ्कट० यः शम्बरम् असुरम् इन्द्रभयात् पर्वतेषु निलीय निवसन्तम् चत्वारिंश्याम् शरदि सेनाभिः अन्वविन्दत् । यः ओजायमानम् अहिम् जघान, दानुम् च शयानम् इति ॥ ११ ॥

यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः ॥ १२ ॥

यः । सप्तऽरश्मिः । वृषभः । तुविष्मान् । अवऽअसृजत् । सर्तवे । सप्त । सिन्धून् ।
यः । रौहिणम् । अस्फुरत् । वज्रऽबाहुः । द्याम् । आऽरोहन्तम् । सः । जनासः । इन्द्रः ॥ १२ ॥

वेङ्कट० यः सप्तरश्मिः वर्षिता बलवान् अवासृजत् सरणाय सप्त नदीः । 'यः च' रौहिणम् असुरं हतवान् वज्रबाहुः दिवम् आरोहन्तम् ॥ १२ ॥

द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इन्द्रः ॥ १३ ॥

द्यावा । चित् । अस्मै । पृथिवी इति । नमेते इति । शुष्मात् । चित् । अस्य । पर्वताः । भयन्ते ।
यः । सोमऽपाः । निऽचितः । वज्रऽबाहुः । यः । वज्रऽहस्तः । सः । जनासः । इन्द्रः ॥ १३ ॥

वेङ्कट० अस्मै द्यावापृथिवी प्रह्वीभवतः । तथा अस्य भयात् पर्वताः बिभ्यति । यः सोमपाः दृढशरीरः, यस्य बाहौ कदाचित् वज्रः, कदाचित् हस्ते इति ॥ १३ ॥

यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः ॥ १४ ॥

१. नास्ति मूको. २-२. नास्ति वि° ३. °वज्रपात् वि° अप°, °वज्रपात् वि° ल° ह. ४-४. नास्ति मूको. ५-५. °सेनावेशन वि° अप°; °सेना वि° ल°

यः । सुन्वन्तम् । अवति । यः । पचन्तम् । यः । शंसन्तम् । यः । शशमानम् । ऊती ।
यस्य । ब्रह्म । वर्धनम् । यस्य । सोमः । यस्य । इदम् । राधः । सः । जनासः । इन्द्रः ॥ १४ ॥

वेङ्कट० यः अभिगमनेन सुन्वन्तम् रक्षति, यश्च पक्वान्नानि च पचन्तम्, शस्त्राणि शंसन्तम्, स्तुतिभिः वर्धयन्तम् । यस्य च ब्रह्म वर्धनम् भवति, सोमः च, यस्य इदम् अपि 'अन्नहविः च' ॥ १४ ॥

यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥ १५ ॥

यः । सुन्वते । पचते । दुध्रः । आ । चित् । वाजम् । दर्दर्षि । सः । किल । असि । सत्यः ।
वयम् । ते । इन्द्र । विश्वह । प्रियासः । सुवीरासः । विदथम् । आ । वदेम ॥ १५ ॥

वेङ्कट० यः त्वं दुर्धरः सुन्वते पचते च अन्नम् आ दृणासि, सः त्वम् असि सत्यः । वयम् ते इन्द्र! सदा प्रियाः सुपुत्राः यज्ञं अभिमुख्येन वदामेति ॥ १५ ॥

'इति द्वितीयाष्टके षष्ठाध्याये नवमो वर्गः' ॥

[१३]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
इन्द्रो देवता । जगती छन्दः, अन्त्यर्चः त्रिष्टुप्' ।

ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते ।
तदाहना अभवत्पिप्युषी पयोंऽशोः पीयूषं प्रथमं तदुक्थ्यम् ॥ १ ॥

ऋतुः । जनित्री । तस्याः । अपः । परि । मक्षु । जातः । आ । अविशत् । यासु । वर्धते ।
तत् । आहनाः । अभवत् । पिप्युषी । पयः । अंशोः । पीयूषम् । प्रथमम् । तत् । उक्थ्यम् ॥ १ ॥

वेङ्कट० ऋतुः चन्द्रमसो जनयित्री । तस्याः जनयित्र्याः वेगात् पश्चात् सोमः जातः स विशन्तोषधीः, यासु ओषधीषु वर्धते । तत्र प्रवृद्धस्याहन्तव्यात् अतिशयेन रसम् आप्याययन्ती भवति लता । तत् इदं त्वया उपस्थापयमानं सोमांशोः पीयूषम् सुतम् प्रथमम् एव हे इन्द्र! तुभ्यं स्तोतव्यम् ॥ १ ॥

सध्रीमा यन्ति परि बिभ्रतीः पयो विश्वप्स्न्याय प्र भरन्त भोजनम् ।
समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥ २ ॥

सध्री । ईम् । आ । यन्ति । परि । बिभ्रतीः । पयः । विश्वऽप्स्न्याय । प्र । भरन्त । भोजनम् ।
समानः । अध्वा । प्रऽवताम् । अनुऽस्यदे । यः । ता । अकृणोः । प्रथमम् । सः । असि । उक्थ्यः ॥ २ ॥

---

१. अर्चन्तम् वि' अ'. २. अग्नि... वि' अ'; ... विश्व वि' ... ३. नास्ति वि' अ'.
४. ... वि'; ... वि' ... अ', ... अन्त्यर्चः (अन्त्ये) ... ५-५. नास्ति मूको.
६. ... वि' अ'; ... वि' ... ७. रसं वि' ... ८. आप्याययन्ती
... वि' अ'. ९. ... वि' अ' ...

वेङ्कट० सधीचीना: एते समुद्रम् आगच्छन्ति पतित विश्वाः नद्यः । विश्वं स्थानम् येन स विश्वव्यचाः समुद्रः तस्मै भोजनम् च भरन्ति । समानः मार्गः समुद्रगाम्यः अपाम् महानाम् समुद्रस्यन्दनाय । यः तानि एतानि एवंविधानि कर्माणि अकृणोः सः त्वम् प्रथमम् एव स्तोतव्यः ॥ २ ॥

अन्वेको वदति यद्ददाति तद्रूपा मिनन्तदपा एक ईयते ।
विश्वा एकस्य विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥ ३ ॥

अनु । एकः । वदति । यत् । ददाति । तत् । रूपा । मिनन् । तत्ऽअपाः । एकः । ईयते ।
विश्वाः । एकस्य । विऽनुदः । तितिक्षते । यः । ता । अकृणोः । प्रथमम् । सः । असि । उक्थ्यः ॥ ३ ॥

वेङ्कट० एकः दाता मनुः अस्मै यत् ददाति तद् वाचा अनु वदति, तुभ्यम् इदम् ददामि इति । अपरः कश्चित् कुम्भकारादिः रूपाणि हिंसन् तत्कर्मा भूत्वा गच्छति । अथ अन्यः शान्तः अन्यस्य विरोधानि बाधनानि बलाभावात् परलोकभयात् च सहते । यः त्वम् एवंविधानि ता कर्माणि अकृणोः इति ॥ ३ ॥

प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।
असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥ ४ ॥

प्रऽजाभ्यः । पुष्टिम् । विऽभजन्तः । आसते । रयिम्ऽइव । पृष्ठम् । प्रऽभवन्तम् । आऽयते ।
असिन्वन् । दंष्ट्रैः । पितुः । अत्ति । भोजनम् । यः । ता । अकृणोः । प्रथमम् । सः । असि । उक्थ्यः ॥ ४ ॥

वेङ्कट० माध्यमिका देवगणाः स्वपुष्टिं प्रजाभ्यः विभजन्तः आसते वर्षार्थं धनम् इव धारक भूतम् 'अभिजायमान अभेत' । लोकः दंष्ट्रैः अखादन् पिबन् पितुः भागधम् भोजनम् अत्ति, न हि भोजनमात्रेण तृप्ता भवन्ति ॥ ४ ॥

अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः ।
तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्यः ॥ ५ ॥

अध । अकृणोः । पृथिवीम् । सम्ऽदृशे । दिवे । यः । धौतीनाम् । अहिऽहन् । अरिणक् । पथः ।
तम् । त्वा । स्तोमेभिः । उदऽभिः । न । वाजिनम् । देवम् । देवाः । अजनन् । सः । असि । उक्थ्यः ॥

वेङ्कट० अपि च अकरोः पृथिवीम् आदित्यस्य संदर्शनाय, यः त्वं धावन्तीनां हे अहिहन् । अपगमयः मार्गान् । तम् त्वा स्तोमैः उदकैः इव अश्वम् देवम् देवाः अजनयन्, स्तुवन्तो अमृतः

1. अभिविशन्ति कर्ष. 2. नदीनाम् मूको. 3. नास्ति वि॰ अर्ष. 4. एतमसि विभा॰ वि॰ अर्ष. 5. स वि॰ लप. 6. स्वपुष्टिम् मू॰. 7–7. भवन्ते यम् भव वि अर्ष. 8. दर्शन वि॰ अ अर्ष; शोषण वि॰; शोषण मू॰. 9. अदमयोः मू॰, अगमयोः वि॰; गमनयोः वि॰ अर्ष. 10. स्तुवन्ता वि॰ मू॰ अर्ष.

प्रादुर्भवति, यथा अद्भ्योऽग्निर्जात इति। 'अद्भ्योऽग्निर्जातः' (मै २,३,१२,२) इति श्रुतिः ॥ ५ ॥

'इति द्वितीयाष्टके पञ्चमाध्याये दशमो वर्गः' ॥

यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद् दुदोहिथ ।
सः शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ॥६॥

यः । भोजनम् । च । दयसे । च । वर्धनम् । आर्द्रात् । आ । शुष्कम् । मधुऽमत् । दुदोहिथ ।
सः । शेवऽधिम् । नि । दधिषे । विवस्वति । विश्वस्य । एकः । ईशिषे । सः । असि । उक्थ्यः ॥६॥

वेङ्कट० यः त्वम् भोजनम् वर्धनम् च प्रयच्छसि, यः च आर्द्रात् ओषध्यादेः शुष्कम् पक्वं व्रीह्यादिकं मधुररसवत् दुदोहिथ, सः त्वं निधिं धनं यजमाने नि दधासि। विश्वस्य च एकः[1] स्वयम् ईशिषे इति ॥ ६ ॥

यः पुष्पिणीश्च प्रस्वश्च धर्मणाऽधि दाने व्य१वनीरधारयः ।
यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः ॥ ७ ॥

यः । पुष्पिणीः । च । प्रऽस्वः । च । धर्मणा । अधि । दाने । वि । अवनीः । अधारयः ।
यः । च । असमाः । अजनः । दिद्युतः । दिवः । उरुः । ऊर्वान् । अभितः । सः । असि । उक्थ्यः ॥

वेङ्कट० यः पुष्पवतीः प्रसूतवतीः च धारणेन विविधं धारयसि फलप्रदाने ओषधीरवनीः। यः च त्वम् नानाविधा द्योतमानाः विद्युतः दिवः जनयसि विस्तीर्णः विस्तीर्णान्[2] सर्वतः इति ॥ ७ ॥

यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः ।
ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत् सास्युक्थ्यः ॥ ८ ॥

यः । नार्मरम् । सहऽवसुम् । निऽहन्तवे । पृक्षाय । च । दासऽवेशाय । च । अवहः ।
ऊर्जयन्त्याः । अपरिऽविष्टम् । आस्यम् । उत । एव । अद्य । पुरुऽकृत् । सः । असि । उक्थ्यः ॥ ८ ॥

वेङ्कट० नृमरस्यापत्यं वसुनामासुरम् सहितं निहन्तुम् पृक्षाय ऋषये दासवेशाय च प्रीणनार्थम् ऊर्जयन्त्याः विशाखिकायाः विद्युतः[3] अपरिमितम् आस्यम् यः त्वं पुरा अवहः, स त्वम् इदानीम् अपि बहुकृत्![4] स्तोतव्यो भवसि ॥ ८ ॥

१-१. नास्ति मूको. २. एकः वि॰ वर्ष. ३. विस्तीर्णान् मूको, ऊर्वान् [नाग.], समुद्रान् इत्यर्थः (ऋ. सा. वा ३,१,१४). ४. एतत् वि॰ अ वर्ष; अतृतम् क मध्यमाय; निवृतम् वि॰.

शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ ।
अरज्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः ॥ ९ ॥

शतम् । वा । यस्य । दश । साकम् । आ । अद्यः । एकस्य । श्रुष्टौ । यत् । ह । चोदम् । आविथ ।
अरज्जौ । दस्यून् । सम् । उनप् । दभीतये । सुऽप्राव्यः । अभवः । सः । असि । उक्थ्यः ॥ ९ ॥

वेङ्कट० 'आशु अश्नोतीति श्रुष्टी' इति यास्कः (नि ६.१२)। यस्य तव पानीयः 'सोमः शत-' [illegible] भवति, अपि 'वा दश' [illegible]। [illegible] इत्यर्थः। स त्वम् [illegible] [illegible] समाश्रयणे तस्य चोदकं [illegible] रक्षितवान् असि। तदानीं रज्जुवर्जित 'उदकबन्धे दभीतेः अर्थाय [illegible] दस्यून् सम् उनप् [illegible]'। ततश्च सुष्ठु अभिगन्तव्य अभवः इति ॥ ९ ॥

विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम् ।
षळस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्युक्थ्यः ॥ १० ॥

विश्वा । इत् । अनु । रोधना । अस्य । पौंस्यम् । ददुः । अस्मै । दधिरे । कृत्नवे । धनम् ।
षट् । अस्तभ्नाः । विऽस्तिरः । पञ्च । सम्ऽदृशः । परि । परः । अभवः । सः । असि । उक्थ्यः ॥ १० ॥

वेङ्कट० इन्द्रस्य पौंस्यम् [illegible] निरुद्धा[1] यजमानाः सर्वाणि एव हवींषि कृत्नवे इन्द्राय अनु अददुः, [illegible] च प्रयच्छन्ति धनम्। षट् इन [illegible] इन्द्रः [illegible] [illegible][2] पञ्च [illegible]। परि [illegible] च सर्वं [illegible] त्वम् ॥ १० ॥

'इति द्वितीयाष्टके षष्ठाध्याये एकादशो वर्गः.' ॥

सुप्रवाचनं तव वीर वीर्यं यदेकेन क्रतुना विन्दसे वसु ।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः ॥ ११ ॥

सुऽप्रवाचनम् । तव । वीर । वीर्यम् । यत् । एकेन । क्रतुना । विन्दसे । वसु ।
जातूऽस्थिरस्य । प्र । वयः । सहस्वतः । या । चकर्थ । सः । इन्द्र । विश्वा । असि । उक्थ्यः ॥ ११ ॥

वेङ्कट० सुष्ठु प्रकर्षेण सर्वसमक्षं[3] प्रकाशनम् तव हे वीर! वीर्यम् यत् त्वम् एकेन कर्मणा शत्रुभ्यो धनं लभसे। [illegible] प्रतिपद्यन्ते [illegible] [illegible]। तथ, यानि त्वं कृतवान् असि [illegible] असि सर्वत्र 'प्रचोदि'। सः त्वम्[1] इन्द्र! सर्वदा स्तुत्य असि[10] ॥ ११ ॥

१-१. "ममत" वि' [illegible]; "म:···म" [illegible]. २-२. [illegible] वि' [illegible]. ३-३. [illegible] [illegible] वि' ब'. ४. [illegible] वि'' ब' [illegible]; "[illegible] [illegible] ५. "[illegible] वि' ब'; '[illegible] वि' कपं. ६. [illegible] वि' कपं. ७-७. नास्ति मूको. ८. [illegible] वि' ब'. ९-९. [illegible] मूको. १०. नास्ति मूको.

अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिम् ।
नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्त्सास्युक्थ्यः ॥ १२ ॥

अरमयः । सरःऽअपसः । तराय । कम् । तुर्वीतये । च । वय्याय । च । स्रुतिम् ।
नीचा । सन्तम् । उत् । अनयः । पराऽवृजम् । प्र । अन्धम् । श्रोणम् । श्रवयन् । सः । असि । उक्थ्यः ॥

वेङ्कट० अरमयः सरणशीलाः नदीः सुखं तरणाय तुर्वीतये वय्याय च [illegible] स्रुतिम् उदकम्। कुल्यस्थान् तृषितान् एव नीचा सन्तम् परावृजम् उदनयः अन्धं श्रोणं च प्रकर्षेण श्रावयन् ‡ सः त्वम् उक्थ्यः असि इति॥ १२॥

अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥ १३ ॥

अस्मभ्यम् । तत् । वसो इति । दानाय । राधः । सम् । अर्थयस्व । बहु । ते । वसव्यम् ।
इन्द्र । यत् । चित्रम् । श्रवस्याः । अनु । द्यून् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १३ ॥

वेङ्कट० 'अस्मभ्यम् तत् हे वासयितः' दानाय धनं समर्धय भूयः। बहु ते धनम्। इन्द्र! यदि चित्रम् धनं दिवसेषु इच्छसि इति' ॥ १३ ॥

'इति द्वितीयाष्टके पञ्चमाध्याये द्वादशो वर्गः' ।

[१४]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
इन्द्रो देवता । त्रिष्टुप् छन्दः' ॥

अध्वर्यवो भरतेन्द्राय सोममामत्रेभिः सिञ्चता मद्यमन्धः ।
कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि ॥ १ ॥

अध्वर्यवः । भरत । इन्द्राय । सोमम् । आ । अमत्रेभिः । सिञ्चत । मद्यम् । अन्धः ।
कामी । हि । वीरः । सदम् । अस्य । पीतिम् । जुहोत । वृष्णे । तत् । इत् । एषः । वष्टि ॥ १ ॥

वेङ्कट० अध्वर्यवः! सोमम् इन्द्राय भरत। आ सिञ्चत च अमत्रैः पात्रैः मदकरं तत् अन्नम्। सदैव हि असौ वीरः अस्य पानं कामयते। तत् अस्मै वृष्णे जुहोत। तत् एव असौ सदा कामयते ॥ १ ॥

---

१ सुगम वि' लप. २-२. नास्ति वि' लप. ‡-‡ [illegible]. ‡ नास्ति मूको. ३-३. नास्ति वि' लपे. † नास्ति मूको. ४-४. नास्ति मूको. ५ नास्ति मूको.

अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम् ।
तस्मा एतं भरत तद्वशायँ एष इन्द्रो अर्हति पीतिमस्य ॥ २ ॥

अध्वर्यवः । यः । अपः । वव्रिऽवांसम् । वृत्रम् । जघान । अशन्याऽइव । वृक्षम् ।
तस्मै । एतम् । भरत । तत्ऽवशाय । एषः । इन्द्रः । अर्हति । पीतिम् । अस्य ॥ २ ॥

वेङ्कट० अध्वर्यवः ! यः उदकानि आवृण्वन्तम् [illegible] वृक्षम् इव हतवान्, तस्मै एतम् सोमम् [illegible] तत्कामाय । [illegible] अस्य पानम् [illegible] ॥ २ ॥

अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः ।
तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः ॥ ३ ॥

अध्वर्यवः । यः । दृभीकम् । जघान । यः । गाः । उत्ऽआजत् । अप । हि । वलम् । वरिति वः ।
तस्मै । एतम् । अन्तरिक्षे । न । वातम् । इन्द्रम् । सोमैः । आ । ऊर्णुत । जूः । न । वस्त्रैः ॥ ३ ॥

वेङ्कट० अध्वर्यवः ! [illegible] आसुरम् [illegible] हतवान् [illegible] [illegible] [illegible] अपावृणोत् [illegible]
[illegible] असुरम् [illegible] [illegible] [illegible] सोमैः [illegible] अन्तरिक्षे इव वायुम्, इन्द्रम्
[illegible] आच्छादयत जीर्णम् इव वस्त्रैः [illegible] ॥ ३ ॥

अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून् ।
यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत ॥ ४ ॥

अध्वर्यवः । यः । उरणम् । जघान । नव । चख्वांसम् । नवतिम् । च । बाहून् ।
यः । अर्बुदम् । अव । नीचा । बबाधे । तम् । इन्द्रम् । सोमस्य । भृथे । हिनोत ॥ ४ ॥

वेङ्कट० [illegible] यः उरणम् असुरम् [illegible] [illegible] च [illegible] बाहून् [illegible] [illegible],
[illegible] नीचैः [illegible] बबाधे, तम् इन्द्रम् [illegible] [illegible] [illegible] ॥ ४ ॥

अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम् ।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत ॥ ५ ॥

अध्वर्यवः । यः । सु । अश्नम् । जघान । यः । शुष्णम् । अशुषम् । यः । विऽअंसम् ।
यः । पिप्रुम् । नमुचिम् । यः । रुधिऽक्राम् । तस्मै । इन्द्राय । अन्धसः । जुहोत ॥ ५ ॥

१. नास्ति मूको. २. [illegible] वि॰ अ॰ [illegible]. ३-३. नास्ति वि॰ अ॰. ४. [illegible] वि॰ अ॰.
४-४. नास्ति वि॰ अ॰. ५. नास्ति वि॰ अ॰.

वेङ्कट० [illegible] इति ॥ ५ ॥

अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः ।
यो वर्चिनः शतमिन्द्रः सहस्रमपावपद्भरता सोममस्मै ॥ ६ ॥

अध्वर्यवः । यः । शतम् । शम्बरस्य । पुरः । बिभेद । अश्मनाऽइव । पूर्वीः ।
यः । वर्चिनः । शतम् । इन्द्रः । सहस्रम् । अपऽअवपत् । भरत । सोमम् । अस्मै ॥ ६ ॥

वेङ्कट० [illegible] इति ॥ ६ ॥

इति द्वितीयाष्टके षष्ठाध्याये त्रयोदशो वर्गः ॥

अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान् ।
कुत्सस्यायोरतिथिग्वस्य वीरान्न्यावृणग्भरता सोममस्मै ॥ ७ ॥

अध्वर्यवः । यः । शतम् । आ । सहस्रम् । भूम्याः । उपऽस्थे । अवपत् । जघन्वान् ।
कुत्सस्य । आयोः । अतिथिऽग्वस्य । वीरान् । नि । अवृणक् । भरत । सोमम् । अस्मै ॥ ७ ॥

वेङ्कट० [illegible] ॥ ७ ॥

अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे ।
गभस्तिपूतं भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत ॥ ८ ॥

अध्वर्यवः । यत् । नरः । कामयाध्वे । श्रुष्टी । वहन्तः । नशथ । तत् । इन्द्रे ।
गभस्तिऽपूतम् । भरत । श्रुताय । इन्द्राय । सोमम् । यज्यवः । जुहोत ॥ ८ ॥

वेङ्कट० [illegible] ॥ ८ ॥

अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम् ।
जुषाणो हस्त्यमभि वावशे व इन्द्राय सोमं मदिरं जुहोत ॥ ९ ॥

[illegible]

अध्वर्यवः । कर्णेन । ऊर्मिम् । अस्मै । वने । निऽपूतम् । वने । उत । नयध्वम् ।
जुषाणः । हस्त्यम् । अभि । वावशे । वः । इन्द्राय । सोमम् । मदिरम् । जुहोत ॥ ९ ॥

संकृट० अध्वर्यवः![1] अस्मै आप्याययित्रे सोमं कुरुत वृक्षविकारे कलशे । एतम् पात्रे उत नयध्वम् । हस्ताभ्यां सोमं सेवमानः तम् अभि कामयते युष्माकं सम्यक् इन्द्रः । ततः अस्मै मदकरम् सोमम् जुहोत इति ॥ ९ ॥

अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिन्द्रम् ।
वेदाहमस्य निभृतं म एतद् दित्सन्तं भूयो यजतश्चिकेत ॥ १० ॥

अध्वर्यवः । पयसा । ऊधः । यथा । गोः । सोमेभिः । ईम् । पृणत । भोजम् । इन्द्रम् ।
वेद । अहम् । अस्य । निऽभृतम् । मे । एतत् । दित्सन्तम् । भूयः । यजतः । चिकेत ॥ १० ॥

संकृट० अध्वर्यवः![1] यथा गोः ऊधः पयसा मनुष्याः पूरयन्ति एवं सोमैः इन्द्रम् पूरयत दातारम् । अहम् अस्य स्वभावं जानामि । निभृतम् मम एतत्, इतः[2] पूर्वं न च कथितम् । दातुम् इच्छन्तं यजमानं बहुतरं जानाति ॥ १० ॥

अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा ।
तमूर्दरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु ॥ ११ ॥

अध्वर्यवः । यः । दिव्यस्य । वस्वः । यः । पार्थिवस्य । क्षम्यस्य । राजा ।
तम् । ऊर्दरम् । न । पृणत । यवेन । इन्द्रम् । सोमेभिः । तत् । अपः । वः । अस्तु ॥ ११ ॥

संकृट० 'ऊर्दरं' (निघ १,३) इत्यन्तरिक्षनाम । क्षमेति पृथिव्याः (नि. निघ १,१) । तम् इन्द्रम् कुसूलम् इव यवेन सोमैः पूरयत । तत् भवतु भवतां कर्मेति ॥ ११ ॥

अस्मभ्यं तद् वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून् बृहद् वदेम विदथे सुवीराः ॥ १२ ॥

अस्मभ्यम् । तत् । वसो इति । दानाय । राधः । सम् । अर्थयस्व । बहु । ते । वसव्यम् ।
इन्द्र । यत् । चित्रम् । श्रवस्याः । अनु । द्यून् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १२ ॥

संकृट० पूर्वं (ऋ २,१३,१३) व्याख्यातः ॥ १२ ॥

[3]इति द्वितीयाष्टके षष्ठाध्याये चतुर्दशो वर्गः[3] ॥

१. नास्ति मूले. २. ... वि' ... ३-३. नास्ति मूले.

[१५]

[1]गृत्समदो आङ्गिरसः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
इन्द्रो देवता । त्रिष्टुप् छन्दः[1] ॥

प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।
त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान ॥ १ ॥

प्र । घ । नु । अस्य । महतः । महानि । सत्या । सत्यस्य । करणानि । वोचम् ।
त्रिऽकद्रुकेषु । अपिबत् । सुतस्य । अस्य । मदे । अहिम् । इन्द्रः । जघान ॥ १ ॥

वेङ्कट० प्रवोचाम अस्य महतः महान्ति[2] सत्यानि[3] कर्माणि अहम् प्र वोचम् कथयामि । तत्रैकं कर्म — त्रिकद्रुकेषु[4] सोमम् अपिबत् इति, तथा सोमस्य मदे अहिम् च वधम् हतवान् इति ॥ १ ॥

अवंशे द्यामस्तभायद्बृहन्तमा रोदसी अपृणदन्तरिक्षम् ।
स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार ॥ २ ॥

अवंशे । द्याम् । अस्तभायत् । बृहन्तम् । आ । रोदसी इति । अपृणत् । अन्तरिक्षम् ।
सः । धारयत् । पृथिवीम् । पप्रथत् । च । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ २ ॥

वेङ्कट० अवंशे निर्वंशे महान्तं दिवम् अस्तम्भयत्, आपूरयच्च तेजसा द्यावापृथिवी अन्तरिक्षम् च । तथा स[5] अनालम्बनाम् पृथिवीम् अधारयत्, विस्तीर्णां च[5] चक्रे । तानि एतानि कर्माणि इन्द्रः[1] सोमस्य पीतस्य मदे कृतवान्[6] ॥ २ ॥

सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम् ।
वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार ॥ ३ ॥

सद्मऽइव । प्राचः । वि । मिमाय । मानैः । वज्रेण । खानि । अतृणत् । नदीनाम् ।
वृथा । असृजत् । पथिऽभिः । दीर्घऽयाथैः । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ३ ॥

वेङ्कट० यथा गृहाणि जनाः मानदण्डैः विमिमते[4], एवम् प्राचः सिन्धून् मानदण्डैः[7] विममे । तथा वृत्रेण परिवृतानि नदीनाम् द्वाराणि वज्रेण तृणत्तवान् । अथ ताः नदीः अनायासेन दीर्घगामिभिः पथिभिः असृजत् इति ॥ ३ ॥

स प्रवोळ्हॄन्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ ।
सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार ॥ ४ ॥

१ १. नास्ति मूको. २. महानि म'. ३. नास्ति मूको. ४. कानि ... वि' लप.
५. ... को' वि' लप. ६. ... वि' अ', ... वि' लप. ७. नास्ति अ' वि'.

स । प्रऽवोळ्हॄन् । परिऽगत्य । दभीतेः । विश्वम् । अधाक् । आयुधम् । इद्धे । अग्नौ ।
सम् । गोभिः । अश्वैः । असृजत् । रथेभिः । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ४ ॥

वेङ्कट० दभीतिः नर्याय तदनन्तरं ... सर्वतो ... धनम् ... आयुधम् इद्धे अग्नौ दग्धवान् । अथ दभीतिं गवादिभिः ... समसृजत् इति ॥ ४ ॥

स ईं मही धुनिमेतोररम्णात् सो अस्नातॄनपारयत् स्वस्ति ।
त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इन्द्रश्चकार ॥ ५ ॥

सः । ईम् । महीम् । धुनिम् । एतोः । अरम्णात् । सः । अस्नातॄन् । अपारयत् । स्वस्ति ।
ते । उत्ऽस्नाय । रयिम् । अभि । प्र । तस्थुः । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ५ ॥

वेङ्कट० स एताम् मनुष्याय महतीं नदीं ... अरमयत् नदीं प्रावर्तयत् । ततः स ... अस्नातॄन् स्वस्ति ... अपारयत् । ते च उत्स्नायोत्तीर्य धनम् अभि प्र तस्थुः ... इति ॥ ५ ॥

'इति द्वितीयाष्टके षष्ठाध्याये पञ्चदशो वर्गः' ।

सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ।
अजवसो जविनीभिर्विवृश्चन्त्सोमस्य ता मद इन्द्रश्चकार ॥ ६ ॥

सः । उदञ्चम् । सिन्धुम् । अरिणात् । महिऽत्वा । वज्रेण । अनः । उषसः । सम् । पिपेष ।
अजवसः । जविनीभिः । विऽवृश्चन् । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ६ ॥

वेङ्कट० स महत्त्वेन प्राङ्मुखम् सिन्धुम् उदङ्मुखं करोति । तथा वज्रेण उषसः ... अनः ... सेनाः विपरीताभिः विवृश्चन्निति ॥ ६ ॥

स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत् परावृक् ।
प्रति श्रोणः स्थाद्व्यनगचष्ट सोमस्य ता मद इन्द्रश्चकार ॥ ७ ॥

सः । विद्वान् । अपऽगोहम् । कनीनाम् । आविः । भवन् । उत् । अतिष्ठत् । पराऽवृक् ।
प्रति । श्रोणः । स्थात् । वि । अनक् । अचष्ट । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ७ ॥

१. प्रवनद् मूको. २-२. नास्ति मूको. ३. धुनिमद् वि°.

वेङ्कट० न [illegible] कन्यकानाम् [illegible] इन्द्रं गृहाण । पश्य मां कन्यका उपभोगाय [illegible] [illegible] विवाह । अथ [illegible] इन्द्रप्रसादात् [illegible] प्रकाशियत 'उत अभियन' [illegible] ऋषिः । किं मम [illegible] 'उत न' इति [illegible] । तथा इन्द्रप्रसादात् [illegible] ॥ ७ ॥

भिनद् वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत् ।
रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार ॥ ८ ॥

भिनत् । वलम् । अङ्गिरःऽभिः । गृणानः । वि । पर्वतस्य । दृंहितानि । ऐरत् ।
रिणक् । रोधांसि । कृत्रिमाणि । एषाम् । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ८ ॥

वेङ्कट० भिनत् [illegible] अङ्गिरोभिः स्तूयमानः । वि ऐरत् [illegible] दृढीकृतानि । तथा एषाम् असुराणाम् [illegible] निरोधनानि प्राकारादीनि [illegible] ॥ ८ ॥

स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः ।
रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार ॥ ९ ॥

स्वप्नेन । अभिऽउप्य । चुमुरिम् । धुनिम् । च । जघन्थ । दस्युम् । प्र । दभीतिम् । आवः ।
रम्भी । चित् । अत्र । विविदे । हिरण्यम् । सोमस्य । ता । मदे । इन्द्रः । चकार ॥ ९ ॥

वेङ्कट० अभिवपनम् उपरि प्रक्षेप । चुमुरिनामानम् असुरं धुनिं च [illegible] निद्रां [illegible] तम् [illegible] अपि । [illegible] रम्भी नाम कश्चित् सोऽपि [illegible] हिरण्यम् [illegible] ॥ ९ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः ॥ १० ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १० ॥

वेङ्कट० पूर्वं (ऋ २ ११,२१) व्याख्याता ॥ १० ॥

'इति द्वितीयाष्टके षष्ठाध्याये [illegible] वर्गः' ॥

१-१. [illegible] २ २. नास्ति [illegible] ३. [illegible] ४. [illegible] [illegible] ५. '[illegible]' [illegible] ६. नास्ति [illegible] ७. [illegible] ८-८. नास्ति मूको.

[१६]

गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
इन्द्रो देवता । जगती छन्दः, नवमी त्रिष्टुप् ।

प्र वः॑ स॒तां ज्येष्ठ॑तमाय सुष्टु॒तिम॒ग्नावि॑व समिधा॒ने ह॒विर्भ॑रे ।
इन्द्र॑मजु॒र्यं ज॒रय॑न्तमुक्षि॒तं स॒नाद्युवा॑न॒मव॑से हवामहे ॥ १ ॥

प्र । वः॒ । स॒ताम् । ज्येष्ठ॑ऽतमाय । सु॒ऽस्तु॒तिम् । अ॒ग्नौऽइ॑व । स॒म्ऽइ॒धा॒ने । ह॒विः । भ॒रे॒ ।
इन्द्र॑म् । अ॒जु॒र्यम् । ज॒रय॑न्तम् । उ॒क्षि॒तम् । स॒नात् । युवा॑नम् । अव॑से । ह॒वा॒म॒हे॒ ॥ १ ॥

वेङ्कट० 'गृत्समदोऽहम्' 'सताम्' ज्येष्ठतमाय इन्द्राय सुष्टुतिम् प्र भरामि । यथा समिध्यमाने अग्नौ हविः प्रभरन्ति तद्वत् इति । इन्द्रम् अन्यैः अजरयितुम् अशक्यम् अन्यान् जरयन्तम् हविर्भिः उक्षितम् सनातनम् युवानम् रक्षणाय हवामहे ॥ १ ॥

यस्मा॒दिन्द्रा॑द्बृह॒तः किं च॒नेमृ॒ते विश्वा॑न्यस्मि॒न्त्संभृ॒ताधि॑ वी॒र्या॑ ।
ज॒ठरे॒ सोमं॑ त॒न्वी॒३॒॑ सहो॒ महो॒ हस्ते॒ वज्रं॒ भर॑ति शी॒र्षणि॒ क्रतु॑म् ॥ २ ॥

यस्मा॑त् । इन्द्रा॑त् । बृ॒ह॒तः । किम् । च॒न । ई॒म् । ऋ॒ते । विश्वा॑नि । अ॒स्मि॒न् । सम्ऽभृ॑ता । अधि॑ । वी॒र्या॑ ।
ज॒ठरे॑ । सोम॑म् । त॒न्वि॑ । सहः॑ । महः॑ । हस्ते॑ । वज्र॑म् । भर॑ति । शी॒र्षणि॑ । क्रतु॑म् ॥ २ ॥

वेङ्कट० महतः यस्मात् इन्द्रात् ऋते व्यतिरिक्तं किम् अपि न विद्यते इति वाक्यशेषः । तस्मिन्निन्द्रे विश्वानि अपि वीर्याणि सम्भृतानि भवन्ति । स जठरे सोमम् धत्ते, शरीरे च महत् बलम्, हस्ते च वज्रम् बिभर्ति शिरसि प्रज्ञानं कर्म वा ॥ २ ॥

न क्षो॒णीभ्यां॑ परि॒भ्वे॑ त इन्द्रि॒यं न स॑मु॒द्रैः पर्व॑तैरिन्द्र ते॒ रथः॑ ।
न ते॒ वज्र॒मन्व॑श्नोति॒ कश्च॒न यदा॒शुभिः॒ पत॑सि॒ योज॑ना पु॒रु ॥ ३ ॥

न । क्षो॒णीभ्या॑म् । प॒रि॒ऽभ्वे॑ । ते॒ । इ॒न्द्रि॒यम् । न । स॒मु॒द्रैः । पर्व॑तैः । इ॒न्द्र॒ । ते॒ । रथः॑ ।
न । ते॒ । वज्र॑म् । अनु॑ । अ॒श्नो॒ति॒ । कः । च॒न । यत् । आ॒शुऽभिः॑ । पत॑सि । योज॑ना । पु॒रु ॥ ३ ॥

वेङ्कट० न द्यावापृथिवीभ्यां तव वीर्यं परिभवितुं शक्यते । तथा गच्छतः तव रथः इन्द्र! समुद्रैः पर्वतैः वा अनिहन्यमानः भवति । न तव वज्रम् अपि कः चित् आगच्छति यदा त्वम् आशुगमनैः अश्वैः पुरूणि योजनानि गच्छसि ॥ ३ ॥

१-१. नास्ति मूको. २-२. नास्ति वि' सर्व. ३. नास्ति वि' सर्व. ४. कस्मादपि वि' सर्व.
५. नास्ति मूको. ६. विरिता वरी वि' सर्व.

विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरन्ति वृषभाय सश्चते ।
वृषा यजस्व हविषा विदुष्टरः पिबेन्द्र सोमं वृषभेण भानुना ॥ ४ ॥

विश्वे । हि । अस्मै । यजताय । धृष्णवे । क्रतुम् । भरन्ति । वृषभाय । सश्चते ।
वृषा । यजस्व । हविषा । विदुःऽतरः । पिब । इन्द्र । सोमम् । वृषभेण । भानुना ॥ ४ ॥

वेङ्कट० 'सर्वे हि अस्मै' यष्टव्याय धृष्णवे वृषभाय सच्छमानाय' कर्म सम्भरन्ति । त्वं च वर्षिता हविषा यजस्व हविषा यजस्व । विद्वत्तरः, त्वं च इन्द्र ! वर्षित्रा' स्वतेजसा सोमम् पिब इति ॥ ४ ॥

वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे ।
वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ॥ ५ ॥

वृष्णः । कोशः । पवते । मध्वः । ऊर्मिः । वृषभऽअन्नाय । वृषभाय । पातवे ।
वृषणा । अध्वर्यू इति । वृषभासः । अद्रयः । वृषणम् । सोमम् । वृषभाय । सुस्वति ॥ ५ ॥

वेङ्कट० वर्षितुः सोमस्य मधुनः वेगः, अंशुः पवते सोमभक्षाय इन्द्राय पानार्थम् । वर्षितारौ अध्वर्युः प्रतिप्रस्थाता च तथा वर्षणशीलाः ग्रावाणः च वर्षितारम् सोमम् वर्षणशीलाय' सुन्वन्ति' ॥ ५ ॥

'इति द्वितीयाष्टके षष्ठाध्याये सप्तदशो वर्गः' ॥

वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।
वृष्णो मदस्य वृषभ त्वमीशिष इन्द्र सोमस्य वृषभस्य तृप्णुहि ॥ ६ ॥

वृषा । ते । वज्रः । उत । ते । वृषा । रथः । वृषणा । हरी इति । वृषभाणि । आयुधा ।
वृष्णः । मदस्य । वृषभ । त्वम् । ईशिषे । इन्द्र । सोमस्य । वृषभस्य । तृप्णुहि ॥ ६ ॥

वेङ्कट० निगदव्याख्याता ॥ ६ ॥

प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।
कुविन्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ॥ ७ ॥

प्र । ते । नावम् । न । समने । वचस्युवम् । ब्रह्मणा । यामि । सवनेषु । दधृषिः ।
कुवित् । नः । अस्य । वचसः । निऽबोधिषत् । इन्द्रम् । उत्सम् । न । वसुनः । सिचामहे ॥ ७ ॥

१-१. नास्ति वि° मूको. २. °सच्छमाना° मूको. ३. वर्षिणा मूको. ४. °तोन मूको. ५. सुन्वन्तु ल.
६-६. नास्ति मूको.

वेङ्कट० हे[1] धनवान्[2] तव अहम् मावत् इव यथा सङ्ग्रामे सायके स्तोत्रम् इच्छन्तम् इन्द्रं एतः मखेषु स्तोत्रेण अभिगच्छामि। अस्माकम् इदं वचनम् इन्द्रः बहु विबुध्यताम्। इन्द्रम् कूपम् इव उदकार्थं धनानाम् सर्वार्थं[3] सिञ्चामह इति ॥ ७ ॥

पुरा संबाधादभ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी ।
सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ॥ ८ ॥

पुरा । सम्ऽबाधात् । अभि । आ । ववृत्स्व । नः । धेनुः । न । वत्सम् । यवसस्य । पिप्युषी ।
सकृत् । सु । ते । सुमतिऽभिः । शतक्रतो इति शतऽक्रतो । सम् । पत्नीभिः । न । वृषणः । नसीमहि ॥८॥

वेङ्कट० सम्बाधायाः[4] पूर्वमेव अस्मान् 'अभि आ ववृत्स्व' धेनुः इव वत्सम् यवसेन तृप्ता। शतक्रतो! एव तव सुमतिभिः सकृत् सु[5] सम् नसीमहि सङ्गताः भवेम, यथा पुमांसः पत्नीभिः सङ्गच्छन्ते तद्वत्। वृषणः इव पत्नीभिः इत्येतत् प्रातुपमार्थीयावच्छिन्नतामिति ॥ ८ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥९॥

वेङ्कट० पूर्वम् (ऋ २,११,२१) व्याख्यातेति ॥ ९ ॥

'इति द्वितीयाष्टके पञ्चमाध्यायेऽष्टादशो वर्गः'[6] ॥

[१७]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । इन्द्रो देवता । जगती छन्दः, अष्टमीनवम्यौ त्रिष्टुभौ'[6] ।

तदस्मै नव्यमङ्गिरस्वदर्चत शुष्मा यदस्य प्रत्नथोदीरते ।
विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दृंहितान्यैरयत् ॥ १ ॥

तत् । अस्मै । नव्यम् । अङ्गिरस्वत् । अर्चत । शुष्माः । यत् । अस्य । प्रत्नऽथा । उत्ऽईरते ।
विश्वा । यत् । गोत्रा । सहसा । परिऽवृता । मदे । सोमस्य । दृंहितानि । ऐरयत् ॥१॥

वेङ्कट० तत् अस्मै इन्द्राय स्तोतव्यम्[7] अङ्गिरसः इव अर्चत । शोषकाः च बलाः । यत् अस्य पुरस्तात् उद्गच्छन्ति । यत् च सर्वान् मेघान् बलेन परिवृतान् सोमस्य मदे दृढान् अपि प्रेरितवानिति ॥ १ ॥

१. नास्ति मूको. २. नास्ति मूको. ३. बाधाया वि[1] मूको. ४-४. अनन्वितमूलम् वि[2] मूको. ५. नास्ति मूको. ६-६. नास्ति मूको. ७. सेलन्धन मूको.

स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत् ।
शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महिना प्रत्यमुञ्चत ॥ २ ॥

सः । भूतु । यः । ह । प्रथमाय । धायसे । ओजः । मिमानः । महिमानम् । आ । अतिरत् ।
शूरः । यः । युत्ऽसु । तन्वम् । परिऽव्यत । शीर्षणि । द्याम् । महिना । प्रति । अमुञ्चत ॥ २ ॥

वेङ्कट० सः भवतात्, यः प्रथमाय धात्रे इन्द्राय बलं कुर्वन् महत्त्वमात्मनः स्तोतॄन् वर्धयति, यः शूरः सङ्ग्रामेषु आत्मीयं शरीरं शत्रुभ्यः परिनिधत्ते रक्षति शिरसि द्याम् माहात्म्येन प्रति मुञ्चति धारयति ॥ २ ॥

अधाकृणोः प्रथमं वीर्यं महद्यदस्याग्रे ब्रह्मणा शुष्ममैरयः ।
रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्यक्पृथक् ॥ ३ ॥

अध । अकृणोः । प्रथमम् । वीर्यम् । महत् । यत् । अस्य । अग्रे । ब्रह्मणा । शुष्मम् । ऐरयः ।
रथेऽस्थेन । हरिऽअश्वेन । विऽच्युताः । प्र । जीरयः । सिस्रते । सध्र्यक् । पृथक् ॥ ३ ॥

वेङ्कट० अपि च त्वं पूर्वम् महत् वीर्यम् कृतवान् असि, यत् अस्य वीर्यस्य अग्रतः स्तोत्रेण शुष्मम् बलम् प्रेरयः। तस्मै वीर्याय ... । रथस्थेन हर्यश्वेन इन्द्रेण विच्याविताः क्षिप्रकारिण्यो धेनवः पृथक् ... सहगताः गच्छन्ति ... ॥ ३ ॥

अधा यो विश्वा भुवनाभि मज्मनेशानकृत्प्रवया अभ्यवर्धत ।
आद्रोदसी ज्योतिषा वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत् ॥ ४ ॥

अध । यः । विश्वा । भुवना । अभि । मज्मना । ईशानऽकृत् । प्रऽवयाः । अभि । अवर्धत ।
आत् । रोदसी इति । ज्योतिषा । वह्निः । आ । अतनोत् । सीव्यन् । तमांसि । दुधिता । सम् । अव्ययत् ॥ ४ ॥

वेङ्कट० अपि च यः सर्वाणि भुवनानि[1] बलेन अभिभवति, स स्वामित्वस्य कर्ता प्रवयाः अभि वर्धते। अनन्तरम् एव द्यावापृथिव्यौ ज्योतिषा[2] वोढा इन्द्रः विस्तारयति। सूच्येव ... तमांसि सीव्यन् दुर्निहितानि समव्ययति[3] ॥ ४ ॥

स प्राचीनान्पर्वतान्दृंहदोजसाधराचीनमकृणोदपामपः ।
अधारयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः ॥ ५ ॥

सः । प्राचीनान् । पर्वतान् । दृंहत् । ओजसा । अधराचीनम् । अकृणोत् । अपाम् । अपः ।
अधारयत् । पृथिवीम् । विश्वऽधायसम् । अस्तभ्नात् । मायया । द्याम् । अवऽस्रसः ॥ ५ ॥

१. भवतु वि॰ अ॰. २. नास्ति मूको. ३. नास्ति वि॰. ४. नास्ति वि॰ लपं. ५. ज्योतिषा लपं; °तिषा क. ६. संवय° वि॰ अ॰.

वेङ्कट० न [illegible] [illegible] [illegible] पृथिव्यां [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] अकरोत्। अथ [illegible] च [illegible] [illegible] पृथिवीम्, [illegible] च [illegible] [illegible] ॥ ५ ॥

'इति द्वितीयाष्टके षष्ठाध्याये एकोनविंशो वर्गः' ॥

सास्मा अरं बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेदसस्परि ।
येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः ॥ ६ ॥

सः । अस्मै । अरम् । बाहुऽभ्याम् । यम् । पिता । अकृणोत् । विश्वस्मात् । आ । जनुषः । वेदसः । परि ।
येन । पृथिव्याम् । नि । क्रिविम् । शयध्यै । वज्रेण । हत्वी । अवृणक् । तुविऽस्वनिः ॥ ६ ॥

वेङ्कट० स [illegible] अस्मै इन्द्राय पर्याप्तं भवति, यम् अस्य [illegible] करोति बाहुभ्याम् [illegible] एव [illegible] [illegible]। परिः [illegible] [illegible]। येन [illegible] [illegible] [illegible] [illegible] वज्रेण हत्वा 'नि अवृणक्' महास्वनः [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥ ६ ॥

अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम् ।
कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो३ येन मामहः ॥ ७ ॥

अमाजूःऽइव । पित्रोः । सचा । सती । समानात् । आ । सदसः । त्वाम् । इये । भगम् ।
कृधि । प्रऽकेतम् । उप । मासि । आ । भर । दद्धि । भागम् । तन्वः । येन । ममहः ॥ ७ ॥

वेङ्कट० [illegible] पित्रोः सह जीर्णा अस्मिन् गृहे पितृभ्यां [illegible] इति यदा [illegible], [illegible] पितृभ्यां च साधारणात् पितृगृहात् [illegible] [illegible] [illegible] इन्द्र! त्वाम् [illegible] भगम् [illegible]। तदा [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। येन [illegible] [illegible] [illegible] [illegible] ॥ ७ ॥

भोजं त्वामिन्द्र वयं हुवेम ददिष्ट्वमिन्द्रापांसि वाजान् ।
अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्द्र वस्यसो नः ॥ ८ ॥

भोजम् । त्वाम् । इन्द्र । वयम् । हुवेम । ददिः । त्वम् । इन्द्र । अपांसि । वाजान् ।
अविड्ढि । इन्द्र । चित्रया । नः । ऊती । कृधि । वृषन् । इन्द्र । वस्यसः । नः ॥ ८ ॥

१-१. नास्ति मूको. २. [illegible] वि' कर्ष. ३-३. [illegible] [illegible] वि'. ४. [illegible] वि' अ'. ५. नास्ति वि' कर्ष. ६-६. [illegible] वि' अ'. ७. [illegible] [illegible] वि'. ८-८. [illegible] [illegible] वि'; [illegible] [illegible] वि' कर्ष; [illegible] अ' क.

वेङ्कट० दातारम् इन्द्र! त्वा वयम् हुवेम । दाता त्वम् इन्द्र! कर्माणि जानासि च । त्वम् अस्मान् त्वं विशेषेण रक्षणेन । कुरु धनम्[1] धनीयस, अस्मास्विति ॥ ८ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ९ ॥

वेङ्कट० पूर्वम् (ऋ २.११.२१) व्याख्यातेयम् ऋक् ॥ ९ ॥

[2]इति द्वितीयाष्टके षष्ठाध्याये विंशो वर्गः[2] ॥

[१८]

[3]गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः ।
दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत् ॥ १ ॥

प्रातरिति । रथः । नवः । योजि । सस्निः । चतुःऽयुगः । त्रिऽकशः । सप्तऽरश्मिः ।
दशऽअरित्रः । मनुष्यः । स्वःऽसाः । सः । इष्टिऽभिः । मतिऽभिः । रंह्यः । भूत् ॥ १ ॥

वेङ्कट० प्रातरेव रथः नवतरः युक्तः[4] युक्तः चतुर्भिः धुरैः युक्तः त्रिभिः च कशाभिः सप्तभिः रश्मिभिः च दशभिः अरित्रैः च मनुष्येभ्यो हितः स्वर्गलाभ सम्पन्नः । सः रथः इष्टिभिः स्तुतिभिः च रंहणीयः एव भवति । तत्र महर्त्विजो युगाः, कशो यष्टिः धारणीति कशाः, एवा यस्या भवन्ति, सप्त छन्दांसि ॥ १ ॥

सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता ।
अन्यस्या गर्भमन्य ऊ जनन्त सो अन्येभिः सचते जेन्यो वृषा ॥ २ ॥

सः । अस्मै । अरम् । प्रथमम् । सः । द्वितीयम् । उतो इति । तृतीयम् । मनुषः । सः । होता ।
अन्यस्याः । गर्भम् । अन्ये । ऊँ इति । जनन्त । सः । अन्येभिः । सचते । जेन्यः । वृषा ॥ २ ॥

वेङ्कट० सः यज्ञः इन्द्राय प्रथमम् पर्याप्तः प्रातःसवने । एवं माध्यन्दिने तृतीयसवने च । सः[5]

१ नास्ति वि[1] लभ. २. ०प मूको. ३-३. नास्ति मूको. ४. युक्तः क, कर्ण; योजित इत्यर्थः मुद्रितपाठः. ५. नास्ति वि[2] अ.

मतः[1] मनुष्यस्य ईर्यत्र स्वधनं प्रयच्छतः प्रज्ञाता, देवान् वा आत्मना आह्वयति । पृथिव्या उत्पन्नैः हविर्भिः कामयन्ते च यज्ञो जायते इति पृथिव्याः गर्भः उच्यते । तम् ऋत्विजः स्तुवन्ति । स च आत्मीयैः देवैः सङ्गच्छते अपरोक्षः कामानां वर्धिता इति ॥ २ ॥

हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन ।
मो षु त्वामत्र बहवो हि विप्रा नि रीरमन् यजमानासो अन्ये ॥ ३ ॥

हरी इति । नु । कम् । रथे । इन्द्रस्य । योजम् । आऽयै । सुऽउक्तेन । वचसा । नवेन ।
मो इति । सु । त्वाम् । अत्र । बहवः । हि । विप्राः । नि । रीरमन् । यजमानासः । अन्ये ॥ ३ ॥

वेङ्कट० एवं विततं यज्ञं कर्तुं अस्मिन्नहनि इन्द्रस्य योजयामि अश्वौ सुष्टुताभ्यां स्तोत्रेण नवतरेण । मा त्वाम् अन्ये यजमानाः कस्मिंश्चिदहनि आह्वयन्तु । बहवः हि भवन्तु[2] मेधाविनो लोके । ते सर्वे न रमयन्तु । अत्र निरमन्तु अन्ये यजमाना इति ॥ ३ ॥

आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः ।
आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥ ४ ॥

आ । द्वाभ्याम् । हरिऽभ्याम् । इन्द्र । याहि । आ । चतुःऽभिः । आ । षट्ऽभिः । हूयमानः ।
आ । अष्टाभिः । दशऽभिः । सोमऽपेयम् । अयम् । सुतः । सुऽमख । मा । मृधः । करिति कः ॥ ४ ॥

वेङ्कट० सोमपाने प्रत्यागमनम् । अयं सोमः त्वदर्थं सुतः, सम्प्रति मा अपूजायां कार्षीः, क्रोधं मा कुर्विति[4] ॥ ४ ॥

आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः ।
आ पञ्चाशता सुरथेभिरिन्द्रा षष्ट्या सप्तत्या सोमपेयम् ॥ ५ ॥

आ । विंशत्या । त्रिंशता । याहि । अर्वाङ् । आ । चत्वारिंशता । हरिऽभिः । युजानः ।
आ । पञ्चाशता । सुरथेभिः । इन्द्र । आ । षष्ट्या । सप्तत्या । सोमऽपेयम् ॥ ५ ॥

वेङ्कट० विंशत्यादिका व्याख्याता ॥ ५ ॥

[3]इति द्वितीयाष्टके षष्ठाध्याये एकविंशो वर्गः[3] ॥

आशीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः ।
अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ॥ ६ ॥

---

१. यज्ञे वि॰ कर्म. २. बालि वि॰ मूर्च. ३. इतः परम् विंशो विंशत्यादिव्याख्याताः मूको. ४. कुर्विति वि॰. ४-४. नास्ति मूको.

आ । अशीत्या । नवत्या । याहि । अर्वाङ् । आ । शतेन । हरिऽभिः । उह्यमानः ।
अयम् । हि । ते । शुनऽहोत्रेषु । सोमः । इन्द्र । त्वाऽया । परिऽसिक्तः । मदाय ॥ ६ ॥

वेङ्कट० त्वाया[1] त्वत्कामनया । तव मदार्थम् परिषिक्तः इति ॥ ६ ॥

मम ब्रह्मेन्द्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य ।
पुरुत्रा हि विहव्यो बभूथास्मिञ्छूर सवने मादयस्व ॥ ७ ॥

मम । ब्रह्म । इन्द्र । याहि । अच्छ । विश्वा । हरी इति । धुरि । धिष्व । रथस्य ।
पुरुऽत्रा । हि । विऽहव्यः । बभूथ । अस्मिन् । शूर । सवने । मादयस्व ॥ ७ ॥

वेङ्कट० इन्द्र! मम स्तोत्राणि प्रति आगच्छ । तदर्थम् रथस्य धुरि अश्वौ स्थापय । त्वं बहुषु स्थानेषु विविधं [illegible] इति [illegible] । [illegible] शूर! मादयस्व इति ॥ ७ ॥

न म इन्द्रेण सख्यं वि योषदस्मभ्यमस्य दक्षिणा दुहीत ।
उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये जिगीवांसः स्याम ॥ ८ ॥

न । मे । इन्द्रेण । सख्यम् । वि । योषत् । अस्मभ्यम् । अस्य । दक्षिणा । दुहीत ।
उप । ज्येष्ठे । वरूथे । गभस्तौ । प्रायेऽप्राये । जिगीवांसः । स्याम ॥ ८ ॥

वेङ्कट० निहत्य [illegible] ।
यथेष्टं [illegible] ॥ १ ॥

ततो [illegible] ते [illegible] ।
[illegible] अस्माकं [illegible] ॥ २ ॥

[illegible] ।
[illegible] ॥ ३ ॥

इन्द्र![6] त्वां वयं[7] [illegible] जन्मनि जन्मनि ।
[illegible] ॥ ४ ॥

इत्येवमुक्त्वा[10] गृत्समदः [illegible] दक्षिणे ।
[illegible] ॥ ५ ॥ (बृहद्दे ४,७०-७३,७५) इति ॥

---

१. त्वया मूको. २. °[illegible]° मूको. ३. [illegible] मूको. ४. [illegible] ड. ५-५. [illegible] मूको. ६. [illegible] मूको. ७. इन्द्र मूको. ८. न ड. ९-९. [illegible] मूको. १०. [illegible]. ११. [illegible] मूको.

वेङ्कट० न मे इदम् इन्द्रेण सख्यम् अस्माकम् विपुलं भवतु । अन्यत्सर्वम् अस्य इन्द्रस्य दानम् आभिलषितं प्रयच्छतु । वयम् इन्द्रस्य श्रेष्ठे धारके मन्त्रणे भाहो उरुव्याम तदात्मनः सखाय प्रमाणेऽप्रमाणे कल्पनं त्रियामाः इति ॥ ८ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ९ ॥

वेङ्कट० पूर्वम् (ऋ २,११,२१) व्याख्याता ॥ ९ ॥

'इति द्वितीयाष्टके षष्ठाध्याये त्रयोविंशो वर्गः' ॥

[१९]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
इन्द्रो देवता । त्रिष्टुप् छन्दः' ।

अपाय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः ।
यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः ॥ १ ॥

अपायि । अस्य । अन्धसः । मदाय । मनीषिणः । सुवानस्य । प्रयसः ।
यस्मिन् । इन्द्रः । प्रऽदिवि । ववृधानः । ओकः । दधे । ब्रह्मण्यन्तः । च । नरः ॥ १ ॥

वेङ्कट० अस्य अन्नभूतस्य मदार्थं मेधाविनः अभिषूयमाणस्य अन्नस्य' अंशुः अपायि, यस्मिन् इन्द्रः पुराणे प्रवर्धमानो वा वर्धमानः स्थानं धारयति, स्तोत्रमिच्छन्तः मनुष्याः च इति ॥ १ ॥

अस्य मन्दानो मध्वो वज्रहस्तोऽहिमिन्द्रो अर्णोवृतं वि वृश्चत् ।
प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त ॥ २ ॥

अस्य । मन्दानः । मध्वः । वज्रऽहस्तः । अहिम् । इन्द्रः । अर्णःऽवृतम् । वि । वृश्चत् ।
प्र । यत् । वयः । न । स्वसराणि । अच्छ । प्रयांसि । च । नदीनाम् । चक्रमन्त ॥ २ ॥

वेङ्कट० अस्य मधुमदकस्य सोमस्य तृप्यन् वज्रहस्तः इन्द्रः उदकस्य वारकम् अहिम् वि वृश्चत् । यदा पक्षिण इव स्वावासभूतानि प्रति नदीनाम् वेगा' न च चक्रमन्त गन्तुमुपचक्रमिरे । यदि च इत्यादि, तदानीमेव नदीषु प्रावर्तयदित्यर्थः ॥ २ ॥

१. दाधुस वि' भ'. २-२. नास्ति मूको. ३. अन्नस्य मूको. ४. वेगा वेगान वि'; वेगान् वेगान् अ'; वेगा वि' भ'; वेगान् ड.

स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम् ।
अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत् ॥ ३ ॥

सः । माहिनः । इन्द्रः । अर्णः । अपाम् । प्र । ऐरयत् । अहिऽहा । अच्छ । समुद्रम् ।
अजनयत् । सूर्यम् । विदत् । गाः । अक्तुना । अह्नाम् । वयुनानि । साधत् ॥ ३ ॥

वेङ्कट० स महान् इन्द्रः अपाम् अर्णः समुद्रम् प्रति प्र ऐरयत् अहिहन्ता । सूर्यम् च अजनयत्, अङ्गिरोभ्यः गाः च अविन्दत्, अक्तुनाशनेन तेजसा अह्नाम् प्रज्ञानानि साधयति ॥ ३ ॥

सो अप्रतीनि मनवे पुरूणीन्द्रो दाशद्दाशुषे हन्ति वृत्रम् ।
सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातौ ॥ ४ ॥

सः । अप्रतीनि । मनवे । पुरूणि । इन्द्रः । दाशत् । दाशुषे । हन्ति । वृत्रम् ।
सद्यः । यः । नृऽभ्यः । अतसाय्यः । भूत् । पस्पृधानेभ्यः । सूर्यस्य । सातौ ॥ ४ ॥

वेङ्कट० सः इन्द्रः मनुष्याय यजमानाय असह्यानि पुरूणि धनानि प्रयच्छति, हन्ति च वृत्रम्, सद्यः एव यः मनुष्येभ्यः सततगमनीयः अभूत् स्पर्धमानेभ्यः 'सूर्यस्य [illegible]' युद्धे सम्भजन इति । '[illegible]' (ऋ १,६१,१५) इत्युक्तमिति च ॥ ४ ॥

स सुन्वत इन्द्रः सूर्यमा देवो रिणङ्मर्त्याय स्तवान् ।
आ यद्रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ॥ ५ ॥

सः । सुन्वते । इन्द्रः । सूर्यम् । आ । देवः । रिणक् । मर्त्याय । स्तवान् ।
आ । यत् । रयिम् । गुहत्ऽअवद्यम् । अस्मै । भरत् । अंशम् । न । एतशः । दशस्यन् ॥ ५ ॥

वेङ्कट० सः इन्द्रः सुन्वते यजमानाय सूर्यम् नाम अश्वम् आ रिणक् अदात् स्तूयमानः यदा 'आ भरत्' धने [illegible] निगदनम् अस्मै इन्द्राय पिता पुत्राय अंशम् इव प्रयच्छन् एतशनामा ऋषिः ॥ ५ ॥

"इति द्वितीयाष्टके षष्ठाध्याये त्रयोविंशो वर्गः" ॥

स रन्धयत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय ।
दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य ॥ ६ ॥

---

१. [illegible] वि॰ [illegible]   २-२. [illegible] वि॰, [illegible] अ॰, [illegible] वि॰, [illegible]   ४. नास्ति वि॰   ५-५ [illegible] मूको.   ५. [illegible] वि॰ [illegible] अ॰.
६. [illegible] वि॰.   ७-७. नास्ति मूको.

सः । रन्धयत् । सऽदिवः । सारथये । शुष्णम् । अशुषम् । कुयवम् । कुत्साय ।
दिवःऽदासाय । नवतिम् । च । नव । इन्द्रः । पुरः । वि । ऐरत् । शम्बरस्य ॥ ६ ॥

वेङ्कट० सः वशमनयत् सोमाभिषवित्रे [illegible] स्वयम् [illegible] कुत्से शुष्णम् [illegible] शोषयितृम् [illegible] कुयवम् च कुत्साय [illegible] । दिवोदासाय राज्ञे नवतिम् नव च इन्द्रः पुरः शम्बरस्य स्वभूताः वि ऐरयत् इति ॥ ६ ॥

एवा त इन्द्रोचथमहेम श्रवस्या न त्मना वाजयन्तः ।
अश्याम तत् साप्तमाशुषाणा ननमो वधरदेवस्य पीयोः ॥ ७ ॥

एव । ते । इन्द्र । उचथम् । अहेम । श्रवस्या । न । त्मना । वाजयन्तः ।
अश्याम । तत् । साप्तम् । आशुषाणाः । ननमः । वधः । अदेवस्य । पीयोः ॥ ७ ॥

वेङ्कट० एव तव इन्द्र! स्तोत्रं प्रेरितवन्तः, यथा [illegible] स्तुवन्ति । एवं [illegible] स्तुवन्तः [illegible] सप्तपरिमाणं [illegible] त्वां स्तुतिभिः [illegible] । तदश्याम असुरस्य '[illegible]' ॥ ७ ॥

एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः ।
ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः ॥ ८ ॥

एव । ते । गृत्सऽमदाः । शूर । मन्म । अवस्यवः । न । वयुनानि । तक्षुः ।
ब्रह्मण्यन्तः । इन्द्र । ते । नवीयः । इषम् । ऊर्जम् । सुऽक्षितिम् । सुम्नम् । अश्युः ॥ ८ ॥

वेङ्कट० 'एवम् ते गृत्समदाः' हे शूर! स्तोत्राणि स्तुतवन्तः [illegible] नवतरं [illegible] गृहं सुखं च प्राप्नुयुः ॥ ८ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः ॥ ९ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ९ ॥

वेङ्कट० पूर्वम् (ऋ २, ११, २१) व्याख्याता ॥ ९ ॥

"इति द्वितीयाष्टके षष्ठाध्याये चतुर्विंशो वर्गः" ॥

---

१. [illegible] वि' अ'. २-२. [illegible] वि' अ'. ३. [illegible]
४-४. नास्ति मूको.

[२०]

[1]गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
इन्द्रो देवता । त्रिष्टुप् छन्दः, तृतीया विराड्रूपा[2] ।

वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर्न रथम् ।
विपन्यवो दीध्यतो मनीषा सुम्नमियक्षन्तस्त्वावतो नॄन् ॥ १ ॥

वयम् । ते । वयः । इन्द्र । विद्धि । सु । नः । प्र । भरामहे । वाजयुः । न । रथम् ।
विपन्यवः । दीध्यतः । मनीषा । सुम्नम् । इयक्षन्तः । त्वाऽवतः । नॄन् ॥ १ ॥

वेङ्कट० वयम् युष्माकं 'इन्द्र! भर्तारः' तेषाम् । अस्मान्[3] सुष्टु बुध्यस्व । प्र भराम त्वाम् अन्नम् इच्छन् इव महान्तं कर्मसु । स्तोतारः स्तुत्या दीप्यमानाः सुखं प्राप्नुम् इच्छन्तः त्वत्सदृशान् नेतॄन् अभिगच्छन्तीति ॥ १ ॥

त्वं न इन्द्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान् ।
त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा ॥ २ ॥

त्वम् । नः । इन्द्र । त्वाभिः । ऊती । त्वाऽयतः । अभिष्टिऽपा । असि । जनान् ।
त्वम् । इनः । दाशुषः । वरूता । इत्थाऽधीः । अभि । यः । नक्षति । त्वा ॥ २ ॥

वेङ्कट० त्वम्[4] इन्द्र! त्वदीयाभिः ऊतिभिः त्वत्कामान् अभीष्टानां रक्षिता असि[4] अस्मान् जनान् । त्वम् स्वामी दाशुषः रक्षिता, यः त्वाम् एवंविधकर्मा अभि व्याप्नोति ॥ २ ॥

स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता ।
यः शंसन्तं यः शशमानमूती पचन्तं च स्तुवन्तं च प्रणेषत् ॥ ३ ॥

सः । नः । युवा । इन्द्रः । जोहूत्रः । सखा । शिवः । नराम् । अस्तु । पाता ।
यः । शंसन्तम् । यः । शशमानम् । ऊती । पचन्तम् । च । स्तुवन्तम् । च । प्रऽनेषत् ॥ ३ ॥

वेङ्कट० स इन्द्रः युवा अस्माकम् आह्वातव्यः कल्याणः सखा नेतॄणाम् अस्तु रक्षकः । यः शंसन्तम् मार्गेण नयति, करोति उद्योगकर्मा, अस्मार्थम् उद्यच्छन्तम् पचन्तम् स्तुवन्तम् च ॥ ३ ॥

तमु स्तुष इन्द्रं तं गृणीषे यस्मिन् पुरा वावृधुः शाशदुश्च ।
स वस्वः कामं पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ॥ ४ ॥

१-१. नास्ति मूको. २-२. पाणमदो वि. ३. अस्मान् वि. ४. त्वम् अस्मात् मूको.

तम् । ऊँ इति । स्तुषे । इन्द्रम् । तम् । गृणीषे । यस्मिन् । पुरा । वावृधुः । शाशदुः । च ।
सः । वस्वः । कामम् । पीपरत् । इयानः । ब्रह्मण्यतः । नूतनस्य । आयोः ॥ ४ ॥

वेङ्कट० तम एव स्तौमि इन्द्रम्, तम् एव च[१] शंसामि, यस्मिन् पुरा स्तोतारो वावृधुः[२] शाशदुः च शत्रून्। 'सः धनस्य याच्यमानो' मा[३] धनेन कामम् पूरयतु स्तुतिम् गच्छन् ब्रह्मशीलस्य मनुष्यस्य नूतनस्य ॥ ४ ॥

सो अङ्गिरसामुचथा जुजुष्वान् ब्रह्मा तूतोदिन्द्रो गातुमिष्णन् ।
मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथत् पूर्व्याणि ॥ ५ ॥

सः । अङ्गिरसाम् । उचथा । जुजुष्वान् । ब्रह्म । तूतोत् । इन्द्रः । गातुम् । इष्णन् ।
मुष्णन् । उषसः । सूर्येण । स्तवान् । अश्नस्य । चित् । शिश्नथत् । पूर्व्याणि ॥ ५ ॥

वेङ्कट० स इन्द्रः अङ्गिरसाम् स्तोत्राणि सेवमानः कर्माणि प्रेरयति गमनम् इच्छन्[४]। सूर्येण सह उषसः विनाशयन् स्तूयमानः[५] मेघस्य अपि श्लथयति पूर्वकालप्रादुर्भूतानि शरीराणि[६] ॥ ५ ॥

'इति द्वितीयाष्टके षष्ठाध्याये पञ्चविंशो वर्गः' ॥

स ह श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः ।
अव प्रियमर्शसानस्य साह्वाञ्छिरो भरद् दासस्य स्वधावान् ॥ ६ ॥

सः । ह । श्रुतः । इन्द्रः । नाम । देवः । ऊर्ध्वः । भुवत् । मनुषे । दस्मऽतमः ।
अव । प्रियम् । अर्शसानस्य । सह्वान् । शिरः । भरत् । दासस्य । स्वधाऽवान् ॥ ६ ॥

वेङ्कट० सः विश्रुतः इन्द्रः नाम देवः श्रान्तः ऊर्ध्वः भवति मनुष्याणां दर्शनीयतमः। सोऽयं प्रजा बाधमानस्य वृत्रासुरस्य प्रियम् शिरः अवाभरत्[७] सहमानः अन्नवान् इति ॥ ६ ॥

स वृत्रहेन्द्रः कृष्णयोनीः पुरंदरो दासीरैरयद् वि ।
अजनयन् मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत् ॥ ७ ॥

सः । वृत्रऽहा । इन्द्रः । कृष्णऽयोनीः । पुरम्ऽदरः । दासीः । ऐरयत् । वि ।
अजनयत् । मनवे । क्षाम् । अपः । च । सत्रा । शंसम् । यजमानस्य । तूतोत् ॥ ७ ॥

वेङ्कट० 'सः वृत्रहा इन्द्रः' कृष्णासुरो यासां योनिषु ताः असुरस्त्रीः पुरंदरः वज्रेण नि जघान 'यः कृष्णगर्भा निरहन्' (ऋ १,१०१,१) इत्युक्तमिति। तथा मनवे भूमिम् उदकम् च अजनयत्। सत्यम् एव यजमानस्य अभिलषितं प्रेरयति ॥ ७ ॥

१. नास्ति कर्प. २. मर्द वि' कर्प. ३-३. मिरन्धन् धनमानो मूको. ४. नास्ति वि'. ५. स्तोत्रेति वि'. ६-६. नास्ति मूको. ७. भरत् वि'; भरत् कर्प.

तस्मै तवस्यमनु दायि सत्रेन्द्राय देवेभिरर्णसातौ ।
प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत् ॥ ८ ॥

तस्मै । तवस्यम् । अनु । दायि । सत्रा । इन्द्राय । देवेभिः । अर्णऽसातौ ।
प्रति । यत् । अस्य । वज्रम् । बाह्वोः । धुः । हत्वी । दस्यून् । पुरः । आयसीः । नि । तारीत् ॥८॥

वेङ्कट० तवस्यं बलिकर्मकमन्वदायि सत्रा अस्य बलवत्त्वं स्तुत्वा अर्णसातौ इन्द्राय सत्राजिः देवैः सम्यग्राज्यकामयमाने कृताय । 'अनु ते दायि मह इन्द्रियाय' (ऋ ६,२५,८) इति मन्त्रः । स्तोतारः यदा अस्य वज्रं बाह्वोः निदधुः देवाः, तदा दस्यून् हत्वा शत्रूणाम् आयसीः निर्मिताः पुरीः नि तारीत् इति ॥८॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।
शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥९॥

वेङ्कट० पूर्वम् (ऋ २,११,२१) व्याख्याता ॥ ९ ॥

'इति द्वितीयाष्टके सप्तमाध्याये षड्विंशो वर्गः.'।

[२१]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
इन्द्रो देवता । जगती छन्दः, षष्ठी त्रिष्टुप्' ।

विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते ।
अश्वजिते गोजिते अब्जिते भरेन्द्राय सोमं यजताय हर्यतम् ॥ १ ॥

विश्वऽजिते । धनऽजिते । स्वःऽजिते । सत्राऽजिते । नृऽजिते । उर्वराऽजिते ।
अश्वऽजिते । गोऽजिते । अप्ऽजिते । भर । इन्द्राय । सोमम् । यजताय । हर्यतम् ॥ १ ॥

वेङ्कट० 'विश्वजित' इत्येतस्य प्रथमः शेषः । स्वः[1] स्वर्गः । सत्राशब्दो महत्त्वपर्यायः, महदपि जयति धनम् इति । हर्यतम् स्पृहणीयम् इति ॥ १ ॥

अभिभुवेऽभिभङ्गाय वन्वतेऽषाळ्हाय सहमानाय वेधसे ।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत ॥ २ ॥

१. नास्ति वि° अर्थ. २-२. नास्ति मूको.

अभिऽभुवे । अभिऽभङ्गाय । वन्वते । अषाळ्हाय । सहमानाय । वेधसे ।
तुविऽग्रये । वह्नये । दुस्तरीतवे । सत्राऽसहे । नमः । इन्द्राय । वोचत ॥ २ ॥

वेङ्कट० शत्रूणामभिभवित्रे पुरामभिभञ्जकाय[1] वनते शत्रूणां कुर्वते[2] अशत्रुभिरसोढाय[3] शत्रून् सहमानाय 'मेधस्य विधात्रे' बहुस्तुत्याय वोढ्रे शत्रुभिः दुस्तराय बहूनाम् अभिभवित्रे इन्द्राय[4] नमस्कारं ब्रूत ॥ २ ॥

सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः ।
वृतंचयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या ॥ ३ ॥

सत्राऽसहः । जनऽभक्षः । जनम्ऽसहः । च्यवनः । युध्मः । अनु । जोषम् । उक्षितः ।
वृतम्ऽचयः । सहुरिः । विक्षु । आरितः । इन्द्रस्य । वोचम् । प्र । कृतानि । वीर्या ॥ ३ ॥

वेङ्कट० बहूनामभिभविता जनानां भक्षयिता अभिभविता परेषाम्[5] । च्यावयिता च[6] योद्धा सेवायाम् सोमेन सिक्तः । परिवृतस्य धनस्य चायिता सहनशीलः प्रजासु उपासुचैः[7] सम्भाव्यः । तस्य इन्द्रस्य 'प्र ब्रवीमि'[8] कृतानि वीर्याणि ॥ ३ ॥

अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः ।
रध्रचोदः श्नथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषसः स्वर्जनत् ॥ ४ ॥

अननुऽदः । वृषभः । दोधतः । वधः । गम्भीरः । ऋष्वः । असमष्टऽकाव्यः ।
रध्रऽचोदः । श्नथनः । वीळितः । पृथुः । इन्द्रः । सुऽयज्ञः । उषसः । स्वः । जनत् ॥ ४ ॥

वेङ्कट० अननुदातानिर्लिप्तानन्यकृतबलमहानः वर्षिता कामानां कम्पयतः हन्ता, "महत्वात् महान्" असमाप्तस्तोत्र, रध्र"[9] समृद्ध"[10] स्पर्धं कुर्वन्ति शरीरे इति समृद्धानां प्रेरक, श्नथयिता[11] सेनामहत्त्व दृढीकृत पृथुः इन्द्रः शोभनयज्ञः[12] उषसः स्व आदित्यं च जनयति ॥ ४ ॥

यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः ।
अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत ॥ ५ ॥

यज्ञेन । गातुम् । अप्ऽतुरः । विविद्रिरे । धियः । हिन्वानाः । उशिजः । मनीषिणः ।
अभिऽस्वरा । निऽसदा । गाः । अवस्यवः । इन्द्रे । हिन्वानाः । द्रविणानि । आशत ॥ ५ ॥

१. पुराणाम° वि° अ°. २. नास्ति वि°³ लप. ३. °असोढ° मूको. ४-४. स्पर्धते° वि° अ°. ५. नास्ति मूको. ६. च नास्ति वि° अ°. ७. नास्ति लप. ८. ब्रवीमि° अ°. ९-९. नास्ति वि° लप. १०-१०. नास्ति लप. ११. श्नथ° मूको. १२. नास्ति वि°³ अ° लप. १३. स्तवयिता (°ता) लप. १४. °यज्ञः च लप.

वेङ्कट० यतेन यथा वेदयितुः इन्द्रस्य गमने सम्यग्यन्तः कर्माणि प्रेरयन्तः[1] ऋत्विजः मेधाविनः अभिगमनेन निधनेन च अस्मिन् इन्द्रे यागः हित्वाना रक्षणेच्छवो मनवोः धनानि प्राप्नुवन्ति ॥ ५ ॥

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ॥ ६ ॥

इन्द्र । श्रेष्ठानि । द्रविणानि । धेहि । चित्तिम् । दक्षस्य । सुभगऽत्वम् । अस्मे इति ।
पोषम् । रयीणाम् । अरिष्टिम् । तनूनाम् । स्वाद्मानम् । वाचः । सुदिनऽत्वम् । अह्नाम् ॥ ६ ॥

वेङ्कट० हे इन्द्र! त्वं प्रशस्यतमानि धनानि प्रयच्छ । तथा प्राणस्य चित्तिम् प्रयच्छ । अस्माकं शरीर-सौभाग्यं[2] देहि । धनानाम् पोषम् देहि[3], तथा शरीराणाम् अविनाशम्, वाचः मधुरत्वम्, अह्नाम् सुदिनत्वम् इति ॥ ६ ॥

'इति द्वितीयाष्टके षष्ठाध्याये सप्तविंशो वर्गः' ॥

[२२]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । इन्द्रो देवता । प्रथमा अष्टिः, द्वितीयातृतीये अतिशाक्वर्यौ, चतुर्थी अष्टिः अतिशाक्वरी वा छन्दः' ।

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् ।
स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ १ ॥

त्रिऽकद्रुकेषु । महिषः । यवऽआशिरम् । तुविऽशुष्मः । तृपत् । सोमम् । अपिबत् । विष्णुना । सुतम् । यथा । अवशत् ॥ सः । ईम् । ममाद । महि । कर्म । कर्तवे । महान् । उरुम् । सः । एनम् । सश्चत् । देवः । देवम् । सत्यम् । इन्द्रम् । सत्यः । इन्दुः ॥ १ ॥

वेङ्कट० त्रिकद्रुकेषु[4] यज्ञेषु महान् यवसक्तुमयाणे बहुबलः तृप्यन् सोमम् अपिबत् विष्णुना सह सुतम् यथा कामयते । सः च एनं मदयति महत् कर्म कर्तुं वृत्रवधादिकं महान्तं विस्तीर्णम् । सः सोमः एनम् सेवते देवः देवम् सत्यकर्माणम्[5] इन्द्रम्[6] सत्यकर्मा इन्दुः[7] ॥ १ ॥

अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे ।
अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ २ ॥

---

१. प्रेरयन्ति वि॰ अ॰. २. शरीरस्य सौ॰ वि॰ अ॰. ३-३. नास्ति वि॰ अ॰. ४-४. नास्ति मूको. ५. नास्ति अ॰. ६. नास्ति वि॰ अ॰. ७. इन्दुः वि॰. ८. इन्दुः मूको.

अध । त्विषिऽमान् । अभि । ओजसा । क्रिविम् । युधा । अभवत् । आ । रोदसी इति ।
अपृणात् । अस्य । मज्मना । प्र । वावृधे ॥ अधत्त । अन्यम् । जठरे । प्र । ईम् । अरिच्यत ।
सः । एनम् । सश्चत् । देवः । देवम् । सत्यम् । इन्द्रम् । सत्यः । इन्दुः ॥ २ ॥

वेङ्कट० अध दीप्तिमान् अभि अभवत् युद्धेन क्रिविम्, 'क्रिविः' (निघ ३.२१) इति कूपनाम, मेघम् । अथ अस्य वज्रस्य बलेन द्यावापृथिवी तेजसा आ अपूरयत्, स्वयं च प्रवृद्ध आसीत् । अध अन्यत् सोमम् नः जठरे निदधे, प्र अरिच्यत पानशिष्टम् ॥ २ ॥

साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः ।
दाता राधः स्तुवते काम्यं वसु सैनं सश्चद् देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥ ३ ॥

साकम् । जातः । क्रतुना । साकम् । ओजसा । ववक्षिथ । साकम् । वृद्धः । वीर्यैः । ससहिः ।
मृधः । विऽचर्षणिः ॥ दाता । राधः । स्तुवते । काम्यम् । वसु । सः । एनम् ।
सश्चत् । देवः । देवम् । सत्यम् । इन्द्रम् । सत्यः । इन्दुः ॥ ३ ॥

वेङ्कट० प्रज्ञानेन बलेन च सह जातः त्वं सर्वं जगद् वहसि सह वीर्यैः प्रवृद्धः सोढा शत्रून् अथवा विद्रष्टा । दाता इति तृन् प्रत्ययः, दानशीलः । स्तुवते साधकम् अभिलषितं धनं ददासि ॥ ३ ॥

तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यद् देवस्य शवसा प्रारिणा असुं रिणन्नपः ।
भुवद् विश्वमभ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषम् ॥ ४ ॥

तव । त्यत् । नर्यम् । नृतो इति । अपः । इन्द्र । प्रथमम् । पूर्व्यम् । दिवि । प्रऽवाच्यम् । कृतम् ।
यत् । देवस्य । शवसा । प्र । अरिणाः । असुम् । रिणन् । अपः ।
भुवत् । विश्वम् । अभि । अदेवम् । ओजसा । विदात् । ऊर्जम् । शतऽक्रतुः । विदात् । इषम् ॥ ४ ॥

वेङ्कट० तव पुराणं नर्यम् नेतः ! कर्म पूर्वकालकृतम्[1] दिवि स्थितस्य मम प्रथमम् प्रवाच्यम् भवति । किं तत् कर्म । यत् त्वम् देवस्य तव बलेन प्र अगमयः अभिलाषम् असुरं वृत्रम् अवधीः । निर्गमयन् । अभि भवतु सर्वम् असुरं बलेन शतक्रतुः सम्भक्तं[4] रसम् अन्नं च ॥ ४ ॥

[5]इति द्वितीयाष्टके षष्ठाध्यायेऽष्टाविंशो वर्गः[5] ॥

१. 'धत्त = वि'. २. दकुम वि° ब°. ३. पूर्व° वि° ब° . ४. ना च वि° ब° अर्द.
५-५. नास्ति मूको.

[२३]

[1]गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । प्रथमापञ्चमीनवम्ये-
कादशीत्रयोदशीसप्तदश्येकोनविंशीनां ब्रह्मणस्पतिर्देवता, अन्यासां बृहस्पतिः ।
जगती छन्दः, पञ्चदश्येकोनविंश्यौ त्रिष्टुभौ[1] ॥

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ १ ॥

गणानाम् । त्वा । गणऽपतिम् । हवामहे । कविम् । कवीनाम् । उपमश्रवःऽतमम् ।
ज्येष्ठऽराजम् । ब्रह्मणाम् । ब्रह्मणः । पते । आ । नः । शृण्वन् । ऊतिऽभिः । सीद । सदनम् ॥ १ ॥

वेङ्कट० देवगणानां पतिं त्वाम्[2] हवामहे । कवीनाम् अपि कविम् । येषां श्रुतेन अन्नस्य श्रुतमुपमीयते ते उपमश्रवसः[3], तान् अपि अयम् अतिशेते । ज्येष्ठानाम् अपि राजानम् । हे मन्त्राणाम् पते ! अस्माकम् इदं बर्हिः[4] स्तोत्रम् शृण्वन् रक्षणैः सह आ सीद ॥ १ ॥

देवाश्चित् ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः ।
उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥ २ ॥

देवाः । चित् । ते । असुर्य । प्रऽचेतसः । बृहस्पते । यज्ञियम् । भागम् । आनशुः ।
उस्राःऽइव । सूर्यः । ज्योतिषा । महः । विश्वेषाम् । इत् । जनिता । ब्रह्मणाम् । असि ॥ २ ॥

वेङ्कट० देवाः अपि तव प्रसादात्, असुराणां हन्तः ! प्रकृष्टज्ञानस्य बृहस्पते ! यज्ञार्हं भागम् प्राप्नुवन्ति । यस्मात् त्वं महान् सूर्य इव रश्मीन् तथा प्रभाः[5] सर्वेषाम् मन्त्राणां जनयिता भवसि तस्मात् अनुग्राह्यानसीति ॥ २ ॥

आ विबाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि ।
बृहस्पते भीममित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम् ॥ ३ ॥

आ । विऽबाध्य । परिऽरापः । तमांसि । च । ज्योतिष्मन्तम् । रथम् । ऋतस्य । तिष्ठसि ।
बृहस्पते । भीमम् । अमित्रऽदम्भनम् । रक्षःऽहनम् । गोत्रऽभिदम् । स्वःऽविदम् ॥ ३ ॥

वेङ्कट० आ तिष्ठसि परितो रक्षः तमांसि च विविधं बाधित्वा[6] ज्योतिष्मन्तम् रथम् यज्ञस्य गमनार्थम्, बृहस्पते ! भीमम् अमित्रदम्भनम् रक्षसां हन्तारं मेघभिदम् उदकस्य लम्भयितारम् ॥ ३ ॥

१-१. नास्ति मूको. २. त्वा अ॰. ३. नास्ति वि॰. ४. बर्हि वि॰ अप॰; बर्हि अ॰, बर्हिः वि॰, नास्ति क॰. ५. यथा वि॰ अ॰ अप॰; प्रभा अ॰. ६. बाधित्वा वि॰ अप॰.

सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् ॥ ४ ॥

सुनीतिऽभिः । नयसि । त्रायसे । जनम् । यः । तुभ्यम् । दाशात् । न । तम् । अंहः । अश्नवत् ।
ब्रह्मऽद्विषः । तपनः । मन्युऽमीः । असि । बृहस्पते । महि । तत् । ते । महिऽत्वनम् ॥ ४ ॥

वेङ्कट० त्वम् शोभनैर्नयनैः नयसि रक्षसि च यः तुभ्यम् हविः प्रयच्छति । न च तम् [illegible] व्याप्नोति [illegible] । ब्रह्मद्विषः असुरस्य तापयिता च 'मन्युमीः' क्रोधं प्रेरयसि । [illegible] 'महत् तत्' ते माहात्म्यम् ॥ ४ ॥

न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः ।
विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ॥ ५ ॥

न । तम् । अंहः । न । दुःऽइतम् । कुतः । चन । न । अरातयः । तितिरुः । न । द्वयाविनः ।
विश्वाः । इत् । अस्मात् । ध्वरसः । वि । बाधसे । यम् । सुऽगोपाः । रक्षसि । ब्रह्मणः । पते ॥ ५ ॥

वेङ्कट० न तम् अंहः व्याप्नोति, नापि दुरितम् कुतश्चित् [illegible] । न च शत्रवः [illegible], नापि द्वयाविनः [illegible] । विश्वाः [illegible] अस्मात् [illegible] हिंसाः वि बाधसे यम् 'ब्रह्मणः पते' त्वम् सुगोपाः रक्षसि ॥ ५ ॥

'इति द्वितीयाष्टके षष्ठाध्याये एकत्रिंशो वर्गः' ॥

त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे ।
बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥ ६ ॥

त्वम् । नः । गोपाः । पथिऽकृत् । विऽचक्षणः । तव । व्रताय । मतिऽभिः । जरामहे ।
बृहस्पते । यः । नः । अभि । ह्वरः । दधे । स्वा । तम् । मर्मर्तु । दुच्छुना । हरस्वती ॥ ६ ॥

वेङ्कट० त्वम् नः गोपायिता मार्गकृत् प्राज्ञः । तव व्रताय वयं स्तुतिभिः स्तुमः । बृहस्पते ! यः अस्माकं हिंसाम् अभि दधाति, स्वा एव तम् मारयतु दुर्गतिः हिंसायुक्ता । तेजोविशेषः हरः, तेनान्वा हरति ॥ ६ ॥

---

१. दुरितम् वि' अ'. २ नास्ति वि' अ' [illegible] ३-३ [illegible] वि' अ' [illegible] ४-४ नास्ति वि' [illegible]. ५. [illegible] वि' अ'. ६-६. नास्ति मूको. ७. 'हरस्' वि' अ'.

उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः ।
बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि ॥ ७ ॥

उत । वा । यः । नः । मर्चयात् । अनागसः । अरातिऽवा । मर्तः । सानुकः । वृकः ।
बृहस्पते । अप । तम् । वर्तय । पथः । सुऽगम् । नः । अस्यै । देवऽवीतये । कृधि ॥ ७ ॥

वेङ्कट० अपि च यः [illegible] अनागसः [illegible] मनुष्यः [illegible] वृकः, [illegible] अप [illegible] मार्गात् [illegible] अस्यै [illegible] कृधि इति ॥ ७ ॥

त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥ ८ ॥

त्रातारम् । त्वा । तनूनाम् । हवामहे । अवऽस्पर्तः । अधिऽवक्तारम् । अस्मऽयुम् ।
बृहस्पते । देवऽनिदः । नि । बर्हय । मा । दुःऽएवाः । उत्ऽतरम् । सुम्नम् । उत् । नशन् ॥ ८ ॥

वेङ्कट० रक्षितारं [illegible] हवामहे [illegible] अस्माकम् [illegible] । बृहस्पते देवनिन्दकान् नि बर्हय । [illegible] सुम्नम् [illegible] ॥ ८ ॥

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरे तळितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः ॥ ९ ॥

त्वया । वयम् । सुऽवृधा । ब्रह्मणः । पते । स्पार्हा । वसु । मनुष्या । आ । ददीमहि ।
याः । नः । दूरे । तळितः । याः । अरातयः । अभि । सन्ति । जम्भय । ताः । अनप्नसः ॥ ९ ॥

वेङ्कट० [illegible] सुवर्धयित्रा [illegible] स्पृहणीयानि धनानि मनुष्येभ्यः आ ददीमहि । [illegible] (३ ११) । [illegible] इति ॥ ९ ॥

त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।
मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहि ॥ १० ॥

---

१. [illegible] २. [illegible] ३. [illegible] ४. [illegible] ५-५. [illegible] ६. [illegible] ७. [illegible] ८. [illegible] ९-९. [illegible]

त्वया । वयम् । उत्ऽतमम् । धीमहे । वयः । बृहस्पते । पप्रिणा । सस्निना । युजा ।
मा । नः । दुःऽशंसः । अभिऽदिप्सुः । ईशत । प्र । सुऽशंसाः । मतिऽभिः । तारिषीमहि ॥ १० ॥

वेङ्कट० त्वया वयम् उत्तमम् अन्नं धारयेमहि बृहस्पते! पूरयित्रा शुद्धेन सहायेन। मा अस्माकम् ईशत अभिदम्भनेच्छुः दुःशंसः। वयं तु शोभनशंसाः मतिभिः सुतराम प्र तारयेमहि इति ॥ १० ॥

'इति द्वितीयाष्टके षष्ठाध्याये त्रिंशो वर्गः' ॥

अ॒ना॒नु॒दो वृ॑ष॒भो जग्मि॑राह॒वं निष्ट॑प्ता॒ शत्रुं॒ पृत॑नासु सास॒हिः ।
असि॑ स॒त्य ऋ॑ण॒या ब्र॑ह्मणस्पत उ॒ग्रस्य॑ चिद्दमि॒ता वी॑ळुह॒र्षिणः॑ ॥ ११ ॥

अ॒न॒नु॒ऽदः । वृ॒ष॒भः । जग्मिः॑ । आ॒ऽह॒वम् । निःऽत॑प्ता । शत्रु॑म् । पृत॑नासु । स॒स॒हिः ।
असि॑ । स॒त्यः । ऋ॒ण॒ऽयाः । ब्र॒ह्म॒णः॒ । प॒ते॒ । उ॒ग्रस्य॑ । चि॒त् । द॒मि॒ता । वी॒ळु॒ऽह॒र्षिणः॑ ॥ ११ ॥

वेङ्कट० अप्रतिनोद्यः दाता कामानां वर्षिता युद्धे गन्ता शत्रोः तापयिता युद्धेषु सहनशीलो भवसि सत्यकर्मा ऋणानां च यापयिता, कामानां प्रदातेत्यर्थः। उग्रस्य अपि दमयिता दृढम् अपि हर्षयतो बलेन बलवतोऽपि कुर्वतः ॥ ११ ॥

अदे॑वेन॒ मन॑सा॒ यो रि॑ष॒ण्यति॑ शा॒साम॒ग्रो मन्य॑मानो॒ जिघां॑सति ।
बृह॑स्पते॒ मा प्रण॒क्तस्य॑ नो व॒धो नि क॑र्म म॒न्युं दु॒रेव॑स्य॒ शर्ध॑तः ॥ १२ ॥

अदे॑वेन । मन॑सा । यः । रि॒ष॒ण्यति॑ । शा॒साम् । उ॒ग्रः । मन्य॑मानः । जिघां॑सति ।
बृह॑स्पते । मा । प्रण॑क् । तस्य॑ । नः॒ । व॒धः । नि । क॒र्म॒ । म॒न्युम् । दुः॒ऽएव॑स्य । शर्ध॑तः ॥ १२ ॥

वेङ्कट० अदेवयजनशीलेन मनसा यः अस्मान् बाधते, शासने च आत्मानम् उद्गूर्णं मन्यमानः जिघांसति, बृहस्पते! अस्य आयुधम् मा अस्मान् स्पृशतु। नि कुर्मः मन्युम् दुष्टस्य अभिभवतः, वयं कुर्मः ॥ १२ ॥

भरे॑षु॒ हव्यो॒ नम॑सोप॒सद्यो॒ गन्ता॒ वाजे॑षु॒ सनि॑ता॒ धनं॑धनम् ।
विश्वा॒ इद॒र्यो अ॑भिदि॒प्स्वो॒३॒॑ मृधो॒ बृह॒स्पति॒र्वि व॑वर्हा॒ रथाँ॑ इव ॥ १३ ॥

भरे॑षु । हव्यः॑ । नम॑सा । उ॒प॒ऽसद्यः॑ । गन्ता॑ । वाजे॑षु । सनि॑ता । धन॑म्ऽधनम् ।
विश्वाः॑ । इत् । अ॒र्यः । अ॒भि॒ऽदि॒प्स्वः॑ । मृधः॑ । बृह॒स्पतिः॑ । वि । व॒व॒र्ह॒ । रथा॑न्ऽइव ॥ १३ ॥

वेङ्कट० संग्रामेषु आह्वातव्यः हविषा उपगन्तव्यः गन्ता युद्धेषु दाता सर्वं धनं सर्वाः एव अभिदम्भनेच्छून् शत्रून् बृहस्पतिः वि ववर्ह विविनक्ति, रथान् इव वेगेन आपततः ॥ १३ ॥

तेजि॑ष्ठया तप॒नी र॒क्षस॑स्तप॒ ये त्वा॑ नि॒दे द॑धि॒रे दृ॒ष्टवी॑र्यम् ।
आ॒विस्तत्कृ॑ष्व॒ यदस॑त्त उ॒क्थ्यं१॒॑ बृह॑स्पते॒ वि प॑रि॒रापो॑ अर्दय ॥ १४ ॥

१-१. नास्ति मूको. २. नास्ति वि' अ'. ३. ओ धमेन थ'. ४. पूर्व मूको. ५. विविनक्ति मूको.

तेजिष्ठया । तपनी । रक्षसः । तप । ये । त्वा । निदे । दधिरे । दृष्टऽवीर्यम् ।
आविः । तत् । कृण्व । यत् । असत् । ते । उक्थ्यम् । बृहस्पते । वि । परिऽरापः । अर्दय ॥

वेङ्कट० तीक्ष्णया शस्त्रेण राक्षसान् तप, ये राक्षसाः त्वाम् दृष्टवीर्यं योद्धुम् ... । निन्दितुं ... । आविः कुरु तत् यत् भवति तव स्तोतव्यं वीर्यम् । बृहस्पते ! वि अर्दय ... परितो ... राक्षसानिति ॥ १४ ॥

बृह॑स्पते॒ अति॒ यद॒र्यो अर्हा॑द्द्यु॒मद्वि॒भाति॒ क्रतु॑म॒ज्जने॑षु ।
यद्दी॒दय॒च्छव॑स ऋतप्रजात॒ तद॒स्मासु॒ द्रवि॑णं धेहि चि॒त्रम् ॥ १५ ॥

बृहस्पते । अति । यत् । अर्यः । अर्हात् । द्युऽमत् । विऽभाति । क्रतुऽमत् । जनेषु ।
यत् । दीदयत् । शवसा । ऋतऽप्रजात । तत् । अस्मासु । द्रविणम् । धेहि । चित्रम् ॥ १५ ॥

वेङ्कट० बृहस्पते ! यत् 'अर्होऽस्मत्सकाशात्' पूजार्हम्, ... अतिशयेन ... इति । यत् ... कर्मवत् जनेषु विभाति । यत् च दीप्यमानं बलेन । ऋतार्थं प्रजात ! तदस्मासु धनम् चित्रम् ... धेहि इति ॥ १५ ॥

'इति द्वितीयाष्टके षष्ठाध्याये एकत्रिंशो वर्गः' ॥

मा न॑ स्ते॒नेभ्यो॒ ये अ॒भि द्रु॒हस्प॒दे नि॑रा॒मिणो॑ रि॒पवोऽन्ने॑षु जागृ॒धुः ।
आ दे॒वाना॒मोह॑ते॒ वि व्रयो॑ हृ॒दि बृह॑स्पते॒ न प॒रः साम्नो॑ विदुः ॥ १६ ॥

मा । नः । स्तेनेभ्यः । ये । अभि । द्रुहः । पदे । निरऽआमिणः । रिपवः । अन्नेषु । जगृधुः ।
आ । देवानाम् । ओहते । वि । व्रयः । हृदि । बृहस्पते । न । परः । साम्नः । विदुः ॥ १६ ॥

वेङ्कट० मा नः स्तेनेभ्यः परो भव ये स्तेनाः द्रोहस्य स्थाने निरुद्धाः निर्गतरमणाः रिपवः अन्नेषु अभि जागृधुः अभिकाङ्क्षन्ति ... साम ... देवानां हृदये ... त्वत्तः परः न कश्चन साम जानाति । 'साम वै स्तोमः' (तै ...) इति ब्राह्मणम् इति ॥ १६ ॥

विश्वे॑भ्यो॒ हि त्वा॒ भुव॑नेभ्य॒स्परि॒ त्वष्टाज॑न॒त्साम्नः॑साम्नः क॒विः ।
स ऋ॑ण॒चिदृ॑ण॒या ब्रह्म॑ण॒स्पति॑र्द्रु॒हो ह॒न्ता म॒ह ऋ॒तस्य॑ ध॒र्तरि॑ ॥ १७ ॥

विश्वेभ्यः । हि । त्वा । भुवनेभ्यः । परि । त्वष्टा । अजनत् । साम्नःऽसाम्नः । कविः ।
सः । ऋणऽचित् । ऋणऽयाः । ब्रह्मणः । पतिः । द्रुहः । हन्ता । महः । ऋतस्य । धर्तरि ॥ १७ ॥

१-१. °रिक्त वि॰ ... ; °राक्षसः ... २. नास्ति वि॰ ... ३. दीप्यमान° ... ४. नास्ति ... ५-५. नास्ति मूको. ६. ... मूको. ७. ...

वेङ्कट० सर्वेभ्यः भूतेभ्यः उपरिष्टात् हि त्वाम् ... । त्वं नानाविधानि धामानि जानासि । ... स्तोतॄणां कामम् ... हृदये निर्मासि, ऋणस्य च वापयिता भवसि । ब्रह्मणः पतिः महतः ... धर्तरि होतव्यां इति ॥ १७ ॥

तव॑ श्रि॒ये व्य॑जिहीत॒ पर्व॑तो॒ गवां॑ गो॒त्रमु॒दसृ॑जो॒ यद॑ङ्गिरः ।
इन्द्रे॑ण यु॒जा तम॑सा॒ परी॑वृतं॒ बृह॑स्पते॒ निर॒पामौ॑ब्जो अर्ण॒वम् ॥ १८ ॥

तव॑ । श्रि॒ये । वि । अ॒जि॒ही॒त॒ । पर्व॑तः । गवा॑म् । गो॒त्रम् । उ॒त्ऽअसृ॑जः । यत् । अ॒ङ्गि॒रः॒ ।
इन्द्रे॑ण । यु॒जा । तम॑सा । परि॑ऽवृतम् । बृह॑स्पते । निः । अ॒पाम् । औ॒ब्जः॒ । अ॒र्ण॒वम् ॥ १८ ॥

वेङ्कट० तव श्रियै ... पर्वतः ..., यदा त्वम् अङ्गिरसां कुले जातः! गवाम् समूहम् उदसृजः पणिभिः अपहृतम्, तथा 'इन्द्रेण सहायेन' ... वृतेन ... अपाम् अर्णवम् निः औब्जः, ... तेजोभिरपि ... भवसि इति ॥ १८ ॥

ब्रह्म॑णस्पते॒ त्वम॒स्य य॒न्ता सू॒क्तस्य॑ बोधि॒ तन॑यं च जिन्व ।
विश्वं॒ तद्भ॒द्रं यदव॑न्ति दे॒वा बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ १९ ॥

ब्रह्म॑णः । प॒ते॒ । त्वम् । अ॒स्य । य॒न्ता । सु॒ऽउ॒क्तस्य॑ । बो॒धि॒ । तन॑यम् । च॒ । जि॒न्व॒ ।
विश्व॑म् । तत् । भ॒द्रम् । यत् । अव॑न्ति । दे॒वाः । बृ॒हत् । व॒दे॒म॒ । वि॒दथे॑ । सु॒ऽवीराः॑ ॥ १९ ॥

वेङ्कट० 'ब्रह्मणः पते!' त्वम् इदं जगत् सर्वं नियच्छसि । स त्वम् इदं सूक्तं बुध्यस्व । ... तनयम् ... प्रीणय । विश्वं तत् भद्रम् एव भवति यत् रक्षन्ति देवाः । वयं च त्वद्रक्षिताः बृहत् वदेम विदथे सुवीराः इति ॥ १९ ॥

इति द्वितीयाष्टके षष्ठाध्याये द्वात्रिंशो वर्गः ॥

षष्ठं व्याकरोद् द्वितीयस्य माधवोऽध्यायमञ्जसा ।
... यस्य माताऽऽसीदनुजः कवि ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने
द्वितीयाष्टके षष्ठोऽध्यायः ॥

— ❀ —

इति ऋग्वेदे सभाष्ये द्वितीयाष्टके षष्ठोऽध्यायः ॥



१. ... मूको. २-३. ... वि᳚ मूको. ३. नास्ति वि᳚ ... ४. ... वि᳚ अर्थं. ५-५. नास्ति मूको. ६. नास्ति वि᳚ अर्थं. ७. नास्ति वि᳚.

अथ द्वितीयाष्टके सप्तमोऽध्यायः

वे ८२० 'समासविशेष पर्व नमु'[1] व्याभिक्यामति माधवः ।
तत्राक्रियेषु वाक्येषु कर्तव्यमुपदिश्यते ॥ १ ॥

अपेक्षया क्रियाक्षेपः कालकालामिति द्विधा ।
[illegible] [illegible] [illegible] परस्मिन्[2] पवित्रदृश्य ॥ २ ॥

'[illegible] तु [illegible]'[3] इति यान्ते पामिति क्रिया
'[illegible] [illegible] [illegible] [illegible]'[4] याचते प्रक्रम् ॥ ३ ॥

उपसर्गाः प्रयुज्यन्ते क्रियाक्षेपाय च[5] क्वचित् ।
'अग्ने [illegible] [illegible]'[6] आश्रयतेऽदिति क्रिया ॥ ४ ॥

इमे मार्मासु इन्द्र [illegible] अभि'[7] आप्यते क्रिया ।
'अर्चन्तु[8] [illegible]'[9] इत्यत्रान्यत्र[10] क्रियापदम् ॥ ५ ॥

पश्यन्तु यत्राद्विशेषोऽपि विद्धि[11] यदि तिङन्तम् ।
मध्य क्रियापदाक्षेपात्मकाद्यर्थानुरूपतः[12] ॥ ६ ॥

[13]'मही इन्द्रो य ओजसा'†, 'प्र मन्महे शवसानाय'‡ च ।
'स यो [illegible] [illegible]'§ [illegible] [illegible] ॥ ७ ॥

'[illegible] [illegible] [illegible]'[14], '[illegible]'[15] ।
'[illegible] [illegible] [illegible]'[16] आक्षिपन्ति[17] क्रियामिमाः[18] ॥ ८ ॥

[19]'[illegible] [illegible]'[19] [20]क्रियाशब्दस्तथाऽपि च ।
तस्मेत्यान्वये योऽस्यामन्यामभ्याहरेत क्रियाम्[20] ॥ ९ ॥

'[illegible] [illegible]'[21] '[illegible] [illegible]'[22] ।
'[illegible] [illegible]'[23] तत्रान्यत्र निदर्शनम् ॥ १० ॥

१. ऋ १,४३,९. २. ऋ १,१५०,१ ३. ऋ ६,६०,८ ४. नास्ति वि° सर्वे ५. ऋ १, ४,०. ६. [illegible] वि° क° [illegible] ७. ऋ १,१६,३. ८. नतु वि° सर्वं ९. ऋ १,८०,१. १०. [illegible] [illegible] वि° सर्वं, '[illegible]' वि° क°. ११. [illegible] वि° सर्वं. १२. '[illegible]' वि°, '[illegible]' क° [illegible]. १३-१३. नास्ति वि° क°. † ऋ ८,६,१. ‡ ऋ १,३३,५. § ऋ १,१४३,५. १४. ऋ १,२०,१. १५. ऋ ६,६१,३. १६. ऋ ६,६७,४ १७. [illegible] वि° सर्वं १८. '[illegible]' वि° सर्वं, [illegible] [illegible]. १९-१९. '[illegible]' [illegible]. २०-२०. क्रियां क्रियान् वि° क°. २१. ऋ १,११०,१. २२. ऋ २,२०,१ २३. ऋ २,१६,१.

[illegible]

[illegible] ॥ ११ ॥

[२४]

गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । [illegible] ।
[illegible] । जगती छन्दः ,
[illegible] त्रिष्टुभौ ।

सेमामविड्ढि प्रभृतिं य ईशिषेऽया विधेम नवया महा गिरा ।
यथा नो मीढ्वान्त्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिम् ॥ १ ॥

सः । इमाम् । अविड्ढि । प्रऽभृतिम् । यः । ईशिषे । अया । विधेम । नवया । महा । गिरा ।
यथा । नः । मीढ्वान् । स्तवते । सखा । तव । बृहस्पते । सीसधः । सः । उत । नः । मतिम् ॥ १ ॥

वेङ्कट० गृत्समदः । सः इमाम् प्रक्षिप्यमाणां स्तुतिम् [illegible] धनप्रदानेन यः त्वं धनस्य ईशिषे । अनया परिचरेम नवया महत्या स्तुत्या । यथा अस्माकं [illegible] स्तुतिं करोति , हे बृहस्पते ! साधय अस्माकम् अभिलषितं [illegible] ॥ १ ॥

यो नन्त्वान्यनमन्न्योजसोतादर्दर्मन्युना शम्बराणि वि ।
प्राच्यावयदच्युता ब्रह्मणस्पतिरा चाविशद्वसुमन्तं वि पर्वतम् ॥ २ ॥

यः । नन्त्वानि । अनमत् । नि । ओजसा । उत । अदर्दः । मन्युना । शम्बराणि । वि ।
प्र । अच्यावयत् । अच्युता । ब्रह्मणः । पतिः । आ । च । अविशत् । वसुऽमन्तम् । वि । पर्वतम् ॥ २ ॥

वेङ्कट० [illegible] बलेन [illegible] । अपि च [illegible] क्रोधेन [illegible] प्रच्यावयति च अच्युतानि ब्रह्मणस्पतिः । तथा [illegible] वसुभिः [illegible] [illegible] ॥ २ ॥

तद्देवानां देवतमाय कर्त्वमश्रथ्नन्दृळ्हाव्रदन्त वीळिता ।
उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः ॥ ३ ॥

तत् । देवानाम् । देवऽतमाय । कर्त्वम् । अश्रथ्नन् । दृळ्हा । अव्रदन्त । वीळिता ।
उत् । गाः । आजत् । अभिनत् । ब्रह्मणा । वलम् । अगूहत् । तमः । वि । अचक्षयत् । स्वरिति स्वः ॥ ३ ॥

१. [illegible] २-२. [illegible] † ऋ २,६,५. ‡ [illegible] ३-३. नास्ति मूको. ४. नास्ति वि॰. ५. [illegible] ६-६. [illegible] † [illegible] मूको. ७-७. नास्ति वि॰ अ॰. † नास्ति मूको. ८. [illegible] ९. नास्ति मूको.

वेङ्कट० तत्र देवानाम् [illegible] 'कर्म, कन्' [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] ॥ ३ ॥

अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् ।
तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम् ॥ ४ ॥

अश्मऽआस्यम् । अवतम् । ब्रह्मणः । पतिः । मधुऽधारम् । अभि । यम् । ओजसा । अतृणत् ।
तम् । एव । विश्वे । पपिरे । स्वःऽदृशः । बहु । साकम् । सिसिचुः । उत्सम् । उद्रिणम् ॥ ४ ॥

वेङ्कट० [illegible] ब्रह्मणः पतिः मधुधारम् अभि अतृणत् यम् [illegible] । मधुधारम् इति [illegible] । तम् एव विश्वे पिबन्ति देवाः, [illegible] । 'बहु च [illegible]' इति । [illegible] — [illegible] मधुधारम् अभि' यमोजसा [illegible], [illegible] 'सिसिचुः [illegible] बहु [illegible] उत्समुद्रिणम्' [illegible] (१०,१२) इति ॥ ४ ॥

सना ता का चिद्भुवना भवीत्वा माद्भिः शरद्भिर्दुरो वरन्त वः ।
अयतन्ता चरतो अन्यदन्यदिद्या चकार वयुना ब्रह्मणस्पतिः ॥ ५ ॥

सना । ता । का । चित् । भुवना । भवीत्वा । माःऽभिः । शरत्ऽभिः । दुरः । वरन्त । वः ।
अयतन्ता । चरतः । अन्यत्ऽअन्यत् । इत् । या । चकार । वयुना । ब्रह्मणः । पतिः ॥ ५ ॥

वेङ्कट० यानि [illegible] [illegible] [illegible] 'सर्वे सह देवाः'† [illegible], [illegible] ॥ ५ ॥

'इति द्वितीयाष्टके सप्तमाध्याये प्रथमो वर्गः' ॥

अभिनक्षन्तो अभि ये तमानशुर्निधिं पणीनां परमं गुहा हितम् ।
ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुराविशम् ॥ ६ ॥

अभिऽनक्षन्तः । अभि । ये । तम् । आनशुः । निऽधिम् । पणीनाम् । परमम् । गुहा । हितम् ।
ते । विद्वांसः । प्रतिऽचक्ष्य । अनृता । पुनः । यतः । ऊँ इति । आयन् । तत् । उत् । ईयुः । आऽविशम् ॥

१-१. नास्ति वि' [illegible]　२-२. [illegible] वि'; [illegible] मूको'.　३-३. [illegible] वि' मूको'.
४. [illegible] मूको.　५. नास्ति मूको.　६. नास्ति वि' [illegible].　७-७. [illegible] वि' मूको'.　† [illegible]
वि'.　८-८ नास्ति मूको.

वेङ्कट० [illegible] 'निधिम्' [illegible] गुहायां निहितम् । ते [illegible] अनृतानि [illegible] दृष्ट्वा पुनः च [illegible] देवलोकात् आयन्, [illegible] 'सुकृते निर्देशनाय' ॥ ६ ॥

ऋतावानः प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः ।
ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि तम् ॥ ७ ॥

ऋतऽवानः । प्रतिऽचक्ष्य । अनृता । पुनः । आ । अतः । आ । तस्थुः । कवयः । महः । पथः ।
ते । बाहुऽभ्याम् । धमितम् । अग्निम् । अश्मनि । नकिः । सः । अस्ति । अरणः । जहुः । हि । तम् ॥

वेङ्कट० 'सत्यवन्तोऽसुराणाम्' अनृतानि दृष्ट्वा [illegible] पुनः च [illegible] विद्वांसः [illegible] मार्गात् देवलोकं प्रति गन्तुम् । ते बाहुभ्याम् धमनम् [illegible] अश्मनि [illegible] नकिः [illegible] [illegible] तस्मिन् पुरे न कश्चित् सः अरणः । [illegible] यस्मात् तत्र [illegible] नहि तम् जहुः इति ॥ ७ ॥

ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना ।
तस्य साध्वीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयोनयः ॥ ८ ॥

ऋतऽज्येन । क्षिप्रेण । ब्रह्मणः । पतिः । यत्र । वष्टि । प्र । तत् । अश्नोति । धन्वना ।
तस्य । साध्वीः । इषवः । याभिः । अस्यति । नृऽचक्षसः । दृशये । कर्णऽयोनयः ॥ ८ ॥

वेङ्कट० सत्यज्येन [illegible] धनुषा [illegible] 'यत्र इच्छति, तत्र [illegible] पतिः । तस्य [illegible], यैः [illegible] [illegible] देवानाम् [illegible] 'तान् दर्शयति इति' ॥ ८ ॥

स संनयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस्पतिः ।
चाक्ष्मो यद् वाजं भरते मती धनाऽऽदित् सूर्यस्तपति तप्यतुर्वृथा ॥ ९ ॥

सः । सम्ऽनयः । सः । विऽनयः । पुरःऽहितः । सः । सुऽस्तुतः । सः । युधि । ब्रह्मणः । पतिः ।
चाक्ष्मः । यत् । वाजम् । भरते । मती । धना । आत् । इत् । सूर्यः । तपति । तप्यतुः । वृथा ॥९॥

वेङ्कट० 'सः [illegible]' [illegible] । [illegible] । देवैः पुरोहितः [illegible] च [illegible],

---

[illegible]

[illegible] 'स, प्रयाम [illegible]' । योऽयम् [illegible] मनुष्याणाम् [illegible] 'धन [illegible]', [illegible] च [illegible] । [illegible] ॥ ९ ॥

विभु प्रभु प्रथमं मेहनावतो बृहस्पतेः सुविदत्राणि राध्या ।

इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुञ्जते विशः ॥ १० ॥

विऽभु । प्रऽभु । प्रथमम् । मेहनाऽवतः । बृहस्पतेः । सुविदत्राणि । राध्या ।

इमा । सातानि । वेन्यस्य । वाजिनः । येन । जनाः । उभये । भुञ्जते । विशः ॥ १० ॥

वेङ्कट० विभूनि प्रभूनि च प्रथमम् एव हविर्भिः सिञ्चतो यजमानस्य 'बृहस्पतेः शोभनदानानि राध्यानि भवन्ति इमानि दानानि' वेन्यस्य कामयितृणाम् आश्रयस्य बलवतोऽन्नस्य, येन देवा मनुष्याश्च भुञ्जते इति ॥ १० ॥

'इति द्वितीयाष्टके षष्ठाध्याये द्वितीयो वर्गः' ।

योऽवरे वृजने विश्वथा विभुर्महामु रण्वः शवसा ववक्षिथ ।

स देवो देवान् प्रति पप्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः ॥ ११ ॥

यः । अवरे । वृजने । विश्वऽथा । विऽभुः । महान् । ऊँ इति । रण्वः । शवसा । ववक्षिथ ।

सः । देवः । देवान् । प्रति । पप्रथे । पृथु । विश्वा । इत् । ऊँ इति । ता । परिऽभूः । ब्रह्मणः । पतिः ॥ ११ ॥

वेङ्कट० यः त्वम् अवरे स्थाने 'युद्धे विश्वथा विभुः महान् उ रण्वः' बलेन वहसि । सर्वेषाम् [illegible] । सः देवः देवान् प्रति पप्रथे [illegible] पृथु [illegible] आत्मीयम् । विश्वानि एव तानि परिभवति बृहस्पतिः '[illegible]' ॥ ११ ॥

विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनन्ति व्रतं वाम् ।

अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ॥ १२ ॥

विश्वम् । सत्यम् । मघवाना । युवोः । इत् । आपः । चन । प्र । मिनन्ति । व्रतम् । वाम् ।

अच्छ । इन्द्राब्रह्मणस्पती इति । हविः । नः । अन्नम् । युजाऽइव । वाजिना । जिगातम् ॥ १२ ॥

वेङ्कट० 'इन्द्रश्च देवता' । हे धनवन्तौ! युवयोरेव विश्वम् सत्यम् भवति । तथा युवयोरेव [illegible] 'व्रतं कर्म आपः अपि न हिंसन्ति' । हे इन्द्राब्रह्मणस्पती 'अस्मदीयम् हविः प्रति आगच्छतम्, यथा [illegible]' [illegible] ॥ १२ ॥

१-१. नास्ति मूको. २-२. नास्ति वि' अ'. ३. [illegible] वि'; [illegible] अ'. ४. [illegible] वि'. [illegible] अ'. ५-५. नास्ति वि' अ' [illegible]. ६. नास्ति वि' अ'. ७-७. [illegible] वि' अ'.

उताशिष्ठा अनु शृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना ।
वीळुद्वेषा अनु वश ऋणमाददिः स ह वाजी समिथे ब्रह्मणस्पतिः ॥१३॥

उत । आशिष्ठाः । अनु । शृण्वन्ति । वह्नयः । सभेयः । विप्रः । भरते । मती । धना ।
वीळुऽद्वेषाः । अनु । वशा । ऋणम् । आऽददिः । सः । ह । वाजी । सम्ऽइथे । ब्रह्मणः । पतिः ॥१३॥

वेङ्कट० अपि च शीघ्रतराः शृण्वन्ति [illegible] अनु शृण्वन्ति वोढारः । तथा [illegible] इति । स [illegible] यजमानानाम् ऋणम् आददिः [illegible] इति [illegible] । सः [illegible] ब्रह्मणः पतिः इति ॥ १३ ॥

ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः ।
यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् ॥ १४ ॥

ब्रह्मणः । पतेः । अभवत् । यथाऽवशम् । सत्यः । मन्युः । महि । कर्म । करिष्यतः ।
यः । गाः । उत्ऽआजत् । सः । दिवे । वि । च । अभजत् । महीऽइव । रीतिः । शवसा । असरत् । पृथक् ॥

वेङ्कट० ब्रह्मणः पते [illegible] सत्य एव क्रोधो भवति महत् कर्म करिष्यतः । यः पणि[illegible] गाः उदाजत्, सः [illegible] देवेभ्यो यथास्व वि अभजत् च । महीव [illegible] गृहं प्रति [illegible] गावो [illegible] इति ॥ १४ ॥

ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो वयस्वतः ।
वीरेषु वीराँ उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम् ॥ १५ ॥

ब्रह्मणः । पते । सुऽयमस्य । विश्वहा । रायः । स्याम । रथ्यः । वयस्वतः ।
वीरेषु । वीरान् । उप । पृङ्धि । नः । त्वम् । यत् । ईशानः । ब्रह्मणा । वेषि । मे । हवम् ॥१५॥

वेङ्कट० 'ब्रह्मणः पते । [illegible] सर्वदा धनस्य' [illegible] स्याम [illegible] । वीरेषु पुत्रेषु अस्माकम् त्वम् वीरान् उपचर्य[illegible] [illegible] गच्छ । यदा स्वामी हविषा सह कामयते मम आह्वानम् ॥ १५ ॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ १६ ॥

१-१ [illegible] पदनाद वि' अ'. २. नास्ति मूको ३-३ नास्ति वि' अ'. ४-४. नास्ति वि' अ' मूको ५. [illegible] वि' अ'.

ब्रह्मणः । पते । त्वम् । अस्य । यन्ता । सुऽउक्तस्य । बोधि । तनयम् । च । जिन्व ।
विश्वम् । तत् । भद्रम् । यत् । अवन्ति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥१६॥

वेङ्कट० पूर्वम् (ऋ २,२३,१९) व्याख्यातमेतत् ॥ १६ ॥

'इति द्वितीयाष्टके सप्तमाध्याये तृतीयो वर्गः' ॥

[२५]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । ब्रह्मणस्पतिर्देवता । जगती छन्दः ।'

इन्धानो अग्निं वनवद् वनुष्यतः कृतब्रह्मा शूशुवद् रातहव्य इत् ।
जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ १ ॥

इन्धानः । अग्निम् । वनवत् । वनुष्यतः । कृतऽब्रह्मा । शूशुवत् । रातऽहव्यः । इत् ।
जातेन । जातम् । अति । सः । प्र । सर्सृते । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥१॥

वेङ्कट० 'यमयम् ब्रह्मणः पतिः सखायं करोति, सः अग्निम् इन्धानः यजमानः हिंसितॄन् हन्तुमिच्छतः शत्रून् । तथा कृतस्तोत्रः देवानां वर्धते दत्तहविष्कश्च । 'तथा स्वेन मनुष्येण शत्रुमजु[जाति स सखायं] अतिक्रम्य सरिष्यति' च ॥ १ ॥

वीरेभिर्वीरान् वनवद् वनुष्यतो गोभी रयिं पप्रथद् बोधति त्मना ।
तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ २ ॥

वीरेभिः । वीरान् । वनवत् । वनुष्यतः । गोभिः । रयिम् । पप्रथत् । बोधति । त्मना ।
तोकम् । च । तस्य । तनयम् । च । वर्धते । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥२॥

वेङ्कट० आत्मीयैः वीरैः सम्भृतान् वीरान् हन्तुम् इच्छतो हन्ति । गोभिः च धनं प्रथयति । बुध्यते च आत्मना विधेयम् । तथा 'पुत्रम् तस्य पुत्रम् च वर्धयति' ॥ २ ॥

सिन्धुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीँरभि वष्ट्योजसा ।
अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ ३ ॥

सिन्धुः । न । क्षोदः । शिमीऽवान् । ऋघायतः । वृषाऽइव । वध्रीन् । अभि । वष्टि । ओजसा ।
अग्नेःऽइव । प्रऽसितिः । न । अह । वर्तवे । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥ ३ ॥

१-१. नास्ति मूको. २-२. पुत्रिणम् वि[३] अ[१]. ३-३. °तथा...°मन्यता वि[३] अ[१].
†-† जानाति सख्यमिति वि[२] अ[१]; अतिक्रम्य सर्यति अ.

वेङ्कट० सिन्धुः नदीः इव उदकं कर्मवान् मुख्यान् हिंसकान् [illegible] अभिभवति । यथा [illegible] भवति आक्रम्य, यथा [illegible] [illegible] क्रियमाणः । स 'सन्ते इव [illegible] [illegible]' इति ॥ ३ ॥

तस्मा अर्षन्ति दिव्या असश्चतः स सत्वभिः प्रथमो गोषु गच्छति ।
अनिभृष्टतविषिर्हन्त्योजसा यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ ४ ॥

तस्मै । अर्षन्ति । दिव्याः । असश्चतः । सः । सत्वऽभिः । प्रथमः । गोषु । गच्छति ।
अनिभृष्टऽतविषिः । हन्ति । ओजसा । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥ ४ ॥

वेङ्कट० तस्मै निपतन्ति दिव्याः आपः [illegible] । स [illegible] परिचारकैः सह प्रथममेव गोषु गच्छति । सत्वभिः '[illegible], हन्ति [illegible]' ॥ ४ ॥

तस्मा इद्विश्वे धुनयन्त सिन्धवोऽच्छिद्रा शर्म दधिरे पुरूणि ।
देवानां सुम्ने सुभगः स एधते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥ ५ ॥

तस्मै । इत् । विश्वे । धुनयन्त । सिन्धवः । अच्छिद्रा । शर्म । दधिरे । पुरूणि ।
देवानाम् । सुम्ने । सुऽभगः । सः । एधते । यम्ऽयम् । युजम् । कृणुते । ब्रह्मणः । पतिः ॥ ५ ॥

वेङ्कट० तस्मै एव सर्वे सिन्धवः स्यन्दन्ते, तथा अच्छिद्राणि बहूनि गृहाणि च धारयन्ति, देवानां सुखे सुभगः सः वर्धते ॥ ५ ॥

इति द्वितीयाष्टके सप्तमाध्याये अष्टमो वर्गः ॥

[२६]

गृत्समदः भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
ब्रह्मणस्पतिर्देवता । जगती छन्दः ।

ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निददेवयन्तमभ्यसत् ।
सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति भोजनम् ॥ १ ॥

ऋजुः । इत् । शंसः । वनवत् । वनुष्यतः । देवऽयन् । इत् । अदेवऽयन्तम् । अभि । असत् ।
सुप्रऽअवीः । इत् । वनवत् । पृत्ऽसु । दुस्तरम् । यज्वा । इत् । अयज्योः । वि । भजाति । भोजनम् ॥

वेङ्कट० ऋजुः एव देवानां स्तोता हिंसतः शत्रून्, देवान् इच्छन् एव अदेवयन्तम् अभि भवति । देवैः सुष्ठु

---

१. नास्ति [illegible] [illegible]. २. नास्ति [illegible]. ३. नास्ति मूको. ४-५. [illegible] [illegible]. ५. [illegible]. ६. नास्ति [illegible]. ७. नास्ति [illegible]. ८. [illegible]. ९. नास्ति मूको. १०-१०. [illegible].

प्रयच्छमानाय एव हन्ति युद्धेषु दुर्जनम् शत्रुम्, गच्छति एव यजमानस्य धनमादाय इति, तदिदं सर्वं ब्रह्मणस्पतिर्निमित्तं करोतीति ॥ १ ॥

यज॑स्व वीर॒ प्र वि॑हि मनाय॒तो भ॒द्रं मनः॑ कृणुष्व वृत्र॒तूर्ये॑ ।
ह॒विष्कृ॑णुष्व सु॒भगो॒ यथास॑सि॒ ब्रह्म॑ण॒स्पते॒रव॒ आ वृ॑णीमहे ॥ २ ॥

यज॑स्व । वी॒र॒ । प्र । वि॒हि॒ । म॒ना॒य॒तः । भ॒द्रम् । मनः॑ । कृ॒णु॒ष्व॒ । वृ॒त्र॒ऽतूर्ये॑ ।
ह॒विः । कृ॒णु॒ष्व॒ । सु॒ऽभगः॑ । यथा॑ । अस॑सि । ब्रह्म॑णः । पतेः॑ । अवः॑ । आ । वृ॒णी॒म॒हे॒ ॥ २ ॥

वेङ्कट० 'सुपुत्र! ब्रह्मणस्पतिम् यजस्व । प्र गच्छ च अन्नार्थं स्तुवतां यजमानानाम् । कल्याणं च भद्रम् मनः कुरु युद्धे । हविः च देवेभ्यः कुरु, यथा सुभगो भवसि । सर्वे वयं तव ब्रह्मणः पतेः रक्षणम् आ वृणीमहे ॥ २ ॥

स इज्जने॑न॒ स वि॒शा स जन्म॑ना॒ स पु॒त्रैर्वाजं॑ भरते॒ धना॒ नृभिः॑ ।
दे॒वानां॒ यः पि॒तर॑मा॒विवा॑सति श्र॒द्धाम॑ना ह॒विषा॒ ब्रह्म॑ण॒स्पति॑म् ॥ ३ ॥

सः । इत् । जने॑न । सः । वि॒शा । सः । जन्म॑ना । सः । पु॒त्रैः । वाज॑म् । भ॒र॒ते॒ । धना॑ । नृऽभिः॑ ।
दे॒वाना॑म् । यः । पि॒तर॑म् । आ॒ऽविवा॑सति । श्र॒द्धाऽम॑नाः । ह॒विषा॑ । ब्रह्म॑णः । पति॑म् ॥ ३ ॥

वेङ्कट० 'स एव जनपदेन जनपदस्थैः मनुष्यैः च सह धनानि च बिभर्ति, तथा सर्वेण कालेन स्वकीयेन जन्मना, पुत्रैर्दासैश्च सह, यः देवानाम् पालयितारम् ब्रह्मणः पतिम् परिचरति श्रद्धानमनस्कः हविषा इति ॥ ३ ॥

यो अ॑स्मै ह॒व्यैर्घृ॒तव॑द्भि॒रवि॑ध॒त्प्र तं प्रा॒चा न॑यति॒ ब्रह्म॑ण॒स्पतिः॑ ।
उ॒रु॒ष्यती॒मंह॑सो॒ रक्ष॑ती रि॒षो॒३॒॑ऽंहो॑श्चिदस्मा उरु॒चक्रि॒रद्भु॑तः ॥ ४ ॥

यः । अ॒स्मै॒ । ह॒व्यैः । घृ॒तव॑त्ऽभिः । अवि॑धत् । प्र । तम् । प्रा॒चा । न॒य॒ति॒ । ब्रह्म॑णः । पतिः॑ ।
उ॒रु॒ष्यति॑ । ई॒म् । अंह॑सः । रक्ष॑ति । रि॒षः । अं॒होः । चि॒त् । अ॒स्मै॒ । उ॒रु॒ऽचक्रिः॑ । अद्भु॑तः ॥ ४ ॥

वेङ्कट० यः अस्मै हवींषि घृतवन्ति परिचरति, तम् प्राचा देव ऊर्ध्वं नयति, पापात् च रक्षति एनम्, तथा हिंसितुः च रक्षति, पापान्मुक्तम् । अस्मै बहु करोति महान् इति ॥ ४ ॥

"इति द्वितीयाष्टके सप्तमाध्याये पञ्चमो वर्गः" ॥

---

१. ब्रह्मणस्पतिः वि[१-२] अपि; यजमा° अ°. २-२ त्रुटितम् वि° अ°. ३. एतत् नास्ति मूको. ४. °माम् वि° ५-५. ···यो वि°; पुत्रैः अ° ६. यथा मूको. ७-७. त्रुटितम् वि° अ°. † ब्रह्मणस्पतिः इ इत्यादिः; यथास्थानम् वि°. ८. आनयो. वि° अपि; ० ते वि° अ° ० ९-९. त्रुटितम् वि° अ°. †-† मूको° क. १०-१०. नास्ति मूको.

[२७]

'कूर्मो गार्त्समदो गृत्समदो वा ऋषिः । आदित्या देवता । त्रिष्टुप् छन्दः'।

इमा गिर आदित्येभ्यो घृतस्नूः सनाद् राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ॥ १ ॥

इमाः । गिरः । आदित्येभ्यः । घृतऽस्नूः । सनात् । राजऽभ्यः । जुह्वा । जुहोमि ।
शृणोतु । मित्रः । अर्यमा । भगः । नः । तुविऽजातः । वरुणः । दक्षः । अंशः ॥ १ ॥

वेङ्कट० कूर्मो गार्त्समदः । इमाः स्तुतीः आदित्येभ्यः घृतस्राविणीरिव स्रुचा सनातनेभ्यः राजभ्यः जुह्वा जुहोमि ... 'एवम् [illegible]' ... मित्रादयः' शृणोतु ... बहुजन्मा [illegible] दक्षः इति ॥ १ ॥

इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषन्त ।
आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः ॥ २ ॥

इमम् । स्तोमम् । सऽक्रतवः । मे । अद्य । मित्रः । अर्यमा । वरुणः । जुषन्त ।
आदित्यासः । शुचयः । धारऽपूताः । अवृजिनाः । अनवद्याः । अरिष्टाः ॥ २ ॥

वेङ्कट० इमम् स्तोमम् समानकर्माणः मे अद्य [illegible] सेवन्ताम् आदित्याः निर्मलाः [illegible] अवर्जिताः अहिंसिताः ॥ २ ॥

त आदित्यास उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः ।
अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिदन्ति ॥ ३ ॥

ते । आदित्यासः । उरवः । गभीराः । अदब्धासः । दिप्सन्तः । भूरिऽअक्षाः ।
अन्तरिति । पश्यन्ति । वृजिना । उत । साधु । सर्वम् । राजऽभ्यः । परमा । चित् । अन्ति ॥ ३ ॥

वेङ्कट० ते आदित्याः [illegible] गम्भीराः अहिंसिताः [illegible] बहुदर्शनाः । ते मनुष्याणाम् [illegible] पापानि साधूनि च [illegible] । सर्वम् एषाम् अपि दूरस्थानि अन्तिके भवन्ति [illegible] ॥ ३ ॥

धारयन्त आदित्यासो जगत् स्था देवा विश्वस्य भुवनस्य गोपाः ।
दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ॥ ४ ॥

१-१. नास्ति मूको. २-२. नास्ति स१. *-* नास्ति वि२. ३. '[illegible]' इति वि१ अ१. ४-४. नास्ति अ१. † † नास्ति वि१. ५. नास्ति वि१ अ१. ६-६. [illegible] वि१; नास्ति अ१. ७. [illegible] वि१ अ१.

धारयन्तः । आदित्यासः । जगत् । स्थाः । देवाः । विश्वस्य । भुवनस्य । गोपाः ।
दीर्घऽधियः । रक्षमाणाः । असुर्यम् । ऋतऽवानः । चयमानाः । ऋणानि ॥ ४ ॥

वेङ्कट० धारयन्तः आदित्याः जङ्गमं स्थावरं च देवाः विश्वस्य भुवनस्य गोपायितारः दीर्घकर्माणः रक्षमाणाः असुरत्वम् सत्यवन्तः वर्जयितारः मनुष्याणाम् ऋणानि कामयमानाः ॥ ४ ॥

विद्यामादित्या अवसो वो अस्य यदर्यमन्भय आ चिन्मयोभु ।
युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्याम् ॥ ५ ॥

विद्याम् । आदित्याः । अवसः । वः । अस्य । यत् । अर्यमन् । भये । आ । चित् । मयःऽभु ।
युष्माकम् । मित्रावरुणा । प्रऽनीतौ । परि । श्वभ्राऽइव । दुःऽइतानि । वृज्याम् ॥ ५ ॥

वेङ्कट० हे आदित्याः! युष्मदीयं रक्षणम् जानीम, अर्यमन्! मनुष्यकृते भये सति मम रक्षणम् आगत्य सुखं भावयति । हे मित्रावरुणौ! युष्मत्प्रणीतौ 'प्रणयने परि वर्जयाम श्वभ्राणीव दुरितानि' ॥ ५ ॥

'इति द्वितीयाष्टके सप्तमाध्याये षष्ठो वर्गः' ॥

सुगो हि वो अर्यमन्मित्र पन्था अनृक्षरो वरुण साधुरस्ति ।
तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहन्तु शर्म ॥ ६ ॥

सुऽगः । हि । वः । अर्यमन् । मित्र । पन्थाः । अनृक्षरः । वरुण । साधुः । अस्ति ।
तेन । आदित्याः । अधि । वोचत । नः । यच्छत । नः । दुःऽपरिहन्तु । शर्म ॥ ६ ॥

वेङ्कट० हे अर्यमन्! मित्र! वरुण! सुगमः कण्टकवर्जितश्च पन्थाः युष्माकम् अस्ति हि । तेन हे आदित्याः! अस्मान्' प्रणयत' अस्माकमधिवचनं कुरुत । यच्छत च अस्मभ्यम् शत्रुभिः दुष्परिहरणं सुखम्' ॥ ६ ॥

पिपर्तु नो अदिती राजपुत्राति द्वेषांस्यर्यमा सुगेभिः ।
बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥ ७ ॥

पिपर्तु । नः । अदितिः । राजऽपुत्रा । अति । द्वेषांसि । अर्यमा । सुऽगेभिः ।
बृहत् । मित्रस्य । वरुणस्य । शर्म । उप । स्याम । पुरुऽवीराः । अरिष्टाः ॥ ७ ॥

१. यद् म° वि° व° ए कर्म. २-२. नास्ति वि° अ°. ३-३. नास्ति मूको. ४. तत् वि°१ अ° कर्म.
५. °भ्यः ए.

वेङ्कट० राजानः पुत्रा यस्याः सा अदितिः अस्मान् अति पारयतु दुर्गमाणि कामेन, अर्यमा च। मित्रावरुणयोर्महत् शर्म वयम् उप स्याम बहुपुत्रा आदित्याः ॥ ७ ॥

तिस्रो भूमीर्धारयन् त्रीँरुत द्यून् त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्यमन् वरुण मित्र चारु ॥ ८ ॥

तिस्रः । भूमीः । धारयन् । त्रीन् । उत । द्यून् । त्रीणि । व्रता । विदथे । अन्तः । एषाम् ।
ऋतेन । आदित्याः । महि । वः । महिऽत्वम् । तत् । अर्यमन् । वरुण । मित्र । चारु ॥ ८ ॥

वेङ्कट० 'महत्त्वात् लोका भूयस्त्व उच्यन्ते, त्रीन्नपात् इव । त्रिष एव च' भूमयः सन्ति, दिवश्च । 'तिस्रो द्यावः' (ऋ १.३५.६) इति मन्त्रः । त्रीणि च कर्माणि अन्तः एषां कर्माणि इति सन्तताभिप्रायम् । सत्येनैव महत् वः आदित्याः ! महती महत्त्वम् । तत् 'कल्याणं च इति' ॥ ८ ॥

त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः ।
अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥ ९ ॥

त्री । रोचना । दिव्या । धारयन्त । हिरण्ययाः । शुचयः । धारऽपूताः ।
अस्वप्नऽजः । अनिमिषाः । अदब्धाः । उरुऽशंसाः । ऋजवे । मर्त्याय ॥ ९ ॥

वेङ्कट० 'दिव्यानि त्रीणि रोचनानि लोकान् इमे' धारयन्ति हिरण्मयशरीराः, निर्मलाः धाराभिरिव पूताः अस्वप्ना निमेषवर्जिता अहिंसिताः साधवे' मनुष्याय बहुशासनाः ॥ ९ ॥

त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ।
शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा ॥ १० ॥

त्वम् । विश्वेषाम् । वरुण । असि । राजा । ये । च । देवाः । असुर । ये । च । मर्ताः ।
शतम् । नः । रास्व । शरदः । विऽचक्षे । अश्याम । आयूंषि । सुऽधितानि । पूर्वा ॥ १० ॥

वेङ्कट० 'सर्वेषाम् ! वरुण ! देवानाम्* मानुषाणाम् च निवसन्[2] राजा असि[3] बलवान् !'[4] । शतं त्वम् अस्माकम् शरदः विदर्शनाय देहि । अश्याम[5] अन्नानि त्वयि सुनिहितानि पूर्वाणि ॥ १० ॥

'इति द्वितीयाष्टके सप्तमाध्याये सप्तमो वर्गः'[1] ॥

न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ॥ ११ ॥

१-१. नास्ति वि' अ'. २-२. ... वि', ... अ'. ३-३. ...नित वि' अ'. ४ ... वि' अ' अर्थ. ... वि', सुहितम् अ'. † ... वि' अ' ... ‡ ... अ' अर्थ. ६. नास्ति मूको. ७. ...म् मूके. ८. ...मः वि'' अ'. ९-९. नास्ति मूको.

न । दक्षिणा । वि । चिकिते । न । सव्या । न । प्राचीनम् । आदित्याः । न । उत । पश्चा ।
पाक्या । चित् । वसवः । धीर्या । चित् । युष्माऽनीतः । अभयम् । ज्योतिः । अश्याम् ॥ ११ ॥

वेङ्कट० राज्ञामस्मत्कारसद्भावात्[1] न 'अस्मत्स्वपि दिक्षु किञ्चिदपि ज्ञायते; तथा सति[2] पक्तव्योऽप्राज्ञो[3] धीरो वाऽहं युष्माभिः प्रणीतः अभयं तेजः अश्याम् हे वासयितारः' ॥ ११ ॥

यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश्च नित्याः ।
स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः ॥ १२ ॥

यः । राजऽभ्यः । ऋतनिऽभ्यः । ददाश । यम् । वर्धयन्ति । पुष्टयः । च । नित्याः ।
सः । रेवान् । याति । प्रथमः । रथेन । वसुऽदावा । विदथेषु । प्रऽशस्तः ॥ १२ ॥

वेङ्कट० निगदव्याख्याता ॥ १२ ॥

शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।
नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥ १३ ॥

शुचिः । अपः । सुऽयवसाः । अदब्धः । उप । क्षेति । वृद्धऽवयाः । सुऽवीरः ।
नकिः । तम् । घ्नन्ति । अन्तितः । न । दूरात् । यः । आदित्यानाम् । भवति । प्रऽनीतौ ॥ १३ ॥

वेङ्कट० शुचिः शोधकः 'दीप्तिकर्मणः, उदकानि सुयवसानि अहिंसितः [illegible] क्षियति[4] प्रवृद्धान्नः सुवीरः । तम् न केचन[5] घ्नन्ति समीपात् दूरात् योऽयम् यः[6] आदित्यानाम् प्रणये वर्तते ॥ १३ ॥

अदिते मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः ।
उर्वश्यामभयं ज्योतिरिन्द्र मा नो दीर्घा अभि नशन्तमिस्राः ॥ १४ ॥

अदिते । मित्र । वरुण । उत । मृळ । यत् । वः । वयम् । चकृम । कत् । चित् । आगः ।
उरु । अश्याम् । अभयम् । ज्योतिः । इन्द्र । मा । नः । दीर्घाः । अभि । नशन् । तमिस्राः ॥ १४ ॥

वेङ्कट० अदिते! मित्र! अपि च वरुण! दयां कुरु, 'यत् किञ्चित् वः अस्माभिः आगः कृतमस्ति । हे इन्द्र![‡] महत् अभयम् ज्योतिः अश्याम । मा अस्मान् दीर्घाः अभि व्याप्नुवन्तु तमिस्राः ॥ १४ ॥

१. 'रः इन्द्र नाद वि' अ', 'राजमानान् लप. २-२. न [illegible] वि' अ'. ३. [illegible] वि' * अ' लप. ४-४. [illegible] वि', [illegible] अ'. ५. [illegible] वि' अ'. ६. नास्ति वि' लप. ७-७. कुटिलम् वि'; नास्ति अ'. † [illegible] वि' लप. ‡ नास्ति लप. ८. नास्ति लप.

उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन् ।
उभा क्षयावाजयन्याति पृत्सूभावर्धौ भवतः साधू अस्मै ॥ १५ ॥

उभे इति । अस्मै । पीपयतः । समीची इति सम्ऽईची । दिवः । वृष्टिम् । सुऽभगः । नाम । पुष्यन् ।
उभा । क्षयौ । आऽजयन् । याति । पृत्ऽसु । उभौ । अर्धौ । भवतः । साधू इति । अस्मै ॥ १५ ॥

वेङ्कट० द्यावापृथिवी समीची[1] अस्मै कामम् आप्याययतः । तस्य दिवः[2] वर्षं सुभग इत्येव सुभगः भवति । नाम इति प्रख्यम्[3] । एवमाह रात्री चाऽभिमुखेन जयन्[4] याति युद्धेषु । तस्मै उभे पूर्वकायोऽपर-कायश्च अस्मै साधुनी भवतः ॥ १५ ॥

या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः ।
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्स्याम ॥ १६ ॥

याः । वः । मायाः । अभिऽद्रुहे । यजत्राः । पाशाः । आदित्याः । रिपवे । विऽचृत्ताः ।
अश्वीऽइव । तान् । अति । येषम् । रथेन । अरिष्टाः । उरौ । आ । शर्मन् । स्याम ॥ १६ ॥

वेङ्कट० याः वः माया † अभिद्रोग्धुः हे‡ यजत्राः!, ये च पाशाः † हे आदित्याः! रिपूणाम्[5] बन्धाय प्रसारिताः, अश्ववान् इव तान् रथेन अतिगच्छेयम्[6] आत्मानम्, अहिंसिताश्च महति सुखे आ भवेमेति[7] ॥ १६ ॥

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥ १७ ॥

मा । अहम् । मघोनः । वरुण । प्रियस्य । भूरिऽदाव्नः । आ । विदम् । शूनम् । आपेः ।
मा । रायः । राजन् । सुऽयमात् । अव । स्थाम् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १७ ॥

वेङ्कट० न अहम् धनवतः[8] सख्युः हे वरुण! शूनम् मा वृद्धं स्वं धनप्रदानेन वर्धयति आविदम् आवेदयामि बहुदानस्य[9] आपेः च । मा[10] अहम् राजन्![11] धनात्[12] सुयमात्[13] अवरूढो भवामि सुष्ठु विवक्ष्यामीति ॥ १७ ॥

[14]इति द्वितीयाष्टके सप्तमाध्यायेऽष्टमो वर्गः[15] ॥

[२८]

[16]कूर्मो गार्त्समदो गृत्समदो वा ऋषिः । वरुणो देवता । त्रिष्टुप् छन्दः ।[17]

इदं कवेरादित्यस्य स्वराजो विश्वानि सान्त्यभ्यस्तु मह्ना ।
अति यो मन्द्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः ॥ १ ॥

१. नास्ति मूको. २-२. °मी गत् वि° ध°. ३. वसवन क छ°. ४ ४. न पूणम वि° अ°. † नास्ति मूको. ‡ वे वि° अ कप. ५. मलनां, खर्प. ६-६. °न° ' इत्यल वि° अ°. ७. नास्ति वि°. ८. नास्ति वि° छ. ९. नु°पाद वि° लप. १०-१०. नास्ति मूको.

इदम् । कवेः । आदित्यस्य । स्वऽराजः । विश्वानि । सान्ति । अभि । अस्तु । मह्ना ।
अति । यः । मन्द्रः । यजथाय । देवः । सुऽकीर्तिम् । भिक्षे । वरुणस्य । भूरेः ॥ १ ॥

वेङ्कट० इदम् सर्वं क्रान्तदर्शिनः आदित्यस्य स्वराजः विश्वानि 'विद्यमानानि कर्माणि महत्त्वा स्तोत्रेणाभिभवामि । यो अतिशयेन यष्टव्यः देवः कारयन्तं यजमानाय भवति', तस्य प्रभूतस्य' वरुणस्य 'शोभनकीर्तिं धनम्' भिक्षे ॥ १ ॥

तव॑ व्र॒ते सु॒भगा॑सः स्याम स्वा॒ध्यो॑ वरुण तुष्टु॒वांसः॑ ।
उ॒पाय॑न उ॒षसां॒ गोम॑तीनाम॒ग्नयो॒ न जर॑माणा॒ अनु॒ द्यून् ॥ २ ॥

तव॑ । व्र॒ते । सु॒ऽभगा॑सः । स्या॒म॒ । सु॒ऽआ॒ध्यः॑ । व॒रु॒ण॒ । तु॒स्तु॒ऽवांसः॑ ।
उ॒प॒ऽअय॑ने । उ॒षसा॑म् । गोऽम॑तीनाम् । अ॒ग्नयः॑ । न । जर॑माणाः । अनु॑ । द्यून् ॥ २ ॥

वेङ्कट० तव कर्मणि सुभगाः स्याम सुकर्माणो हे वरुण! 'स्याम स्तुवन्तः' । उषसाम् गवादिमतीनाम् उपगमने अग्नयः इव स्तुवमानाः' अन्वहम् । ते यथा दीप्ताः शोभन्ते, एवं' वयमपि स्यामेति ॥ २ ॥

तव॑ स्याम पुरु॒वीर॑स्य॒ शर्म॑न्नुरु॒शंस॑स्य वरुण प्रणेतः ।
यू॒यं नः॑ पुत्रा अदिते॑रदब्धा अ॒भि क्ष॑मध्वं॒ युज्या॑य देवाः ॥ ३ ॥

तव॑ । स्या॒म॒ । पु॒रु॒ऽवीर॑स्य । शर्म॑न् । उ॒रु॒ऽशंस॑स्य । व॒रु॒ण॒ । प्र॒ने॒त॒रिति॑ प्रऽनेतः ।
यू॒यम् । नः॒ । पु॒त्राः॒ । अदि॑तेः । अद॑ब्धाः । अ॒भि । क्ष॒म॒ध्व॒म् । युज्या॑य । दे॒वाः॒ ॥ ३ ॥

वेङ्कट० तव स्याम बहुवीरस्य' सुखे बहुस्तुत्यस्य हे वरुण! प्रणेतः! । 'यूयम् अस्माकं अदितेः पुत्राः! अहिंसिताः! अस्मदभिलाषं सहायार्थं कुरुत' देवाः!' । 'अभि नो नरो अर्वन्ति सन्तं' (ऋ २,३१,१) इति मन्त्रः ॥ ३ ॥

प्र सी॑मादि॒त्यो अ॑सृजद्विध॒र्ताँ ऋ॒तं सिन्ध॑वो॒ वरु॑णस्य यन्ति ।
न श्रा॑म्यन्ति॒ न वि मु॑चन्त्ये॒ते वयो॒ न प॑प्तू रघु॒या परि॑ज्मन् ॥ ४ ॥

प्र । सी॒म् । आ॒दि॒त्यः । अ॒सृ॒ज॒त् । वि॒ऽध॒र्ता । ऋ॒तम् । सिन्ध॑वः । वरु॑णस्य । य॒न्ति॒ ।
न । श्रा॒म्य॒न्ति॒ । न । वि । मु॒च॒न्ति॒ । ए॒ते । वयः॑ । न । प॒प्तुः॒ । र॒घु॒ऽया । परि॑ऽज्मन् ॥ ४ ॥

वेङ्कट० सिन्धून् वरुणः' सर्वतः प्र असृजत विधर्ता । वरुणस्य उदकमेव ते न प्राप्नुवन्ति ''न श्राम्यन्ति न च स्पन्दने कदाचिद् वि मुञ्चन्ति एताः । पक्षिणः'' इव पतन्ति लघवः पतितो गमने ॥ ४ ॥

१-१. स्थाता ॰॰ स्' वि' अ'. † नास्ति मूको. २ यद्' वि'. ३-३. तैत्तरत्तम् वि' अ'. ४ ४. सुदितम् वि' अ'. † नास्ति मूको. ५. एत वि'. ६. 'वेगवन वि' अ'. ७-७. सुद्र॰॰॰ स्त वि' अ'. † एकं वि' अ' पे. ८ नास्ति मूको. ९ नास्ति वि' अ'. १०-१०. सुदितम् वि' अ'. † 'पुच्छति वि' अ' पे. ‡ नास्ति मूको.

वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य ।
मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ॥ ५ ॥

वि । मत् । श्रथय । रशनाम्ऽइव । आगः । ऋध्याम । ते । वरुण । खाम् । ऋतस्य ।
मा । तन्तुः । छेदि । वयतः । धियम् । मे । मा । मात्रा । शारि । अपसः । पुरा । ऋतोः ॥५॥

वेङ्कट० हे वरुण! मत्तो रज्जुम् इव पापं विश्लथय। वर्धयेम तव ऋतस्य [illegible] । मा सूत्रम् छिन्नं भवतु कर्म वयतः मे। मा च मात्रा शीर्णा भवतु। कर्मणः पुरा [illegible] इति कर्मकरणे मनुष्यकरणमित्याह ॥ ५ ॥

'इति द्वितीयाष्टके सप्तमाध्याये प्रथमो वर्गः' ॥

अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय ।
दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे ॥ ६ ॥

अपो इति । सु । म्यक्ष । वरुण । भियसम् । मत् । सम्ऽराट् । ऋतऽवः । अनु । मा । गृभाय ।
दामऽइव । वत्सात् । वि । मुमुग्धि । अंहः । नहि । त्वत् । आरे । निऽमिषः । चन । ईशे ॥६॥

वेङ्कट० हे वरुण! मत्तो भयं सुष्ठु अपगमय। हे सम्राट्! सत्यवन्! माम् अनुगृहाण। वत्सात् रज्जुमिव पापं विमोचय। नहि त्वयि असति कश्चन निमेषस्य ईश्वरो भवति ॥ ६ ॥

मा नो वधैर्वरुण ये त इष्टावेनः कृण्वन्तमसुर भ्रीणन्ति ।
मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः ॥ ७ ॥

मा । नः । वधैः । वरुण । ये । ते । इष्टौ । एनः । कृण्वन्तम् । असुर । भ्रीणन्ति ।
मा । ज्योतिषः । प्रऽवसथानि । गन्म । वि । सु । मृधः । शिश्रथः । जीवसे । नः ॥ ७ ॥

वेङ्कट० मा अस्मान् आयुधैः हे वरुण! हिंसीः, ये तव यज्ञे वर्तमाने पापं कुर्वन्तं बलवन् नराऽऽयुधानि कानि हिंसन्ति ते। मा वयम् ज्योतिषः प्रवासान् वियोगान् गमेम, सूर्यं पश्येम। अस्माकं जीवनाय शत्रून् सुष्ठु विश्लथयेति ॥ ७ ॥

नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम ।
त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि ॥ ८ ॥

---

१. विश्लथय वि॰ अ॰. २. नास्ति वि॰. ३-३. नास्ति वि॰ अ॰. ४. कार्य वि॰ अ॰. ५-५. नास्ति मूको. ६-६. नास्ति वि॰ अ॰. ७-७. कुरु वि॰ अ॰. ८. अगम्य मूको.

नमः । पुरा । ते । वरुण । उत । नूनम् । उत । अपरम् । तुविऽजात । ब्रवाम ।
त्वे इति । हि । कम् । पर्वते । न । श्रितानि । अप्रऽच्युतानि । दुःऽदभ । व्रतानि ॥ ८ ॥

वेङ्कट० पुरा च ते नमः, वरुण! 'सम्प्रति च अपि च ततोऽन्यस्मिन्नपि बहुजनन! ब्रवाम'। त्वयि हि पर्वते इव श्रितानि कम् इति पूरणम्, अप्रच्युतानि हे दुर्दभ! तव कर्माणि ॥ ८ ॥

परा ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजम् ।
अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान्वरुण तासु शाधि ॥ ९ ॥

परा । ऋणा । सावीः । अध । मत्ऽकृतानि । मा । अहम् । राजन् । अन्यऽकृतेन । भोजम् ।
अविऽउष्टाः । इत् । नु । भूयसीः । उषसः । आ । नः । जीवान् । वरुण । तासु । शाधि ॥ ९ ॥

वेङ्कट० अपि च अस्मत्कृतानि ऋणानि परा गमय, मा[1] अहम् राजन्! अन्यप्रयुक्तेन धनेन भोजम्। अव्युष्टाः एव मम बहवः[2] उषसः। ऋणापाकरणागताधो मिद्धायाम् एतम् अव्युच्छन्तीषु तास्वस्मान् जीवतः हे वरुण! कुरु स्वेनैव धनेन ॥ ९ ॥

यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह ।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ॥ १० ॥

यः । मे । राजन् । युज्यः । वा । सखा । वा । स्वप्ने । भयम् । भीरवे । मह्यम् । आह ।
स्तेनः । वा । यः । दिप्सति । नः । वृकः । वा । त्वम् । तस्मात् । वरुण । पाहि । अस्मान् ॥ १० ॥

वेङ्कट० यः मे राजन् वरुण![3] नियोक्तव्यः[4] वा 'सखा वा स्वप्ने भयम् दर्शयति भीरवे मह्यम् वदति, स्तेनः[5] वा वृकः वा अस्मान् हिंसितुमिच्छति त्वम् तस्मात् वरुण! अस्मान् रक्षेति ॥ १० ॥

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥ ११ ॥

मा । अहम् । मघोनः । वरुण । प्रियस्य । भूरिऽदाव्नः । आ । विदम् । शूनम् । आपेः ।
मा । रायः । राजन् । सुऽयमात् । अव । स्थाम् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ११ ॥

वेङ्कट० (ऋ २,२७,१७ द्र.) ॥ ११ ॥

'इति द्वितीयाष्टके सप्तमाध्याये दशमो वर्गः' ॥

१. नत वि' ब अपे. २-२. ०गाम वि' अ. ३. नास्ति ब मूपे. ४. दुर्दम्भ अ'. ५. ग मूपे. ६-६. ०००कुप वि' अ'. ७. 'कल्पं गा वि' अ'. ८-८. नास्ति वि', ००नो अ'. ९-९. नास्ति मूको.

[२९]

'कूर्मो गार्त्समदो गृत्समदो वा ऋषिः । विश्वे देवा देवता । त्रिष्टुप् छन्दः' ।

धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः ।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ॥ १ ॥

धृतऽव्रताः । आदित्याः । इषिराः । आरे । मत् । कर्त । रहसूःऽइव । आगः ।
शृण्वतः । वः । वरुण । मित्र । देवाः । भद्रस्य । विद्वान् । अवसे । हुवे । वः ॥ १ ॥

वेङ्कट० हे धृतकर्माणः! आदित्याः! इषिराः[1] एषणशीलाः! दूरे मत्तः कुरुत पापम्, यं रहस्यसम्भवाः प्रक्षिपन्ति तादृशं मन्त्रवेदनाबाधम् । हे वरुणादयः! स्तुतीः शृण्वतः भवतः[†] अहं[‡] भद्रम् रक्षणाय ह्वयामि । युष्मान् वा हविः प्रयच्छन् इति[1] ॥ १ ॥

यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत ।
अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ॥ २ ॥

यूयम् । देवाः । प्रऽमतिः । यूयम् । ओजः । यूयम् । द्वेषांसि । सनुतः । युयोत ।
अभिऽक्षत्तारः । अभि । च । क्षमध्वम् । अद्य । च । नः । मृळयत । अपरम् । च ॥ २ ॥

वेङ्कट० '[2]यूयम् देवाः! प्रमतिर्लक्षणा कुरुत[†] ओजः च, यूयम् एव अन्तर्हितानि द्वेषांसि पृथक् कुरुत, अभिक्षन्तारः अस्मत्[‡] च क्षमध्वम्, अद्य श्वः च अस्मान् सुखयतेति[2]' ॥ २ ॥

किमू नु वः कृणवामापरेण किं सनेन वसव आप्येन ।
यूयं नो मित्रावरुणादिते च स्वस्तिमिन्द्रामरुतो दधात ॥ ३ ॥

किम् । ऊं इति । नु । वः । कृणवाम । अपरेण । किम् । सनेन । वसवः । आप्येन ।
यूयम् । नः । मित्रावरुणा । अदिते । च । स्वस्तिम् । इन्द्राऽमरुतः । दधात ॥ ३ ॥

वेङ्कट० '[3]युष्माकं सम्प्रतितनेन किम् नु सनातनेन[†] हविषा परिचरणम् कुर्वाम, अथवा अपरेण इति । शिष्टं स्पष्टम्[‡3]' ॥ ३ ॥

हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यम् ।
मा वो रथो मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म ॥ ४ ॥

१-१. नास्ति मूको. २-२. एवम् ··· वि' अ'. † 'ता वि' अ कर्प. ‡ अहम् वि'. ३-३. युष्माकम् वि' अ'. † 'क्ष वि' कर्प. ‡ नदि वि' कम. ३-३. युष्माकम् वि' अ'. † सनातेन कर्प; सनातन वि'. ‡ 'ष्टम् इति वि'.

हये । देवाः । यूयम् । इत् । आपयः । स्थ । ते । मृळत । नाधमानाय । मह्यम् ।
मा । वः । रथः । मध्यमऽवाट् । ऋते । भूत् । मा । युष्मावत्ऽसु । आपिषु । श्रमिष्म ॥ ४ ॥

वेङ्कट० 'हे देवाः! यूयम् एव मम बान्धवाः स्थ, ते सुखयत याचमानाय मह्यम् । मा युष्माकम् रथः मध्ये भवन्तमन्तरिक्षे यो वहति दिवं युष्मान् स युष्माभिः ऋते भवतु । अपि सह गच्छन्तु । मा वयं युष्मत्सदृशेषु बन्धुषु सत्सु श्रमाम धनाभावादिनेति' ॥ ४ ॥

प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशास ।
आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ॥ ५ ॥

प्र । वः । एकः । मिमय । भूरि । आगः । यत् । मा । पिताऽइव । कितवम् । शशास ।
आरे । पाशाः । आरे । अघानि । देवाः । मा । मा । अधि । पुत्रे । विम्ऽइव । ग्रभीष्ट ॥ ५ ॥

वेङ्कट० 'युष्माकम् एकः वरुणः भूरि पापं हिनस्ति यस्मात् माम् पितेव कितवपुत्रम् शशास । वरुणप्रसादात् हि पापं नानुतिष्ठति । हे देवाः! वरुणपाशाः मत्तो दूरे भवन्तु, दूरम् आयुष्मत्पि पाप्मानि । मा माम् अधि पुत्रे पश्यति पक्षिणम् इव व्याधः धर्नाद् गृह्णीध्वं पापैः' ॥ ५ ॥

अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥ ६ ॥

अर्वाञ्चः । अद्य । भवत । यजत्राः । आ । वः । हार्दि । भयमानः । व्ययेयम् ।
त्राध्वम् । नः । देवाः । निऽजुरः । वृकस्य । त्राध्वम् । कर्तात् । अवऽपदः । यजत्राः ॥ ६ ॥

वेङ्कट० 'हे यजत्राः देवाः! इतोऽभिमुखाः अद्य भवत । अहं बिभ्यत् युष्माकं हार्दं प्रियम् आ व्ययेयम् । तेनाच्छादनमावृणोमि । यथा भवति रक्षध्वम्! अस्मान् नितरां हिंसकात् वृकात् । रक्षध्वं चाऽवपातयितुः श्वभ्रात् इति' ॥ ६ ॥

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥ ७ ॥

मा । अहम् । मघोनः । वरुण । प्रियस्य । भूरिऽदाव्नः । आ । विदम् । शूनम् । आपेः ।
मा । रायः । राजन् । सुऽयमात् । अव । स्थाम् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ७ ॥

१-१. त्रुटितम् वि' अ'. २-२. त्रुटितम् वि' अ'. † नास्ति मूको. ३-३. त्रुटितम् वि' अ'; "दुःखम्" मूको. † पाठ इ प्रस्तावः.

वेङ्कट० (ऋ २,२७,१० द्र.) ॥ ७ ॥

¹इति द्वितीयाष्टके षष्ठाध्याये एकादशो वर्गः.¹ ॥

[३०]

²गृत्समदः भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । इन्द्रो देवता, षष्ठ्या इन्द्रासोमौ, अष्टम्याः पूर्वार्धर्चस्य सरस्वती, नवम्या बृहस्पतिः, एकादश्या मरुतः । त्रिष्टुप् छन्दः, एकादशी जगती² ।

ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः ।
अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसाम् ॥ १ ॥

ऋतम् । देवाय । कृण्वते । सवित्रे । इन्द्राय । अहिऽघ्ने । न । रमन्ते । आपः ।
अहःऽअहः । याति । अक्तुः । अपाम् । कियति । आ । प्रथमः । सर्गः । आसाम् ॥ १ ॥

वेङ्कट० ³गृत्समदः । अथाभिप्रैत्यैन्द्रं सूक्तम् एकपूर्वम् आपि च । आदितः पञ्चेन्द्राः । सत्यम् कुर्वते प्रेरयित्रे देवाय इन्द्राय अहिघ्ने न कदाचिदपि आपः विरामं कुर्वन्ति, सर्वदा निर्गच्छन्ति । अन्वहम् अपाम् बिन्दुरागच्छति । एतत् अपाम् अन्तोऽस्माभिर्न दृश्यते । अथ कियति काले स्थिता आसाम् अपाम् प्रथमः सर्गः । तस्मादि अपर्यन्तम् इन्द्रकृतं भवति³ ॥ १ ॥

यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुष उवाच ।
पथो रदन्तीरनु जोषमस्मै दिवेदिवे धुनयो यन्त्यर्थम् ॥ २ ॥

यः । वृत्राय । सिनम् । अत्र । अभरिष्यत् । प्र । तम् । जनित्री । विदुषे । उवाच ।
पथः । रदन्तीः । अनु । जोषम् । अस्मै । दिवेऽदिवे । धुनयः । यन्ति । अर्थम् ॥ २ ॥

वेङ्कट० ⁴यः इन्द्रो वृत्रं हन्तुं बन्धकं वज्रविभिन्नबन्धनम् अत्र अभरत्, तद् इन्द्रस्य वृत्रस्य माता विदुषे वृत्राय 'अयं त्वां हन्तुमुद्यतः' इत्युवाच, तदस्मा च सम्योपदर्शितम् । तथा मन्त्रः— 'उत्तरा सूरधरः पुत्र आसीत्' (ऋ १,३२,९) इति । अथ वृत्रे हते मार्गान् खनन्त्यः इन्द्रस्य प्रसादम् अन्वहं नद्यः समुद्रं प्रति गच्छन्ति⁴ ॥ २ ॥

ऊर्ध्वो ह्यस्थादध्यन्तरिक्षेऽधा वृत्राय प्र वधं जभार ।
मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिन्द्रः ॥ ३ ॥

१-१. नास्ति मूको. २-२. कुर्वन्त् वि° अ°. † °वधिक्व मूको °जे जिन ऊ पञ्चावः
३-३. कुटिकम् वि° अ°. ‡ °मित्यन्तम् मूको.

ऊर्ध्वः । हि । अस्थात् । अधि । अन्तरिक्षे । अध । वृत्राय । प्र । वधम् । जभार ।
मिहम् । वसानः । उप । हि । ईम् । अदुद्रोत् । तिग्मऽआयुधः । अजयत् । शत्रुम् । इन्द्रः ॥३॥

वेङ्कट० 'इन्द्रः ऊर्ध्वः तिष्ठन् अन्तरिक्षे । वृत्रस्याथ वधं प्र जहार । तदानीं च वृत्र एव वृष्टिमाच्छादयन् उप दुद्राव । तम् शत्रुम् इन्द्रः तीक्ष्णायुधः अजयत् इति' ॥ ३ ॥

बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान् ।
यथा जघन्थ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिन्द्र ॥ ४ ॥

बृहस्पते । तपुषा । अश्माऽइव । विध्य । वृकऽद्वरसः । असुरस्य । वीरान् ।
यथा । जघन्थ । धृषता । पुरा । चित् । एव । जहि । शत्रुम् । अस्माकम् । इन्द्र ॥ ४ ॥

वेङ्कट० इन्द्रसहाय बृहस्पते! तेजसा अश्ना इव विध्य वारयितव्यबलान् वृत्रस्य वीरान् । हे इन्द्र! त्वम् यथा पुरा वज्रेण हतवानसि, तथा इदानीमपि अस्माकम् शत्रुम् जहि ॥ ४ ॥

अव क्षिप दिवो अश्मानमुच्चा येन शत्रुं मन्दसानो निजूर्वाः ।
तोकस्य सातौ तनयस्य भूरेरस्माँ अर्धं कृणुतादिन्द्र गोनाम् ॥ ५ ॥

अव । क्षिप । दिवः । अश्मानम् । उच्चा । येन । शत्रुम् । मन्दसानः । निऽजूर्वाः ।
तोकस्य । सातौ । तनयस्य । भूरेः । अस्मान् । अर्धम् । कृणुतात् । इन्द्र । गोनाम् ॥५॥

वेङ्कट० उच्चैः स्थितम् दिवः अव क्षिप वज्रम्, येन पुरा त्वम् हृष्यमाणः शत्रून् हिंसितवानसि । बहोः पुत्रस्य पौत्रस्य च लाभनिमित्तम् अस्मान् प्रति त्वदीयानां गवाम् अर्धम् कृणुतात् इति ॥ ५ ॥

'इति द्वितीयाष्टके सप्तमाध्याये द्वादशो वर्गः' ॥

प्र हि क्रतुं वृहथो यं वनुथो रध्रस्य स्थो यजमानस्य चोदौ ।
इन्द्रासोमा युवमस्माँ अविष्टमस्मिन् भयस्थे कृणुतमु लोकम् ॥ ६ ॥

प्र । हि । क्रतुम् । वृहथः । यम् । वनुथः । रध्रस्य । स्थः । यजमानस्य । चोदौ ।
इन्द्रासोमा । युवम् । अस्मान् । अविष्टम् । अस्मिन् । भयऽस्थे । कृणुतम् । ऊँ इति । लोकम् ॥ ६ ॥

१-१. तुदितम् वि' मू'. २. वरावनान, ... मूको. ३-३. नास्ति मूको.

वेङ्कट० 'इन्द्रासोमौ! वयम् इदं । अस्य कर्म च कुर्मः विश्वक्रमस्य† रायस्कस्य । महास्तनस्य पोषयितारौ च भवथ । तौ युवम् अस्मान् रक्षतम् । अस्मिन्‡ संग्रामे कृणुतम् विलोकनम्§ भवता स्याम इति' ॥ ६ ॥

न मा॑ तम॒न्न श्र॑म॒न्नोत त॑न्द्र॒न्न वो॑चाम॒ मा सु॑नो॒तेति॒ सोम॑म् ।
यो मे॑ पृ॒णाद्यो दद॒द्यो नि॒बोधा॒द्यो मा॑ सु॒न्वन्त॒मुप॒ गोभि॒राय॑त् ॥ ७ ॥

न । मा॒ । त॒म॒त् । न । श्र॒म॒त् । उ॒त । त॒न्द्र॒त् । न । वो॒चा॒म॒ । मा । सु॒नो॒त॒ । इति॑ । सोम॑म् ।
यः । मे॒ । पृ॒णात् । यः । दद॑त् । यः । नि॒ऽबोधा॑त् । यः । मा॒ । सु॒न्वन्त॑म् । उप॑ । गोभिः॑ । आ । अय॑त् ॥ ७ ॥

वेङ्कट० 'न माम् इन्द्रो ग्लापयतु । श्रमं च न जनयतु, अपि च मा तन्द्रिं करोतु । वयं प्रमादादपि सोमम् मा सुनोत इति न वोचाम । यः मम कामं पूरयति । यः च धनं प्रयच्छति । उक्तं च शृणोति । यः च माम् सुन्वन्तम् गोभिः सह उप आ‡ गच्छतीति' ॥ ७ ॥

सर॑स्वति॒ त्वम॒स्माँ अ॑विड्ढि म॒रुत्व॑ती धृष॒ती जे॑षि॒ शत्रू॑न् ।
त्यं चि॒च्छर्ध॑न्तं तविषी॒यमा॑ण॒मिन्द्रो॑ हन्ति वृष॒भं शण्डि॑कानाम् ॥ ८ ॥

सर॑स्वति । त्वम् । अ॒स्मान् । अ॒वि॒ड्ढि॒ । म॒रुत्व॑ती । धृ॒ष॒ती । जे॒षि॒ । शत्रू॑न् ।
त्यम् । चि॒त् । शर्ध॑न्तम् । त॒वि॒षी॒ऽयमा॑णम् । इन्द्रः॑ । ह॒न्ति॒ । वृ॒ष॒भम् । शण्डि॑कानाम् ॥ ८ ॥

वेङ्कट० ''सरस्वति त्वमित्यस्मिन्नर्धर्चे मध्यमा तु वाक्' इति शौनकः (बृदे ४,८५) । हे सरस्वति! त्वम् अस्मान् रक्ष । मरुद्भिः सहिता धर्षयन्ती जयसि शत्रून् । त्यम् चित् वेगं कुर्वन्तं बलमिवाचरन्तम् इन्द्रः हन्ति असुराणामीश्वरं वृषभम् असुरमिति' ॥ ८ ॥

यो नः॑ सनु॒त्य उ॒त वा॑ जिघ॒त्नुर॑भि॒ख्याय॒ तं ति॑गि॒तेन॑ विध्य ।
बृह॑स्पत॒ आयु॑धैर्जेषि॒ शत्रू॑न्द्रु॒हे रीष॑न्तं॒ परि॑ धेहि राजन् ॥ ९ ॥

यः । नः॒ । स॒नु॒त्यः॑ । उ॒त । वा॒ । जि॒घ॒त्नुः । अ॒भि॒ऽख्याय॑ । तम् । ति॒गि॒तेन॑ । वि॒ध्य॒ ।
बृह॑स्पते । आयु॑धैः । जे॒षि॒ । शत्रू॑न् । द्रु॒हे । रिष॑न्तम् । परि॑ । धे॒हि॒ । रा॒ज॒न् ॥ ९ ॥

वेङ्कट० 'यः अस्माकमन्तर्हितः, अपि च अस्मान् जिघांसति, तम् अभि दृष्ट्वा† तीक्ष्णेनायुधेन विध्य । बृहस्पते! त्वम् आयुधैः शत्रून् जेषि । हे राजन्! हिंसन्तं द्रोग्धुः‡ परितो निधेहि' ॥ ९ ॥

१-१. त्रुटितम् वि॰ अ॰. † विश्वक्रमस्य वि॰ कपे. ‡ तस्मिन् कपे. § विलोकनम् कपे; विलोकनमस्माकम् वि॰. २-२ त्रुटितम् वि॰ अ॰. † तु न वि॰. ‡ नास्ति कपे. ३-३. नास्ति वि॰ अ॰. † दृष्ट्वा मूको. ४-४. नास्ति वि॰ अ॰ †-† कोष्ठकान्तर्गतः पाठः मूकोगतः. ‡ द्रोग्धुम् वि॰ कपे.

अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि ।
ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि ॥ १० ॥

अस्माकेभिः । सत्वऽभिः । शूर । शूरैः । वीर्या । कृधि । यानि । ते । कर्त्वानि ।
ज्योक् । अभूवन् । अनुऽधूपितासः । हत्वी । तेषाम् । आ । भर । नः । वसूनि ॥ १० ॥

वेङ्कट० 'अस्माकैः† शूरैः पुत्रैः सह त्वं वीर्याणि कुरु शूर !,‡ यानि तव वीर्याणि§ कर्तव्यानि । चिरम् अभूवन् शत्रवः, नूनं सन्तापयितारः, तान् हत्वा तेषाम् वसूनि अस्माकम् आ भर' ॥ १० ॥

तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम् ।
यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे ॥ ११ ॥

तम् । वः । शर्धम् । मारुतम् । सुम्नऽयुः । गिरा । उप । ब्रुवे । नमसा । दैव्यम् । जनम् ।
यथा । रयिम् । सर्वऽवीरम् । नशामहै । अपत्यऽसाचम् । श्रुत्यम् । दिवेऽदिवे ॥ ११ ॥

वेङ्कट० 'शौनकः — 'बृहस्पतिरिन्द्र नवमे स्वसूक्ते तु स्तुतिः' (बृहद्दे ४, ८५) इति । हे स्तोतारः! युष्माकम् तम् मारुतम् बलिनं सुम्नमिच्छन्† स्तुत्या उप ब्रुवे नमसा च दैव्यम् जनम्, मरुतां प्रसादात् यथा‡ धनं सर्ववीरम्‡ प्राप्नवाम§ पुत्राणां सम्भक्तृ¶ श्रवणीयम् अन्वहमिति' ॥ ११ ॥

'इति द्वितीयाष्टके सप्तमाध्याये त्रयोदशो वर्गः' ॥

[३१]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
विश्वे देवा देवता । जगती छन्दः पञ्चमी त्रिष्टुप्' ॥

अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा ।
प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवन्तो वनर्षदः ॥ १ ॥

अस्माकम् । मित्रावरुणा । अवतम् । रथम् । आदित्यैः । रुद्रैः । वसुऽभिः । सचाऽभुवा ।
प्र । यत् । वयः । न । पप्तन् । वस्मनः । परि । श्रवस्यवः । हृषीऽवन्तः । वनऽसदः ॥ १ ॥

वेङ्कट० 'वैश्वदेवमिदम् । हे मित्रावरुणौ! अस्माकम् रथम् रक्षतम् आदित्यादिभिः सहभुवौ । यदा प्र पतन्ति यसते स्थानात् पक्षिण इव अश्वमिच्छन्तः हृष्टाः वने सीदन्तो युद्धार्थमश्वाः' ॥ १ ॥

1-1. मुद्रितम् वि' भ'. † स्मा' मूको. ‡ नास्ति मूको. § वीर्ये मूको. २-२. मुद्रितम् वि' भ' † 'स्तुत्या मूको. ‡ नास्ति मूको. ३ धनं मूको. § प्राप्नुयाम मूको. ¶ सम्भक्त मूको ३-३. नास्ति मूको ४-४. मुद्रितम् वि' भ'. † यसः मूको.

अध॑ स्मा न॒ उद॑वता सजोषसो॒ रथं॑ देवासो अ॒भि वि॒क्षु वा॑ज॒युम् ।
यदा॒शवः॒ पद्या॑भि॒स्तित्र॑तो॒ रजः॑ पृथि॒व्याः सानौ॒ जङ्घ॑नन्त पा॒णिभिः॑ ॥ २ ॥

अध॑ । स्म॒ । न॒ । उत् । अ॒वत॒ । स॒ऽजो॑षसः । रथ॑म् । दे॒वा॒सः॒ । अ॒भि । वि॒क्षु । वा॒ज॒ऽयुम् ।
यत् । आ॒शवः॑ । पद्या॑भिः । तित्र॑तः । रजः॑ । पृ॒थि॒व्याः । सानौ॑ । जङ्घ॑नन्त । पा॒णिऽभिः॑ ॥ २ ॥

वेङ्कट० 'अध अस्माकम् उत् रक्षत सङ्गताः' रथम् हे देवाः ! अभि विक्षु संग्रामेच्छन्तम् । यदा अश्वाः पद्याभिः गतिभिर्युक्तदेशं तरन्तः पृथिव्याः सानौ इमे पुनःपुनर्घ्नन्ति पाणिभिः अग्रपादैः ॥ २ ॥

उ॒त स्य न॒ इन्द्रो॑ वि॒श्वच॑र्षणिर्दि॒वः शर्धे॑न॒ मारु॑तेन सु॒क्रतुः॑ ।
अनु॒ नु स्था॑त्यवृ॒काभि॑रू॒तिभी॒ रथं॑ म॒हे स॒नये॒ वाज॑सातये ॥ ३ ॥

उ॒त । स्यः । न॒ः । इन्द्रः॑ । वि॒श्वऽच॑र्षणिः । दि॒वः । शर्धे॑न । मारु॑तेन । सु॒ऽक्रतुः॑ ।
अनु॑ । नु । स्था॒ति॒ । अ॒वृ॒काभिः॑ । ऊ॒तिऽभिः॑ । रथ॑म् । म॒हे । स॒नये॑ । वाज॑ऽसातये ॥ ३ ॥

वेङ्कट० 'अपि च सः इन्द्रः सर्वद्रष्टा अस्माकम् रथम् दिवः' 'आगत्य मारुतेन वेगेन । सह सुकर्मा' स्थाति अनु तिष्ठति अवृकाभिः ऊतिभिः सह महते लाभाय युद्धार्थमिति ॥ ३ ॥

उ॒त स्य दे॒वो भुव॑नस्य स॒क्षणि॒स्त्वष्टा॒ ग्नाभिः॑ स॒जोषा॑ जूजुव॒द्रथ॑म् ।
इळा॒ भगो॑ बृहद्दि॒वोत रोद॑सी पू॒षा पुरं॑धिर॒श्विना॒वधा॒ पती॑ ॥ ४ ॥

उ॒त । स्यः । दे॒वः । भुव॑नस्य । स॒क्षणिः॑ । त्वष्टा॑ । ग्नाभिः॑ । स॒ऽजोषाः॑ । जू॒जु॒व॒त् । रथ॑म् ।
इळा॑ । भगः॑ । बृ॒ह॒त्ऽदि॒वा । उ॒त । रोद॑सी॒ इति॑ । पू॒षा । पुर॑म्ऽधिः । अ॒श्विनौ॑ । अध॑ । पती॒ इति॑ ॥ ४ ॥

वेङ्कट० अपि च सः देवः भुवनस्य सेवकः 'त्वष्टा च ग्नाः' देवपत्नीभिः सहितः रथम् 'प्रेरयति इळा च देवी भगः च तथा बृहद्दिवा' च रोदसी द्यावापृथिवी पूषा सरस्वती अश्विनौ च सर्वे प्रेरयन्त्विति ॥ ४ ॥

उ॒त त्ये दे॒वी सु॒भगे॑ मिथू॒दृशो॒षासा॒नक्ता॒ जग॑ताम॒पीजुवा॑ ।
स्तु॒षे यद्वां॑ पृथिवि॒ नव्य॑सा॒ वचः॑ स्था॒तुश्च॒ वय॒स्त्रिव॑या उप॒स्तिरे॑ ॥ ५ ॥

उ॒त । त्ये इति॑ । दे॒वी इति॑ । सु॒भगे॒ इति॑ सु॒ऽभगे॑ । मि॒थु॒ऽदृशा॑ । उ॒षसा॒नक्ता॑ । जग॑ताम् । अ॒पि॒ऽजुवा॑ ।
स्तु॒षे । यत् । वा॒म् । पृ॒थि॒वि॒ । नव्य॑सा । वचः॑ । स्था॒तुः । च॒ । वयः॑ । त्रिऽव॑याः । उ॒प॒ऽस्तिरे॑ ॥

१-१. कुटिलम् वि° अ°. ५. गा° वि° अ°. ३ ३. °गा···र्थं वि° अ°. † देवेन मूको. ७-७. मेरं···वृद्ध° वि° अ°.

वेङ्कट० अपि चैवं देव्यौ सोमतत्त्वे मिथुनं [illegible] 'हे कामाद् [illegible] देवपत्नी स्तौमि' । यद्वा हे मिथुने! नक्तम् [illegible] वचसा मह् [illegible] उभयं च हविर्लक्षणं [illegible] युक्त्वा वां [illegible] [illegible], [illegible] स्तौमि इति' । [illegible] (ऋ १ ६६,२) 'इत्यत्र नैष्य' ॥ ५ ॥

उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्योऽज एकपादुत ।
त्रित ऋभुक्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि ॥ ६ ॥

उत । वः । शंसम् । उशिजाम्ऽइव । श्मसि । अहिः । बुध्न्यः । अजः । एकऽपात् । उत ।
त्रितः । ऋभुक्षाः । सविता । चनः । दधे । अपाम् । नपात् । आशुऽहेमा । धिया । शमि ॥ ६ ॥

वेङ्कट० अपि च युष्माकं स्तोत्रं कामयमानानामस्माकं यथाऽस्तु [illegible] भवति, एवं यथाऽस्तु [illegible] (?) [illegible] बुध्न्यः [illegible] [illegible] 'आदित्यः [illegible]† इन्द्रः [illegible] च अस्मभ्यम्' प्रयच्छतु [illegible] [illegible] [illegible] कर्माणि ॥ ६ ॥

एता वो वश्म्युद्यता यजत्रा अतक्षन्नायवो नव्यसे सम् ।
श्रवस्यवो वाजं चकानाः सप्तिर्न रथ्यो अह धीतिमश्याः ॥ ७ ॥

एता । वः । वश्मि । उत्ऽयता । यजत्राः । अतक्षन् । आयवः । नव्यसे । सम् ।
श्रवस्यवः । वाजम् । चकानाः । सप्तिः । न । रथ्यः । अह । धीतिम् । अश्याः ॥ ७ ॥

वेङ्कट० एतानि वः कामये उद्यतानि हे यजत्राः! [illegible] मनुष्याः [illegible] 'यानि स्तोत्राणि । यत् [illegible] [illegible] कामयमानाः' यथाऽश्वो रथे युक्तो [illegible] [illegible] एवम् [illegible] [illegible] ॥ ७ ॥

'इति द्वितीयाष्टके सप्तमाध्याये चतुर्दशो वर्गः' ।

[३२]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
प्रथमाया द्यावापृथिवी देवता, द्वितीयातृतीययोः इन्द्रस्त्वष्टा वा, चतुर्थीपञ्चम्यो राका,
षष्ठीसप्तम्योः सिनीवाली, अष्टम्या लिङ्गोक्ताः ।
[illegible] छन्दः, तिस्रोऽन्त्या अनुष्टुभः' ॥

अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः ।
ययोरायुः प्रतरं ते इदं पुर उपस्तुते वसूयुर्वां महो दधे ॥ १ ॥

१-१. [illegible] वि' मूको. २. [illegible] वि' [illegible] ३. नास्ति वि'.
४-४. नास्ति वि' अ' ५-५. [illegible] [illegible] मूको ६-६. [illegible] वि' मूको.
† [illegible] वि' क सप. ●● [illegible] वि' मूको. ८-८. नास्ति मूको.

अस्य । मे । द्यावापृथिवी इति । ऋतऽयतः । भूतम् । अवित्री इति । वचसः । सिसासतः ।
ययोः । आयुः । प्रऽतरम् । ते इति । इदम् । पुरः । उपस्तुते इत्युपऽस्तुते । वसुऽयुः । वाम् । महः । दधे ॥

वेङ्कट० हे द्यावापृथिवी ! युवां सत्यमिच्छतो मम अस्य वचसः सम्भक्तुमिच्छतो रक्षिके भवतम् । ययोः द्यावापृथिव्योः प्रकृष्टमायुर्भवति, ते युवां पुरः स्तुते । यशोऽर्थमिच्छन् वाम् महद् हविः प्रयच्छामि ॥ १ ॥

मा नो॑ गु॒ह्या रिप॑ आ॒योरह॑न् दभ॒न् मा न॑ आ॒भ्यो री॑रधो दु॒च्छुना॑भ्यः ।
मा नो॒ वि यौः॑ स॒ख्या वि॒द्धि तस्य॑ नः सुम्ना॒यता॒ मन॑सा॒ तत् त्वे॑महे ॥ २ ॥

मा । नः॒ । गुह्याः॑ । रिपः॑ । आ॒योः । अह॑न् । द॒भ॒न् । मा । नः॒ । आ॒भ्यः । री॒र॒धः॒ । दु॒च्छुना॑भ्यः ।
मा । नः॒ । वि । यौः॒ । स॒ख्या । वि॒द्धि । तस्य॑ । नः॒ । सु॒म्न॒ऽयता॑ । मन॑सा । तत् । त्वा॒ । ई॒म॒हे॒ ॥ २ ॥

वेङ्कट० इतःप्रभृति इन्द्रो देवता 'मा अस्मान् आयोः गुहाः हिंसकाः' हिंसिषुः, मा च गूहितारः । मा अस्मान् एभ्यः दुःखुनेभ्यः शत्रुभ्यो वशं नय । मा अस्माकं सख्यानि विश्लेषय । तस्य अस्य सर्वस्य अस्मदीयस्य वचनस्य बुध्यस्व 'सुखमिच्छता मनसा तत् इद सर्वं त्वां याचामहे' ॥ २ ॥

अहे॑ळता॒ मन॑सा श्रु॒ष्टिमा व॑ह॒ दुहा॑नां धे॒नुं पि॒प्युषी॑मस॒श्चत॑म् ।
पद्या॑भिरा॒शुं वच॑सा च वा॒जिनं॒ त्वां हि॑नोमि पुरुहूत वि॒श्वहा॑ ॥ ३ ॥

अहे॑ळता । मन॑सा । श्रु॒ष्टिम् । आ । व॒ह॒ । दुहा॑नाम् । धे॒नुम् । पि॒प्युषी॑म् । अ॒स॒श्चत॑म् ।
पद्या॑भिः । आ॒शुम् । वच॑सा । च॒ । वा॒जिन॑म् । त्वाम् । हि॒नो॒मि॒ । पु॒रु॒ऽहू॒त॒ । वि॒श्वहा॑ ॥ ३ ॥

वेङ्कट० अक्रुध्यता मनसा क्षिप्रकारिणीम् आ वह दुहानाम् धेनुम् पयः आप्याययन्तीम् असक्ताम् । स्तुतिभिः स्तोत्रेण च शीघ्रं बलिनम् त्वाम् प्रेरयामि 'अस्मत्कार्ये हे पुरुभिराहूत । सर्वदेति' ॥ ३ ॥

रा॒काम॒हं सु॒हवां॑ सुष्टु॒ती हु॑वे शृ॒णोतु॑ नः सु॒भगा॒ बोध॑तु॒ त्मना॑ ।
सीव्य॒त्वपः॑ सू॒च्याच्छि॑द्यमानया॒ ददा॑तु वी॒रं श॒तदा॑यमु॒क्थ्य॑म् ॥ ४ ॥

रा॒काम् । अ॒हम् । सु॒ऽहवा॑म् । सु॒ऽस्तु॒ती । हु॒वे॒ । शृ॒णोतु॑ । नः॒ । सु॒ऽभगा॑ । बोध॑तु । त्मना॑ ।
सीव्य॑तु । अपः॑ । सू॒च्या । अच्छि॑द्यमानया । ददा॑तु । वी॒रम् । श॒तऽदा॑यम् । उ॒क्थ्य॑म् ॥ ४ ॥

वेङ्कट० राकाम् अहम् शोभनाह्वानां सुष्टुत्या हुवे । शृणोतु अस्मान् सुभगा । तथा आत्मनैव च बुध्यताम् । सीव्यतु च' सूचिलक्षण्या' अपः सूच्या आच्छिद्यमानया 'स्वायुधमूलया । यास्कस्त्वाह - 'सीव्यत्वपः' प्रजननकर्म सूच्या' (११.३१) इति । ददातु वीरम् शतप्रदं स्तवनीयमिति ॥ ४ ॥

१-१. रक्ष' वि' क स्मे, ...पृथिव्योः वि' अ'. २-२. स्तुता वि' अ'. ३-३. ...गाथा वि' अ'. ४. आप्यायन्तीम् क; आप्याययन्तीम् सर्वे. ५-५. सूचिलाम् वि' अ'. ६. नास्ति वि'. ७. स्वायु' वि'.

यास्ते॑ राके सुम॒तयः॑ सु॒पेश॑सो॒ याभि॒र्ददा॑सि दा॒शुषे॒ वसू॑नि ।
ताभि॑र्नो अ॒द्य सु॒मना॑ उ॒पाग॑हि सहस्रपो॒षं सु॑भगे॒ ररा॑णा ॥ ५ ॥

याः । ते॒ । रा॒के॒ । सु॒ऽम॒तयः॑ । सु॒ऽपेश॑सः । याभिः॑ । ददा॑सि । दा॒शुषे॑ । वसू॑नि ।
ताभिः॑ । नः॒ । अ॒द्य । सु॒ऽमनाः॑ । उ॒प॒ऽआग॑हि । स॒ह॒स्र॒ऽपो॒षम् । सु॒ऽभ॒गे॒ । ररा॑णा ॥ ५ ॥

वेङ्कट० याः ते राके! सुमतयः सुरूपाः याभिः सुमतिभिः प्रयच्छसि यजमानाय धनानि, ताभिः सह 'अस्मान् अद्य सुमनाः भूत्वा सुभगे! उपागच्छ'[1] सहस्रसंख्यपोषम् धनमस्मभ्यं प्रयच्छन्ती । ५ ॥

सिनी॑वालि॒ पृथु॑ष्टुके॒ या दे॒वाना॒मसि॒ स्वसा॑ ।
जु॒षस्व॑ ह॒व्यमाहु॑तं प्र॒जां दे॑वि दिदिड्ढि नः ॥ ६ ॥

सिनी॑वालि । पृथु॑ऽस्तुके । या । दे॒वाना॑म् । असि॑ । स्वसा॑ ।
जु॒षस्व॑ । ह॒व्यम् । आऽहु॑तम् । प्र॒ऽजाम् । दे॒वि॒ । दि॒दि॒ड्ढि॒ । नः॒ ॥ ६ ॥

वेङ्कट० यास्कः—'सिनीवालि! पृथुजघने! । स्तुकः स्त्यायतेः संघातः । पृथुकेशस्तुके![2] पृथुष्टुते[3] वा[4] । या त्वं[4] देवानामसि स्वसा । स्वसा सु असा, स्वेषु सीदतीति वा । जुषस्व हव्यम् अदनम्[5] । प्रजां च देवि! दिश वा[7] (नि ११.३१) इति[8] ॥ ६ ॥

या सु॑बा॒हुः स्व॑ङ्गु॒रिः सु॒षूमा॑ बहु॒सूव॑री ।
तस्यै॑ वि॒श्पत्न्यै॑ ह॒विः सि॑नीवा॒ल्यै जु॑होतन ॥ ७ ॥

या । सु॒ऽबा॒हुः । सु॒ऽअ॒ङ्गु॒रिः । सु॒ऽसूमा॑ । ब॒हु॒ऽसूव॑री । तस्यै॑ । वि॒श्पत्न्यै॑ । ह॒विः । सि॒नी॒वा॒ल्यै । जु॒हो॒त॒न ॥

वेङ्कट० या शोभनबाहुः शोभनाङ्गुलिः शोभनप्रजा बहूनां[7] जनयित्री, तस्यै विशां 'पालयित्र्यै सिनीवाल्यै जुहोत[8] हविः ॥ ७ ॥

या गु॒ङ्गूर्या सि॑नीवा॒ली या रा॒का या सर॑स्वती । इ॒न्द्रा॒णीम॑ह्व ऊ॒तये॑ वरुणा॒नीं स्व॒स्तये॑ ॥८॥

या । गु॒ङ्गूः । या । सि॒नी॒वा॒ली । या । रा॒का । या । सर॑स्वती ।
इ॒न्द्रा॒णीम् । अ॒ह्वे॒ । ऊ॒तये॑ । व॒रु॒णा॒नीम् । स्व॒स्तये॑ ॥ ८ ॥

१-१. सुरूपास् वि[१] कां. † स्तुत[०] वि[१] कार्. २. 'स्तुच मूको. ३. 'स्तुतिः मूको. ४. नास्ति सर्व. ५. नास्ति मूको. ६. अनुनन मूको. ७. बहून् वि[१] कार. ८-८ ·· सुष्ठ कां; सुरीरत्व् वि[१].

वेङ्कट० मा युवनः इति कुद्धमाहेति ॥ ८ ॥

[१]इति द्वितीयाष्टके सप्तमाध्याये पञ्चदशो वर्गः[१] ॥

[३३]

[२]गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः । रुद्रो देवता । त्रिष्टुप् छन्दः[२] ।

आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ।
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥ १ ॥

आ । ते । पितः । मरुताम् । सुम्नम् । एतु । मा । नः । सूर्यस्य । सम्ऽदृशः । युयोथाः ।
अभि । नः । वीरः । अर्वति । क्षमेत । प्र । जायेमहि । रुद्र । प्रऽजाभिः ॥ १ ॥

वेङ्कट० हे मरुताम् पितः ! तव सुखमस्मान् आ यातु । मा अस्मान् सूर्यस्य [३]सन्दर्शनात् पृथक् कुरु । तथा अस्माकं पुत्रः अश्वे[३] शक्तो भवतु । हे रुद्र ! तव प्रसादात् प्रजाभिः च वयम् प्र जायेमहि ॥ १ ॥

त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।
व्यस्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ॥ २ ॥

त्वाऽदत्तेभिः । रुद्र । शन्ऽतमेभिः । शतम् । हिमाः । अशीय । भेषजेभिः ।
वि । अस्मत् । द्वेषः । विऽतरम् । वि । अंहः । वि । अमीवाः । चातयस्व । विषूचीः ॥ २ ॥

वेङ्कट० त्वया दत्तैः हे रुद्र ! सुखतमैः भेषजैः शतम् †संवत्सरान् व्याप्नुयाम् । अस्मत्तः[४] शत्रून् वि चातय[४] पृथक् कुरु, पापं च दूरतमम्[५], एवं राक्षसांश्च रोगादिकानिति ॥ २ ॥

श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।
पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥ ३ ॥

श्रेष्ठः । जातस्य । रुद्र । श्रिया । असि । तवःऽतमः । तवसाम् । वज्रबाहो इति वज्रऽबाहो ।
पर्षि । नः । पारम् । अंहसः । स्वस्ति । विश्वाः । अभिऽइतीः । रपसः । युयोधि ॥ ३ ॥

वेङ्कट० हे रुद्र ! सर्वस्य भूतजातस्य त्वमेव श्रेष्ठः भवसि श्रिया । [६]वेगवत्तमः वेगवतामपि आयुधयुक्तबाहो ![६] ।

१-१. नास्ति मूको. २-२. "शौन...यु" वि[०] अ[०]. ३-३. दृष्टितत् वि[०] अ[०]. † चान्नु[०] वि[०] अ[०]. ४. चातय अ[०]. ५. दूरम् अ[०]. ६-६. वेग... वि[०] अ[०].

स त्वम् अस्मात्[1] पारय पापस्य पारम् अविनाशेन । रपसः पापस्य सर्वाः अभीतीः अभिगतीः पृथक् कुरु ॥ ३ ॥

मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥ ४ ॥

मा । त्वा । रुद्र । चुक्रुधाम । नमःऽभिः । मा । दुःऽस्तुती । वृषभ । मा । सऽहूती ।
उत् । नः । वीरान् । अर्पय । भेषजेभिः । भिषक्ऽतमम् । त्वा । भिषजाम् । शृणोमि ॥ ४ ॥

वेङ्कट० हे रुद्र ! नमस्कारैः मा त्वां क्रोधयाम[2] । मा च दुष्टुत्या[3] । हे वृषभ ! मा च अन्यैर्देवैः सहहूत्या[4] 'सोमारुद्रा वि वृहतम्' (ऋ ६,७४,२) इत्यादिकया । अस्माकम् वीरान् उत्थापय भेषजैः । भिषक्तमम् त्वा भिषजाम् शृणोमि वृद्धेभ्य इति ॥ ४ ॥

हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ॥ ५ ॥

हवीमऽभिः । हवते । यः । हविःऽभिः । अव । स्तोमेभिः । रुद्रम् । दिषीय ।
ऋदूदरः । सुऽहवः । मा । नः । अस्यै । बभ्रुः । सुऽशिप्रः । रीरधत् । मनायै ॥ ५ ॥

वेङ्कट० 'होमयोग्यैः हविर्भिः' सह यः आहूयते, तम् रुद्रम् स्तोमैः अव दिषीय पृथक् करोमि अस्मत्[5] । 'ऋदूदरः सोमः' । मृदूदरः' इति यास्कः (६, ४) । 'स्वाह्वानः मा अस्मै अस्यै[6]' पुत्रादिमन्यमानायै 'वशं नयतु । अस्य बुद्धिः[7] सर्वान् अमन्यत' इति । बभ्रुवर्णः सुहनुः ॥ ५ ॥

'इति द्वितीयाष्टके सप्तमाध्याये षोडशो वर्गः'[8] ॥

उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
घृणीव च्छायामरपा अशीयाविवासेयं रुद्रस्य सुम्नम् ॥ ६ ॥

उत् । मा । ममन्द । वृषभः । मरुत्वान् । त्वक्षीयसा । वयसा । नाधमानम् ।
घृणिऽइव । छायाम् । अरपाः । अशीय । आ । विवासेयम् । रुद्रस्य । सुम्नम् ॥ ६ ॥

वेङ्कट० उन्मादितवान् कामानां वर्षिता मरुद्भिः सहितो दीप्तेन हविषा 'याचमानम् माम्' ।

---

1. नास्ति मूको. 2-2. क्रो .. वि° अ°. † योधयेत् वि° 3. स्तुत्या अ°. 4-4. स्तुतिम् वि° अ°. 5. सप्ताद वि° अ°. 6. नास्ति वि° अ° मूको. 7-7. स्तुतिम् अ°, नास्ति वि°. 8-8. नास्ति वि° अ°. 9-9. नास्ति मूको.

अथवा धर्मगृहीत मृतम् [illegible] अश्नुते, एकम् अपाः [illegible] मुखं प्राप्नुयात्। मा विदानानम् अस्य सुखम्। [illegible] अविदासः ॥ ६ ॥

क्व१ स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥ ७ ॥

क्व । स्यः । ते । रुद्र । मृळयाकुः । हस्तः । यः । अस्ति । भेषजः । जलाषः ।
अपऽभर्ता । रपसः । दैव्यस्य । अभि । नु । मा । वृषभ । चक्षमीथाः ॥ ७ ॥

वेङ्कट० क्व सः ते रुद्र! सुखयिता हस्तः, यः विद्यते भैषज्यकृत् सुखकरोऽपहर्ता पापस्य देवकृतस्य। तादृशः[1] स्वम् नाथ[1] [illegible]। [illegible] अभि क्षमस्वेति ॥ ७ ॥

प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥ ८ ॥

प्र । बभ्रवे । वृषभाय । श्वितीचे । महः । महीम् । सुऽस्तुतिम् । ईरयामि ।
नमस्य । कल्मलीकिनम् । नमःऽभिः । गृणीमसि । त्वेषम् । रुद्रस्य । नाम ॥ ८ ॥

वेङ्कट० प्र ईरयामि [2]बभ्रवे वर्षित्रे श्वेतिमानमञ्चते[2] महतोऽपि महतीम् सुष्टुतिम्। नमस्यत नमस्कारैर्दीप्तम्, [illegible] (निघ १,१७) पठितम् कल्मलीकिनम् इति, ज्वलन्तम्। उच्चारयामो [3]दीप्तम् रुद्रस्य[3] नामधेयम् ॥ ८ ॥

स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ॥ ९ ॥

स्थिरेभिः । अङ्गैः । पुरुऽरूपः । उग्रः । बभ्रुः । शुक्रेभिः । पिपिशे । हिरण्यैः ।
ईशानात् । अस्य । भुवनस्य । भूरेः । न । वै । ऊं इति । योषत् । रुद्रात् । असुर्यम् ॥ ९ ॥

वेङ्कट० दृढैः [4]अङ्गैः युक्तो बहुरूपः[4] उद्गूर्णः, 'शुक्रं ज्योतेर्ज्वलतिकर्मणः' (नि ८. ११), दीप्तैः आभरणैः भ्राजति संयोजयति हिरण्मयैः। अस्य सर्वस्य बहोः भुवनस्य ईश्वरात् अस्मात् रुद्रात् न पृथक् 'भवतु असुराणां हन्तृ बलम् इति' ॥ ९ ॥

१-१. ..नाम वि° कां. २-२. °अम् . पिपाश वि° कां. ३. °द मूको. ४. मा वि°. ५-५. ...नसम° वि° कां. ६-६. °यम् न रुद्र° वि° कां; °रुद्र° वि° मूको. ७-७. कृदितम् वि° कां. ८. नम . . वि° कां.

अर्हन् बिभर्षि सायकानि धन्वार्हन् निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥ १० ॥

अर्हन् । बिभर्षि । सायकानि । धन्व । अर्हन् । निष्कम् । यजतम् । विश्वऽरूपम् ।
अर्हन् । इदम् । दयसे । विश्वम् । अभ्वम् । न । वै । ओजीयः । रुद्र । त्वत् । अस्ति ॥ १० ॥

वेङ्कट० त्वम् अर्हन् स्वम् सायकानि धनुश्च बिभर्षि[1] निष्कम् आभरणं शोभनं नानारूपम् । 'तथा अर्हन् त्वं[2] सर्वं महद्भुवनम् अनुगृह्णासि । न त्वत्तो बलवत्तरम् इह किञ्चिन अस्ति[3] ॥ १० ॥

[4]इति द्वितीयाष्टके सप्तमाध्याये सप्तदशो वर्गः[4] ॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥ ११ ॥

स्तुहि । श्रुतम् । गर्तऽसदम् । युवानम् । मृगम् । न । भीमम् । उपऽहत्नुम् । उग्रम् ।
मृळ । जरित्रे । रुद्र । स्तवानः । अन्यम् । ते । अस्मत् । नि । वपन्तु । सेनाः ॥ ११ ॥

वेङ्कट० स्तोतः![5] स्तुहि विश्रुतं रथस्थम् युवानम् मृगम् इव भीमम् उपहन्तारं शत्रूणाम् उद्गूर्णम् । त्वं च रुद्र! स्तूयमानः स्तोत्रे सुखं कुरु । मत्तः अन्यम् तव सेना नि वपन्तु छिन्दन्तु ॥ ११ ॥

कुमारश्चित् पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ॥ १२ ॥

कुमारः । चित् । पितरम् । वन्दमानम् । प्रति । ननाम । रुद्र । उपऽयन्तम् ।
भूरेः । दातारम् । सत्ऽपतिम् । गृणीषे । स्तुतः । त्वम् । भेषजा । रासि । अस्मे इति ॥ १२ ॥

वेङ्कट० [6]'बालः इव पितरम् अभिभवन्तम्[6] उपगच्छन्तम् हे रुद्र! अहं त्वाम्[7] प्रति ननाम प्रणतोऽस्मि । तथा स्तौमि च बहुनः[8] दातारम् सतां पतिम् । स्तुतः च त्वम् अस्मभ्यं भेषजानि प्रयच्छसि ॥ १२ ॥

या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि ॥ १३ ॥

---

१. धनि तथा वि[2] भ[1]. २-२. तदर्हस्तथा त्वम भ[1]. ३. नास्ति वि[3] भ[1]. ४-४ नास्ति मूको. ५. दुःस्थम् वि[3] भ[1]. ६-६. ~ भीमम' वि[3]; ~ भीमम' भ[1]. ७. ता वि[3] भ[1]. ८. बहुना वि[3] भ[1].

या । वः । भेषजा । मरुतः । शुचीनि । या । शम्ऽतमा । वृषणः । या । मयःऽभु ।
यानि । मनुः । अवृणीत । पिता । नः । ता । शम् । च । योः । च । रुद्रस्य । वश्मि ॥ १३ ॥

वेङ्कट० 'हे मरुतः ! वृषणः ! यानि वः भेषजानि शुचीनि, यानि सुखतमानि, यानि च मयोभूनि, यानि च सर्वेषामस्माकमपि भवद्भ्यः मनुः पिता अवृणीत, तानि रुद्रस्य शम् च यो च कामये ॥ १३ ॥

परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥ १४ ॥

परि । नः । हेतिः । रुद्रस्य । वृज्याः । परि । त्वेषस्य । दुःऽमतिः । मही । गात् ।
अव । स्थिरा । मघवत्ऽभ्यः । तनुष्व । मीढ्वः । तोकाय । तनयाय । मृळ ॥ १४ ॥

वेङ्कट० 'रुद्रस्य आयुधम् अस्मान् वर्जयतु । तथा दीप्तस्य दुर्मतिः अस्मान् परिहाय गच्छतु महती । किञ्चाऽऽततज्यानि स्थिराणि धनूंषि हविष्मद्भ्योऽवततज्यानि कुरु । हे वर्षितः ! पुत्राय पौत्राय च सुखं भव ॥ १४ ॥

एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥ १५ ॥

एव । बभ्रो इति । वृषभ । चेकितान । यथा । देव । न । हृणीषे । न । हंसि ।
हवनऽश्रुत् । नः । रुद्र । इह । बोधि । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १५ ॥

वेङ्कट० 'एवमेव हे बभ्रुवर्ण ! वृषभ ! विद्वन् ! देव ! यथा न क्रुध्यसि न वधं हंसि च, तथा स्तोत्रस्य श्रोता अस्मान् इह बुध्यस्व ... हे रुद्र ! सुवीरास्त्विति ॥ १५ ॥

'इति द्वितीयाष्टके सप्तमाध्यायेऽष्टादशो वर्गः' ॥

[३४]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
मरुतो देवता । जगती छन्दः, पञ्चदशी त्रिष्टुप्' ।

धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास्तविषीभिरर्चिनः ।
अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमन्तो अप गा अवृण्वत ॥ १ ॥

१-१. °°नि वि² अ°. २-२. दुर्मतिरस्मान् वि¹ अ². ३-३. नास्ति वि¹ अ¹. ४-४. नास्ति मूको.

धाराऽवराः । मरुतः । धृष्णुऽओजसः । मृगाः । न । भीमाः । तविषीभिः । अर्चिनः ।
अग्नयः । न । शुशुचानाः । ऋजीषिणः । भृमिम् । धमन्तः । अप । गाः । अवृण्वत ॥ १ ॥

वेङ्कट० उदकधाराणां कर्तारः मरुतः धृष्णुबलाः मृगाः इव भयानकाः बलैः अर्चिष्मन्तः अग्नयः इव दीप्यमानाः सोमयुक्ताः, सोमस्य वा ऋजीषस्य [illegible] । भृमिशब्दो [illegible], तथा मन्त्रः— 'धमन्तो वाणं मरुतः' (ऋ १,८५,१०) इति । [illegible] 'अप गाः' [illegible] ॥ १ ॥

द्यावो न स्तृभिश्चितयन्त खादिनो व्यभ्रिया न द्युतयन्त वृष्टयः ।
रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि ॥ २ ॥

द्यावः । न । स्तृऽभिः । चितयन्त । खादिनः । वि । अभ्रियाः । न । द्युतयन्त । वृष्टयः ।
रुद्रः । यत् । वः । मरुतः । रुक्मऽवक्षसः । वृषा । अजनि । पृश्न्याः । शुक्रे । ऊधनि ॥ २ ॥

वेङ्कट० 'द्यावः इव नक्षत्रैः [illegible]' [illegible] । [illegible] वृष्टयः इव [illegible] । [illegible] हे रुक्माभरणवक्षसः ! मरुतः ! [illegible] पृश्न्याः ऊधनि [illegible] शुक्रवर्णे । [illegible] ([illegible]) इति [illegible] ॥ २ ॥

उक्षन्ते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयन्त आशुभिः ।
हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ॥ ३ ॥

उक्षन्ते । अश्वान् । अत्यान्ऽइव । आजिषु । नदस्य । कर्णैः । तुरयन्ते । आशुऽभिः ।
हिरण्यऽशिप्राः । मरुतः । दविध्वतः । पृक्षम् । याथ । पृषतीभिः । सऽमन्यवः ॥ ३ ॥

वेङ्कट० [illegible] [illegible] युद्धार्थम् अश्वान् [illegible] । [illegible] [illegible] । हिरण्मयशिरस्त्राणाः [illegible] मरुतः । [illegible] हविः प्रति गच्छथ पृषद्वर्णाभिः [illegible] हे समानमनस्काः ॥ ३ ॥

पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः ।
पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ॥ ४ ॥

[illegible]

पृक्षे । ता । विश्वा । भुवना । ववक्षिरे । मित्राय । वा । सदम् । आ । जीरऽदानवः ।
पृषत्ऽअश्वासः । अनवभ्रऽराधसः । ऋजिप्यासः । न । वयुनेषु । धूःऽसदः ॥ ४ ॥

वेङ्कट० यानि भूतानि 'मरुतो ववक्षिरे, तानि सर्वाणि सर्वाणि अन्नं' अन्ने वहन्ति मित्रत्वमस्मा[1] । मित्रे प्रति च सर्वेव क्षिप्रदाना पृषद्वर्णाऽश्वाः अनपभ्रष्टधनाः सारथय इव ऋजूनि[2] मार्गेषु धुरि सीदन्तः । 'ऋजु मार्गगामिनः ऋजिप्यासः इति' ॥ ४ ॥ ।

इन्धन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिर्भ्राजदृष्टयः ।
आ हंसासो न स्वसराणि गन्तन मधोर्मदाय मरुतः समन्यवः ॥ ५ ॥

इन्धन्वऽभिः । धेनुऽभिः । रप्शदूधऽभिः । अध्वस्मऽभिः । पथिऽभिः । भ्राजत्ऽऋष्टयः ।
आ । हंसासः । न । स्वसराणि । गन्तन । मधोः । मदाय । मरुतः । सऽमन्यवः ॥ ५ ॥

वेङ्कट० उदकवद्भिः मनुष्यान् दीपयन्तीभिः महोदकैः धेनुभिः सह अध्वंसनैः मार्गैः हे दीप्यमानायुधाः! आ गच्छत हंसा इव अवनीः[3] स्वकीयानि सोमस्य मदाय हे[4] मरुतः! समानमनस्काः! ॥ ५ ॥

'इति द्वितीयाष्टके सप्तमाध्याये एकोनविंशो वर्गः ॥'

आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन ।
अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसम् ॥ ६ ॥

आ । नः । ब्रह्माणि । मरुतः । सऽमन्यवः । नराम् । न । शंसः । सवनानि । गन्तन ।
अश्वाम्ऽइव । पिप्यत । धेनुम् । ऊधनि । कर्ता । धियम् । जरित्रे । वाजऽपेशसम् ॥ ६ ॥

वेङ्कट० हे मरुतः! समन्यवः! अस्माकं स्तोत्राणि प्रति आ गच्छत, यथा नराशंसः स्तुतिः सवनानि अभिगच्छति । तथाऽस्मदीयाम् 'धेनुम् ऊधनि आप्याययत† पयसा', यथाऽश्वाम् पयसैव पुष्टियुक्तां कुर्वन्ति । कुरुत[8] च स्तोत्रे कर्म अन्नेन संश्लिष्टम् इति ॥ ६ ॥

तं नो दात मरुतो वाजिनं रथ आपानं ब्रह्म चितयद्दिवेदिवे ।
इषं स्तोतृभ्यो वृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ॥ ७ ॥

१-१. म ... °देव वि°, मुद्रितम् अ°. २. °न्धासाद वि° मूको. ३. नास्ति मूको. ४-४. मुद्रितम् वि° अ°. ५-५. स्व ... वि° अ°. ६-६. नास्ति मूको. ७-७. धेनु ... वि° अ°. † प्यायत क मूको. ८. कुरु मूको.

नरः । नः । दात । मरुतः । वाजिनम् । रथे । आपानम् । ब्रह्म । चितयत् । दिवेऽदिवे ।
इषम् । स्तोतृऽभ्यः । वृजनेषु । कारवे । सनिम् । मेधाम् । अरिष्टम् । दुस्तरम् । सहः ॥ ७ ॥

वेङ्कट० हे मरुतः ! अस्माकम् अस्मभ्यम् रथे नियोक्तव्यम् अश्वम् आपानम् ब्रह्म अस्मदर्थं चितयत् । तथा अन्नम् स्तोतृभ्यः यच्छत, कर्मे च सङ्ग्रामेषु दिवसे प्रयच्छत तथा धनं प्रज्ञाम् अहिंसितम् दुस्तरम् सहः च ॥ ७ ॥

यद्युञ्जते मरुतो रुक्मवक्षसोऽश्वान्रथेषु भग आ सुदानवः ।
धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषम् ॥ ८ ॥

यत् । युञ्जते । मरुतः । रुक्मऽवक्षसः । अश्वान् । रथेषु । भगे । आ । सुऽदानवः ।
धेनुः । न । शिश्वे । स्वसरेषु । पिन्वते । जनाय । रातऽहविषे । महीम् । इषम् ॥ ८ ॥

वेङ्कट० यदि युञ्जते मरुतः रुक्माभरणवक्षसः अश्वान् आत्मीयेषु रथेषु धनार्थं सुदानाः । तदा धेनुः इव वत्साय अहःसु पिन्वते दत्तहविषे यजमानाय महदन्नमिति ॥ ८ ॥

यो नो मरुतो वृकताति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ।
वर्तयत तपुषा चक्रियाभि तमव रुद्रा अशसो हन्तना वधः ॥ ९ ॥

यः । नः । मरुतः । वृकऽताति । मर्त्यः । रिपुः । दधे । वसवः । रक्षत । रिषः ।
वर्तयत । तपुषा । चक्रिया । अभि । तम् । अव । रुद्राः । अशसः । हन्तन । वधरिति ॥ ९ ॥

वेङ्कट० हे मरुतः ! यः अस्माकम् वृकतातिः, स्तोतेव, आत्मानमेव मनुष्यः हिंसकमो, हे वासयितारः ! तस्मात् हिंसकात् रक्षत अस्मान् । किञ्च तापयित्र्या चक्राकारया च अशनी तम् अभि वर्तयत । हे रुद्रपुत्राः ! अस्तोतृभ्यः अस्मीयम् आयुधम् अव हन्तनेति ॥ ९ ॥

चित्रं तद्वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः ।
यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः ॥ १० ॥

चित्रम् । तत् । वः । मरुतः । याम । चेकिते । पृश्न्याः । यत् । ऊधः । अपि । आपयः । दुहुः ।
यत् । वा । निदे । नवमानस्य । रुद्रियाः । त्रितम् । जराय । जुरताम् । अदाभ्याः ॥ १० ॥

वेङ्कट० हे मरुतः ! तद् वः प्रयाणम् चित्रम् प्रज्ञायते । पृश्नीति दिवो नाम (निघ १,४,),

१ मारुत सूक्ते. २ २. सुदिनम् वि' मूं'. ३. मद मूं'. ४-४. ... वि' मूं'. ५ ... वि' मूं'.
६. मरुत क प्रस्तावः. ७. चक्रिया वि' क. ८-८. ...पृश्नः वि' मूं'. ९-९ सुदिनम् वि' मूं'.

[illegible] मरुतः आगताः [illegible], [illegible] यत् [illegible] प्रयाणे [illegible] । [illegible] । यत् [illegible] प्रयाणे 'भवतो स्तुतेः कर्तारौ [illegible]' [illegible] भवति [illegible] । [illegible] — [illegible] इति [illegible] [illegible] ॥ १० ॥

'इति द्वितीयाष्टके सप्तमाध्याये विंशो वर्गः' ॥

तान् वो महो मरुत एवयाव्नो विष्णोरेषस्य प्रभृथे हवामहे ।
हिरण्यवर्णान् ककुहान् यतस्रुचो ब्रह्मण्यन्तः शंस्यं राध ईमहे ॥ ११ ॥

तान् । वः । महः । मरुतः । एवऽयाव्नः । विष्णोः । एषस्य । प्रऽभृथे । हवामहे ।
हिरण्यऽवर्णान् । ककुहान् । यतऽस्रुचः । ब्रह्मण्यन्तः । शंस्यम् । राधः । ईमहे ॥ ११ ॥

वेङ्कट० "तान् व महतः" [illegible] [illegible] गच्छतो [illegible] [illegible] हवामहे । हिरण्यवर्णान् [illegible] [illegible] स्तुति "[illegible] [illegible] याचामहे" ॥ ११ ॥

ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वन्तूषसो व्युष्टिषु ।
उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ॥ १२ ॥

ते । दशऽग्वाः । प्रथमाः । यज्ञम् । ऊहिरे । ते । नः । हिन्वन्तु । उषसः । विऽउष्टिषु ।
उषाः । न । रामीः । अरुणैः । अप । ऊर्णुते । महः । ज्योतिषा । शुचता । गोऽअर्णसा ॥ १२ ॥

वेङ्कट० ते मरुतो [illegible] (?) प्रथममेव यज्ञम् [illegible] । ते [illegible] [illegible] [illegible] उषसः व्युष्टेषु । उषाः [illegible] रात्रीः अरुणैः '[illegible]' [illegible] [illegible] रात्रीः "[illegible]" "[illegible]" इत्यर्थः ॥ १२ ॥

ते क्षोणीभिररुणेभिर्नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।
निमेघमाना अत्येन पाजसा सुश्चन्द्रं वर्णं दधिरे सुपेशसम् ॥ १३ ॥

ते । क्षोणीभिः । अरुणेभिः । न । अञ्जिऽभिः । रुद्राः । ऋतस्य । सदनेषु । ववृधुः ।
निऽमेघमानाः । अत्येन । पाजसा । सुऽचन्द्रम् । वर्णम् । दधिरे । सुऽपेशसम् ॥ १३ ॥

---

१. [illegible] मूको. २. नास्ति वि° [illegible]. ३-३. कुटिलम् वि° [illegible]. ४. [illegible]. ५. [illegible] वि°. ६-६. नास्ति मूको. ७-७. नास्ति वि° [illegible]. ८. [illegible]. ९-९. कुटिलम् वि°, नास्ति [illegible]. १०. [illegible] वि° [illegible]; [illegible] वि° [illegible]. ११-११. [illegible] मूको. १२-१२. नास्ति वि°.

वेङ्कट० ये मरुतः [illegible] 'आत्मीये [आत्मनः] [illegible] † मह' [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] सुकाम्यम् [illegible] [illegible] 'गोमत्- पुष्टिमतीमिति' ॥ १३ ॥

तान् इ॑या॒नो महि॒ वरू॑थमू॒तय॒ उप॒ घेदे॒ना नम॑सा गृणीमसि ।
त्रि॒तो न यान् पञ्च॒ होतॄ॑न॒भिष्ट॑य आव॒वर्त॒दव॑राञ्च॒क्रियाव॑से ॥ १४ ॥

तान् । इ॒या॒नः । महि॑ । वरू॑थम् । ऊ॒तये॑ । उप॑ । घ॒ । इत् । ए॒ना । नम॑सा । गृ॒णी॒म॒सि॒ ।
त्रि॒तः । न । यान् । पञ्च॑ । होतॄ॑न् । अ॒भिष्ट॑ये । आ॒ऽव॒वर्त॑त् । अव॑रान् । च॒क्रिया॑ । अव॑से ॥ १४ ॥

वेङ्कट० तान् अभिगच्छन् महत् वरूथं रक्षणार्थम् । तथा स्तुति [illegible] नमस्कारेण ह तान् उप- स्तुमः । यो मनुष्य [illegible] त्रित इव यान् इमान् '[illegible]' [illegible] आत्मा- भिमुखान्' [illegible] [illegible] [illegible] [illegible] । [illegible] तान् इमान् इति [illegible] । [illegible] [illegible] [illegible] [illegible] इति । '[illegible]' (तैब्रा २.१४.१) इति ब्राह्मणमिति ॥ १४ ॥

यया॑ र॒ध्रं पा॒रय॒थात्यंहो॒ यया॑ नि॒दो मु॒ञ्चथ॑ वन्दि॒तार॑म् ।
अ॒र्वाची॒ सा म॑रुतो॒ या व॑ ऊ॒तिरो षु वा॒श्रेव॑ सुम॒तिर्जि॑गातु ॥ १५ ॥

यया॑ । र॒ध्रम् । पा॒रय॑थ । अति॑ । अंहः॑ । यया॑ । नि॒दः । मु॒ञ्चथ॑ । व॒न्दि॒तार॑म् ।
अ॒र्वाची॑ । सा । म॒रु॒तः॒ । या । वः॒ । ऊ॒तिः । ओ इति॑ । सु । वा॒श्राऽइ॑व । सु॒ऽम॒तिः । जि॒गा॒तु॒ ॥ १५ ॥

वेङ्कट० यया [illegible] अति पापम्, यया च [illegible] मुञ्चथ स्तोतारम्, हे मरुतः ! सा अस्मदभिमुखी भवतु या युष्माकं [illegible] । [illegible] [illegible] धेनुरिव सुमतिः ॥ १५ ॥

'इति द्वितीयाष्टके सप्तमाध्याये एकविंशो वर्गः' ॥

[३५]

'गृत्समदो भार्गवः शौनकः (पूर्वम् आङ्गिरसः शौनहोत्रः) ऋषिः ।
अपांनपाद् देवता । त्रिष्टुप् छन्दः' ।

उपे॑मसृक्षि वाज॒युर्व॑च॒स्यां चनो॑ दधीत ना॒द्यो गिरो॑ मे ।
अ॒पां नपा॑दाशु॒हेमा॑ कु॒वित्स सु॒पेश॑सस्करति॒ जोषि॑ष॒द्धि ॥ १ ॥

१-१. [illegible] वि'. †† [illegible] २-२. [illegible] वि' भ'. ३. नास्ति मूको. ४-४. [illegible] वि' भ'. † [illegible] वि' द. ५-५. [illegible] वि' भ'. † [illegible] वि' [illegible]. ६. नास्ति वि' भ'. ७. नास्ति वि' भ' [illegible]. ८-८. नास्ति मूको.

उप॑ । ई॒म् । अ॒सृ॒क्षि॒ । वा॒ज॒ऽयुः । व॒च॒स्याम् । चनः॑ । द॒धी॒त॒ । ना॒द्यः॑ । गिरः॑ । मे॒ ।
अ॒पाम् । नपा॑त् । आ॒शु॒ऽहेमा॑ । कु॒वित् । सः । सु॒ऽपेश॑सः । क॒र॒त् । जोषि॑षत् । हि ॥ १ ॥

वेङ्कट० 'मध्यमस्थानमग्निमपां नपातम्' [illegible] । [illegible] सृजामि [illegible] स्तुतीच्छाम् । [illegible] स्तुतिरूपं [illegible] । सः [illegible] अपाम् [illegible] यजमानेषु [illegible] गत्वा [illegible], 'करोति, सेवते हि स्तोत्रम् इति' ॥ १ ॥

इ॒मं स्व॑स्मै हृ॒द आ सुत॑ष्टं॒ मन्त्रं॑ वोचेम कु॒विद॑स्य॒ वेद॑त् ।
अ॒पां नपा॑दसु॒र्य॑स्य म॒ह्ना विश्वा॑न्य॒र्यो भुव॑ना जजान ॥ २ ॥

इ॒मम् । सु । अ॒स्मै॒ । हृ॒दः । आ । सुऽत॑ष्टम् । मन्त्र॑म् । वो॒चे॒म॒ । कु॒वित् । अ॒स्य॒ । वेद॑त् ।
अ॒पाम् । नपा॑त् । अ॒सु॒र्य॑स्य । म॒ह्ना । विश्वा॑नि । अ॒र्यः । भुव॑ना । ज॒जा॒न॒ ॥ २ ॥

वेङ्कट० इमम् [illegible] हृदयात् [illegible] सु आ [illegible] । इमं मन्त्रम् [illegible] वेत्ति हि । सोऽयमसुरहननसमर्थस्य [illegible] महत्त्वेन [illegible] भुवनानि 'जन-यितुं स्वामी' ॥ २ ॥

सम॒न्या यन्त्युप॑ यन्त्य॒न्याः स॑मा॒नमू॒र्वं न॒द्य॑: पृणन्ति ।
सुऽरेतसा । श्रवसा । तुञ्जमानाः । अभि । स्याम । पृतनाऽयून् । अदेवान् ॥ १६ ॥

वेङ्कट० अग्ने! शोभनप्रणयन! तव उपनिवासं कुर्वन्तः विश्वानि धनसमूहनानि धारयन्तः शोभनकर्मणा अन्नेन याचमानेभ्यो दानं कुर्वन्तः अभिभवेम पृतनाभिरुपक्रम्य अदेवान् ॥ १६ ॥

आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि काव्यानि विद्वान् ।
प्रति मर्ताँ अवासयो दमूना अनु देवान् रथिरो यासि साधन् ॥ १७ ॥

---

१. स्तुहि मा. २. नास्ति वि' भ'. ३. 'ह रक्षे वि' भ'. ४. नास्ति मूको. ५-५. नास्ति मूको.

आ । देवानाम् । अभवः । केतुः । अग्ने । मन्द्रः । विश्वानि । काव्यानि । विद्वान् ।
प्रति । मर्तान् । अवासयः । दमूनाः । अनु । देवान् । रथिरः । यासि । साधन् ॥ १७ ॥

संस्कृत० देवानाम् विज्ञापयिता त्वम् मनुष्येषु आ अभवसि मादयिता सर्वाणि स्तोत्राणि जानन् । तथा मर्त्यान् ... स्थापयसि ... , देवान् च अनु गच्छसि रथवान् ... साधयन् इति ॥ १७ ॥

नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन् ।
घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान् ॥ १८ ॥

नि । दुरोणे । अमृतः । मर्त्यानाम् । राजा । ससाद । विदथानि । साधन् ।
घृतऽप्रतीकः । उर्विया । वि । अद्यौत् । अग्निः । विश्वानि । काव्यानि । विद्वान् ॥ १८ ॥

संस्कृत० नि ससाद गृहे देवः स मनुष्याणाम् राजा यज्ञान् साधयन् । ... विस्तीर्णः ... द्योतते अग्निः विद्वान् कविकर्माणि ... ॥ १८ ॥

आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ।
अस्मे रयिं बहुलं संतरुत्रं सुवाचं भागं यशसं कृधी नः ॥ १९ ॥

आ । नः । गहि । सख्येभिः । शिवेभिः । महान् । महीभिः । ऊतिऽभिः । सरण्यन् ।
अस्मे इति । रयिम् । बहुलम् । सम्ऽतरुत्रम् । सुऽवाचम् । भागम् । यशसम् । कृधि । नः ॥ १९ ॥

संस्कृत० अस्मान् आ गच्छ कल्याणैः सख्यैः महद्भिः रक्षणैः सह महान् अभिसरणमिच्छन् । अस्माकम् ... ... पुत्रं च कुरु । पुनः नः इति पूरणम् इति ॥ १९ ॥

एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचम् ।
महान्ति वृष्णे सवना कृतेमा जन्मञ्जन्मन्निहितो जातवेदाः ॥ २० ॥

एता । ते । अग्ने । जनिम । सनानि । प्र । पूर्व्याय । नूतनानि । वोचम् ।
महान्ति । वृष्णे । सवना । कृता । इमा । जन्मन्ऽजन्मन् । निऽहितः । जातऽवेदाः ॥ २० ॥

---

१. ... २. ... ३. ... ४. ... ५-५. ... ६. ...

वेङ्कट० अग्ने! तुभ्यम् पुराणानि समानभानि नक्षत्राणि च महान्ति अन्नानि प्र ब्रवीमि, तथा महान्ति सवनानि एते कृतानि इमानि । सोऽयम् अग्निः जन्मभिः जन्मनिजन्मनि आहित इति । जातवेदा सूक्ते निर्वचनाय ॥ २० ॥

जन्म॑ञ्जन्म॒न् निहि॑तो जा॒तवे॑दा वि॒श्वामि॑त्रेभिरिध्यते॒ अज॑स्रः ।
तस्य॑ व॒यं सु॑म॒तौ य॒ज्ञिय॒स्यापि॑ भ॒द्रे सौ॑मन॒से स्या॑म ॥ २१ ॥

जन्म॑न्ऽजन्मन् । निऽहि॑तः । जा॒तऽवे॑दाः । वि॒श्वामि॑त्रेभिः । इ॒ध्य॒ते॒ । अज॑स्रः ।
तस्य॑ । व॒यम् । सु॒ऽम॒तौ । य॒ज्ञिय॑स्य । अपि॑ । भ॒द्रे । सौ॒म॒न॒से । स्या॒म॒ ॥ २१ ॥

वेङ्कट० सोऽयम् सर्वेषु जन्मसु विश्वामित्रैः आहितः 'समिध्यते' अजस्रम् 'आस्वरः' । तस्य यज्ञियस्य वयम् सुमतौ स्याम, अपि च भद्रे सौमनसे ॥ २१ ॥

इ॒मं य॒ज्ञं स॑हसाव॒न् त्वं नो॑ देव॒त्रा धे॑हि सुक्रतो॒ ररा॑णः ।
प्र यं॑सि होतर्बृह॒तीरिषो॑ नो॒ऽग्ने॒ महि॒ द्रवि॑ण॒मा य॑जस्व ॥ २२ ॥

इ॒मम् । य॒ज्ञम् । स॒ह॒सा॒ऽव॒न् । त्वम् । नः॒ । दे॒व॒ऽत्रा । धे॒हि॒ । सु॒क्र॒तो॒ इति॑ सुऽक्रतो । ररा॑णः ।
प्र । यं॒सि॒ । हो॒तः॒ । बृ॒ह॒तीः । इषः॑ । नः॒ । अग्ने॑ । महि॑ । द्रवि॑णम् । आ । य॒ज॒स्व॒ ॥ २२ ॥

वेङ्कट० हे बलवन्! सुक्रतो! त्वम् अस्माकम् इमम् यज्ञम् देवेषु निधेहि रममाणः । प्र यच्छ होतः! महान्ति अन्नानि अस्मभ्यम् । तथा महत् धनम् 'आ यजस्व' अग्ने ॥ २२ ॥

इळा॑मग्ने पुरु॒दंसं॑ स॒निं गोः श॑श्वत्त॒मं हव॑मानाय साध ।
स्यान्नः॑ सू॒नुस्तन॑यो विजा॒वाग्ने॒ सा ते॑ सुम॒तिर्भू॑त्व॒स्मे ॥ २३ ॥

इळा॑म् । अ॒ग्ने॒ । पु॒रु॒ऽदंस॑म् । स॒निम् । गोः । श॒श्व॒त्ऽत॒मम् । हव॑मानाय । सा॒ध॒ ।
स्यात् । नः॒ । सू॒नुः । तन॑यः । वि॒जाऽवा॑ । अग्ने॑ । सा । ते॒ । सु॒ऽम॒तिः । भू॒तु॒ । अ॒स्मे इति॑ ॥ २३ ॥

वेङ्कट० महाकर्माणम् गोः दातारम् इळाम् देवीम् बहुतमसमय गोः साधय आह्वयमानाय । अस्तु अस्माकम् अग्ने! पुत्रः पुत्राणां जनयिता । अग्ने! सा तव प्रसिद्धा सुमतिः अस्मासु भविष्यति ॥ २३ ॥

[10]इति द्वितीयाष्टके अष्टमाध्याये षोडशो वर्गः[10] ॥

1. नास्ति वि[1] ख[1] 2. °नानि च वि[1]. 3. कर्मांनि मूको. 4. °व्याय वि[11] ख[1] अ आधारस्य क[1]. 5. °ध्यते वि[1] ख[1]. 6. सर्वतम् वि[1] ख[1]. 7. नास्ति मूको. 8-8. नास्ति वि[11] ख[1] अ[1]. 9. शोभन वि[1] ख[1]. 10-10. नास्ति मूको.

[२]

[1]विश्वामित्रो गाथिन ऋषिः । वैश्वानरोऽग्निर्देवता । जगती छन्दः[1] ।

वैश्वानराय धिषणामृतावृधे घृतं न पूतमग्नये जनामसि ।
द्विता होतारं मनुषश्च वाघतो धिया रथं न कुलिशः समृण्वति ॥ १ ॥

वैश्वानराय । धिषणाम् । ऋतऽवृधे । घृतम् । न । पूतम् । अग्नये । जनामसि ।
द्विता । होतारम् । मनुषः । च । वाघतः । धिया । रथम् । न । कुलिशः । सम् । ऋण्वति ॥ १ ॥

वेङ्कट० वैश्वानराय स्तुतिम् यज्ञस्य वर्धयित्रे पूतम् इव घृतम् आसने जनयामः । अग्निम् मनुष्या यजमानाः[2] ऋत्विजश्च महान्तः कर्मणा द्विधा[3] धारयन्ति गार्हपत्याहवनीयाभ्याम् रथम् इव तक्षा वाहनाय ॥ १ ॥

स रोचयज्जनुषा रोदसी उभे स मात्रोरभवत्पुत्र ईड्यः ।
हव्यवाळग्निरजरश्चनोहितो दूळभो विशामतिथिर्विभावसुः ॥ २ ॥

सः । रोचयत् । जनुषा । रोदसी इति । उभे इति । सः । मात्रोः । अभवत् । पुत्रः । ईड्यः ।
हव्यऽवाट् । अग्निः । अजरः । चनःऽहितः । दुःऽदभः । विशाम् । अतिथिः । विभाऽवसुः ॥ २ ॥

वेङ्कट० सः रोचयति जन्मना द्यावापृथिवी उभे अपि । सः मातापित्रोः भवति पुत्रः स्तुत्यः हविषां वोढा अग्निः अजरः अन्नहितः भजनीयः दुर्दभः[4] मनुष्याणाम् अतिथिः दीप्तिधनः ॥ २ ॥

क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जनयन्त चित्तिभिः ।
रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यन्नुप ब्रुवे ॥ ३ ॥

क्रत्वा । दक्षस्य । तरुषः । विऽधर्मणि । देवासः । अग्निम् । जनयन्त । चित्तिऽभिः ।
रुरुचानम् । भानुना । ज्योतिषा । महाम् । अत्यम् । न । वाजम् । सनिष्यन् । उप । ब्रुवे ॥ ३ ॥

वेङ्कट० कर्मणा बलेन च तरस्य शत्रोस्तारकस्य विधारणार्थम् अग्निम् अजनयन् देवाः । दीप्यमानम् दीप्यमानेन[5] तेजसा महान्तम् अश्वम् इव बलिनम् सम्भजमानः सनिष्यन् उप स्तौमि ॥ ३ ॥

आ मन्द्रस्य सनिष्यन्तो वरेण्यं वृणीमहे अह्रयं वाजमृग्मियम् ।
रातिं भृगूणामुशिजं कविक्रतुमग्निं राजन्तं दिव्येन शोचिषा ॥ ४ ॥

---

१. नास्ति मूको. २. जनाः कर्म. ३. द्विधा वि[1] मू[1], कर्म. ४. दुर्दभः वि[1] कर्म. ५. दीप्तेन वि[1].

आ । मन्द्रस्य । सनिष्यन्तः । वरेण्यम् । वृणीमहे । अह्रयम् । वाजम् । ऋग्मियम् ।
रातिम् । भृगूणाम् । उशिजम् । कविऽक्रतुम् । अग्निम् । राजन्तम् । दिव्येन । शोचिषा ॥४॥

वेङ्कट० आ वृणीमहे [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] अग्निम् भृगूणाम् [illegible], [illegible] [illegible], [illegible] [illegible] [illegible] तेजसा दीप्यमानम् इति ॥ ४ ॥

अग्निं सुम्नाय दधिरे पुरो जना वाजश्रवसमिह वृक्तबर्हिषः ।
यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसाम् ॥ ५ ॥

अग्निम् । सुम्नाय । दधिरे । पुरः । जनाः । वाजऽश्रवसम् । इह । वृक्तऽबर्हिषः ।
यतऽस्रुचः । सुऽरुचम् । विश्वऽदेव्यम् । रुद्रम् । यज्ञानाम् । साधत्ऽइष्टिम् । अपसाम् ॥ ५ ॥

वेङ्कट० [illegible] सुखार्थम् [illegible] कुर्वन्ति जनाः [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] सुरोचनम् सर्वदेवहितम् [illegible] यज्ञानाम् [illegible] कर्मणां च साधदिष्टिम्[1] [illegible] [illegible] साधयन्तम् इति ॥ ५ ॥

"इति द्वितीयाष्टके अष्टमाध्याये सप्तदशो वर्गः" ॥

पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तबर्हिषो नरः ।
अग्ने दुव इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः ॥ ६ ॥

पावकऽशोचे । तव । हि । क्षयम् । परि । होतः । यज्ञेषु । वृक्तऽबर्हिषः । नरः ।
अग्ने । दुवः । इच्छमानासः । आप्यम् । उप । आसते । द्रविणम् । धेहि । तेभ्यः ॥ ६ ॥

वेङ्कट० शोधकदीप्ते ! तव [illegible] परितः होतः ! यज्ञेषु स्तीर्णबर्हिषः मनुष्याः [illegible]। अग्ने ! तव परिचरणम् [illegible] [illegible] च [illegible] [illegible] उप आसते [illegible], तेभ्यः धनम् [illegible] ॥ ६ ॥

आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन् ।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥ ७ ॥

आ । रोदसी इति । अपृणत् । आ । स्वः । महत् । जातम् । यत् । एनम् । अपसः । अधारयन् ।
सः । अध्वराय । परि । नीयते । कविः । अत्यः । न । वाजऽसातये । चनःऽहितः ॥ ७ ॥

---

1. [illegible] वि' [illegible], [illegible] वि' [illegible]. 2. [illegible] मूको. 3. "[illegible]", [illegible]. 4-5. [illegible] मूको. 6. [illegible].

वेङ्कट० द्यावापृथिवी आ[1] पप्रथत्, महत् च अन्तरिक्षम् । [illegible] ॥ ७ ॥

नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसम् ।
रथीरृतस्य बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहितः ॥ ८ ॥

नमस्यत । हव्यऽदातिम् । सुऽअध्वरम् । दुवस्यत । दम्यम् । जातऽवेदसम् ।
रथीः । ऋतस्य । बृहतः । विऽचर्षणिः । अग्निः । देवानाम् । अभवत् । पुरःऽहितः ॥ ८ ॥

वेङ्कट० नमस्यत ब्राह्मणान्वयानाम्, हविषां वा दातारम् 'ब्राह्मणो वै हव्यदातिः' (माश १, ४, १, ३४) इति ब्राह्मणम्, शोभनयज्ञम् । परिचरत[7] गृहहितम् जातम् । यज्ञस्य रथ एव रथीः, 'रथीरध्वराणामसि' । रथो ह वा एष भूत्वा[8] देवेभ्यो यज्ञं वहति (माश १, ४, १, ११) इति ब्राह्मणम्, महतः विद्रष्टा अग्निः देवानाम् अभवत् [illegible] हितः ॥ ८ ॥

तिस्रो यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः ।
तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः ॥ ९ ॥

तिस्रः । यह्वस्य । सम्ऽइधः । परिऽज्मनः । अग्नेः । अपुनन् । उशिजः । अमृत्यवः ।
तासाम् । एकाम् । अदधुः । मर्त्ये । भुजम् । ऊँ इति । लोकम् । ऊँ इति । द्वे इति । उप । जामिम् । ईयतुः ॥

वेङ्कट० [illegible] महतः अग्नेः तिस्रः समिधः[9] [illegible] कामयितारो देवाः अपुनन् । तासाम् [illegible] एकाम् [illegible] मर्त्ये लोके निदधुः [illegible] । अथ अन्ये द्वे [illegible] ॥ ९ ॥

विशां कविं विश्पतिं मानुषीरिषः सं सीमकृण्वन्त्स्वधितिं न तेजसे ।
स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु दीधरत् ॥ १० ॥

विशाम् । कविम् । विश्पतिम् । मानुषीः । इषः । सम् । सीम् । अकृण्वन् । स्वधितिम् । न । तेजसे ।
सः । उत्ऽवतः । निऽवतः । याति । वेविषत् । सः । गर्भम् । एषु । भुवनेषु । दीधरत् ॥ १० ॥

---

१. नास्ति मूको. २. [illegible] वि' अ'. ३. [illegible] वि' अपे. ४. [illegible] अपे. ५. [illegible] वि' अ' अपे. ६. [illegible] वि' अपे. ७. [illegible]. ८. [illegible] वि'. ९. [illegible] वि' अ'. १०. [illegible] वि' अपे. ११. [illegible] वि' अपे.

वेङ्कट० निजाम् कान्तिम्[1] [illegible] मनुष्याणाम्[2] [illegible] सर्वतः [illegible]
इव [illegible]। सः[3] [illegible] देवान् गच्छति सर्वं [illegible]। सः एव वैश्वानरो
भूत्वा एषु सर्वेषु भूतेषु [illegible] धारयति ॥ १० ॥

'इति द्वितीयाष्टके [illegible] वर्गः'[4] ॥

स जिन्वते जठरेषु प्रजज्ञिवान् वृषा चित्रेषु नानदन्न सिंहः ।
वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे ॥ ११ ॥

सः । जिन्वते । जठरेषु । प्रजज्ञिऽवान् । वृषा । चित्रेषु । नानदत् । न । सिंहः ।
वैश्वानरः । पृथुऽपाजाः । अमर्त्यः । वसु । रत्ना । दयमानः । वि । दाशुषे ॥ ११ ॥

वेङ्कट० सः प्रीणयति मनुष्याणामुदरेषु प्रजातः[5] कामानां वर्षिता चित्रेषु [illegible] शब्दं
कुर्वन् इव सिंहः । वैश्वानरः पृथुबलः [illegible] धनानि रत्नानि प्रयच्छन् [illegible]
[illegible] भवति ॥ ११ ॥

वैश्वानरः प्रत्नथा नाकमारुहद् दिवस्पृष्ठं भन्दमानः सुमन्मभिः ।
स पूर्ववज्जनयञ्जन्तवे धनं समानमज्मं पर्येति जागृविः ॥ १२ ॥

वैश्वानरः । प्रत्नऽथा । नाकम् । आ । अरुहत् । दिवः । पृष्ठम् । भन्दमानः । सुमन्मऽभिः ।
सः । पूर्वऽवत् । जनयन् । जन्तवे । धनम् । समानम् । अज्मम् । परि । एति । जागृविः ॥ १२ ॥

वेङ्कट० [illegible][6] वैश्वानरः [illegible] पुराणः दिवम् आ रोहति[7] दिवः [illegible]
स्तोत्रैः । सः पुराण इव [illegible] धनम् [illegible] मार्गम् [illegible] परि गच्छति
[illegible] ॥ १२ ॥

ऋतावानं यज्ञियं विप्रमुक्थ्यमा यं दधे मातरिश्वा दिवि क्षयम् ।
तं चित्रयामं हरिकेशमीमहे सुदीतिमग्निं सुविताय नव्यसे ॥ १३ ॥

ऋतऽवानम् । यज्ञियम् । विप्रम् । उक्थ्यम् । आ । यम् । दधे । मातरिश्वा । दिवि । क्षयम् ।
तम् । चित्रऽयामम् । हरिऽकेशम् । ईमहे । सुऽदीतिम् । अग्निम् । सुवितायं । नव्यसे ॥ १३ ॥

वेङ्कट० [illegible] यज्ञार्हम् मेधाविनम् स्तुत्यम् अन्तरिक्षे दीप्ते [illegible][8] यम् मातरिश्वा
आ दधे, तम् [illegible]। तम् चित्रगमनम्[9] हरितकेशम् याचामहे [illegible]
अग्निम् [illegible] ॥ १३ ॥

1. [illegible] वि॰ [illegible]. 2. [illegible] वि॰ [illegible]. 3. [illegible].
4-4. नास्ति मूको. 5. [illegible] वि॰ [illegible]. 6. नास्ति वि॰ [illegible]. 7. [illegible] मूको. 8. [illegible].
9. चित्रगमनम् वि॰ [illegible].

शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधम् ।
अग्निं मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत् ॥ १४ ॥

शुचिम् । न । यामन् । इषिरम् । स्वःऽदृशम् । केतुम् । दिवः । रोचनऽस्थाम् । उषःऽबुधम् ।
अग्निम् । मूर्धानम् । दिवः । अप्रतिऽस्कुतम् । तम् । ईमहे । नमसा । वाजिनम् । बृहत् ॥ १४ ॥

वेङ्कट० 'आदित्यम् इव गमने क्षिप्रम् सर्वस्य प्रकाशम् प्रज्ञानम् दिवः रोचमानेषु तिष्ठन्तम् प्रातः प्रबुध्यमानम् अग्निम् दिवः† उच्छ्रितम् अप्रतिस्खलितम् अप्रतिहतम्‡ वा तम् अभियाचामः नमसा बलिनम् महान्तम्[1] ॥ १४ ॥

मन्द्रं होतारं शुचिमद्वयाविनं दमूनसमुक्थ्यं विश्वचर्षणिम् ।
रथं न चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे ॥ १५ ॥

मन्द्रम् । होतारम् । शुचिम् । अद्वयाविनम् । दमूनसम् । उक्थ्यम् । विश्वऽचर्षणिम् ।
रथम् । न । चित्रम् । वपुषाय । दर्शतम् । मनुःऽहितम् । सदम् । इत् । रायः । ईमहे ॥ १५ ॥

वेङ्कट० मादकम् होतारम् शुचिम् सत्यानृताभ्यामयुक्तं केवलसत्ययुक्तम् दमनमनसम् स्तुत्यम् सर्वस्य द्रष्टारम् रथम् इव चित्रम् रूपस्य प्रदर्शकम्[2] मनुष्याणां हितम् सदा एव धनानि याचामहे ॥ १५ ॥

'इति द्वितीयाष्टके सप्तमाध्याये एकोनविंशो वर्गः' ॥

[३]

'विश्वामित्रो गाथिन ऋषिः । वैश्वानरोऽग्निर्देवता । जगती छन्दः'[3] ।

वैश्वानराय पृथुपाजसे विपो रत्ना विधन्त धरुणेषु गातवे ।
अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत् ॥ १ ॥

वैश्वानराय । पृथुऽपाजसे । विपः । रत्ना । विधन्त । धरुणेषु । गातवे ।
अग्निः । हि । देवान् । अमृतः । दुवस्यति । अथ । धर्माणि । सनता । न । दूदुषत् ॥ १ ॥

वेङ्कट० वैश्वानराय पृथुतेजसे मेधाविनो विप्राः रमणीयानि हवींषि ददति धारकेषु देवेषु गन्तुम् । अग्निः हि देवान् अमृतः[4] परिचरति, तथा चिरन्तनानि धर्माणि च न[5] दूषयति परिपालयति ॥ १ ॥

१-१. नास्ति ख्पे. † दिवः मूको. ‡ नास्ति वि° अ° क. २. सर्वाभरण वि° मदर्शनम् वि° अ°. ३-३. नास्ति मूको. ४. अमृत वि° अ°. ५. नास्ति वि° अ°.

अन्तर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ।
क्षयं बृहन्तं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥ २ ॥

अन्तः । दूतः । रोदसी इति । दस्मः । ईयते । होता । निऽसत्तः । मनुषः । पुरःऽहितः ।
क्षयम् । बृहन्तम् । परि । भूषति । द्युऽभिः । देवेभिः । अग्निः । इषितः । धियाऽवसुः ॥ २ ॥

वेङ्कट० दर्शनीयोऽग्निः द्यावापृथिव्यौ अन्तः दूतः भूत्वा गच्छति । होता सन् होतृषदने निषण्णः मनुष्यस्य पुरो निहितः निवासं महान्तम् अलङ्करोति उपरवेदिं दीप्तिभिः देवैः अग्निः प्रेरितः[1] प्रज्ञावसुः ॥ २ ॥

केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः ।
अपांसि यस्मिन्नधि संदधुर्गिरस्तस्मिन्सुम्नानि यजमान आ चके ॥ ३ ॥

केतुम् । यज्ञानाम् । विदथस्य । साधनम् । विप्रासः । अग्निम् । महयन्त । चित्तिऽभिः ।
अपांसि । यस्मिन् । अधि । सम्ऽदधुः । गिरः । तस्मिन् । सुम्नानि । यजमानः । आ । चके ॥ ३ ॥

वेङ्कट० 'पताकास्थानीयम् यज्ञानाम्' गृहस्य साधयितारम् विप्राः अग्निम् पूजयन्ति कर्मभिः । यस्मिन्[2] कर्माणि स्तुतीश्च संदधुः, तस्मिन् सुखानि यजमानः मनुष्यः कामयते ॥ ३ ॥

पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघताम् ।
आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः ॥ ४ ॥

पिता । यज्ञानाम् । असुरः । विपःऽचिताम् । विऽमानम् । अग्निः । वयुनम् । च । वाघताम् ।
आ । विवेश । रोदसी इति । भूरिऽवर्पसा । पुरुऽप्रियः । भन्दते । धामऽभिः । कविः ॥ ४ ॥

वेङ्कट० पालयिता यज्ञानाम् विपश्चिताम् अपि प्रज्ञावान् सोऽयम् अग्निः[3] ऋत्विजां विमानसाधनं[4] भवति, वेदा[5] प्रज्ञासाधनं च, सोऽयम् आ विशति द्यावापृथिव्यौ बहुरूपेण[6] तेजसा, बहूनां प्रियः स्तौति शरीरैः स्वैः कुर्वन् कविः ॥ ४ ॥

चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम् ।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ॥ ५ ॥

चन्द्रम् । अग्निम् । चन्द्रऽरथम् । हरिऽव्रतम् । वैश्वानरम् । अप्सुऽसदम् । स्वःऽविदम् ।
विऽगाहम् । तूर्णिम् । तविषीभिः । आऽवृतम् । भूर्णिम् । देवासः । इह । सुऽश्रियम् । दधुः ॥ ५ ॥

१. प्रेरितं वि॰ अ॰. २-२. नास्ति मूको. ३. पत्नात् मूको. ४. नास्ति मूको. ५. यस्मिन्नस्मिन् वि॰ अ॰. ६. वेदा वि॰ मूको. ७. बहुरूपेण वि॰ अ॰ ह मूको; बहु रूपेण वि॰.

वेङ्कट० कामम् अग्निम् कान्तकर्माणम्, [illegible] हविर्भिः [illegible] वैश्वानरम् [illegible]
पुत्रेषु [illegible] ' [illegible] इव लोके [illegible] ॥ ५ ॥

'इति द्वितीयाष्टके अष्टमाध्याये विंशो वर्गः' ॥

अग्निर्देवेभिर्मनुषश्च जन्तुभिस्तन्वानो यज्ञं पुरुपेशसं धिया ।
रथीरन्तरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ॥ ६ ॥

अग्निः । देवेभिः । मनुषः । च । जन्तुऽभिः । तन्वानः । यज्ञम् । पुरुऽपेशसम् । धिया ।
रथीः । अन्तः । ईयते । साधदिष्टिऽभिः । जीरः । दमूनाः । अभिशस्तिऽचातनः ॥ ६ ॥

वेङ्कट० अग्निः देवानुद्दिश्य मनो च जन्तुभिः अपत्यैः [illegible] यज्ञम्
बहुरूपम् प्रज्ञया रथभूतः द्यावापृथिव्योः अन्तः गच्छति साधयन्कामान्[1] मनुष्येभ्यः क्षिप्रः
दममनाः शस्तेः चातयिता ॥ ६ ॥

अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः ।
वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपाम् ॥ ७ ॥

अग्ने । जरस्व । सुऽअपत्ये । आयुनि । ऊर्जा । पिन्वस्व । सम् । इषः । दिदीहि । नः ।
वयांसि । जिन्व । बृहतः । च । जागृवे । उशिक् । देवानाम् । असि । सुऽक्रतुः । विपाम् ॥ ७ ॥

वेङ्कट० अग्ने! [illegible] अस्मान् शोभनापत्ययुक्ते [illegible], हविषा अस्माकं कामान् पिन्वस्व,
अन्नानि च अस्मभ्यं प्रयच्छ, तथा महान्ति वयांसि [illegible] अस्मभ्यं प्रयच्छ जागरण-
शील रक्षक![2] । कामयिता देवानाम् असि, असि[5] च सुप्रज्ञः विप्राणाम् ॥ ७ ॥

विश्पतिं यह्वमतिथिं नरः सदा यन्तारं धीनामुशिजं च वाघताम् ।
अध्वराणां चेतनं जातवेदसं प्र शंसन्ति नमसा जूतिभिर्वृधे ॥ ८ ॥

विश्पतिम् । यह्वम् । अतिथिम् । नरः । सदा । यन्तारम् । धीनाम् । उशिजम् । च । वाघताम् ।
अध्वराणाम् । चेतनम् । जातऽवेदसम् । प्र । शंसन्ति । नमसा । जूतिऽभिः । वृधे ॥ ८ ॥

वेङ्कट० विशां पतिं महान्तम् अतिथिम् मनुष्याः सदा कर्मणां नियन्तारं कामयितारं च
ऋत्विजां यज्ञानां चेतयितारं जातवेदसम् प्र शंसन्ति नमस्कारैः स्तुतिभिश्च वर्धनाय। जूतिः
गतेः स्तुतिकर्मणः ॥ ८ ॥

---

१. [illegible] २-२. नास्ति मूको. ३. साधयन्[illegible] वि° अ°. ४. नास्ति वि° अ°.
५. असि वि° अ° क.

विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः ।
तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः ॥ ९ ॥

विभाऽवा । देवः । सुऽरणः । परि । क्षितीः । अग्निः । बभूव । शवसा । सुमत्ऽरथः ॥
तस्य । व्रतानि । भूरिऽपोषिणः । वयम् । उप । भूषेम । दमे । आ । सुवृक्तिऽभिः ॥ ९ ॥

वेङ्कट० प्रभावान् देवः सुरमणः[1] प्रजाः सर्वाः पर्यभवत् अग्निः बलेन शोभनरथः । तस्य कर्माणि बहूनां पोषयितुः वयम् अलङ्कुर्मः[2] स्वगृहे शोभनस्तोत्रैः ॥ ९ ॥

वैश्वानर तव धामान्या चके येभिः स्वर्विदभवो विचक्षण ।
जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना ॥ १० ॥

वैश्वानर । तव । धामानि । आ । चके । येभिः । स्वःऽवित् । अभवः । विऽचक्षण ॥
जातः । आ । अपृणः । भुवनानि । रोदसी इति । अग्ने । ता । विश्वा । परिऽभूः । असि । त्मना ॥ १० ॥

वेङ्कट० हे वैश्वानर ! तव शरीराणि आभिमुख्येन[3] कामये । यैस्त्वम् स्वर्गस्य लम्भयिता भवसि[4] प्राज्ञ[5] । जातः आ पूरयसि भूतानि द्यावापृथिव्यौ च[6] । अग्ने ! सर्वाणि तानि आत्मनैव परिभवसि [illegible] ॥ १० ॥

वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः ।
उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥ ११ ॥

वैश्वानरस्य । दंसनाभ्यः । बृहत् । अरिणात् । एकः । सुऽअपस्यया । कविः ॥
उभा । पितरा । महयन् । अजायत । अग्निः । द्यावापृथिवी इति । भूरिऽरेतसा ॥ ११ ॥

वेङ्कट० वैश्वानरस्य[7] कर्मभ्यः महत्त्वमिदम् एकः[8] प्राप्नोति शोभनकर्मेच्छया कविः । सोऽयम् उभौ पितरौ द्यौः च पृथिवी च[9] बहुरेतस्कौ पूजयन् अजायत । पृथिव्याः[10] ओषध्यात्मको रेतः, उदकं दिव इति ॥ ११ ॥

[11]इति द्वितीयाष्टके अष्टमाध्याये एकविंशो वर्गः[11] ।

१. सुरमणः वि' अ'. २. प्रजा वि' लपं. ३. 'भिमुख्येन वि' अ'; 'मुख्येन क लपं. ४. भवसि लपं. ५. प्राज्ञ वि' अ'. ६. नास्ति वि' लप. ७. वैश्वा वि' अ'. ८. नास्ति वि'. ९-९. पृथ्वी… वि' अ'. १०. पृथिव्याम् वि' अ'. ११-११. नास्ति मूको.

[४]

'विश्वामित्रो गाथिन ऋषिः । आप्रीसूक्तम् । प्रथमायाः ऋचः समिद्धोऽग्निर्देवता,
द्वितीयायास्तनूनपात्, तृतीयाया इळः, चतुर्थ्या बर्हिः, पञ्चम्या देवीर्द्वारः,
षष्ठ्या उषासानक्ता, सप्तम्या दैव्यौ होतारौ प्रचेतसौ,
अष्टम्यास्तिस्रो देव्यः सरस्वतीळाभारत्यः, नवम्यास्त्वष्टा,
दशम्या वनस्पतिः, एकादश्याः स्वाहाकृतयः । त्रिष्टुप् छन्दः'।

समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः ।
आ देव देवान्यजथाय वक्षि सखा सखीन्त्सुमना यक्ष्यग्ने ॥ १ ॥

समित्ऽसमित् । सुऽमनाः । बोधि । अस्मे इति । शुचाऽशुचा । सुऽमतिम् । रासि । वस्वः ।
आ । देव । देवान् । यजथाय । वक्षि । सखा । सखीन् । सुऽमनाः । यक्षि । अग्ने ॥ १ ॥

वेङ्क० समिधंसमिधम् [illegible] । अग्ने ! [illegible] अस्माकं सुमतिम् [illegible] देहि । आ वह च देव ! देवान् यजनाय । [illegible] त्वम् सखा [illegible] यज च अग्ने ॥ १ ॥

यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः ।
सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद्घृतयोनिं विधन्तम् ॥ २ ॥

यम् । देवासः । त्रिः । अहन् । आऽयजन्ते । दिवेऽदिवे । वरुणः । मित्रः । अग्निः ।
सः । इमम् । यज्ञम् । मधुऽमन्तम् । कृधि । नः । तनूऽनपात् । घृतऽयोनिम् । विधन्तम् ॥२॥

वेङ्क० यम् वरुणादयोऽपि देवाः [illegible] अहनि त्रिः आयजन्ते [illegible] त्रिषु सवनेषु । सः त्वम् इमम् यज्ञम् मधुमन्तम् कुरु नः हे तनूनपात् ! [illegible] देवान् परिचरन्तं यज्ञम् ॥ २ ॥

प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै ।
अच्छा नमोभिर्वृषभं वन्दध्यै स देवान्यक्षदिषितो यजीयान् ॥ ३ ॥

प्र । दीधितिः । विश्वऽवारा । जिगाति । होतारम् । इळः । प्रथमम् । यजध्यै ।
अच्छ । नमःऽभिः । वृषभम् । वन्दध्यै । सः । देवान् । यक्षत् । इषितः । यजीयान् ॥ ३ ॥

१-१. नास्ति मूको. २. [illegible]. ३. नास्ति मूको. ४. नास्ति वि' अ'. ५. [illegible] वि' अ'. ६. नास्ति वि' अ'.

वेङ्कट० [illegible] गच्छति होतिः सर्वस्य [illegible] । [illegible] सह [illegible] [illegible] ॥ ३ ॥

ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि ।
दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः ॥ ४ ॥

ऊर्ध्वः । वाम् । गातुः । अध्वरे । अकारि । ऊर्ध्वा । शोचींषि । प्रऽस्थिता । रजांसि ।
दिवः । वा । नाभा । नि । असादि । होता । स्तृणीमहि । देवऽव्यचाः । वि । बर्हिः ॥ ४ ॥

वेङ्कट० हे [illegible] युवयोः गमनम् [illegible] कृतम् इति । [illegible] — ऊर्ध्वानि [illegible] तेजांसि [illegible] । [illegible] [illegible] [illegible] स्तृणीमः [illegible] ॥ ४ ॥

सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वं प्रति यन्नृतेन ।
नृपेशसो विदथेषु प्र जाता अभीमं यज्ञं वि चरन्त पूर्वीः ॥ ५ ॥

सप्त । होत्राणि । मनसा । वृणानाः । इन्वन्तः । विश्वम् । प्रति । यन् । ऋतेन ।
नृऽपेशसः । विदथेषु । प्र । जाताः । अभि । इमम् । यज्ञम् । वि । चरन्त । पूर्वीः ॥ ५ ॥

वेङ्कट० [illegible] होतृकर्माणि [illegible] [illegible] [illegible] [illegible] गच्छन्ति [illegible] । [illegible] यज्ञम् [illegible] [illegible] ॥ ५ ॥

"इति द्वितीयाष्टके सप्तमाध्याये द्वाविंशो वर्गः" ॥

आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा विरूपे ।
यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः ॥ ६ ॥

आ । भन्दमाने इति । उषसा । उपाके इति । उत । स्मयेते इति । तन्वा । विरूपे इति विऽरूपे ।
यथा । नः । मित्रः । वरुणः । जुजोषत् । इन्द्रः । मरुत्वान् । उत । वा । महःऽभिः ॥ ६ ॥

वेङ्कट० स्तूयमाने [illegible] [illegible] अपि च [illegible] [illegible] । यथा अस्मान् मित्रावरुणौ जुषेताम्, [illegible] कुरुताम् ॥ ६ ॥

---

१. नास्ति मूको. २. नास्ति [illegible]. ३. नास्ति वि'. ४. नास्ति अ'. ५-५. [illegible] वि' अ'. ६-६. [illegible] वि' अ' [illegible]; [illegible] वि'. ७. [illegible] मूको. ८. [illegible] वि' [illegible]. ९. [illegible] मूको. १०. [illegible] वि' [illegible]. ११-११. नास्ति मूको. १२. [illegible]. १३. [illegible] वि'; [illegible] अ' [illegible]. १४. [illegible] वि' अ' [illegible].

दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥ ७ ॥

दैव्या । होतारा । प्रथमा । नि । ऋञ्जे । सप्त । पृक्षासः । स्वधया । मदन्ति ।
ऋतम् । शंसन्तः । ऋतम् । इत् । ते । आहुः । अनु । व्रतम् । व्रतऽपाः । दीध्यानाः ॥ ७ ॥

वेङ्कट० दैव्यौ होतारौ प्रथमौ हविर्भिः प्रसाधयामि । सप्त होतारः [illegible] च स्वधया मदन्ति । [illegible] [illegible] [illegible] । [illegible] [illegible] दीप्यमानाः ॥ ७ ॥

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु ॥ ८ ॥

आ । भारती । भारतीभिः । सऽजोषाः । इळा । देवैः । मनुष्येभिः । अग्निः ।
सरस्वती । सारस्वतेभिः । अर्वाक् । तिस्रः । देवीः । बर्हिः । आ । इदम् । सदन्तु ॥ ८ ॥

वेङ्कट० भारती [illegible] सहिता इळा च देवैः सहिता [illegible] अग्निः च मनुष्यैः [illegible] च [illegible] तिस्रः देव्यः इदम् बर्हिः आ सीदन्तु ॥ ८ ॥

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ९ ॥

तत् । नः । तुरीपम् । अध । पोषयित्नु । देव । त्वष्टः । वि । रराणः । स्यस्वेति स्यस्व ।
यतः । वीरः । कर्मण्यः । सुऽदक्षः । युक्तऽग्रावा । जायते । देवऽकामः ॥ ९ ॥

वेङ्कट० [illegible] [illegible] [illegible] देव त्वष्टः [illegible] [illegible] । यतः [illegible] [illegible] [illegible] [illegible] युक्तग्रावा जायते [illegible] ॥ ९ ॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥ १० ॥

वनस्पते । अव । सृज । उप । देवान् । अग्निः । हविः । शमिता । सूदयाति ।
सः । इत् । ऊँ इति । होता । सत्यऽतरः । यजाति । यथा । देवानाम् । जनिमानि । वेद ॥ १० ॥

वेङ्कट० वनस्पते [illegible] देवान् प्रति [illegible] । अग्निः हविः [illegible] [illegible] । सः एव होता सत्यतरः [illegible] यथा देवानाम् जन्मानि वेद इति ॥ १० ॥

१. [illegible] २. [illegible]

आ या॑ह्यग्ने समि॒धा॒नो अ॒र्वाङिन्द्रे॑ण दे॒वैः स॒रथं॑ तु॒रेभिः॑ ।
ब॒र्हिर्न॒ आस्ता॒मदि॑तिः सुपु॒त्रा स्वाहा॑ दे॒वा अ॒मृता॑ मादयन्ताम् ॥ ११ ॥

आ । या॒हि॒ । अ॒ग्ने॒ । स॒म्ऽइ॒धा॒नः । अ॒र्वाङ् । इन्द्रे॑ण । दे॒वैः । स॒ऽरथ॑म् । तु॒रेभिः॑ ।
ब॒र्हिः । नः॒ । आस्ता॑म् । अदि॑तिः । सु॒ऽपु॒त्रा । स्वाहा॑ । दे॒वाः । अ॒मृताः॑ । मा॒द॒य॒न्ता॒म् ॥ ११ ॥

वेङ्कट० आ याहि अग्ने! दीप्यमानः अभिमुखम् इन्द्रेण देवैः च समानरथम् त्वरमाणैः । अस्माकम् इदम् बर्हिः शोभनपुत्रा अदितिः च आस्ताम् । स्वाहाकारेण देवाः च अमृताः माद्यन्ताम्[1] ॥ ११ ॥

[2]इति द्वितीयाष्टकेऽष्टमाध्याये चतुर्विंशो वर्गः[2] ॥

[५]

[3]विश्वामित्रो गाथिन ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[3] ।

प्रत्य॒ग्निरु॒षस॒श्चेकि॑ता॒नोऽबो॑धि॒ विप्रः॑ पद॒वीः क॑वी॒नाम् ।
पृ॒थु॒पाजा॑ देव॒यद्भिः॒ समि॒द्धोऽप॒ द्वारा॒ तम॑सो॒ वह्नि॑रावः ॥ १ ॥

प्रति॑ । अ॒ग्निः । उ॒षसः॑ । चेकि॑तानः । अबो॑धि । विप्रः॑ । प॒द॒ऽवीः । क॒वी॒नाम् ।
पृ॒थु॒ऽपाजाः॑ । दे॒व॒यत्ऽभिः॑ । सम्ऽइ॑द्धः । अप॑ । द्वारा॑ । तम॑सः । वह्निः॑ । आ॒व॒रित्या॑वः ॥ १ ॥

वेङ्कट० उषसः [illegible] जागृमाणः आह प्रबुद्ध आसीत् मेधावी कवीनाम् 'पदानि धाता'[4] पृथुबलः देवानिच्छद्भिः समिद्धः । स तमसः द्वाराणि वृत्तमांसि प्रविशन्ति, तानि अपावृणोत् वा[5] ॥ १ ॥

प्रेद्व॒ग्निर्वा॑वृधे॒ स्तोमे॑भिर्गी॒र्भिः स्तो॑तॄ॒णां न॑म॒स्य॑ उ॒क्थैः ।
पू॒र्वीरृ॒तस्य॑ सं॒दृश॑श्चका॒नः सं दू॒तो अ॑द्यौदु॒षसो॑ वि॒रोके॑ ॥ २ ॥

प्र । इत् । ऊं॒ इति॑ । अ॒ग्निः । व॒वृ॒धे॒ । स्तोमे॑भिः । गीः॒ऽभिः । स्तो॒तॄ॒णाम् । न॒म॒स्यः॑ । उ॒क्थैः ।
पू॒र्वीः । ऋ॒तस्य॑ । स॒म्ऽदृशः॑ । च॒का॒नः । सम् । दू॒तः । अ॒द्यौ॒त् । उ॒षसः॑ । वि॒ऽरोके॑ ॥ २ ॥

वेङ्कट० प्र एव अग्निः वर्धते स्तोमैः शस्त्रैः उक्थैः च स्तोतॄणाम् नमस्कार्यः । दीप्यमानः बहूनि यज्ञस्य सन्दर्शनानि कामयमानः दूतः[6] सं[6] विद्योतयति[7] उषसाम् प्रादुर्भावे ॥ २ ॥

अधा॑य्य॒ग्निर्मानु॑षीषु वि॒क्ष्व१॒॑पां गर्भो॑ मि॒त्र ऋ॒तेन॒ साध॑न् ।
आ ह॑र्य॒तो य॑ज॒तः सान्व॑स्थादभू॑दु॒ विप्रो॒ हव्यो॑ मती॒नाम् ॥ ३ ॥

---

१. माद्यन्ता॰ वि॰ ध॰. २-२. नास्ति मूको. ३. [illegible] वि॰ ध॰. ४-४. [illegible] वि॰ ध॰, पदानाधाता अ॰. ५. नास्ति वि॰ अ॰. ६. [illegible] वि॰ अ॰. ७. [illegible] वि॰ ध॰.

अधायि । अग्निः । मानुषीषु । विक्षु । अपाम् । गर्भः । मित्रः । ऋतेन । साधन् ।
आ । हर्यतः । यजतः । सानु । अस्थात् । अभूत् । ऊँ इति । विप्रः । हव्यः । मतीनाम् ॥ ३ ॥

वेङ्कट० निहितः अग्निः मनुष्येषु प्रजासु अपाम् गर्भः मित्रभूतः सत्येन अभिमतं साधयन् । आ तिष्ठति स्पृहणीयः यष्टव्यः समुच्छ्रितामुत्तरवेदिम् । अभवत् च मेधावी स्तुतीनाम् आह्वातव्यः ॥ ३ ॥

मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः ।
मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम् ॥ ४ ॥

मित्रः । अग्निः । भवति । यत् । सम्ऽइद्धः । मित्रः । होता । वरुणः । जातऽवेदाः ।
मित्रः । अध्वर्युः । इषिरः । दमूनाः । मित्रः । सिन्धूनाम् । उत । पर्वतानाम् ॥ ४ ॥

वेङ्कट० सखा भवति अग्निः, यदा समिद्धः भवति । 'तथा मित्रः भवति' होता वारकः जातप्रज्ञः । तथा मित्रः भवति अध्वर्युरिच्छन् गृहपालकः दमनकाः सोऽयम् नद्यापर्वतानाम् निम्नोन्नतानाम् अपि मित्रः एव भवति ॥ ४ ॥

पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य ।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥ ५ ॥

पाति । प्रियम् । रिपः । अग्रम् । पदम् । वेः । पाति । यह्वः । चरणम् । सूर्यस्य ।
पाति । नाभा । सप्तऽशीर्षाणम् । अग्निः । पाति । देवानाम् । उपऽमादम् । ऋष्वः ॥ ५ ॥

वेङ्कट० रक्षति शत्रुवधन, पक्षिणः अभिमुखम् प्रियम् पदम् अन्तरिक्षम् । रक्षति च महान्' सूर्यस्य स्थानम् दिवम् । रक्षति च उत्तरवेद्यां वर्तमानः सप्तशीर्षाणमस्थितम् यज्ञम् अग्निः' रक्षति च देवानाम् उपमादयितारं यज्ञम् दर्शनीयः ॥ ५ ॥

'इति द्वितीयाष्टके अष्टमाध्याये सप्तविंशो वर्गः' ॥

ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ।
ससस्य चर्म घृतवत्पदं वेस्तदिदग्नी रक्षत्यप्रयुच्छन् ॥ ६ ॥

ऋभुः । चक्रे । ईड्यम् । चारु । नाम । विश्वानि । देवः । वयुनानि । विद्वान् ।
ससस्य । चर्म । घृतऽवत् । पदम् । वेः । तत् । इत् । अग्निः । रक्षति । अप्रऽयुच्छन् ॥ ६ ॥

१. नास्ति वि° मूको. २-२ नास्ति वि°. † रा मूको. ३ नास्ति मूको.
४-४. नास्ति मूको.

वेङ्कट० दीप्तः[1] करोति कर्मार्हस्य कल्याणम् उदकम् निरन्तानि देवः[2] प्रजानाति विद्वान् स्वपसः स्वाग्रहस्य वः गच्छतो ऋतस्य चरणसाधनम् [illegible] अन्तरिक्षमार्गं रक्षति [illegible] पुनः [illegible] अग्निः ॥ ६ ॥

आ योनिमग्निर्घृतवन्तमस्थात्पृथुप्रगाणमुशन्तमुशानः ।
दीद्यानः शुचिर्ऋष्वः पावकः पुनःपुनर्मातरा नव्यसी कः ॥ ७ ॥

आ । योनिम् । अग्निः । घृतऽवन्तम् । अस्थात् । पृथुऽप्रगानम् । उशन्तम् । उशानः ।
दीद्यानः । शुचिः । ऋष्वः । पावकः । पुनःऽपुनः । मातरा । नव्यसी इति । कः ॥ ७ ॥

वेङ्कट० आ तिष्ठति स्थानम् अग्निः उदकवन्तम् पृथुप्रगमनं विस्तीर्णावकाशम् कामयमानम् कामयमानः दीप्यमानः शोचमानः दर्शनीयः शोधकः । पुनःपुनः द्यावापृथिव्यौ नव्यसी करोति वृष्ट्यौषधिभिः[4] ॥ ७ ॥

सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन ।
आप इव प्रवता शुम्भमाना उरुष्यदग्निः पित्रोरुपस्थे ॥ ८ ॥

सद्यः । जातः । ओषधीभिः । ववक्षे । यदि । वर्धन्ति । प्रऽस्वः । घृतेन ।
आपःऽइव । प्रऽवता । शुम्भमानाः । उरुष्यत् । अग्निः । पित्रोः । उपऽस्थे ॥ ८ ॥

वेङ्कट० सद्यः एव जातः अग्निः ओषधीभिः वहते, यदि इमाः भवन्ति ओषधयः उदकेन आपः इव प्रवणवता मार्गेण शोभमानाः । [illegible] ओषधयो वर्धन्ते । रक्षति अग्निः द्यावापृथिव्योः उपस्थे ॥ ८ ॥

उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्मन्दिवो अधि नाभा पृथिव्याः ।
मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद्यजथाय देवान् ॥ ९ ॥

उत् । ऊं इति । स्तुतः । सम्ऽइधा । यह्वः । अद्यौत् । वर्ष्मन् । दिवः । अधि । नाभा । पृथिव्याः ।
मित्रः । अग्निः । ईड्यः । मातरिश्वा । आ । दूतः । वक्षत् । यजथाय । देवान् ॥ ९ ॥

वेङ्कट० 'उत् द्योतते' स्तुतः समिधा महान् दिवः वर्ष्मणि अन्तरिक्षे पृथिव्याः च नाभावुत्तरवेद्याम् । मित्रः अग्निः स्तोतव्यः मातरिश्वा वर्तमानः 'दूतः आ'[5] वहतु यष्टुं च देवान् ॥ ९ ॥

---

१. [illegible] वि² मू² [illegible]. २. देव वि² [illegible]. ३. [illegible] वि³ मू² [illegible] [illegible] ४. [illegible] मू². ५-५. नास्ति मूको.

उद॑स्तम्भीत्स॒मिधा॒ नाक॑मृ॒ष्वो॒३॒॑ऽग्निर्भव॑न्नुत्त॒मो रो॑च॒नाना॑म् ।
यदी॒ भृगु॑भ्य॒: परि॑ मात॒रिश्वा॒ गुहा॒ सन्तं॑ हव्य॒वाहं॑ समी॒धे ॥ १० ॥

उत् । अ॒स्त॒म्भी॒त् । स॒म्ऽइधा॑ । नाक॑म् । ऋ॒ष्वः । अ॒ग्निः । भव॑न् । उ॒त्ऽत॒मः । रो॒च॒नाना॑म् ।
यदि॑ । भृगु॑ऽभ्यः । परि॑ । मा॒त॒रिश्वा॑ । गुहा॑ । सन्त॑म् । ह॒व्य॒ऽवाह॑म् । स॒म्ऽई॒धे ॥ १० ॥

वेङ्कट० उत् अस्तम्भात् समिन्धनेन द्युलोकम् दर्शनीयः अग्निः दीप्यमानानाम् उत्तमः भवन्, यदि भृगुभ्यः अस्मदर्थं वायुः गुहायाम् सन्तम् हव्यवाहम् आहृत्य परि समीधे । 'रातिं भरद् भृगवे मातरिश्वा' (ऋ १,६०,१) इति मन्त्रः ॥ १० ॥

इळा॑मग्ने पुरु॒दंसं॑ स॒निं गोः श॑श्वत्त॒मं हव॑मानाय साध ।
स्यान्न॑: सू॒नुस्तन॑यो विजा॒वाग्ने॒ सा ते॑ सुम॒तिर्भू॑त्व॒स्मे ॥ ११ ॥

इळा॑म् । अ॒ग्ने॒ । पु॒रु॒ऽदंस॑म् । स॒निम् । गोः । श॒श्व॒त्ऽत॒मम् । हव॑मानाय । सा॒ध॒ ।
स्यात् । नः॒ । सू॒नुः । तन॑यः । वि॒जा॒ऽवा । अग्ने॑ । सा । ते॒ । सु॒ऽम॒तिः । भू॒तु॒ । अ॒स्मे इति॑ ॥ ११ ॥

वेङ्कट० पूर्वम् (ऋ ३,१,२३) व्याख्याता ।

'इति द्वितीयाष्टके अष्टमाध्याये पञ्चविंशो वर्गः'[1] ॥

[६]

'विश्वामित्रो गाथिन ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः' ॥

प्र का॑रवो मन॒ना व॒च्यमा॑ना देव॒द्रीचीं॑ नयत देव॒यन्त॑: ।
द॒क्षि॒णा॒वाड्वा॒जिनी॒ प्राच्ये॑ति ह॒विर्भर॑न्त्य॒ग्नये॑ घृ॒ताची॑ ॥ १ ॥

प्र । का॒र॒वः॒ । म॒न॒ना । व॒च्यमा॑नाः । दे॒व॒द्रीची॑म् । न॒य॒त॒ । दे॒व॒ऽयन्त॑: ।
द॒क्षि॒णा॒ऽवाट् । वा॒जिनी॑ । प्राची॑ । ए॒ति॒ । ह॒विः । भर॑न्ती । अ॒ग्नये॑ । घृ॒ताची॑ ॥ १ ॥

वेङ्कट० प्र नयत हे स्तोतारः! मननेन उच्यमानाः देवाभिमुखीम्[2] स्रुचम् देवान् कामयमानाः[3] स्रुचम् नयत । आहवनीयं दक्षिणावहमाना स्रुक् अध्वर्युभिर्ह्रियमाणा प्राची गच्छति हविः भरन्ती अग्नये घृतवती[4], स्रुचमपि तथा नयतेति ॥ १ ॥

१-१. नास्ति मूको. २. 'अग्नेः स्थि' म' स्थं. ३-३. यज्यमानाः देवम् मूको ४. 'मतो मूको.

आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो ।
दिवश्चिदग्ने महिना पृथिव्या वच्यन्तां ते वह्नयः सप्तजिह्वाः ॥ २ ॥

आ । रोदसी इति । अपृणाः । जायमानः । उत । प्र । रिक्थाः । अध । नु । प्रयज्यो इति प्रऽयज्यो ।
दिवः । चित् । अग्ने । महिना । पृथिव्याः । वच्यन्ताम् । ते । वह्नयः । सप्तऽजिह्वाः ॥ २ ॥

वेङ्कट० प्रादुर्भवन्[1] द्यावापृथिव्यौ आ पूरितवानसि, अपि च प्र रिक्तवानसि अनन्तरम् एव प्रकर्षेण यष्टव्य! । द्यावापृथिव्योरुभयोः अपि स्तूयन्ताम् महत्त्वेन अग्ने![2] ते वहनशीलाः वोढारोऽग्नयः सप्तभिर्जिह्वाभिः कालीकरालीत्यादिभिर्युक्ताः ॥ २ ॥

द्यौश्च त्वा पृथिवी यज्ञियासो नि होतारं सादयन्ते दमाय ।
यदी विशो मानुषीर्देवयन्तीः प्रयस्वतीरीळते शुक्रमर्चिः ॥ ३ ॥

द्यौः । च । त्वा । पृथिवी । यज्ञियासः । नि । होतारम् । सादयन्ते । दमाय ।
यदि । विशः । मानुषीः । देवऽयन्तीः । प्रयस्वतीः । ईळते । शुक्रम् । अर्चिः ॥ ३ ॥

वेङ्कट० द्यावापृथिव्यौ देवाः च होतारम् त्वा नि सादयन्ते यज्ञाय । यदि मानुष्यः प्रजाः[3] देवानिच्छन्त्यः हविष्मत्यः स्तुवन्ति तव दीप्यमानम् तेजः,[4] तदानीं निषादयन्ति ॥ ३ ॥

महान्त्सधस्थे ध्रुव आ निषत्तोऽन्तर्द्यावा माहिने हर्यमाणः ।
आस्के सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ॥ ४ ॥

महान् । सधऽस्थे । ध्रुवः । आ । निऽसत्तः । अन्तः । द्यावा । माहिने इति । हर्यमाणः ।
आस्के इति । सपत्नी इति सऽपत्नी । अजरे इति । अमृक्ते इति । सबर्दुघे इति सबःऽदुघे ।
उरुऽगायस्य । धेनू इति ॥ ४ ॥

वेङ्कट० महान् अस्मिन् लोके स्थिरः आ निषण्णः अन्तः द्यावापृथिव्यौ महत्यौ गच्छन् भवति । आस्कन्दनशीले[5] समानपतिके जरावर्जिते शत्रुभिरपरिस्पृष्टे द्यावापृथिव्यौ विस्तीर्णगमनस्याग्नेः मधुदुघे दोग्ध्र्यौ भवतः ॥ ४ ॥

१. °वन् प्रादुर्भवन् मूको. २. नास्ति मूको. ३. प्रमाणं वि'' क्षं ल; प्रजा मूको. ४. तेजः ल मूको. ५. द्यावापृथिव्यावास्कन्दन° मूको.

वृता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ ।
त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम् ॥ ५ ॥

वृता । ते । अग्ने । महतः । महानि । तव । क्रत्वा । रोदसी इति । आ । ततन्थ ।
त्वम् । दूतः । अभवः । जायमानः । त्वम् । नेता । वृषभ । चर्षणीनाम् ॥ ५ ॥

वेङ्कट० व्रतानि ते 'अग्ने महतः' महान्ति । तव प्रज्ञानेन त्वं द्यावापृथिव्यौ आ ततन्थ । त्वम् दूतः अभवः जायमानः प्रणेता च त्वम् मनुष्याणाम् ॥ ५ ॥

'इति द्वितीयाष्टकेऽष्टमाध्याये षड्विंशो वर्गः' ॥

ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व ।
अथा वह देवान्देव विश्वान्त्स्वध्वरा कृणुहि जातवेदः ॥ ६ ॥

ऋतस्य । वा । केशिना । योग्याभिः । घृतऽस्नुवा । रोहिता । धुरि । धिष्व ।
अथ । आ । वह । देवान् । देव । विश्वान् । सुऽअध्वरा । कृणुहि । जातऽवेदः ॥ ६ ॥

वेङ्कट० [illegible] यज्ञस्य । [illegible] रोहितवर्णौ [illegible] धुरि नियोजय च । अथ आ वह च देवान् देव! सर्वान्, सुयज्ञांश्च कुरु जातवेदः ॥ ६ ॥

दिवश्चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः ।
अपो यदग्न उशधग्वनेषु होतुर्मन्द्रस्य पनयन्त देवाः ॥ ७ ॥

दिवः । चित् । आ । ते । रुचयन्त । रोकाः । उषः । विऽभातीः । अनु । भासि । पूर्वीः ।
अपः । यत् । अग्ने । उशधक् । वनेषु । होतुः । मन्द्रस्य । पनयन्त । देवाः ॥ ७ ॥

वेङ्कट० [illegible] दीप्यन्ते रश्मयः [illegible] 'अनु दीप्यसे' । [illegible] हे अग्ने! यदा त्वम् [illegible] वनेषु [illegible] । यदा वा होतुः मन्द्रस्य स्तोत्रं कुर्वन्ति देवाः ॥ ७ ॥

उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः ।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ॥ ८ ॥

१. [illegible] २-२. नास्ति मूको. ३. [illegible] ४. [illegible] मूको. ५. [illegible] ६. नास्ति [illegible] ७-७. नास्ति मू. ८. नास्ति मूको.

ऊर्वाः । वा । ये । अन्तरिक्षे । मदन्ति । दिवः । वा । ये । रोचने । सन्ति । देवाः ।
ऊमाः । वा । ये । सुऽहवासः । यजत्राः । आऽयेमिरे । रथ्यः । अग्ने । अश्वाः ॥ ८ ॥

वेङ्कट० निर्ऋतयो वा अन्तरिक्षे ये देवाः मदन्ति वायुप्रमुखाः, दिवः आदित्यस्य रोचने दीप्ते च ये सन्ति अग्निप्रमुखाः । ऊमाः, ये स्वाह्वानाः पार्थिवाः देवाः ता आनिनयन्ति हविः अग्ने ! अश्वाः । 'ऊमाः अवितारः'[1] ॥ ८ ॥

'इति द्वितीयाष्टके अष्टमाध्याये षड्विंशो वर्गः'[1] ॥

ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः ।
पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ॥ ९ ॥

आ । एभिः । अग्ने । सऽरथम् । याहि । अर्वाङ् । नानाऽरथम् । वा । विऽभवः । हि । अश्वाः ।
पत्नीऽवतः । त्रिंशतम् । त्रीन् । च । देवान् । अनुऽस्वधम् । आ । वह । मादयस्व ॥ ९ ॥

वेङ्कट० एभिः सर्वैर्देवैः समानरथम् आ याहि अभिमुखः अग्ने ! नानारथम् वा । विभवः हि तव अश्वाः भवन्ति । तथा सपत्नीकान्[2] त्रयस्त्रिंशतं देवान्, स्वधामनुसृत्य हविः इति आवह, मादयस्व च ॥ ९ ॥

स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः ।
प्राची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये ॥ १० ॥

सः । होता । यस्य । रोदसी इति । चित् । उर्वी इति । यज्ञम्ऽयज्ञम् । अभि । वृधे । गृणीतः ।
प्राची इति । अध्वराऽइव । तस्थतुः । सुमेके इति सुऽमेके । ऋतवरी इत्यृतऽवरी ।
ऋतऽजातस्य । सत्ये इति ॥ १० ॥

वेङ्कट० स एव होता यस्य यज्ञम् उर्वी द्यावापृथिव्यौ अपि अभि गृणीतः वर्धनाय [illegible] ।
ते द्यावापृथिव्यौ स्थिते [illegible] अध्वर्यू इव[4] स्थिते शोभनपरिमाणे यज्ञवत्यौ ऋतजातस्य सत्यभूते ॥ १० ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ११ ॥

१-१. नास्ति वि¹; [illegible] सर्व. २-२ नास्ति मूको. ३. नास्ति वि¹ अ¹ [illegible].
४. नास्ति सर्व.

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ २३ ॥

वेङ्कट० ३. १. २३ अ.

¹इति द्वितीयाष्टके अष्टमाध्याये सप्तदशो वर्गः¹ ॥

ऋग्वेददीपिका सेयं² द्वितीयस्याष्टमस्य तु ।
वृत्ते श्रीवेङ्कटार्यस्य तनयो माधवाह्वयः ॥ १ ॥


³शाकल्यसहिते ऋग्वेदे द्वितीयस्याष्टकस्य यत् ।
तत्त्वं लक्ष्मणसूनोर्व्याख्यं लिखितं देवशर्मणा‡³ ॥ २ ॥

⁴इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने द्वितीयाष्टके अष्टमोऽध्यायः⁴ ॥

— ❀ —

इति ऋग्वेदे सभाष्ये द्वितीयाष्टके अष्टमोऽध्यायः ॥

द्वितीयाष्टकः समाप्तः ॥



१-१. नास्ति मूको. २. सेयं वि¹ लर्पं. ३-३. नास्ति वि¹ मूं. † °स्वस्य मूको.
‡ देवशर्मणा वि¹. ४-४. नास्ति वि¹ मू.

अथ तृतीयकाण्डे प्रथमोऽध्यायः

तृतीयोऽस्मात्काण्डस्तस्मिन्नव्ययादिषु वक्ष्यते ।
बहुव्ययं निपातेषु स्वाद्यर्थैश्चान्यदर्थयेत् ॥ १ ॥

इयन्त इति सङ्ख्याय निपातानां न शक्यते ।
उपसर्गास्तु विज्ञेया क्रियायोगेषु विंशतिः ॥ २ ॥

निपाताः खलु सान्ते वै पृथक् नाप्यथ यथा पुनः ।
सचकारं द्विका सार्कर्मयोगेति सह सुद्धिः ॥ ३ ॥

[illegible] मिथ्या शीघ्रं वृथा 'सं स्योगृषक् वृषक्' ।
'हिरुक् क्रीणन्तौ पट सु' किल इत्य यशिन्वंहु.' ॥ ४ ॥

यद्यो यदि नमस्तेऽस्मै चत्वारिंशदुदाहृताः ।
भावुकास्ताश्च सर्वेऽस्मीं सम्यगन्येऽपि च तादृशाः ॥ ५ ॥

[illegible] वषट् स्वाहा नानाः शीघं स्वधान्ति कन्दं ।
[illegible] 'वषि [illegible]' ॥ ६ ॥

नूनमस्तु सुधा शः भकः वस्तो कथंचिदिशार्तिः ।
अन्योदाता निपातेषु ननु नूनं स्वयं पुरा ॥ ७ ॥

[illegible](?) मद्द्विस्था पश्चादेवमसा तिरः ।
प्रागस्माह मुन्द्रवका कुत्सितस्य इह[11] मिथः ॥ ८ ॥

[illegible][12] चिरमन्तराञ्च समाहते ।
अन्यथा सनुतः स्यादि सनाऽऽरेऽऽसाऽऽनुषक् पुनः ॥ ९ ॥

[illegible] सार्क चत्वारिंशत् सन्ति चाऽन्ये च तादृशाः ।
हिरुक् सदा पुरस्तात्[13] परस्तात्[14] [illegible] पृथु[14] ॥ १० ॥

---

१. [illegible] १,४,५९. २ [illegible] ३ [illegible] ४ [illegible] ५-६ [illegible] † [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९-१० [illegible] † [illegible] ‡ [illegible] १० [illegible] ११-१३ [illegible] १२ [illegible] १३ [illegible] १४. [illegible]

मत्वर्थीयसत्ता(!)[1] चेदमौ यत्र सन्ति तथाऽपरे ।
स्म इवेति स्वरितौ विद्याद् इहन्यास्त्र तथाऽपरे ॥ ११ ॥

सीमुदु,त्विवानस्वयाङ्केना[2] ग्रादयोऽत्र निपातिनः ।
अमी च सर्वानुदात्ता इहन्यास्त्र तथाऽपरे ॥ १२ ॥

अथो निरीक्षणाद्यर्थे निपाता अनुदात्तकाः ।
त्रिविधा मुख्येतिकरा समुच्चयार्थास्तथाऽपरे ॥ १३ ॥

वाक्यार्थेष्वपदार्थेषु[3] निपाताः स्वेद्दर्शानिताः ।
पदपादपूरणाःऽत्र स्युरिति वाक्यस्य दर्शनम्[4] ॥ १४ ॥

न वै किल नु नामाथ कच्चिदाद्य सीमु कम् ।
इदमुनामिदंकम्मयिद्दया स्युरनर्थकाः ॥ १५ ॥

तत्त्वेषां तु निपातानां पूरणत्वं न दृश्यते ।
माऽदयः पूरणाश्च स्युर्यदा वाक्येष्वनन्विता[5] ॥ १६ ॥

वाक्पूरकेऽपि[6] वाक्यार्थे प्रकृत्येष्वपि नन्वमी ।
दृश्यन्ते यत्र नाऽऽशङ्का क्रियते पादपूरणे ॥ १७ ॥

माषवत्तत्र वर्तन्ते स्फुटत्वोद्भावनादिकम् ।
वाक्यार्थे[7] ज्ञापयन्त्येते मन्त्रब्राह्मणयोरिति ॥ १८ ॥

स्फुटत्वोद्भावनादिश्च क्वचित् सूक्ष्म क्वचित् स्फुट ।
यत्र[8] स्फुटन्त्वहा[9] सार्थाः सूक्ष्मे स्युः पूरणा इति ॥ १९ ॥

'अग्नु ह स्म वा ऋषिभ्यः' त्रिभिः स्फुटतोऽभवत्[10] ।
तथैव 'तु ह वा वा स्वाङ्गार'[11] बहवः सन्ति तादृशाः ॥ २० ॥

उकारो विनिग्रहार्थस्तथाऽनेकत्र दर्शनात् ।
'नमु ध्रुवाम् धे गिरः'[12], 'नर्मु त्वा गोतमो गिरः'[13] ॥ २१ ॥

१. हस्वरीय ... २. मुहितम् वि° क°. ३. °वेष्वपदार्थेषु वि° क° ४. तु मा १, ९. ५. °व्यन्विताः वि° क°. ६. वाक्पूर° वि° क°, ... ७. ... वि° क°. ८. यत्र वि° क°. ९. स्फुट... वि° क°. १०. ... वि° क° ... ११. तै १,१,१२,१ १२. ऋ ८,९५,६. १३. ऋ १,७८,१.

'अयमु ते सर्मतसि'[१२] च विविधस्तस्य भाषः ।
'उदु ष्य देवः सविता'[१३] पूरणस्तासोंडु स ॥ २२ ॥

पूरणार्थं तस्य तकारोऽस्मात् प्रमणे ।
मन्त्रेष्वपु तु तस्याऽर्थः स्फुटस्तोद्ग्रहणादिह ॥ २३ ॥

एतावता पूरणत्वं नायमेवमिति स्थितिः ।
आदावन्तसंबन्धो यथा 'आदह स्वधामनु'[११] ॥ २४ ॥

'आस्य ते ध्वसयन्तो वृषामंसम्'[१२], 'आदिन्नु ते हर्यता'[१३] ।
'आदङ्गिराः प्रथमम्'[१४] पूरणत्वाऽपि विद्यते ॥ २५ ॥

इवेनकारसहिता: 'स इद् भोजो यो गृहवे'[१५] ।
'स इद् देवेषु गच्छति'[१६] दृश्यते चाऽपि पूरणः ॥ २६ ॥

ईमित्यस्य [illegible] 'एनामुपगच्छेत्' मरु[१७] ।
'स ईं पाहि य ऋजीषी'[१८] विद्यते चाऽपि पूरण ॥ २७ ॥

उपायचेषु निपातशब्देष्वेषां[१९] यथायथम् ।
ज्ञातोपादानविद्वद्भिर्नो न मन्त्रार्थेषु मुह्यति ॥ २८ ॥

[७]

[१]विश्वामित्रो गाथिन ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[१६] ।

प्र य आरुः शितिपृष्ठस्य धासेरा मातरा विविशुः सप्त वाणीः ।
परिक्षिता पितरा सं चरेते प्र सर्स्राते दीर्घमायुः प्रयक्षे ॥ १ ॥

प्र । ये । आरुः । शितिऽपृष्ठस्य । धासेः । आ । मातरा । विविशुः । सप्त । वाणीः ।
परिऽक्षिता । पितरा । सम् । चरेते इति । प्र । सर्स्राते इति । दीर्घम् । आयुः । प्रऽयक्षे ॥१॥

वेङ्कट० विश्वामित्रः । प्र गच्छन्ति ये नीलपृष्ठस्याग्नेः धारकस्य[१४] रश्मयः, ते "द्यां च पृथिवीं[१५] च आ विशन्ति [illegible] गमनस्वभावाः नदीः । 'एकं गर्भं दधिरे सप्त वाणीः' (ऋ ३,१,६) इति मन्त्रः । [illegible][१६] द्यावापृथिवी परितो वर्तमाने सम् चरेते । 'अही दशमस्य मातरा मध्ये' (ऋ ३,१,७) इति मन्त्रः । तथाऽग्ने प्रकर्षेण [illegible] दीर्घम् [illegible] प्र सर्स्राते [illegible] ॥ १ ॥

१ ऋ १,३०,४. २. ऋ २,३८,१. ३ ऋ १,६,८ ४ ऋ १,३२,४. ५. ऋ ८,९२, २५-२७. ६. ऋ १,१४१,६ ७. ऋ १०,११०,३. ८. ऋ १ १,४. ९. मूळे वेङ्कट. १० ऋ १,४,७. ११ ऋ ६,१७,३. १२. मैषेषु वेङ्कट. १३ १३. नास्ति मूळे. १४. [illegible] वि॰. १५ १५. द्यावापृथिवी वि॰ क्रम. १६. [illegible] वि॰ क्रम.

दिवक्षसो धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद्वहन्तीः ।
ऋतस्य त्वा सदसि क्षेमयन्तं पर्येका चरति वर्तनिं गौः ॥ २ ॥

दिवक्षसः । धेनवः । वृष्णः । अश्वाः । देवीः । आ । तस्थौ । मधुऽमत् । वहन्तीः ।
ऋतस्य । त्वा । सदसि । क्षेमऽयन्तम् । परि । एका । चरति । वर्तनिम् । गौः ॥ २ ॥

वेङ्कट० दिवं व्याप्नुवानाः प्रीणयित्र्यः वर्षितुरग्नेः अश्वाः [illegible] । सोऽयम् [illegible] उदकम् [illegible] आ तिष्ठति । तं त्वाम् उदकस्य स्थाने क्षेमं कुर्वन्तम् एका गौः परि चरति इति माध्यमिकां वाचमाह, व्याप्ता [illegible] ॥ २ ॥

आ सीमरोहत्सुयमा भवन्तीः पतिश्चिकित्वान्रयिविद्रयीणाम् ।
प्र नीलपृष्ठो अतसस्य धासेस्ता अवासयत्पुरुधप्रतीकः ॥ ३ ॥

आ । सीम् । अरोहत् । सुऽयमाः । भवन्तीः । पतिः । चिकित्वान् । रयिऽवित् । रयीणाम् ।
प्र । नीलऽपृष्ठः । अतसस्य । धासेः । ताः । अवासयत् । पुरुधऽप्रतीकः ॥ ३ ॥

वेङ्कट० आ रोहति सर्वतः [illegible] भवन्तीः [illegible] प्राज्ञो धनानां लम्भयिता । प्रकर्षेण वासयति च [illegible] धासेः [illegible] बहुप्रकाराः ॥ ३ ॥

महि त्वाष्ट्रमूर्जयन्तीरजुर्यं स्तभूयमानं वहतो वहन्ति ।
व्यङ्गेभिर्दिद्युतानः सधस्थ एकामिव रोदसी आ विवेश ॥ ४ ॥

महि । त्वाष्ट्रम् । ऊर्जयन्तीः । अजुर्यम् । स्तभुऽयमानम् । वहतः । वहन्ति ।
वि । अङ्गेभिः । दिद्युतानः । सधऽस्थे । एकाम्ऽइव । रोदसी इति । आ । विवेश ॥ ४ ॥

वेङ्कट० [illegible] त्वष्टुरपत्यं [illegible] वहन्ति । दीप्यमानः [illegible] सधस्थे [illegible] एकामिव [illegible] 'द्यौश्च पृथिवी' [illegible] विविवेश [illegible] इति ॥ ४ ॥

जानन्ति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणन्ति ।
दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः ॥ ५ ॥

१. वैसं मूको. २. नास्ति मूको. ३. [illegible] वि॰ ग्रथं. ४. [illegible] ५. [illegible] ६. [illegible] ७-८. [illegible]

जानन्ति । वृष्णः । अरुषस्य । शेवम् । उत । ब्रध्नस्य । शासने । रणन्ति ।
दिवःऽरुचः । सुऽरुचः । रोचमानाः । इळा । येषाम् । गण्या । माहिना । गीः ॥ ५ ॥

वेङ्कट० जानन्ति वर्षितुः [illegible] सुखम् । अपि च [illegible] शासने [illegible] । '[illegible]' (ऋ १, ६०, [illegible]) इति मन्त्रः । [illegible] मनुष्याणाम् इळा मही स्तुतिः [illegible] । [illegible] ॥ ५ ॥

'इति तृतीयाष्टके प्रथमाध्याये प्रथमो वर्गः' ॥

उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयन्त शूषम् ।
उक्षा ह यत्र परि धानमक्तोरनु स्वं धाम जरितुर्ववक्ष ॥ ६ ॥

उतो इति । पितृऽभ्याम् । प्रऽविदा । अनु । घोषम् । महः । महत्ऽभ्याम् । अनयन्त । शूषम् ।
उक्षा । ह । यत्र । परि । धानम् । अक्तोः । अनु । स्वम् । धाम । जरितुः । ववक्ष ॥ ६ ॥

वेङ्कट० अपि च मातापितृभ्याम् [illegible] सुखम् महद्भ्याम् [illegible] अनु [illegible] । [illegible] ॥ ६ ॥

अध्वर्युभिः पञ्चभिः सप्त विप्राः प्रियं रक्षन्ते निहितं पदं वेः ।
प्राञ्चो मदन्त्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः ॥ ७ ॥

अध्वर्युऽभिः । पञ्चऽभिः । सप्त । विप्राः । प्रियम् । रक्षन्ते । निऽहितम् । पदम् । वेरिति वेः ।
प्राञ्चः । मदन्ति । उक्षणः । अजुर्याः । देवाः । देवानाम् । अनु । हि । व्रता । गुरिति गुः ॥

वेङ्कट० [illegible] । [illegible] । देवाः देवानाम् इति [illegible] । [illegible] (ऋ ९, ७, १४) इति मन्त्रः । [illegible] ॥ ७ ॥

दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥ ८ ॥

दैव्या । होतारा । प्रथमा । नि । ऋञ्जे । सप्त । पृक्षासः । स्वधया । मदन्ति ।
ऋतम् । शंसन्तः । ऋतम् । इत् । ते । आहुः । अनु । व्रतम् । व्रतऽपाः । दीध्यानाः ॥ ८ ॥

वेङ्कट० (ऋ ३, ४, ७ द्र०) ॥ ८ ॥

१-१. नास्ति मूको. २. नास्ति वि' अ'. ३. °[illegible] मूको.

वृषायन्ते महे अत्याय पूर्वीर्वृष्णे चित्राय रश्मयः सुयामाः ।
देव होतर्मन्द्रतरश्चिकित्वान् महो देवान् रोदसी एह वक्षि ॥ ९ ॥

वृषऽयन्ते । महे । अत्याय । पूर्वीः । वृष्णे । चित्राय । रश्मयः । सुऽयामाः ।
देव । होतरिति । मन्द्रऽतरः । चिकित्वान् । महः । देवान् । रोदसी इति । आ । इह । वक्षि ॥ ९ ॥

वे० वृषेवाऽऽचरन्ति ज्वालाः महते अश्वाय महते इति । एतदेवाह — अग्ने चित्रवर्णायाऽस्मै रश्मय 'सुयामाः' भवन्ति । अथ प्रत्यक्षः । इत्थं मन्द्रतरस्त्वम् देव! होतः! प्राज्ञश्च महतः देवान् रोदसी च इह 'आ वह' ॥ ९ ॥

पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो रेवदूषुः ।
उतो चिदग्ने महिना पृथिव्याः कृतं चिदेनः सं महे दशस्य ॥ १० ॥

पृक्षऽप्रयजः । द्रविणः । सुऽवाचः । सुऽकेतवः । उषसः । रेवत् । ऊषुः ।
उतो इति । चित् । अग्ने । महिना । पृथिव्याः । कृतम् । चित् । एनः । सम् । महे । दशस्य ॥ १० ॥

वे० द्रविणः इत्यतेः । हे अग्ने! गमनस्वभाव! हविर्भिर्यष्टव्याः यास्तु होतुं प्रकाशयन्ते, याः कामयमानाः वचसा समृध्यमाना च सर्वे सुप्रज्ञानाः उषसः धनयुक्तमस्माकम् व्युच्छन्तु । अपि च अग्ने! विस्तीर्णाया पृथिव्याः महत्त्वेन कृतम् अपि पापं महते यजमानाय सम् छादय ॥ १० ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाऽग्ने सा ते सुमतिर्भूत्वस्मे ॥ ११ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥

वे० पूर्वं (ऋ ३,१,२३) व्याख्याता ।

इति तृतीयाष्टके प्रथमाध्याये द्वितीयो वर्गः ॥

[८]

विश्वामित्रो गाथिन ऋषिः । यूपो देवता, षष्ठ्याद्यस्य ... नवमीदशम्योः यूपाः, अग्निर्वा विश्वेदेवा वा, एकादश्या ब्रश्चनः । त्रिष्टुप् छन्दः, तृतीयासप्तम्यौ अनुष्टुभौ ।

अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।
यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ॥ १ ॥

१-१ नास्ति वि' अ'. २. ... वि'. ३. ... वि' अ' कपं. ४-४. ... वि' अ'.
५. नास्ति वि' ६ ... वि' कपं. ७-७. नास्ति मूको.

अञ्जन्ति । त्वाम् । अध्वरे । देवऽयन्तः । वनस्पते । मधुना । दैव्येन ।
यत् । ऊर्ध्वः । तिष्ठाः । द्रविणा । इह । धत्तात् । यत् । वा । क्षयः । मातुः । अस्याः । उपऽस्थे ॥

वेङ्कट० वनस्पते! यूपभूत[१] त्वाम् यज्ञे देवान् कामयमानाः 'एतद्वै मधु दैव्यं यदाज्यम्' (तै ब्रा २ १) इति[२] मन्त्र 'दैव्येन मधुना'[३] अञ्जन्ति । तथा सति यदि च ऊर्ध्वः तिष्ठसि[४] यदि च क्षेषे[५] द्रविणान्यपि अस्मासु धेहि[६] अस्याः मातुः पृथिव्याः उपस्थे इति ॥ १ ॥

समिद्धस्य श्रयमाणः पुरस्ताद् ब्रह्म वन्वानो अजरं सुवीरम् ।
आरे अस्मद् अमतिं बाधमान उच्छ्रयस्व महते सौभगाय ॥ २ ॥

सम्ऽइद्धस्य । श्रयमाणः । पुरस्तात् । ब्रह्म । वन्वानः । अजरम् । सुऽवीरम् ।
आरे । अस्मत् । अमतिम् । बाधमानः । उत् । श्रयस्व । महते । सौभगाय ॥ २ ॥

वेङ्कट० आहवनीयस्य पुरस्तात् श्रयमाणः कुर्वन् ब्रह्म च अजरम् शोभनपुत्रं प्रयच्छन् ... 'अमतिम् बाधमानः', 'अमतिं बाधमानः' इत्युक्तम् ... (तै ब्रा ३, २) इत्युक्तम्, उत् श्रयस्व महते सौभगाय ॥ २ ॥

उच्छ्रयस्व वनस्पते वर्ष्मन् पृथिव्या अधि ।
सुमिती मीयमानो वर्चो धा यज्ञवाहसे ॥ ३ ॥

उत् । श्रयस्व । वनस्पते । वर्ष्मन् । पृथिव्याः । अधि ।
सुऽमिती । मीयमानः । वर्चः । धाः । यज्ञऽवाहसे ॥ ३ ॥

वेङ्कट० उत् तिष्ठ वनस्पते! पृथिव्याः वर्ष्मन् अधि उन्नतभूते देशे देवयजने । शोभनेन मानेन मीयमानः यजमानाय वर्चः धेहि ॥ ३ ॥

युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥ ४ ॥

युवा । सुऽवासाः । परिऽवीतः । आ । अगात् । सः । ऊँ इति । श्रेयान् । भवति । जायमानः ।
तम् । धीरासः । कवयः । उत् । नयन्ति । सुऽआध्यः । मनसा । देवऽयन्तः ॥ ४ ॥

१. 'भूते वि' मूं'. २-३. दैव्यं मधु मूको. ४. नास्ति मूको. ५-७. नास्ति मूको. ५. तिष्ठसि वि''' ख; तिष्ठस्य मूं'. ६. क्षमाले मूं' ख, नास्ति वि' ७. देहि वि' मूं' वेङ्कटे ख. ८. निर्माणात्मनः वि' मूं'.

वेङ्कट० [illegible] ॥ ४ ॥

जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः ।
पुनन्ति धीरा अपसो मनीषा देवया विप्र उदियर्ति वाचम् ॥ ५ ॥

जातः । जायते । सुदिनऽत्वे । अह्नाम् । सऽमर्ये । आ । विदथे । वर्धमानः ।
पुनन्ति । धीराः । अपसः । मनीषा । देवऽया । विप्रः । उत् । इयर्ति । वाचम् ॥ ५ ॥

वेङ्कट० [illegible] ॥ ५ ॥

'इति तृतीयाष्टके प्रथमाध्याये तृतीयो वर्गः' ॥

यान् वो नरो देवयन्तो निमिम्युर्वनस्पते स्वधितिर्वा ततक्ष ।
ते देवासः स्वरवस्तस्थिवांसः प्रजावदस्मे दिधिषन्तु रत्नम् ॥ ६ ॥

यान् । वः । नरः । देवऽयन्तः । निऽमिम्युः । वनस्पते । स्वऽधितिः । वा । ततक्ष ।
ते । देवासः । स्वरवः । तस्थिऽवांसः । प्रजाऽवत् । अस्मे इति । दिधिषन्तु । रत्नम् ॥ ६ ॥

वेङ्कट० [illegible] ॥ ६ ॥

ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः ।
ते नो व्यन्तु वार्यं देवत्रा क्षेत्रसाधसः ॥ ७ ॥

ये । वृक्णासः । अधि । क्षमि । निऽमितासः । यतऽस्रुचः ।
ते । नः । व्यन्तु । वार्यम् । देवऽत्रा । क्षेत्रऽसाधसः ॥ ७ ॥

वेङ्कट० [illegible] ॥ ७ ॥

१. [illegible] २. [illegible] ३. [illegible] ४-५. [illegible] ६. [illegible]

आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अन्तरिक्षम् ।
सजोषसो यज्ञमवन्तु देवा ऊर्ध्वं कृण्वन्त्वध्वरस्य केतुम् ॥ ८ ॥

आदित्याः । रुद्राः । वसवः । सुऽनीथाः । द्यावाक्षामा । पृथिवी । अन्तरिक्षम् ।
सऽजोषसः । यज्ञम् । अवन्तु । देवाः । ऊर्ध्वम् । कृण्वन्तु । अध्वरस्य । केतुम् ॥ ८ ॥

षड्गुरु० आदित्यादय शोभननयनाः द्यावाभूमी च विस्तीर्णे अन्तरिक्षम् च सङ्गता यज्ञम् इमम् रक्षन्तु, यज्ञस्य च चिह्नभूतं यूपमूर्ध्वं उच्छ्रयन्तु ॥ ८ ॥

हंसा इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः ।
उन्नीयमानाः कविभिः पुरस्ताद्देवा देवानामपि यन्ति पाथः ॥ ९ ॥

हंसाःऽइव । श्रेणिऽशः । यतानाः । शुक्राः । वसानाः । स्वरवः । नः । आ । अगुः ।
उत्ऽनीयमानाः । कविऽभिः । पुरस्तात् । देवाः । देवानाम् । अपि । यन्ति । पाथः ॥ ९ ॥

षड्गुरु० हंसा इव पङ्क्तिशः यतमानाः शुक्लानि वस्त्राणि आच्छादयन्तः यूपाः अस्मान् आगताः । ऋत्विग्भिः पुरस्तात् उन्नीयमाना देवा देवानाम् प्राप्नुवन्ति स्थानम् ॥ ९ ॥

शृङ्गाणीवेच्छृङ्गिणां सं ददृश्रे चषालवन्तः स्वरवः पृथिव्याम् ।
वाघद्भिर्वा विहवे श्रोषमाणा अस्माँ अवन्तु पृतनाज्येषु ॥ १० ॥

शृङ्गाणिऽइव । इत् । शृङ्गिणाम् । सम् । ददृश्रे । चषालऽवन्तः । स्वरवः । पृथिव्याम् ।
वाघत्ऽभिः । वा । विऽहवे । श्रोषमाणाः । अस्मान् । अवन्तु । पृतनाज्येषु ॥ १० ॥

षड्गुरु० शृङ्गाणीव शृङ्गवताम् महिषादीनाम् सम् दृश्यन्ते चषालवन्तः यूपाः अस्याः पृथिव्याः । ऋत्विग्भिः इव अस्माकम् निहवे क्रियमाणे सति शृण्वन्तः अस्मान् रक्षन्तु संग्रामेषु ॥ १० ॥

वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम ।
यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥ ११ ॥

---

१. [illegible] २. [illegible] ३. नास्ति [illegible] ४. [illegible] ५. नास्ति [illegible] ६. [illegible] ० [illegible]

वनस्पते । शतऽवल्शः । वि । रोह । सहस्रऽवल्शाः । वि । वयम् । रुहेम ।
यम् । त्वाम् । अयम् । स्वऽधितिः । तेजमानः । प्रऽनिनाय । महते । सौभगाय ॥ ११ ॥

वेङ्कट० वनस्पते[1] त्वम् शतवल्शः वि रोह वयम् च सहस्रवल्शाः वि रुहेम । यम् त्वाम् अयम् परशुः निशितधारः[2] प्रणिनाय महते सौभाग्यायेति ॥ ११ ॥

'इति तृतीयाष्टके प्रथमाध्याये चतुर्थो वर्गः' ॥

[९]

'विश्वामित्रो गाथिन ऋषिः । अग्निर्देवता । बृहती छन्दः, नवमी त्रिष्टुप्' ।

सखायस्त्वा ववृमहे देवं मर्तास ऊतये ।
अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसम् ॥ १ ॥

सखायः । त्वा । ववृमहे । देवम् । मर्तासः । ऊतये ।
अपाम् । नपातम् । सुऽभगम् । सुऽदीदितिम् । सुप्रऽतूर्तिम् । अनेहसम् ॥ १ ॥

वेङ्कट० अग्ने! सखायः त्वां वृणीमहे देवम् मनुष्याः रक्षणाय अपाम् पौत्रम् सुधनम् शोभनदीप्तिम् शोभनतरणम् अनुपद्रवम् ॥ १ ॥

कायमानो वना त्वं यन्मातॄरजगन्नपः ।
न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः ॥ २ ॥

कायमानः । वना । त्वम् । यत् । मातॄः । अजगन् । अपः ।
न । तत् । ते । अग्ने । प्रऽमृषे । निऽवर्तनम् । यत् । दूरे । सन् । इह । अभवः ॥ २ ॥

वेङ्कट० वनान्यादि रक्षितुम्[3] कामयमानः यदा त्वम् मातॄः अपः गच्छसि, न[4] तदानीं तव अग्ने! प्रमर्षणाय भवति अस्मदभिमुखं गमनम्, यदा त्वम् दूरे[5] जायमानः समीपे भवसि ॥ २ ॥

अति तृष्टं ववक्षिथाथैव सुमना असि ।
प्रप्रान्ये यन्ति पर्यन्य आसते येषां सख्ये असि श्रितः ॥ ३ ॥

१. नास्ति वि॰ अ॰. २-२. नास्ति मूको. ३. नास्ति वि॰. ४. अद्य॰, वि॰ अ॰.
५. नास्ति अ॰. ६. दूरः वि॰; दूरेण अ॰.

अति । तृष्टम् । ववक्षिथ । अथ । एव । सुऽमनाः । असि ।
प्रऽप्र । अन्ये । यन्ति । परि । अन्ये । आसते । येषाम् । सख्ये । असि । श्रितः ॥ ३ ॥

वेङ्कट० [illegible] अति वहसि । सुमनाः च भवसि तदनन्तरम् एव तस्मै । ये त्वां केचित् [illegible] च गच्छन्ति, परितः आसते अन्ये, येषां त्वम् सख्ये श्रितः भवसि । [illegible] ॥ ३ ॥

ई॒यि॒वांस॒मति॒ स्रिधः॒ शश्व॑ती॒रति॑ स॒श्चतः॑ ।
अन्वी॑मविन्दन्निचि॒रासो॑ अ॒द्रुहो॒ऽप्सु सिं॒हमि॑व श्रि॒तम् ॥ ४ ॥

ई॒यि॒ऽवांस॑म् । अति॑ । स्रिधः॑ । शश्व॑तीः । अति॑ । स॒श्चतः॑ ।
अनु॑ । ई॒म् । अ॒वि॒न्द॒न् । नि॒ऽचि॒रासः॑ । अ॒द्रुहः॑ । अ॒प्ऽसु । सिं॒हम्ऽइ॑व । श्रि॒तम् ॥ ४ ॥

वेङ्कट० अति गच्छन्तम् [illegible] एवं बहुतरा सेनाः [illegible] अतिगच्छन्तम् एनम् अपि तिरोहितम् अप्सु [illegible] सिंहम् इव श्रितम् अनु अविन्दन् नितरां चिरवासाः [illegible] देवाः अद्रोग्धारः । 'सिंहं न [illegible]' (ऋ १,६५,?) इति मन्त्रः ॥ ४ ॥

स॒सृ॒वांस॑मिव॒ त्मना॒ग्निमि॒त्था ति॒रोहि॑तम् ।
ऐनं॑ नयन्मात॒रिश्वा॑ परा॒वतो॑ दे॒वेभ्यो॑ मथि॒तं परि॑ ॥ ५ ॥

स॒सृ॒वांस॑म्ऽइव । त्मना॑ । अ॒ग्निम् । इ॒त्था । ति॒रःऽहि॑तम् ।
आ । ए॒न॒म् । न॒य॒त् । मा॒त॒रिश्वा॑ । प॒रा॒ऽवतः॑ । दे॒वेभ्यः॑ । म॒थि॒तम् । परि॑ ॥ ५ ॥

वेङ्कट० यथा कश्चित् स्वयमेव सरति एवम् अग्निम् तिरोहितम् देवेभ्यः परि मथितम् आहरत् [illegible] मातरिश्वा आ नयत् दूरात् इति ॥ ५ ॥

'इति तृतीयाष्टके प्रथमाध्याये पञ्चमो वर्गः' ॥

तं त्वा॒ मर्ता॑ अगृभ्णत दे॒वेभ्यो॑ हव्यवाहन ।
विश्वा॒न्यद्य॒ज्ञाँ अ॑भि॒पासि॑ मानुष॒ तव॒ क्रत्वा॑ यविष्ठ्य ॥ ६ ॥

तम् । त्वा॒ । मर्ताः॑ । अ॒गृ॒भ्ण॒त॒ । दे॒वेभ्यः॑ । ह॒व्य॒ऽवा॒ह॒न॒ ।
विश्वा॑न् । यत् । य॒ज्ञान् । अ॒भि॒ऽपासि॑ । मा॒नु॒ष॒ । तव॑ । क्रत्वा॑ । य॒वि॒ष्ठ्य॒ ॥ ६ ॥

वेङ्कट० अग्ने! तम् त्वां मनुष्याः देवेभ्यः पर्यगृह्णत हविषां वोढुः । यस्मात् त्वं सर्वान् एव यज्ञान् अभिरक्षसि मनुष्यहित! तव 'कर्मणा युवतम! इति' ॥ ६ ॥

१. 'सोऽपि वि' मूको. २. नास्ति वि' मूको. ३. 'गतिरि वि' मूको. ४-४. नास्ति मूको.
५. [illegible] वि' मूको. ६-६. नास्ति वि' मूको.

तद्भद्रं तव दंसना पाकाय चिच्छदयति ।
त्वां यदग्ने पशवः समासते समिद्धमपिशर्वरे ॥ ७ ॥

तत् । भद्रम् । तव । दंसना । पाकाय । चित् । छदयति ।
त्वाम् । यत् । अग्ने । पशवः । सम्ऽआसते । सम्ऽइद्धम् । अपिऽशर्वरे ॥ ७ ॥

वेङ्कट० 'तत् भद्रम् तव कर्म पुत्राय अपि अनुकूलाय [illegible] करोति [illegible] सत्त्वाय [illegible] पशवः [illegible] अपिशर्वरीषु [illegible] ॥ ७ ॥

आ जुहोता स्वध्वरं शीरं पावकशोचिषम् ।
आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत ॥ ८ ॥

आ । जुहोत । सुऽअध्वरम् । शीरम् । पावकऽशोचिषम् ।
आशुम् । दूतम् । अजिरम् । प्रत्नम् । ईड्यम् । श्रुष्टी । देवम् । सपर्यत ॥ ८ ॥

वेङ्कट० आहुतीः [illegible] 'स्वध्वरं सुयज्ञं' [illegible] शोधकदीप्तिम्' । [illegible] देवानाम् दूतम् [illegible] पुराणं [illegible] क्षिप्रम् देवम् [illegible] सपर्यत ॥ ८ ॥

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥ ९ ॥

त्रीणि । शता । त्री । सहस्राणि । अग्निम् । त्रिंशत् । च । देवाः । नव । च । असपर्यन् ।
औक्षन् । घृतैः । अस्तृणन् । बर्हिः । अस्मै । आत् । इत् । होतारम् । नि । असादयन्त ॥ ९ ॥

वेङ्कट० त्रीणि सहस्राणि 'त्रीणि च' शतानि' त्रिंशत्' च नव च' देवाः अग्निम् अपूजयन् । घृतैः [illegible] । [illegible] अस्मै अस्तृणन् । [illegible] होतारम् [illegible] नि असादयन्त इति । अत्र ब्राह्मणम् — "[illegible] देवा इति । [illegible] [illegible] [illegible] त्रयस्त्रिंशदित्येव [illegible] [illegible] पृथिवी [illegible] ([illegible]) इत्यादिक [illegible] ॥ ९ ॥

॥ इति तृतीयाष्टके प्रथमाध्याये षष्ठो वर्गः ॥

१-१ [illegible] वि' [illegible]. † नास्ति [illegible]. २. [illegible]. ३ [illegible] वि' [illegible]. ४-४. नास्ति वि' [illegible]. ५. [illegible]. ६. नास्ति वि' [illegible]. ७. नास्ति वि' [illegible]. ८. [illegible] वि' [illegible] ९. [illegible] वि' [illegible] १०. [illegible] वि' [illegible] ११-११. नास्ति [illegible].

[१०]

'विश्वामित्रो गाथिन ऋषिः । अग्निर्देवता । उष्णिक् छन्दः' ।

त्वाम॑ग्ने मनी॒षिणः॑ स॒म्राजं॑ चर्षणी॒नाम् । दे॒वं मर्ता॑स इन्धते॒ सम॑ध्व॒रे ॥ १ ॥

त्वाम् । अ॒ग्ने॒ । म॒नी॒षिणः॑ । स॒म्ऽराज॑म् । च॒र्ष॒णी॒नाम् । दे॒वम् । मर्ता॑सः । इ॒न्ध॒ते॒ । सम् । अ॒ध्व॒रे ॥ १ ॥

संस्कृत० त्वाम् अग्ने! मनस ईश्वराः प्रजानाम् अधिपतिम् देवम् मनुष्याः यज्ञे सम् इन्धते ॥ १ ॥

त्वां य॒ज्ञेष्वृ॒त्विज॒मग्ने॒ होता॑रमीळते । गो॒पा ऋ॒तस्य॑ दीदिहि॒ स्वे दमे॑ ॥ २ ॥

त्वाम् । य॒ज्ञेषु॑ । ऋ॒त्विज॑म् । अग्ने॑ । होता॑रम् । ई॒ळ॒ते॒ । गो॒पाः । ऋ॒तस्य॑ । दी॒दि॒हि॒ । स्वे । दमे॑ ॥ २ ॥

संस्कृत० विगतकल्याणत्वात् ॥ २ ॥

स घा॒ यस्ते॒ ददा॑शति स॒मिधा॑ जा॒तवे॑दसे । सो अ॑ग्ने धत्ते सु॒वीर्यं॒ स पु॑ष्यति ॥ ३ ॥

सः । घ॒ । यः । ते॒ । ददा॑शति । स॒म्ऽइधा॑ । जा॒तऽवे॑दसे । सः । अ॒ग्ने॒ । ध॒त्ते॒ । सु॒ऽवीर्य॑म् । सः । पु॒ष्य॒ति॒ ॥ ३ ॥

संस्कृत० अग्ने! स तुभ्यं समिदाधानं करोति जातप्रज्ञाय, सः खलु शोभनवीर्यं पुत्रं धारयति, पुष्यति च प्रजया पशुभिः ॥ ३ ॥

स के॒तुर॑ध्व॒राणा॑म॒ग्निर्दे॒वेभि॒रा ग॑मत् । अ॒ञ्जा॒नः स॒प्त होतृ॑भिर्ह॒विष्म॑ते ॥ ४ ॥

सः । के॒तुः । अ॒ध्व॒राणा॑म् । अ॒ग्निः । दे॒वेभिः॑ । आ । ग॒म॒त् । अ॒ञ्जा॒नः । स॒प्त । होतृ॑ऽभिः । ह॒विष्म॑ते ॥ ४ ॥

संस्कृत० स अग्निः यज्ञानां चिह्नभूतो देवः देवैः सह आ गच्छतु सप्तभिः वषट्कर्तृभिः शोभितः यजमानार्थम् अभ्यञ्जमानः ॥ ४ ॥

प्र होत्रे॑ पू॒र्व्यं वचो॒ऽग्नये॑ भरता बृ॒हत् । वि॒पां ज्योतीं॑षि॒ बिभ्र॑ते॒ न वे॒धसे॑ ॥ ५ ॥

प्र । होत्रे॑ । पू॒र्व्यम् । वचः॑ । अ॒ग्नये॑ । भ॒र॒त॒ । बृ॒हत् । वि॒पाम् । ज्योतीं॑षि । बिभ्र॑ते । न । वे॒धसे॑ ॥ ५ ॥

संस्कृत० पुराणं स्तुतिलक्षणं महत् वचः 'प्र भरत' अग्नये होत्रे मेधाविनां तेजांसि बिभ्रते विधात्रे । न इति पूरणे इति ॥ ५ ॥

'इति तृतीयाष्टके प्रथमाध्याये सप्तमो वर्गः' ॥

१-१ नास्ति मूले २. ... ३. ... ४ ...
... ५ ...

अग्निं वर्धन्तु नो गिरो यतो जायत उक्थ्यः । महे वाजाय द्रविणाय दर्शतः ॥६॥

अग्निम् । वर्धन्तु । नः । गिरः । यतः । जायते । उक्थ्यः । महे । वाजाय । द्रविणाय । दर्शतः ॥ ६ ॥

वेङ्कट० अग्निं वर्धयन्तु नः स्तुतयः । यस्मात् एषः भवति स्तोतव्यः अस्माकम्, महते बलाय धनाय च दर्शनीयः ॥ ६ ॥

अग्ने यजिष्ठो अध्वरे देवान्देवयते यज । होता मन्द्रो वि राजस्यति स्रिधः ॥७॥

अग्ने । यजिष्ठः । अध्वरे । देवान् । देवऽयते । यज । होता । मन्द्रः । वि । राजसि । अति । स्रिधः ॥ ७ ॥

वेङ्कट० बाधकान् अग्ने त्वं राजसि । यजतिष्ठः स्पष्टमिति ॥ ७ ॥

स नः पावक दीदिहि द्युमदस्मे सुवीर्यम् । भवा स्तोतृभ्यो अन्तमः स्वस्तये ॥८॥

सः । नः । पावक । दीदिहि । द्युऽमत् । अस्मे इति । सुऽवीर्यम् । भव । स्तोतृऽभ्यः । अन्तमः । स्वस्तये ॥

वेङ्कट० सः त्वम् पावक । अस्मदर्थं दीप्यस्व दीप्तियुक्तम् शोभनवीर्यम्[1] च । अस्मे इति एकवचनम् । भव च स्तोतृभ्यः अन्तिकतमः अविनाशार्थम् ॥ ८ ॥

तं त्वा विप्रा विपन्यवो जागृवांसः समिन्धते । हव्यवाहममर्त्यं सहोवृधम् ॥ ९ ॥

तम् । त्वा । विप्राः । विपन्यवः । जागृऽवांसः । सम् । इन्धते । हव्यऽवाहम् । अमर्त्यम् । सहःऽवृधम् ॥९॥

वेङ्कट० तम् त्वां[2] मेधाविनः स्तोतारः प्रबुद्धाः सम् इन्धते हव्यवाहम्[4] अमरणम् बलेन वर्धमानम् ॥ ९ ॥

[5]इति तृतीयाष्टके प्रथमाध्याये अष्टमो वर्गः[5] ॥

[११]

[6]विश्वामित्रो गाथिन ऋषिः । अग्निर्देवता । गायत्री छन्दः ।

अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः । स वेद यज्ञमानुषक् ॥ १ ॥

अग्निः । होता । पुरःऽहितः । अध्वरस्य । विऽचर्षणिः । सः । वेद । यज्ञम् । आनुषक् ॥ १ ॥

वेङ्कट० अग्निः होता[3] पुरोहितः यज्ञस्य विद्रष्टा । सः वेत्ति यज्ञम् आनुपूर्व्येण ॥ १ ॥

१. धनाय वि' मूं. २. नास्ति वि' मूप. ३. न्क वि'' मू. ४. हव्यवाहनम् वि' मूर्व. ५-५. नास्ति मूको. ६. वर्गो वि' मूं.

स ह॒व्य॒वाळम॑र्त्य उ॒शिग्दू॒तश्चनो॑हितः । अ॒ग्निर्धि॒या समृ॑ण्वति ॥ २ ॥

सः । ह॒व्य॒ऽवाट् । अम॑र्त्यः । उ॒शिक् । दू॒तः । चनः॑ऽहितः । अ॒ग्निः । धि॒या । सम् । ऋ॒ण्व॒ति॒ ॥ २ ॥

वेङ्कट० सः हविषां वोढा अमरणधर्मा हविः कामयमानः देवानाम् दूतः निहितान्नोऽस्मभिः[1] अत्र निहितः अग्निः प्रज्ञया सम् गच्छते ॥ २ ॥

अ॒ग्निर्धि॒या स चे॑तति के॒तुर्य॒ज्ञस्य॑ पू॒र्व्यः । अर्थं॒ ह्य॑स्य त॒रणि॑ ॥ ३ ॥

अ॒ग्निः । धि॒या । सः । चे॒त॒ति॒ । के॒तुः । य॒ज्ञस्य॑ । पू॒र्व्यः । अर्थ॑म् । हि । अ॒स्य॒ । त॒रणि॑ ॥ ३ ॥

वेङ्कट० सः अग्निः प्रज्ञया सर्वं जानाति यज्ञस्य केतुः पूर्वकालभवः गमनस्वभावम्[2] हि[3] अस्य गमनस्य तारकं तेजः ॥ ३ ॥

अ॒ग्निं सू॒नुं सन॑श्रुतं॒ सह॑सो जा॒तवे॑दसम् । वह्निं॑ दे॒वा अ॑कृण्वत ॥ ४ ॥

अ॒ग्निम् । सू॒नुम् । सन॑ऽश्रुतम् । सह॑सः । जा॒तऽवे॑दसम् । वह्नि॑म् । दे॒वाः । अ॒कृ॒ण्व॒त॒ ॥ ४ ॥

वेङ्कट० सहसः सूनुम् अग्निम् सनातनश्रवणं जातप्रज्ञं वोढारं यज्ञमनुष्ठातुम्[4] देवाः कृतवन्तः ॥ ४ ॥

अदा॑भ्यः पुरए॒ता वि॒शाम॒ग्निर्मानु॑षीणाम् । तू॒र्णी रथः॒ सदा॒ नवः॑ ॥ ५ ॥

अदा॑भ्यः । पु॒रःऽए॒ता । वि॒शाम् । अ॒ग्निः । मानु॑षीणाम् । तू॒र्णिः । रथः॑ । सदा॑ । नवः॑ ॥ ५ ॥

वेङ्कट० अदम्भ्यः अग्निः मानुषीणाम् विशाम् पुरस्तात् गन्ता त्वरमाणः रथः दुःखवहनात् सदा एव नवः ॥ ५ ॥

इति तृतीयाष्टके प्रथमाध्याये नवमो वर्गः[1] ॥

सा॒ह्वान्विश्वा॑ अ॒भियुजः॒ क्रतु॑र्दे॒वाना॒ममृ॑क्तः । अ॒ग्निस्तु॒विश्र॑वस्तमः ॥ ६ ॥

स॒ह्वान् । विश्वाः॑ । अ॒भिऽयुजः॑ । क्रतुः॑ । दे॒वाना॑म् । अमृ॑क्तः । अ॒ग्निः । तु॒विश्र॑वःऽतमः ॥ ६ ॥

वेङ्कट० सहमानः सर्वाः अभियोक्त्रीः सेनाः कर्ता देवानाम् अनुपहिंसितपरिग्रहः[5] अग्निः अतिशयेन बहुश्रुतः[6] ॥ ६ ॥

१. °हितान्नोऽस्म वि° कर्त. २. °गमनस्व वि°; °स्वभावस्य ख. ३. नास्ति वि° अ° क कर्त. ४-४. नास्ति मूको. ५. °हुतिः पार° वि°. ६. °श्रुत वि° अ° क; °श्रुत वि° कर्त.

अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः । क्षयं पावकशोचिषः ॥ ७ ॥

अभि । प्रयांसि । वाहसा । दाश्वान् । अश्नोति । मर्त्यः । क्षयम् । पावकऽशोचिषः ॥ ७ ॥

वेङ्कट० [illegible] प्रयांसि अभि [illegible] मनुष्यः निवासं च पावकशोचिषो [illegible] ॥ ७ ॥

परि विश्वानि सुधिताग्नेरश्याम मन्मभिः । विप्रासो जातवेदसः ॥ ८ ॥

परि । विश्वानि । सुऽधिता । अग्नेः । अश्याम । मन्मऽभिः । विप्रासः । जातऽवेदसः ॥ ८ ॥

वेङ्कट० परि अश्याम विश्वानि [illegible] जातवेदसः ॥ ८ ॥

अग्ने विश्वानि वार्या वाजेषु सनिषामहे । त्वे देवास एरिरे ॥ ९ ॥

अग्ने । विश्वानि । वार्या । वाजेषु । सनिषामहे । त्वे इति । देवासः । आ । ईरिरे ॥ ९ ॥

वेङ्कट० 'अग्ने! विश्वानि' धनानि [illegible] सम्भजेमहि । [illegible]
'[illegible]' ([illegible]) इति मन्त्रो ॥ ९ ॥

'इति तृतीयाष्टके प्रथमाध्याये दशमो वर्गः' ॥

[१२]

'विश्वामित्रो गाथिन ऋषिः । इन्द्राग्नी देवता । गायत्री छन्दः' ।

इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ॥ १ ॥

इन्द्राग्नी इति । आ । गतम् । सुतम् । गीःऽभिः । नभः । वरेण्यम् । अस्य । पातम् । धिया । इषिता ॥

वेङ्कट० 'इन्द्राग्नी! आ गच्छतम् सुतम् सोमं प्रति [illegible] स्तुतिभिः [illegible]
वरणीयम् । [illegible] कर्मणा प्रेषितौ' ॥ १ ॥

इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः । अया पातमिमं सुतम् ॥ २ ॥

इन्द्राग्नी इति । जरितुः । सचा । यज्ञः । जिगाति । चेतनः । अया । पातम् । इमम् । सुतम् ॥ २ ॥

---

१. [illegible] २ [illegible] ३-३. [illegible]
[illegible] ४ [illegible] ५-५ [illegible] ६-६. [illegible]
७-७. [illegible] † [illegible] ‡ [illegible]

वेङ्कट० हे इन्द्राग्नी ! स्तोतुः [illegible] सोमं सुतासमभि [illegible] । अनया स्तुत्या [illegible] पिबतम् इमम् सुतम् ॥ २ ॥

इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे । ता सोमस्येह तृम्पताम् ॥ ३ ॥

इन्द्रम् । अग्निम् । कविऽछदा । यज्ञस्य । जूत्या । वृणे । ता । सोमस्य । इह । तृम्पताम् ॥ ३ ॥

वेङ्कट० स्तोतॄणां कामैश्छादयितारौ इन्द्राग्नी हविषः जवेन वृणे । तौ सोमेन अस्मिन् कर्मणि तृप्यताम् ॥ ३ ॥

तोशा वृत्रहणा हुवे सजित्वानापराजिता । इन्द्राग्नी वाजसातमा ॥ ४ ॥

तोशा । वृत्रऽहना । हुवे । सऽजित्वाना । अपराऽजिता । इन्द्राग्नी इति । वाजऽसातमा ॥ ४ ॥

वेङ्कट० [illegible] इन्द्राग्नी [illegible] इन्द्राग्नी आह्वये [illegible] समानजेतारौ अपराजितौ इन्द्राग्नी अतिशयेन अन्नानां सम्भक्तारौ ॥ ४ ॥

प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः । इन्द्राग्नी इष आ वृणे ॥ ५ ॥

प्र । वाम् । अर्चन्ति । उक्थिनः । नीथऽविदः । जरितारः । इन्द्राग्नी इति । इषः । आ । वृणे ॥ ५ ॥

वेङ्कट० हे इन्द्राग्नी ! प्र अर्चन्ति वाम् उक्थिनः स्तोत्रविदश्च स्तोतारः । [illegible] आ वृणे ॥ ५ ॥

इति तृतीयाष्टके प्रथमाध्याये एकादशो वर्गः ॥

इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् । साकमेकेन कर्मणा ॥ ६ ॥

इन्द्राग्नी इति । नवतिम् । पुरः । दासऽपत्नीः । अधूनुतम् । साकम् । एकेन । कर्मणा ॥ ६ ॥

वेङ्कट० हे इन्द्राग्नी, दासाः [illegible] नवतिसंख्याः पुरः सह युवाम् एकेन एव कर्मणा अकम्पयतम् ॥ ६ ॥

इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः । ऋतस्य पथ्या३ अनु ॥ ७ ॥

इन्द्राग्नी इति । अपसः । परि । उप । प्र । यन्ति । धीतयः । ऋतस्य । पथ्याः । अनु ॥ ७ ॥

वेङ्कट० हे इन्द्राग्नी ! कर्मणः "उप प्र यन्ति" स्तुतयः यज्ञस्य मार्गान् [illegible] ॥ ७ ॥

१. नास्ति [illegible]. २. नास्ति वि'. ३. [illegible]. ४ [illegible]. ५. [illegible]. ६. [illegible] वि'. ७. [illegible] वि' अ'; [illegible] वि' अ मूको. ८-८ नास्ति मूको. ९. [illegible] वि' मूको. १०-१०. [illegible] वि' मूको

इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च । युवोरप्तूर्यं हितम् ॥ ८ ॥

इन्द्राग्नी इति । तविषाणि । वाम् । सधऽस्थानि । प्रयांसि । च । युवोः । अप्ऽतूर्यम् । हितम् ॥ ८ ॥

वेङ्कट० [illegible] ॥ ८ ॥

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः । तद्वां चेति प्र वीर्यम् ॥ ९ ॥

इन्द्राग्नी इति । रोचना । दिवः । परि । वाजेषु । भूषथः । तत् । वाम् । चेति । प्र । वीर्यम् ॥ ९ ॥

वेङ्कट० [illegible] ॥ ९ ॥

'इति तृतीयाष्टके प्रथमाध्याये द्वादशो वर्गः' ॥

[१३]

'ऋषभो वैश्वामित्र ऋषिः । अग्निर्देवता । अनुष्टुप् छन्दः' ।

प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै ।
गमद्देवेभिरा स नो यजिष्ठो बर्हिरा सदत् ॥ १ ॥

प्र । वः । देवाय । अग्नये । बर्हिष्ठम् । अर्च । अस्मै ।
गमत् । देवेभिः । आ । सः । नः । यजिष्ठः । बर्हिः । आ । सदत् ॥ १ ॥

वेङ्कट० ऋषभो वैश्वामित्रः । [illegible] ॥ १ ॥

ऋतावा यस्य रोदसी दक्षं सचन्त ऊतयः ।
हविष्मन्तस्तमीळते तं सनिष्यन्तोऽवसे ॥ २ ॥

ऋतऽवा । यस्य । रोदसी इति । दक्षम् । सचन्ते । ऊतयः ।
हविष्मन्तः । तम् । ईळते । तम् । सनिष्यन्तः । अवसे ॥ २ ॥

[illegible]

वेङ्कट० मन्त्रकर्मेण[1] यस्य इमे द्यावापृथिवी वशे भवतः, तम् [illegible] देवाः [illegible], सम्भूतबलिकाः तम् स्तुवन्ति हविर्वहनार्थम्, तम्[2] एव [illegible] [illegible] [illegible] भजामहे ॥ २ ॥

स यन्ता विप्र एषां स यज्ञानामथा हि षः ।
अग्निं तं वो दुवस्यत दाता यो वनिता मघम् ॥ ३ ॥

सः । यन्ता । विप्रः । एषाम् । सः । यज्ञानाम् । अथ । हि । सः ।
अग्निम् । तम् । वः । दुवस्यत । दाता । यः । वनिता । मघम् ॥ ३ ॥

वेङ्कट० एषाम्[3] हविष्मताम् सः[4] मेधावी नियन्ता । 'स एव यज्ञानाम् अपि नियन्ता' । पुनः सः इति पूरणम् । तम् आनयत यूयं परिचरत, दाता यः अग्निः धनम् प्रयच्छति महर्षीणाम् ॥ ३ ॥

स नः शर्माणि वीतयेऽग्निर्यच्छतु शंतमा ।
यतो नः प्रुष्णवद् वसु दिवि क्षितिभ्यो अप्स्वा ॥ ४ ॥

सः । नः । शर्माणि । वीतये । अग्निः । यच्छतु । शम्ऽतमा ।
यतः । नः । प्रुष्णवत् । वसु । दिवि । क्षितिऽभ्यः । अप्ऽसु । आ ॥ ४ ॥

वेङ्कट० सः अस्मभ्यं सुखतमानि गृहाणि कामाय प्रयच्छतु अस्माकम् अस्मात् [illegible] धनम् दिवि [illegible] भवति । एवं 'पृथिव्याम्' अस्मात् [illegible] इति । यस्य प्रसादात् [illegible] लोकेभ्यो धनम् अस्माकम् [illegible] । [illegible] ॥ ४ ॥

दीदिवांसमपूर्व्यं वस्वीभिरस्य धीतिभिः ।
ऋक्वाणो अग्निमिन्धते होतारं विश्पतिं विशाम् ॥ ५ ॥

दीदिऽवांसम् । अपूर्व्यम् । वस्वीभिः । अस्य । धीतिऽभिः ।
ऋक्वाणः । अग्निम् । इन्धते । होतारम् । विश्पतिम् । विशाम् ॥ ५ ॥

वेङ्कट० 'सन्दीप्यमानम् अपूर्व्यम्' वसुमतीः[5] अस्य अग्नेः कर्मभिः [illegible] होतारम् विशाम् पतिम् मन्त्रवन्तः अग्निम्[6] सन्दीपयन्ति ॥ ५ ॥

---

१. [illegible] २. नास्ति वि[illegible]. ३. [illegible] वि[illegible]. ४. नास्ति वि[illegible]. ५-५. नास्ति वि[illegible]. ६-६. [illegible]. ७. [illegible] वि[illegible]. ८. नास्ति [illegible].

उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः ।
शं नः शोच मरुद्वृधोऽग्ने सहस्रसातमः ॥ ६ ॥

उत । नः । ब्रह्मन् । अविषः । उक्थेषु । देवऽहूतमः ।
शम् । नः । शोच । मरुत्ऽवृधः । अग्ने । सहस्रऽसातमः ॥ ६ ॥

वेङ्कट० अपि च अस्मान् रक्ष यज्ञेषु स्तोत्रे च देवानामाह्वातृतम[1] । सुखं च अस्माकं दीपय मरुद्भिर्वर्धमान, अग्ने! सहस्राणां दातृतम ॥ ६ ॥

नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु ।
द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम् ॥ ७ ॥

नु । नः । रास्व । सहस्रऽवत् । तोकऽवत् । पुष्टिऽमत् । वसु ।
द्युऽमत् । अग्ने । सुऽवीर्यम् । वर्षिष्ठम् । अनुपऽक्षितम् ॥ ७ ॥

वेङ्कट० अग्ने क्षिप्रम् अस्मभ्यं देहि सहस्रसंख्यं पशुमत् पोषणवत् धनं दीप्तिमत् शोभनवीर्यम् अतिशयेन वृद्धम् अनुपक्षीणमिति ॥ ७ ॥

[2]इति तृतीयाष्टके प्रथमाध्याये त्रयोदशो वर्गः[2] ॥

[१४]

[3]ऋषभो वैश्वामित्र ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[3] ॥

आ होता मन्द्रो विदथान्यस्थात्सत्यो यज्वा कवितमः स वेधाः ।
विद्युद्रथः सहसस्पुत्रो अग्निः शोचिष्केशः पृथिव्यां पाजो अश्रेत् ॥ १ ॥

आ । होता । मन्द्रः । विदथानि । अस्थात् । सत्यः । यज्वा । कविऽतमः । सः । वेधाः ।
विद्युत्ऽरथः । सहसः । पुत्रः । अग्निः । शोचिःऽकेशः । पृथिव्याम् । पाजः । अश्रेत् ॥ १ ॥

वेङ्कट० आ होता मोदकः यज्ञानां तिष्ठति सत्यकर्मा देवानां यष्टा अतिशयेन कविः सर्वस्य विधाता । विद्योतमानरथः सहसः सूनुः अग्निः ज्वालाकेशः पृथिव्याम् तेजो बलं सेवते ॥ १ ॥

१. देहि मूको. २-२. नास्ति मूको.

अयामि ते नमउक्तिं जुषस्व ऋतावस्तुभ्यं चेतते सहस्वः ।
विद्वाँ आ वक्षि विदुषो नि षत्सि मध्य आ बर्हिरूतये यजत्र ॥ २ ॥

अयामि । ते । नमःऽउक्तिम् । जुषस्व । ऋतऽवः । तुभ्यम् । चेतते । सहस्वः ।
विद्वान् । आ । वक्षि । विदुषः । नि । ससि । मध्ये । आ । बर्हिः । ऊतये । यजत्र ॥ २ ॥

वेङ्कट० प्रेरयामि तुभ्यम् नमउक्तिम् । त्वं सेवस्व सत्यवन्! । तुभ्यम् एव चेतते नमउक्तिम्, [illegible] बलवन्! । विद्वान् त्वम् आ वह देवान् विदुषः । नि सीद च बर्हिः मध्ये रक्षितुमस्मान् यजनीय! ॥ २ ॥

द्रवतां त उषसा वाजयन्ती अग्ने वातस्य पथ्याभिरच्छ ।
यत् सीमञ्जन्ति पूर्व्यं हविर्भिरा वन्धुरेव तस्थतुर्दुरोणे ॥ ३ ॥

द्रवताम् । ते । उषसा । वाजयन्ती इति । अग्ने । वातस्य । पथ्याभिः । अच्छ ।
यत् । सीम् । अञ्जन्ति । पूर्व्यम् । हविःऽभिः । आ । वन्धुराऽइव । तस्थतुः । दुरोणे ॥ ३ ॥

वेङ्कट० हे अग्ने! [illegible] उषासानक्ते तव [illegible] कुर्वाणे । [illegible] मार्गैः प्रतीचं गच्छ । यदा [illegible] हविर्भिः पूर्व्यम् [illegible] अञ्जन्ति, तदानीं [illegible] आवृत्य तिष्ठतः, [illegible] यज्ञगृहम्, दुरोणे । यथा [illegible] फलकामधारी ॥ ३ ॥

मित्रश्च तुभ्यं वरुणः सहस्वोऽग्ने विश्वे मरुतः सुम्नमर्चन् ।
यच्छोचिषा सहसस्पुत्र तिष्ठा अभि क्षितीः प्रथयन्त्सूर्यो नॄन् ॥ ४ ॥

मित्रः । च । तुभ्यम् । वरुणः । सहस्वः । अग्ने । विश्वे । मरुतः । सुम्नम् । अर्चन् ।
यत् । शोचिषा । सहसः । पुत्र । तिष्ठाः । अभि । क्षितीः । प्रथयन् । सूर्यः । नॄन् ॥ ४ ॥

वेङ्कट० बलवन् अग्ने! तुभ्यम् मित्रावरुणौ विश्वे च मरुतः सुखम् अर्चन्ति कुर्वन्ति । यदा त्वं दीप्त्या हे सहसः पुत्र! दीप्यमानः तिष्ठसि मनुष्यान् अभि नृन् आत्मनो रश्मीन् प्रथयन् सोऽस्मदीयैः ॥ ४ ॥

वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ॥ ५ ॥

---

१. [illegible] वि॰ [illegible], [illegible] वि॰ [illegible]. २. [illegible] वि॰ [illegible]. ३. [illegible] वि॰ [illegible]. ४. [illegible] वि॰ [illegible]. ५. [illegible] वि॰ [illegible]. ६ [illegible] प्रस्तावः. ७ [illegible] वि॰ [illegible].

व॒यम् । ते॒ । अ॒द्य । र॒रि॒म । हि । काम॑म् । उ॒त्ता॒नऽह॑स्ताः । नम॑सा । उ॒प॒ऽसद्य॑ ।
यजि॑ष्ठेन । मन॑सा । य॒क्षि॒ । दे॒वान् । अस्रे॑धता । मन्म॑ना । विप्रः॑ । अ॒ग्ने॒ ॥ ५ ॥

वयम् अद्य तुभ्यम् अग्ने! तव कामम् इति ... हि हविः ... उत्तानहस्ताः नमस्कारेण उपसद्य ... यजिष्ठेन मनसा ... देवान् ... असेधता मन्मना ... मेधावी ... अग्ने ॥ ५ ॥

त्वद्धि पु॑त्र सहसो॒ वि पू॒र्वीर्दे॒वस्य॒ यन्त्यू॒तयो॒ वि वाजाः॑ ।
त्वं दे॑हि सह॒स्रिणं॑ र॒यिं नो॑ऽद्रो॒घेण॒ वच॑सा स॒त्यम॑ग्ने ॥ ६ ॥

त्वत् । हि । पु॒त्र॒ । स॒ह॒सः॒ । वि । पू॒र्वीः । दे॒वस्य॑ । यन्ति॑ । ऊ॒तयः॑ । वि । वाजाः॑ ।
त्वम् । दे॒हि॒ । स॒ह॒स्रिण॑म् । र॒यिम् । नः॒ । अ॒द्रो॒घेण॑ । वच॑सा । स॒त्यम् । अ॒ग्ने॒ ॥ ६ ॥

सहसः पुत्र अग्ने! त्वत्तः हि देवस्य ... ऊतयः ... विविधं गच्छन्ति ... अन्नानि च वि गच्छन्ति । ... सहस्रसङ्ख्यं धनम् अस्मभ्यं देहि ... सत्यं परिगृहाण ... ॥ ६ ॥

तुभ्यं॑ दक्ष कविक्रतो॒ यानी॒मा देव॒ मर्ता॑सो अध्व॒रे अक॑र्म ।
त्वं विश्व॑स्य सु॒रथ॑स्य बोधि॒ सर्वं॒ तद॑ग्ने अमृत स्वदे॒ह ॥ ७ ॥

तुभ्य॑म् । द॒क्ष॒ । क॒वि॒ऽक्र॒तो॒ इति॑ कविऽक्रतो । यानि॑ । इ॒मा । देव॑ । मर्ता॑सः । अ॒ध्व॒रे । अक॑र्म ।
त्वम् । विश्व॑स्य । सु॒ऽरथ॑स्य । बो॒धि॒ । सर्व॑म् । तत् । अ॒ग्ने॒ । अ॒मृ॒त॒ । स्व॒द॒ । इ॒ह ॥ ७ ॥

तुभ्यम् प्रवृद्ध! क्रान्तप्रज्ञ! ... इमानि हवींषि देव! मनुष्याः अध्वरे अकर्म । त्वम् विश्वस्य शोभनरथस्य ... बुध्यस्व । सर्वं च तत् अग्ने! अमृत! इह अस्मिन् कर्मणि स्वद इति ॥ ७ ॥

इति तृतीयाष्टके प्रथमाध्याये षोडशो वर्गः[1] ॥

[१५]

उत्कीलः कात्य ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[1] ।

वि पाज॑सा पृ॒थुना॒ शोशु॑चानो॒ बाध॑स्व द्वि॒षो र॒क्षसो॒ अमी॑वाः ।
सु॒शर्म॑णो बृह॒तः शर्म॑णि स्याम॒ग्नेर॒हं सु॒हव॑स्य॒ प्रणी॑तौ ॥ १ ॥

---

१ ... वि° क°. २ ... वि° अप. ३ ३. नास्ति मूको.

वि । पाजसा । पृथुना । शोशुचानः । बाधस्व । द्विषः । रक्षसः । अमीवाः ।
सुऽशर्मणः । बृहतः । शर्मणि । स्याम् । अग्नेः । अहम् । सुऽहवस्य । प्रऽनीतौ ॥ १ ॥

संस्कृत० [illegible] । विस्तीर्णेन तेजसा दीप्यमानः [illegible] बाधस्व [illegible]
[illegible] । शोभनसुखदस्य [illegible] स्याम् अग्नेः अहम् [illegible] प्रणयने ॥ १ ॥

त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः ।
जन्मेव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सुजात ॥ २ ॥

त्वम् । नः । अस्याः । उषसः । विऽउष्टौ । त्वम् । सूरे । उत्ऽइते । बोधि । गोपाः ।
जन्मऽइव । नित्यम् । तनयम् । जुषस्व । स्तोमम् । मे । अग्ने । तन्वा । सुऽजात ॥ २ ॥

संस्कृत० [illegible] अस्याः उषसः व्युष्टौ, [illegible] सूर्ये च उदिते [illegible] गोपायिता
[illegible] । पिता इव औरसम् तनयम् [illegible] स्तोमम् अग्ने! शोभनजन्मन्! ॥ २ ॥

त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्वग्ने अरुषो वि भाहि ।
वसो नेषि च पर्षि चात्यंहः कृधी नो राय उशिजो यविष्ठ ॥ ३ ॥

त्वम् । नृऽचक्षाः । वृषभ । अनु । पूर्वीः । कृष्णासु । अग्ने । अरुषः । वि । भाहि ।
वसो इति । नेषि । च । पर्षि । च । अति । अंहः । कृधि । नः । रायः । उशिजः । यविष्ठ ॥ ३ ॥

संस्कृत० [illegible] मनुष्याणां [illegible] वर्षितः! [illegible] अनुक्रमेण प्रकाशय [illegible] रात्रिषु
अग्ने! [illegible] । [illegible] अस्मान् [illegible] अति पारय कुरु च [illegible] अस्मान्
[illegible] धनाय [illegible] ॥ ३ ॥

अषाळ्हो अग्ने वृषभो दिदीहि पुरो विश्वाः सौभगा संजिगीवान् ।
यज्ञस्य नेता प्रथमस्य पायोर्जातवेदो बृहतः सुप्रणीते ॥ ४ ॥

अषाळ्हः । अग्ने । वृषभः । दिदीहि । पुरः । विश्वाः । सौभगा । सम्ऽजिगीवान् ।
यज्ञस्य । नेता । प्रथमस्य । पायोः । जातऽवेदः । बृहतः । सुऽप्रनीते ॥ ४ ॥

संस्कृत० शत्रुभिरनभिभूतः त्वम् अग्ने! वृषभ [illegible] दीप्यस्व [illegible] सौभाग्यानि च [illegible]
[illegible] यज्ञस्य प्रणेता [illegible] हे जातवेदः! महतः शोभनप्रणयन! ॥ ४ ॥

---

१. [illegible] २ [illegible] ३ [illegible] ४. [illegible] ५. [illegible] ६. [illegible] ७. [illegible] ८. [illegible] ९. [illegible] १०. [illegible]

अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीद्यानः सुमेधाः ।
रथो न सस्निरभि वक्षि वाजमग्ने त्वं रोदसी नः सुमेके ॥ ५ ॥

अच्छिद्रा । शर्म । जरितरिति । पुरूणि । देवान् । अच्छ । दीद्यानः । सुऽमेधाः ।
रथः । न । सस्निः । अभि । वक्षि । वाजम् । अग्ने । त्वम् । रोदसी इति । नः । सुमेके इति सुऽमेके ॥

वेङ्कट० अच्छिद्राणि सुबहूनि देवानां स्तोतः ! गृहे[1] त्वयि बहूनि सन्ति । तथा त्वम् देवान् प्रति दीप्यमानो भवसि सुप्रज्ञः । रथः इव 'शुद्ध- मान पापम' अन्नम् अस्मान् अग्ने ! त्वम् द्यावापृथिवी च अस्मदभिमुखे शोभमाने वेति । [illegible][2] अवति नैव स्थपाकमिति रथः सस्निः उच्यते ॥ ५ ॥

प्र पीपय वृषभ जिन्व वाजानग्ने त्वं रोदसी नः सुदोघे ।
देवेभिर्देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात् ॥ ६ ॥

प्र । पीपय । वृषभ । जिन्व । वाजान् । अग्ने । त्वम् । रोदसी इति । नः । सुदोघे इति सुऽदोघे ।
देवेभिः । देव । सुऽरुचा । रुचानः । मा । नः । मर्तस्य । दुःऽमतिः । परि । स्थात् ॥ ६ ॥

वेङ्कट० 'प्र प्यायय' अस्मान् कामानां वर्षितः !, प्रेरय च अन्नानि, द्यावापृथिवी च सुदोघे कुरु देवैः[3] सह अग्ने[4] त्वम् यजे शोभनरुचा[5] देवेभ्यो रोचमानः । मा अस्मान् शत्रोर्मनुष्यस्य दुर्मतिः परितः तिष्ठतु[6] ॥ ६ ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ७ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ७ ॥

वेङ्कट० (ऋ ३,१,२३ द्र.) ॥ ७ ॥

"इति तृतीयाष्टके प्रथमाध्याये पञ्चदशो वर्गः" ॥

[१६]

"उत्कीलः कात्य ऋषिः । अग्निर्देवता । प्रगाथः छन्दः, प्रथमातृतीयापञ्चम्यो बृहत्यः, द्वितीयाचतुर्थीषष्ठ्यः सतोबृहत्यः" ।

अयमग्निः सुवीर्यस्येशे महः सौभगस्य ।
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ १ ॥

१ १. शुद्धेऽपि पापम वि° अ° मूको. २. "गृहम" मूको. ३-३. दात्वामम वि° अ°; शाश्वतम वि° मूको; ५ मामक अ. ४. देवैः अ प्रस्तावः ५ "शोभनरुचा" मूको. ६. तिष्ठ वि° मूको ७-७ नास्ति मूको.

अयम् । अग्निः । सुऽवीर्यस्य । ईशे । महः । सौभगस्य ।
रायः । ईशे । सुऽअपत्यस्य । गोऽमतः । ईशे । वृत्रऽहथानाम् ॥ १ ॥

वेङ्कट० 'अयम् अग्निः' शोभनवीर्यस्य महतः सौभाग्यस्य ईश्वरो भवति, तथा धनस्य च शोभनपुत्रस्य गोयुक्तस्य। तथा वृत्रहननानां च ईष्टे इति ॥ १ ॥

इमं नरो मरुतः सश्चता वृधं यस्मिन् रायः शेवृधासः ।
अभि ये सन्ति पृतनासु दूढ्यो विश्वाहा शत्रुमादभुः ॥ २ ॥

इमम् । नरः । मरुतः । सश्चत । वृधम् । यस्मिन् । रायः । शेवऽवृधासः ।
अभि । ये । सन्ति । पृतनासु । दुःऽध्यः । विश्वाहा । शत्रुम् । आऽदभुः ॥ २ ॥

वेङ्कट० हे नेतारः मरुतः! इमम् अग्निं वर्धमानं सेवध्वं यस्मिन् धनानि सुखस्य वर्धयितॄणि सन्ति, ये पृतनासु अभि भवन्ति दुर्बुद्धीन्, सदा ये च सर्वदा आदभ्नुवन्ति शत्रुम् ॥ २ ॥

स त्वं नो रायः शिशीहि मीढ्वो अग्ने सुवीर्यस्य ।
तुविद्युम्न वर्षिष्ठस्य प्रजावतोऽनमीवस्य शुष्मिणः ॥ ३ ॥

सः । त्वम् । नः । रायः । शिशीहि । मीढ्वः । अग्ने । सुऽवीर्यस्य ।
तुविऽद्युम्न । वर्षिष्ठस्य । प्रजाऽवतः । अनमीवस्य । शुष्मिणः ॥ ३ ॥

वेङ्कट० सः त्वम् अग्ने! अस्मान् धनेन तीक्ष्णीकुरु सेक्तः अग्ने! शोभनवीर्येण बहुधन! वृद्धतमेन प्रजावता अभिव्याधिवर्जितेन बलवता ॥ ३ ॥

चक्रिर्यो विश्वा भुवनाभि सासहिश्चक्रिर्देवेष्वा दुवः ।
आ देवेषु यतत आ सुवीर्य आ शंस उत नृणाम् ॥ ४ ॥

चक्रिः । यः । विश्वा । भुवना । अभि । ससहिः । चक्रिः । देवेषु । आ । दुवः ।
आ । देवेषु । यतते । आ । सुऽवीर्ये । आ । शंसे । उत । नृणाम् ॥ ४ ॥

वेङ्कट० कर्तॄणां महनशीलः यः अग्निः, विश्वानि भूतानि करोति, यश्च देवेषु परिचर्यां करोति, सोऽयं देवानुद्दिश्य आ यतते प्रयत्नं करोति, तथा सुवीर्ये, तथा शंसने च सर्वस्मिन् मनुष्याणाम् इति ॥ ४ ॥

१-१. नास्ति मूको. २. सौम वग्यन्त वि. ३. ... ४. ... वि कप; ... ५. नास्ति वि.

मा नो अग्नेऽमतये मावीरतायै रीरधः ।
मागोतायै सहसस्पुत्र मा निदेऽप द्वेषांस्या कृधि ।

मा । नः । अग्ने । अमतये । मा । अवीरतायै । रीरधः ।
मा । अगोतायै । सहसः । पुत्र । मा । निदे । अप । द्वेषांसि । आ । कृधि ॥ ५ ॥

वेङ्कट० [illegible] मा दुर्गतिमत्यै [illegible] मा अस्मान् अग्ने! वशं नैषीः, मा च अनपत्यतायै, मा च अपशुतायै, हे सहसः पुत्र! मा च निन्दित्रे। [illegible] द्वेषांसि अस्मत्तः अप आ कुरु ॥ ५ ॥

शग्धि वाजस्य सुभग प्रजावतोऽग्ने बृहतो अध्वरे ।
सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ॥ ६ ॥

शग्धि । वाजस्य । सुऽभग । प्रजाऽवतः । अग्ने । बृहतः । अध्वरे ।
सम् । राया । भूयसा । सृज । मयःऽभुना । तुविऽद्युम्न । यशस्वता ॥ ६ ॥

वेङ्कट० देहि अन्नम् सुभग! प्रजायुक्तम् अग्ने! महत् यज्ञे। 'सम् सृज च' धनेन बहुना सुखस्य भावयित्रा तुविद्युम्न! यशोयुक्तेन ॥ ६ ॥

'इति तृतीयाष्टके प्रथमाध्याये षोडशो वर्गः' ॥

[१७]

'कतो वैश्वामित्र ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः' ।

समिध्यमानः प्रथमानु धर्मा समक्तुभिरज्यते विश्ववारः ।
शोचिष्केशो घृतनिर्णिक्पावकः सुयज्ञो अग्निर्यजथाय देवान् ॥ १ ॥

सम्ऽइध्यमानः । प्रथमा । अनु । धर्म । सम् । अक्तुऽभिः । अज्यते । विश्वऽवारः ।
शोचिःऽकेशः । घृतऽनिर्निक् । पावकः । सुऽयज्ञः । अग्निः । यजथाय । देवान् ॥ १ ॥

वेङ्कट० कतो वैश्वामित्रः । प्रथमानि कर्माणि प्रति समिध्यमानः सम् अज्यते [illegible] विश्वैर्वरणीयः ज्वालाकेशः घृतरूपः शोधकः शोभनयज्ञः अग्निः देवान् यष्टुम् ॥ १ ॥

---

१. [illegible] अर्थ. २. [illegible] ३. [illegible] ४. [illegible] ५. [illegible] ६-६. [illegible] ७. [illegible]

यथायजो होत्रमग्ने पृथिव्या यथा दिवो जातवेदश्चिकित्वान् ।
एवानेन हविषा यक्षि देवान् मनुष्वद् यज्ञं प्र तिरेममद्य ॥ २ ॥

यथा । अयजः । होत्रम् । अग्ने । पृथिव्याः । यथा । दिवः । जातऽवेदः । चिकित्वान् ।
एव । अनेन । हविषा । यक्षि । देवान् । मनुष्वत् । यज्ञम् । प्र । तिर । इमम् । अद्य ॥ २ ॥

वेङ्कट० हे अग्ने! यथा यजमानाय कस्मैचित् पृथिव्याः पुरा त्वम् होत्रम् अयजः कृतवानसि, यथा वा दिवः जातवेदः! यज्ञे, एवम् अनेन हविषा यज देवान्। मनोरिव अस्माकम् इमम् यज्ञम् अद्य प्रवर्धय ॥ २ ॥

त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने ।
ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः ॥ ३ ॥

त्रीणि । आयूंषि । तव । जातऽवेदः । तिस्रः । आऽजानीः । उषसः । ते । अग्ने ।
ताभिः । देवानाम् । अवः । यक्षि । विद्वान् । अथ । भव । यजमानाय । शम् । योः ॥ ३ ॥

वेङ्कट० हे जातवेदः अग्ने! तव त्रीणि अन्नानि आज्यौषधिसोमात्मकानि, 'अग्निः द्विजन्मा त्रिषधस्थः' (ऋ १,१४०,२) इति मन्त्रः। तथा च तव उषसः सकाशात् त्रीणि आजननानि सन्ति अनुमन्तव्यम्। ताभिः त्वम् देवानाम् अन्नं यज, जानन् अथ भव यजमानाय शम् च योः च ॥ ३ ॥

अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेड्यं जातवेदः ।
त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिम् ॥ ४ ॥

अग्निम् । सुऽदीतिम् । सुऽदृशम् । गृणन्तः । नमस्यामः । त्वा । ईड्यम् । जातऽवेदः ।
त्वाम् । दूतम् । अरतिम् । हव्यऽवाहम् । देवाः । अकृण्वन् । अमृतस्य । नाभिम् ॥ ४ ॥

वेङ्कट० अग्निम् शोभनदीप्तिम् शोभनदर्शनम् स्तुवन्तः नमस्यामः त्वां स्तुत्यम् हे जातवेदः! । त्वाम् देवानाम् दूतम् गन्तारम् हविषां वाहकम् देवाः कृतवन्तः अमृतस्य धारकम् ॥ ४ ॥

यस्त्वद्धोता पूर्वो अग्ने यजीयान् द्विता च सत्ता स्वधया च शंभुः ।
तस्यानु धर्म प्र यजा चिकित्वोऽथा नो धा अध्वरं देववीतौ ॥ ५ ॥

यः । त्वत् । होता । पूर्वः । अग्ने । यजीयान् । द्विता । च । सत्ता । स्वधया । च । शम्ऽभुः ।
तस्य । अनु । धर्म । प्र । यज । चिकित्वः । अथ । नः । धाः । अध्वरम् । देवऽवीतौ ॥ ५ ॥

१. नास्ति मूको. २. यज्ञ. वि¹ कर्ष. ३. नास्ति वि¹ कर्ष. ४. 'मर्यदः वि¹ क¹ क; मा॰ज्ञयः वि कर्ष; अर्थ क प्रस्तारः. ५. 'नमस्यामः वि¹ कर्ष. ६. 'तथा' वि¹ क कर्ष, आजननानि वि¹ कर्ष. ७. 'स्तुत्यं वि¹³ कर्ष. ८. धारकम् वि¹ कर्ष.

वेङ्कट० यः स्वयं प्रादुर्भूतः होता पुरातनः अग्निः[१] बहुधनः दृश्यते ईळयन् तिष्ठन् बहुहविष्केण च इष्टवन्तम्[२] च यजन्तं देवानां सुखं भावयति, तस्य कर्मणा देवान् यजस्व त्वं हे [अग्ने]। अथ अस्माकं भाग्यं यष्टुं पुरस्तात् होतारमिति ॥ ५ ॥

'इति तृतीयाष्टके प्रथमाध्याये सप्तदशो वर्गः' ॥

[१८]

'कतो वैश्वामित्र ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः' ।

भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः ।
पुरुद्रुहो हि क्षितयो जनानां प्रति प्रतीचीर्दहतादरातीः ॥ १ ॥

भव । नः । अग्ने । सुऽमनाः । उपऽइतौ । सखाऽइव । सख्ये । पितराऽइव । साधुः ।
पुरुऽद्रुहः । हि । क्षितयः । जनानाम् । प्रति । प्रतीचीः । दहतात् । अरातीः ॥ १ ॥

वेङ्कट० भव अस्माकम् अग्ने[१] शोभनमनस्कः उपगमने। यथा सखा सख्ये साधुः[२] भवति पुत्राय वा पितरौ, एवम् साधुः भव। बहुद्रोग्धारः[३] हि भवन्ति मनुष्याः जनानाम्। तथा सति प्रति दहतात् प्रतिमुखमागच्छन्तीः शत्रुसेनाः ॥ १ ॥

तपो ष्वग्ने अन्तराँ अमित्रान् तपा शंसमररुषः परस्य ।
तपो वसो चिकितानो अचित्तान् वि ते तिष्ठन्तामजरा अयासः ॥ २ ॥

तपो इति । सु । अग्ने । अन्तरान् । अमित्रान् । तप । शंसम् । अररुषः । परस्य ।
तपो इति । वसो इति । चिकितानः । अचित्तान् । वि । ते । तिष्ठन्ताम् । अजराः । अयासः ॥ २ ॥

वेङ्कट० तपैव अग्ने[४] सुष्ठु विद्यमानानमित्रान् आसन्नान्, शत्रुमस्मदीयम् अप्रयच्छतः परस्य शंसनं तप च। तपैव वासयितः[५] प्रज्ञायमानः अस्मदीयानज्ञानवतः। तदर्थं तव ज्वालाः अजरा गमनशीलाः व्याप्य वि तिष्ठन्ताम् इति ॥ २ ॥

इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।
यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ॥ ३ ॥

इध्मेन । अग्ने । इच्छमानः । घृतेन । जुहोमि । हव्यम् । तरसे । बलाय ।
यावत् । ईशे । ब्रह्मणा । वन्दमानः । इमाम् । धियम् । शतऽसेयाय । देवीम् ॥ ३ ॥

१. बहुधनेन वि' अ'. बहुवेन वि' अर्थं पाठो नेव कथयत्यत्र; २-२. नास्ति मूको. ३. सम् वि[१०] अर्थे. ४. °होतारमि वि' अ.

वेङ्कट० इध्मेन घृतेन च सह हव्यम् गृह्णन् अग्ने! जुहोमि तव कामान् इच्छमानः।[1] तानि कर्म तवाभिस्तवानि। यावता कालेन ईश्वरो भवामि मन्त्रेण स्तुवन्[2] एतत् 'कर्म देवयज्यास्यम्'[3] सततकामाय कर्तुं, तावज्जुहोमि ॥ ३ ॥

उच्छोचिषा सहसस्पुत्र स्तुतो बृहद् वयः शशमानेषु धेहि ।
रेवदग्ने विश्वामित्रेषु शं योर्मर्मृज्मा ते तन्वं भूरि कृत्वः ॥ ४ ॥

उत् । शोचिषा । सहसः । पुत्र । स्तुतः । बृहत् । वयः । शशमानेषु । धेहि ।
रेवत् । अग्ने । विश्वामित्रेषु । शम् । योः । मर्मृज्म । ते । तन्वम् । भूरि । कृत्वः ॥ ४ ॥

वेङ्कट० हे सहसः पुत्र स्तुतः सन् महत्[4] अन्नं परिचरत्सु तेजसा 'उत् धेहि'[5] दधिक्रा कुरु धनवत्[6]। अग्ने! विश्वामित्रेषु अस्मासु शम् च यो च कुरु। 'कृत्वः बहुः'[7] इत्यनुक्रमणपर्यायः। तव[8] शरीरं हविर्वहनार्थम् अत्यन्तम् बहुकृत्वः वयं स्नपनेन मार्जयाम[9] इति ॥ ४ ॥

कृधि रत्नं सुसनितर्धनानां स घेदग्ने भवसि यत् समिद्धः ।
स्तोतुर्दुरोणे सुभगस्य रेवत् सृप्रा करस्ना दधिषे वपूंषि ॥ ५ ॥

कृधि । रत्नम् । सुऽसनितः । धनानाम् । सः । घ । इत् । अग्ने । भवसि । यत् । सम्ऽइद्धः ।
स्तोतुः । दुरोणे । सुऽभगस्य । रेवत् । सृप्रा । करस्ना । दधिषे । वपूंषि ॥ ५ ॥

वेङ्कट० धनानाम् सुष्ठु दात! अस्मभ्यम् रत्नम्[10] प्रयच्छ। सः त्वम् अग्ने! भवसि यदा समिद्धः तदा "स्तोतुः गृहे"[11] सुदविष्करस्य[12], यदा[13] पद्ममान[14] स्यादित्येवमर्थं हविरस्ताय[15] देवान् प्रति सर्पणशीलौ[16] बाहू करोषि[17] इत्याह ॥ ५ ॥

"इति तृतीयाष्टके प्रथमाध्याये अष्टादशो वर्गः" ॥

[१९]

"गाथी कौशिक ऋषिः। अग्निर्देवता। त्रिष्टुप् छन्दः" ।

अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्वविदममूरम् ।
स नो यक्षद् देवताता यजीयान् राये वाजाय वनते मघानि ॥ १ ॥

---

१. हव्यद् क प्रतमाव्य. २. स्तुवन् वि' अ' म. ३-३. कर्मदेवयज्याख्य वि' अ'; अदेवयज्याख्य वि' क्ष ४. ४. भाति वि' अपं. ५-५. उद्धेहि वि'. ६. धनवन् वि' अपं. ७-७. कृत्वः वि' अ' क. ८. ते वि' अ. ९. 'मार्ज मूको. १०. अस्मभ्य वि' अ' अ; मह्यं वि'. ११. धने वि' अपं. १२-१२. स्तोतृगृहे वि' अ. १३. सहायै' अ'. १४. यदा वि' अ'. १५. प्रसर्पण' वि' अ' अपं. १६-१६. नास्ति मूको.

अग्निम्। होतारम्। प्र। वृणे। मियेधे। गृत्सम्। कविम्। विश्वऽविदम्। अमूरम्।
सः। नः। यक्षत्। देवऽताता। यजीयान्। राये। वाजाय। वनते। मघानि॥ १॥

वेङ्कट० गाथी[थि] कौशिकः। अग्निम् अहं यज्ञे होतारम् प्र वृणे मि मेधाविनम् ... सर्वज्ञम् अमूढम्। सः नः यजतु यज्ञे देवान् यष्टृतमः। स धनार्थम् अन्नार्थं च भजते धनानि॥ १॥

प्र ते अग्ने हविष्मतीमियर्म्यच्छा सुद्युम्नां रातिनीं घृताचीम्।
प्रदक्षिणिद्देवतातिमुराणः सं रातिभिर्वसुभिर्यज्ञमश्रेत्॥ २॥

प्र। ते। अग्ने। हविष्मतीम्। इयर्मि। अच्छ। सुऽद्युम्नाम्। रातिनीम्। घृताचीम्।
प्रऽदक्षिणित्। देवऽतातिम्। उराणः। सम्। रातिऽभिः। वसुऽभिः। यज्ञम्। अश्रेत्॥ २॥

वेङ्कट० प्र ईरयामि स्रुच्यम् अग्ने! हविष्मतीम् ... तव सुधनाम् दानवतीम् घृतवतीम् त्वाम् प्रति। देवाः ताम् ... तम् यज्ञम् प्रदक्षिणम् ... अग्निः ... उराणः, 'उराण उरु कुर्वाणः' इति यास्कः (६, १७)। ... यज्ञम् समानवतीत्यर्थः॥ २॥

स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः॥ ३॥

सः। तेजीयसा। मनसा। त्वाऽऊतः। उत। शिक्ष। सुऽअपत्यस्य। शिक्षोः।
अग्ने। रायः। नृऽतमस्य। प्रऽभूतौ। भूयाम। ते। सुऽस्तुतयः। च। वस्वः॥ ३॥

वेङ्कट० सः तेजिष्ठेन मनसा संयुक्तो भवति त्वया रक्षितः। 'अपि च' देहि शोभनापत्यं धनम्। 'शिक्षोः' इति धनमाह, शिक्षतेर्दानकर्मणः। हे अग्ने! धनस्य नेतृतमस्य प्रभूते भवेम तव सुष्टु स्तोतारः वासयितारः च वयं भवेमेति॥ ३॥

भूरीणि हि त्वे दधिरे अनीकाग्ने देवस्य यज्यवो जनासः।
स आ वह देवतातिं यविष्ठ शर्धो यदद्य दिव्यं यजासि॥ ४॥

भूरीणि। हि। त्वे इति। दधिरे। अनीका। अग्ने। देवस्य। यज्यवः। जनासः।
सः। आ। वह। देवऽतातिम्। यविष्ठ। शर्धः। यत्। अद्य। दिव्यम्। यजासि॥ ४॥

१. ... वि° कर्प. २. ... वि° ... कर्प. ३. ... वि° कर्प. ४. ... वि°, ... कर्प. ५. नास्ति मूको. ६. ... कर्प. ७-७. नास्ति वि° कर्प. ८-८. ... वि कर्प. ९. हि वि° कर्प.

वेङ्कट० बहूनि देयानि नः स्थापयसि हे अग्ने ... यथा ... त्वम् इमं यज्ञं प्रति ... इति ... इति [illegible] ॥४॥

यत् त्वा होतारमनजन् मियेधे निषादयन्तो यजथाय देवाः ।
स त्वं नो अग्नेऽवितेह बोधि अधि श्रवांसि धेहि नस्तनूषु ॥ ५ ॥

यत् । त्वा । होतारम् । अनजन् । मियेधे । निऽसादयन्तः । यजथाय । देवाः ।
सः । त्वम् । नः । अग्ने । अविता । इह । बोधि । अधि । श्रवांसि । धेहि । नः । तनूषु ॥५॥

वेङ्कट० यदा त्वा होतारम् ... यागार्थम् ... देवाः, ... तस्मात् अग्ने अस्मिन् यज्ञे ... रक्षिता बुध्यस्व । ... अस्माकम् ... च विविधान्यन्नानि अधि निधेहि ॥५॥

इति ... प्रथमाध्याये ... वर्गः ॥

[२०]

गाथी कौशिक ऋषिः । अग्निर्देवता ... विश्वे देवा । त्रिष्टुप् छन्दः ।

अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः ।
सुज्योतिषो नः शृण्वन्तु देवाः सजोषसो अध्वरं वावशानाः ॥ १ ॥

अग्निम् । उषसम् । अश्विना । दधिऽक्राम् । विऽउष्टिषु । हवते । वह्निः । उक्थैः ।
सुऽज्योतिषः । नः । शृण्वन्तु । देवाः । सऽजोषसः । अध्वरम् । वावशानाः ॥१॥

वेङ्कट० अग्निम् ... उषसः व्युष्टेषु होता आह्वयते स्तोत्रैः । ... देवाः ... शृण्वन्तु ... यज्ञं कामयमानाः । ... ॥१॥

अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥ २ ॥

अग्ने । त्री । ते । वाजिना । त्री । सधऽस्था । तिस्रः । ते । जिह्वाः । ऋतऽजात । पूर्वीः ।
तिस्रः । ऊँ इति । ते । तन्वः । देवऽवाताः । ताभिः । नः । पाहि । गिरः । अप्रऽयुच्छन् ॥२॥

---

१. नास्ति वि¹ ... २. नास्ति मूको. ३. त्वा वि¹. ४-४. नास्ति वि¹ ... † नास्ति वि¹ ... ५-५. नास्ति मूको. ६-६. नास्ति वि¹ ... ‡ ‡ नास्ति ...

वेङ्कट० 'हे अग्ने ! त्रीणि तव' [illegible] , त्रीणि च तव [illegible] पृथिव्यादीनि । तथा 'त्रय तव जिह्वा सन्ति गार्हपत्यादिकाः [illegible]' [illegible] । [illegible] ॥ २ ॥

अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य नाम ।
याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ॥ ३ ॥

अग्ने । भूरीणि । तव । जातऽवेदः । देव । स्वधाऽवः । अमृतस्य । नाम । याः । च । मायाः ।
मायिनाम् । विश्वम्ऽइन्व । त्वे इति । पूर्वीः । सम्ऽदधुः । पृष्टबन्धो इति पृष्टऽबन्धो ॥ ३ ॥

वेङ्कट० [illegible] बहूनि तव [illegible] ! देव ! [illegible] अमृतस्य नामानि [illegible] जातवेदः [illegible] । [illegible] ! त्वयि पुरातनाः देवाः [illegible] , [illegible] इति ॥ ३ ॥

अग्निर्नेता भग इव क्षितीनां दैवीनां देव ऋतुपा ऋतावा ।
स वृत्रहा सनयो विश्ववेदाः पर्षद्विश्वाति दुरिता गृणन्तम् ॥ ४ ॥

अग्निः । नेता । भगःऽइव । क्षितीनाम् । दैवीनाम् । देवः । ऋतुऽपाः । ऋतऽवा ।
सः । वृत्रऽहा । सनयः । विश्वऽवेदाः । पर्षत् । विश्वा । अति । दुःऽइता । गृणन्तम् ॥ ४ ॥

वेङ्कट० अग्निः [illegible] प्रजानाम् प्रणेता भवति, यथा भगवन्तः प्रणयन्ति, [illegible] देव [illegible] [illegible] । सः [illegible] सर्वज्ञः अति नयतु विश्वानि दुरितानि स्तुवन्तम् ॥ ४ ॥

दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवम् ।
अश्विना मित्रावरुणा भगं च वसून्रुद्राँ आदित्याँ इह हुवे ॥ ५ ॥

दधिऽक्राम् । अग्निम् । उषसम् । च । देवीम् । बृहस्पतिम् । सवितारम् । च । देवम् ।
अश्विना । मित्रावरुणा । भगम् । च । वसून् । रुद्रान् । आदित्यान् । इह । हुवे ॥ ५ ॥

वेङ्कट० निगदव्याख्याता ॥ ५ ॥

"इति तृतीयाष्टके प्रथमाध्याये विंशो वर्गः" ॥

१-१. नास्ति वि' मूको. २ [illegible] मूको. ३. [illegible] वि'; नास्ति मूको. ४. [illegible] वि' मूको. ५. नास्ति वि' मूको. ६. [illegible] ७ [illegible] वि' मूको. ८ [illegible] वि' अ' [illegible] वि' मूको. ९ नास्ति वि'. १० [illegible] वि' अ'. ११ [illegible] वि' अ'. १२-१२. नास्ति मूको.

[२१]

गाथी कौशिक ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः, द्वितीयातृतीये अनुष्टुभौ, चतुर्थी विराड्रूपा, पञ्चमी सतोबृहती[१] ।

इ॒मं नो॑ य॒ज्ञम॒मृते॑षु धेही॒मा ह॒व्या जा॑तवेदो जुषस्व ।
स्तो॒काना॑मग्ने॒ मेद॑सो घृ॒तस्य॒ होतः॒ प्राशा॑न प्रथ॒मो नि॒षद्य॑ ॥ १ ॥

इ॒मम् । नः॒ । य॒ज्ञम् । अ॒मृते॑षु । धे॒हि॒ । इ॒मा । ह॒व्या । जा॒त॒ऽवे॒दः॒ । जु॒ष॒स्व॒ ।
स्तो॒काना॑म् । अ॒ग्ने॒ । मेद॑सः । घृ॒तस्य॑ । होतः॑ । प्र । अ॒शा॒न॒ । प्र॒थ॒मः । नि॒ऽसद्य॑ ॥ १ ॥

वेङ्कट० अग्ने! अस्माकम् इमं यज्ञं देवेषु धेहि । इमानि हवींषि जातवेदः[२] सेवस्व । हे होतः! मेदसः घृतस्य च स्तोकान् प्रथमः ... निषद्य प्राशान भक्षय ॥ १ ॥

घृ॒तव॑न्तः पावक ते स्तो॒काः श्चो॑तन्ति॒ मेद॑सः ।
स्वध॑र्मन्दे॒ववी॑तये॒ श्रेष्ठं॑ नो धेहि॒ वार्य॑म् ॥ २ ॥

घृ॒तऽव॑न्तः । पा॒व॒क॒ । ते॒ । स्तो॒काः । श्चो॒त॒न्ति॒ । मेद॑सः ।
स्वऽध॑र्मन् । दे॒वऽवी॑तये । श्रेष्ठ॑म् । नः॒ । धे॒हि॒ । वार्य॑म् ॥ २ ॥

वेङ्कट० हे पावक! घृतयुक्ताः मेदसः स्तोकाः तुभ्यम् श्चोतन्ति । स्वभूतकर्मन्![२] यज्ञार्थम् अस्मभ्यं प्रशस्यतमं धनं प्रयच्छ ॥ २ ॥

तुभ्यं॑ स्तो॒का घृ॑त॒श्चुतोऽग्ने॒ विप्रा॑य सन्त्य ।
ऋषिः॒ श्रेष्ठः॒ समि॑ध्यसे य॒ज्ञस्य॑ प्रावि॒ता भ॑व ॥ ३ ॥

तुभ्य॑म् । स्तो॒काः । घृ॒त॒ऽश्चुतः॑ । अग्ने॑ । विप्रा॑य । स॒न्त्य॒ ।
ऋषिः॑ । श्रेष्ठः॑ । सम् । इ॒ध्य॒से॒ । य॒ज्ञस्य॑ । प्र॒ऽअ॒वि॒ता । भ॒व॒ ॥ ३ ॥

वेङ्कट० अग्ने! भजनीय! तुभ्यम् मेधाविने घृतश्चुतः मेदसः स्तोकाः भवन्ति । ... द्रष्टा श्रेष्ठः समिध्यसे । स त्वं यज्ञस्य रक्षिता भव ... ॥ ३ ॥

तुभ्यं॑ श्चोतन्त्यध्रिगो शचीवः स्तो॒कासो॑ अग्ने॒ मेद॑सो घृ॒तस्य॑ ।
क॒वि॒श॒स्तो बृ॑ह॒ता भा॒नुनागा॑ ह॒व्या जु॑षस्व मेधिर ॥ ४ ॥

१-१. नास्ति मूको. २. स्वभूतकर्मन् वि॰ ... ३. ... वि॰ ...

तुभ्यम् । श्चोतन्ति । अध्रिगो इत्यध्रिऽगो । शचीऽवः । स्तोकासः । अग्ने । मेदसः । घृतस्य ।
कविऽशस्तः । बृहता । भानुना । आ । अगाः । हव्या । जुषस्व । मेधिर ॥ ४ ॥

मुद्ग० 'अध्रिगो अप्रतिगमन! शचीवः कर्मवन्!' इति यास्कः (५, ११)। [illegible] कविभिः स्तुतः त्वम् [illegible] महता तेजसा [illegible], हव्यानि च सेवस्व मेधिर! ॥ ४ ॥

ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे ।
श्चोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान्देवशो विहि ॥ ५ ॥

ओजिष्ठम् । ते । मध्यतः । मेदः । उत्ऽभृतम् । प्र । ते । वयम् । ददामहे ।
श्चोतन्ति । ते । वसो इति । स्तोकाः । अधि । त्वचि । प्रति । तान् । देवऽशः । विहि ॥ ५ ॥

मुद्ग० [illegible] मध्यतः [illegible], उद्धृतम् [illegible] वयम् प्रयच्छाम । [illegible] वसो! [illegible], तान् देवशः प्रति गमय ॥ ५ ॥

इति तृतीयाष्टके प्रथमाध्याये एकविंशो वर्गः ।

[२२]

गाथी कौशिक ऋषिः । अग्निर्देवता, चतुर्थ्याः पुरीष्या अग्नयः । त्रिष्टुप् छन्दः, चतुर्थी अनुष्टुप् ।

अयं सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रिणं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूयसे जातवेदः ॥ १ ॥

अयम् । सः । अग्निः । यस्मिन् । सोमम् । इन्द्रः । सुतम् । दधे । जठरे । वावशानः ।
सहस्रिणम् । वाजम् । अत्यम् । न । सप्तिम् । ससऽवान् । सन् । स्तूयसे । जातऽवेदः ॥ १ ॥

मुद्ग० [illegible] अग्निः, यस्मिन् [illegible] सुतम् [illegible] कामयमानः । [illegible] । [illegible] अश्वम् इव [illegible] स्तूयसे जातवेदः! ॥ १ ॥

अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥ २ ॥

१ १. [illegible] इति ([illegible]) [illegible] मूको. २. [illegible] ३. नास्ति मूको. ४ [illegible] मूको ५. [illegible] ६ [illegible] मूको. ७-७. नास्ति मूको. ८-८. [illegible]

अग्ने। यत्। ते। दिवि। वर्चः। पृथिव्याम्। यत्। ओषधीषु। अप्ऽसु। आ। यजत्र।
येन। अन्तरिक्षम्। उरु। आऽततन्थ। त्वेषः। सः। भानुः। अर्णवः। नृऽचक्षाः ॥ २ ॥

वेङ्कट० हे यजनीय अग्ने! यत् तव पृथिव्यादिषु स्थितम् वर्चः, येन वर्चसा विस्तीर्णम् अन्तरिक्षम् आ तनोषि, दीप्तः स रश्मिः उदकवान् मनुष्याणां द्रष्टा ॥ २ ॥

अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये।
या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ॥ ३ ॥

अग्ने। दिवः। अर्णम्। अच्छ। जिगासि। अच्छ। देवान्। ऊचिषे। धिष्ण्याः। ये।
याः। रोचने। परस्तात्। सूर्यस्य। याः। च। अवस्तात्। उपऽतिष्ठन्ते। आपः ॥ ३ ॥

वेङ्कट० अग्ने! द्युलोकस्थम् उदकम् अभिमुख्येन गच्छसि। तथा स्तुतवान् असि देवान् अच्छ स्तुतीर्गमयसि। याः आपः सूर्यमण्डलं परस्तात् उपतिष्ठन्ते याः च अवस्तात्, ताः उदकानि च आपः गमयसि अभिगच्छसि चेति ॥ ३ ॥

पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः। जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः ॥ ४ ॥

पुरीष्यासः। अग्नयः। प्रवणेभिः। सऽजोषसः। जुषन्ताम्। यज्ञम्। अद्रुहः। अनमीवाः। इषः। महीः ॥ ४ ॥

वेङ्कट० पुरीषभवाः अग्नयः प्रवणैः अभिषिच्यमानाः सङ्गताः सेवन्ताम् यज्ञम् अद्रोग्धारः, अमीवारहितानि महान्ति अन्नानि चेति ॥ ४ ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ५ ॥

इळाम्। अग्ने। पुरुऽदंसम्। सनिम्। गोः। शश्वत्ऽतमम्। हवमानाय। साध।
स्यात्। नः। सूनुः। तनयः। विजाऽवा। अग्ने। सा। ते। सुऽमतिः। भूतु। अस्मे इति ॥ ५ ॥

वेङ्कट० गत ३,१,२३ इ. ॥ ५ ॥

इति तृतीयाष्टके प्रथमाध्याये द्वाविंशो वर्गः ॥

[२३]

देवश्रवा देववातश्च भारतौ ऋषी। अग्निर्देवता। त्रिष्टुप् छन्दः, तृतीया सतोबृहती।

निर्मथितः सुधित आ सधस्थे युवा कविरध्वरस्य प्रणेता।
जूर्यत्स्वग्निरजरो वनेष्वत्रा दधे अमृतं जातवेदाः ॥ १ ॥

---

१. [illegible] २. नास्ति [illegible] ३-३. नास्ति मूको.

निःऽमथितः । सुऽधितः । आ । सधऽस्थे । युवा । कविः । अध्वरस्य । प्रऽनेता ।
जूर्यत्ऽसु । अग्निः । अजरः । वनेषु । अत्र । दधे । अमृतम् । जातऽवेदाः ॥ १ ॥

वेङ्कट० देवश्रवा देववातः इति द्वावृषी भारतौ। अरणीभ्याम् [illegible] सुष्ठु निहितश्च सधस्थे [illegible] [illegible] [illegible] जरत्सु काष्ठेष्वजरः [illegible] [illegible] [illegible] ॥ १ ॥

अमन्थिष्टां भारता रेवदग्निं देवश्रवा देववातः सुदक्षम् ।
अग्ने वि पश्य बृहताभि रायेषां नो नेता भवतादनु द्यून् ॥ २ ॥

अमन्थिष्टाम् । भारता । रेवत् । अग्निम् । देवऽश्रवाः । देवऽवातः । सुऽदक्षम् ।
अग्ने । वि । पश्य । बृहता । अभि । राया । इषाम् । नः । नेता । भवतात् । अनु । द्यून् ॥ २ ॥

वेङ्कट० मथितवन्तावरणीभ्याम् भरतपुत्रौ धनयुक्तम् अग्निम् [illegible] देववातः च शोभनबलम्। अग्ने! त्वम् महता धनेन अस्मान् अभिमुखम् [illegible] [illegible] [illegible] नेता भव दिवसेषु ॥ २ ॥

दश क्षिपः पूर्व्यं सीमजीजनन्त्सुजातं मातृषु प्रियम् ।
अग्निं स्तुहि दैववातं देवश्रवो यो जनानामसद् वशी ॥ ३ ॥

दश । क्षिपः । पूर्व्यम् । सीम् । अजीजनन् । सुऽजातम् । मातृषु । प्रियम् ।
अग्निम् । स्तुहि । दैवऽवातम् । देवऽश्रवः । यः । जनानाम् । असत् । वशी ॥ ३ ॥

वेङ्कट० दश अङ्गुलयः पूर्वकालभवम् अग्निम् सर्वतः परिगृह्य अजनयन् [illegible] [illegible] [illegible] प्रियम्। अग्निम् देववातपुत्रम् [illegible] हे देवश्रवः! त्वम् स्तुहि, यः अग्निः जनानाम् भवति नेता ॥ ३ ॥

नि त्वा दधे वर आ पृथिव्या इळायास्पदे सुदिनत्वे अह्नाम् ।
दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि ॥ ४ ॥

नि । त्वा । दधे । वरे । आ । पृथिव्याः । इळायाः । पदे । सुदिनऽत्वे । अह्नाम् ।
दृषत्ऽवत्याम् । मानुषे । आपयायाम् । सरस्वत्याम् । रेवत् । अग्ने । दिदीहि ॥ ४ ॥

१ [illegible] २. [illegible] ३. [illegible] ४. [illegible]

वेङ्कट० [illegible] ॥ ४ ॥

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाऽग्ने सा ते सुमतिर्भूत्वस्मे ॥ ५ ॥

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ५ ॥

वेङ्कट० [illegible] ३,१,२३ [illegible] ॥ ५ ॥

'इति तृतीयाष्टके प्रथमाध्याये [illegible] वर्गः' ॥

[२४]

'विश्वामित्रो गाथिन ऋषिः। अग्निर्देवता। गायत्री छन्दः, प्रथमा अनुष्टुप्'।

अग्ने सहस्व पृतना अभिमातीरपास्य । दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसे ॥ १ ॥

अग्ने । सहस्व । पृतनाः । अभिऽमातीः । अप । अस्य ।
दुस्तरः । तरन् । अरातीः । वर्चः । धाः । यज्ञऽवाहसे ॥ १ ॥

वेङ्कट० विश्वामित्रः। 'अग्ने! अभिभव सेनाः' शत्रूणाम्, अभिमातीः च निरस्य [illegible]। [illegible] 'यज्ञवाहसे [illegible] यजमानायेति' ॥ १ ॥

अग्न इळा समिध्यसे वीतिहोत्रो अमर्त्यः । जुषस्व सू नो अध्वरम् ॥ २ ॥

अग्ने । इळा । सम् । इध्यसे । वीतिऽहोत्रः । अमर्त्यः । जुषस्व । सु । नः । अध्वरम् ॥ २ ॥

वेङ्कट० अग्ने! त्वम् [illegible] सम् इध्यसे [illegible] अमर्त्यः। सेवस्व सुष्ठु अस्माकम् यज्ञम् ॥ २ ॥

अग्ने द्युम्नेन जागृवे सहसः सूनवाहुत । एदं बर्हिः सदो मम ॥ ३ ॥

अग्ने । द्युम्नेन । जागृवे । सहसः । सूनो इति । आऽहुत । आ । इदम् । बर्हिः । सदः । मम ॥ ३ ॥

वेङ्कट० अग्ने! जागरणशील! [illegible] पुत्र! [illegible] मम इदम् बर्हिः आ सीदेति ॥ ३ ॥

अग्ने विश्वेभिरग्निभिर्देवेभिर्महया गिरः । यज्ञेषु य उ चायवः ॥ ४ ॥

---

१. [illegible] २. नास्ति [illegible] ३. [illegible] ४-४. नास्ति मूको. ५-५. नास्ति वि॰. † नास्ति [illegible] ६-६ [illegible] †-† [illegible]

अग्ने । विश्वेभिः । अग्निऽभिः । देवेभिः । महय । गिरः । यज्ञेषु । ये । ऊँ इति । चायवः ॥ ४ ॥

वेङ्कट० अग्ने! सर्वैः अग्निभिः सर्वैः 'देवैः' सह महीयाः स्तुतीः पूजय, ये चाग्नयो यज्ञेषु मनुष्यैश्चायनीयाः पूजनीयाः तैश्च सहेति ॥ ४ ॥

अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम् । शिशीहि नः सूनुमतः ॥ ५ ॥

अग्ने । दाः । दाशुषे । रयिम् । वीरऽवन्तम् । परीणसम् । शिशीहि । नः । सूनुऽमतः ॥ ५ ॥

वेङ्कट० अग्ने! प्रयच्छ यजमानाय धनम् पुत्रवत् बहु । तीक्ष्णीकुरु च अस्मान् पुत्रयुक्तानिति ॥ ५ ॥

'इति तृतीयाष्टके प्रथमाध्याये चतुर्विंशो वर्गः' ॥

[२५]

'विश्वामित्रो गाथिन ऋषिः । अग्निर्देवता, चतुर्थ्या अग्नीन्द्रौ । विराट् छन्दः' ।

अग्ने दिवः सूनुरसि प्रचेतास्तना पृथिव्या उत विश्ववेदाः ।
ऋधग्देवाँ इह यजा चिकित्वः ॥ १ ॥

अग्ने । दिवः । सूनुः । असि । प्रऽचेताः । तना । पृथिव्याः । उत । विश्वऽवेदाः ।
ऋधक् । देवान् । इह । यज । चिकित्वः ॥ १ ॥

वेङ्कट० 'दिवस्परि प्रथमं जज्ञे अग्निः' (ऋ १०,४५,१) इति मन्त्रः । अग्ने! त्वम् दिवः पुत्रः असि प्रकृष्टज्ञानः, तनयः पृथिव्याः, असि च विश्वधनः । स त्वं पृथक् देवान् अस्मिन् यज्ञे यज हे ज्ञातः! ॥ १ ॥

अग्निः सनोति वीर्याणि विद्वान्त्सनोति वाजममृताय भूषन् ।
स नो देवाँ एह वहा पुरुक्षो ॥ २ ॥

अग्निः । सनोति । वीर्याणि । विद्वान् । सनोति । वाजम् । अमृताय । भूषन् ।
सः । नः । देवान् । आ । इह । वह । पुरुक्षो इति पुरुऽक्षो ॥ २ ॥

वेङ्कट० अग्निः प्रयच्छति वीर्याणि जानन् प्रयच्छति च अन्नम् अमृतत्वाय भवन् । स त्वम् अस्माकम् देवान् इह आ वह हे बहुस्तुते! ॥ २ ॥

अग्निर्द्यावापृथिवी विश्वजन्ये आ भाति देवी अमृते अमूरः ।
क्षयन्वाजैः पुरुश्चन्द्रो नमोभिः ॥ ३ ॥

१-१. नास्ति वि॰ । † नास्ति मूको. २. नास्ति वि॰ अ॰. ३. °मुक्तोऽभि° वि॰ अ॰.
४-४. नास्ति मूको. ५. बहुस्तुते वि॰ अ॰.

अग्निः । द्यावापृथिवी इति । विश्वजन्ये इति विश्वऽजन्ये । आ । भाति । देवी इति । अमृते इति । अमूरः ।
क्षयन् । वाजैः । पुरुऽचन्द्रः । नमःऽभिः ॥ ३ ॥

वेङ्कट० अग्निः द्यावापृथिव्यौ विश्वजनहिते आ[1] भासयति देवी अमर्त्ये अमूढः निवसन् अन्नैः[2]
बह्वाह्लादकैश्च बह्वाह्लादः ॥ ३ ॥

अग्न इन्द्रश्च दाशुषो दुरोणे सुतावतो यज्ञमिहोप यातम् ।
अमर्धन्ता सोमपेयाय देवा ॥ ४ ॥

अग्ने । इन्द्रः । च । दाशुषः । दुरोणे । सुतऽवतः । यज्ञम् । इह । उप । यातम् ।
अमर्धन्ता । सोमऽपेयाय । देवा ॥ ४ ॥

वेङ्कट० अग्ने! त्वम् इन्द्रः च सुतवतः प्रयच्छतो यजमानस्य गृहे यज्ञम् प्रति इह उप आगच्छतम्
अहिंसन्तौ सोमपानार्थम् हे देवौ! ॥ ४ ॥

अग्ने अपां समिध्यसे दुरोणे नित्यः सूनो सहसो जातवेदः ।
सधस्थानि महयमान ऊती ॥ ५ ॥

अग्ने । अपाम् । सम् । इध्यसे । दुरोणे । नित्यः । सूनो इति । सहसः । जातऽवेदः ।
सधऽस्थानि । महयमानः । ऊती ॥ ५ ॥

वेङ्कट० अग्ने! अपाम् स्थानेऽन्तरिक्षे सम् इध्यसे अनवरतम् हे सहसः पुत्र जातवेदः! पूजयन्
त्रीँल्लोकान् रक्षणेन ॥ ५ ॥

[1]इति तृतीयाष्टके प्रथमाध्याये पञ्चविंशो वर्गः[1] ॥

[२६]

वेङ्कट० हे मघवन्! अस्माकं यज्ञकरणार्थं वैश्वानरस्य तमसो बाधकं ज्योतिः द्यावापृथिवी अनु भवतु। आरे स्याम तमसा कृतस्य दुरितस्य भयेः। इन्द्रसोमस्य स्तुवतो मम अपि वचनम् सेवस्व प्रयच्छन् मर्त्यस्य शोभनधारणाः यूयम् हे मघवन्! धनं प्रयच्छन्त्य बुद्धिमद्दिति ॥ ८ ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ९ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ ९ ॥

वेङ्कट० ऋ ३.३०,२२ द्र ॥ ९ ॥

'इति तृतीयाष्टके द्वितीयाध्याये षड्विंशो वर्गः'[1] ।

व्याख्यद् द्वितीयमध्यायं तृतीयस्याष्टकस्य सः ।
मिताक्षरार्थबोधाय माधवस्य [illegible] ॥ १ ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने तृतीयाष्टके द्वितीयोऽध्यायः ।

— • —

इति ऋग्वेदे सभाष्ये तृतीयाष्टके द्वितीयोऽध्यायः ॥



१-१. नास्ति मूको.

अथ तृतीयाष्टके तृतीयोऽध्यायः

मङ्गल० 'चन्द्र मा इत्यत्र नञ्'[1] व्याचिख्यासति माधवः ।
निपातेष्वेव केषांचिद् वृत्तिभेदं प्रदर्शयन् ॥ १ ॥

निपाता ये विकल्पार्था ये समुच्चयवाचिनः ।
ये वा विनिग्रहार्थीया उपमार्थाश्च ये तथा ॥ २ ॥

सर्वे ते न प्रयुज्यन्त कल्पादावित्यचिन्ति[2] स्थितिः ।
'इव देवदत्त' इति न हि लोके प्रयुज्यते ॥ ३ ॥

'वा देवदत्त' इति वा तथा वेदे न दृश्यते ।
मध्येऽन्त्यावसानस्थ उकारो दर्शनात्ततः ॥ ४ ॥

स दृश्यते च पादादावु "उ लोकमांश कृणवं"[3] ।
"उ लोककृन्नुमीमहे"[4] "उ ...नादरः"[5] ॥ ५ ॥

'उ लोको यस्मै अदितिः'[6] ते चक्कार उदाहृतः ।
नासौ विनिग्रहार्थीया न प्रयुज्यन्त विनिग्रहः ॥ ६ ॥

पूर्वार्धे च 'मैत्रो न धाती' सन्ति दृश्यताः ।
न लोके उपमाने लोके इति यत्नु[7] न युज्यते ॥ ७ ॥

शाकल्यो ह्यवगृह्णीयात् ... गौ इति प्रयोजयेत् ।
यथाप्युपमानपर्यायं कौशलं प्राक् पर्यवस्थितम् ॥ ८ ॥

मन्यामहे काश्चिदीदृशस्तत्र द्वयेषु निर्णयः ।
उपमार्थेषु मन्यादौ यथासाम्यं प्रयुज्यते ॥ ९ ॥

'नवा नदेषु गोमतः'[8], 'यमो न ...'[9] ।
प्रकारवचनः सोऽयं लौकिकाश्च प्रयुञ्जते ॥ १० ॥

येन प्रकारेण कृतं तेनास्माकं 'करोत्विति' ।
'इव देवदत्तो'[10] कृतं "न तु"[11] इदं तथा क्वचित् ॥ ११ ॥

---

१. ...रा॰ वि॰ कर्प. २-२. नास्ति वि॰ मर्व. † ऋ ५,४,११. ३. ऋ ९,२,८. ४. ऋ ८,१५,४. ५. ऋ ३,३०,११. ६-६ ...त्यादौ वि॰ कं॰. ७ नास्ति वि॰. ८. ऋ ३,३०,११. ९-९. नास्ति वि॰ म॰. १० देवदत्तेन वि॰ म॰ देवदत्त ११ ११. नास्ति वि॰ कर्प.

तस्मात् यथेवौ[1] विज्ञायाविति पूर्वेणोपमापरः ।
प्रयुज्यते यथाशब्दं क्रियापदमपेक्षितम् ॥ १० ॥

अवस्तीत्यादिके नैवमित्ययोगे[2] प्रयुज्यते ।
'बहुष्वर्थेषु दृष्टो नश्' प्रतिषेधेऽथ समुच्चये ॥ ११ ॥

कम्मार्थे पूरणे च पूरणेऽपि च दृश्यते ।
प्रयुज्यते न वाक्यादावुपमार्थे तथैव निर्णयः ॥ १२ ॥

उपमार्थो निषेधे च दृश्यते बहवो नशः ।
यथा[3] मनुष्यार्थीना आ प्रमुच[4] न वेत्से[5] ॥ १३ ॥

'नहिनित्स्थानके विद्युता न'[6], 'ह्रोभा मनुष्या न दक्षे'[7] ।
'अग्ने न निन्ने अहानि'[8] मन्त्राश्चार्थे नभे विदुः ॥ १४ ॥

'अस्मै भीमाय'[9] च तथा सन्ति चार्थेऽपि वाचकाः ।
'नि त्वा जनाति विश्वे'[10] नकारस्तत्र[11] पूरणः ॥ १५ ॥

वाक्यादौ[12] न प्रयुज्यन्ते हि-स्म-चेत्-किल्-नु-नो तथा ।
कारणं नव वाक्यवाक्यार्थस्यैवामसन्ततः ॥ १६ ॥

वाक्यादावपि मन्त्रार्थे[13] पूरणार्थमपीष्यति ।
वाक्यो परस्य[14]—'नूनं सा'[15] पूर्वार्थस्याथ पूरणः ॥ १७ ॥

यथा 'न नवदहित'[16] इति सम्प्रत्ययार्थस्य[17] वाचकः ।
तथैव सम्प्रत्ययार्थत्वमन्यापीच्छन्ति केवलम् ॥ १८ ॥

नुकन्दः विप्रकर्षणो वाक्यादावपि दृश्यते ।
'न मर्तो दयते'[18] इति मध्ये प्रकृतस्य वाचकः ॥ १९ ॥

निपातानां "प्रयोगस्य स्थानं ज्ञात्वा न मुह्यति" ।
अतो लोकानुसारेण निपातार्थं प्रयोजयेत् ॥ २० ॥ इति

१. यथेव वि॰, यथैव अ॰ २. नेत्यमेले वि॰ अ॰ ३-३. नास्ति वि॰ अ॰. ४. एते वि॰, नास्ति वि॰ अ॰ ५. ऋ १,१४१,१. ६. ऋ १,१६४,४८ ७. ऋ १,५१,४ ८. ऋ १,१०,११ ९. ऋ १,५७ १. १०. ऋ ३,१०,५. ११. नकारस्तत्र वि॰ अ॰ १२. वाक्यादौ वि॰ अ॰ १३. मन्त्रार्थे वि॰ अ॰ स १४. ऋ १,६,७ इ. १५. ऋ २,११,११. १६. ऋ १,१४०,१. १७. सम्प्रत्ययस्य नैरुक्त. १८. ऋ ३,१००,१. १९-१९. प्रयोगस्य न मुह्यन्ति वाचकाः नैरुक्त. † नास्ति मूले; अस्मद् वा क पाठः.

[४०]

'विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । गायत्री छन्दः'।

इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे । स पाहि मध्वो अन्धसः ॥ १ ॥

इन्द्र । त्वा । वृषभम् । वयम् । सुते । सोमे । हवामहे । सः । पाहि । मध्वः । अन्धसः ॥ १ ॥

वेङ्कट० विश्वामित्र । गाथा निगदसिद्धा ॥ १ ॥

इन्द्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत । पिबा वृषस्व तातृपिम् ॥ २ ॥

इन्द्र । क्रतुऽविदम् । सुतम् । सोमम् । हर्य । पुरुऽस्तुत । पिब । आ । वृषस्व । ततृपिम् ॥ २ ॥

वेङ्कट० इन्द्र! प्रज्ञाया लम्भकम् सुतम् सोमम् इच्छ पुरुष्टुत!, अथ पिब, जठरे च सिञ्चस्व तर्पणसमर्थम्[1] ॥ २ ॥

इन्द्र प्र णो धितावानं यज्ञं विश्वेभिर्देवेभिः । तिर स्तवान विश्पते ॥ ३ ॥

इन्द्र । प्र । नः । धितऽवानम् । यज्ञम् । विश्वेभिः । देवेभिः । तिर । स्तवान । विश्पते ॥ ३ ॥

वेङ्कट० इन्द्र! वर्धय अस्माकम् निहितसोमम् यज्ञम् विश्वैः देवैः सह हे स्तूयमान विशां पते! ॥ ३ ॥

इन्द्र सोमाः सुता इमे तव प्र यन्ति सत्पते । क्षयं चन्द्रास इन्दवः ॥ ४ ॥

इन्द्र । सोमाः । सुताः । इमे । तव । प्र । यन्ति । सत्ऽपते । क्षयम् । चन्द्रासः । इन्दवः ॥ ४ ॥

वेङ्कट० इन्द्र! इमे सुताः सोमाः तव जठरं प्रति गच्छन्ति हे सत्पते! सोमाः हर्षकराः दीप्ताः ॥ ४ ॥

दधिष्वा जठरे सुतं सोममिन्द्र वरेण्यम् । तव द्युक्षास इन्दवः ॥ ५ ॥

दधिष्व । जठरे । सुतम् । सोमम् । इन्द्र । वरेण्यम् । तव । द्युक्षासः । इन्दवः ॥ ५ ॥

वेङ्कट० इन्द्र! स्थापय[2] जठरे सुतम् सोमम् वरणीयम् । 'तव भवन्ति' दीप्ताः सोमाः इति ॥ ५ ॥

'इति तृतीयाष्टके तृतीयाध्याये प्रथमो वर्गः'।

गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे । इन्द्र त्वादातमिद्यशः ॥ ६ ॥

गिर्वणः । पाहि । नः । सुतम् । मधोः । धाराभिः । अज्यसे । इन्द्र । त्वाऽदातम् । इत् । यशः ॥ ६ ॥

वेङ्कट० हे गीर्भिः[4] वननीय![5] पिब नः सुतम् सोमम् । मधुमदरसस्य सोमस्य धाराभिः त्वम् अज्यसे । इन्द्र! त्वयैव दीयते यजमानानां कीर्तिः[6], तवत्वा च देहीति ॥ ६ ॥

१-१. नास्ति मूको. २. पर्ण° ऋ मूको. ३. अज्यध्वा° वि°, वस्था ऋ°. ४-४. नपात्न वि° ऋ°. ५-५. नास्ति वि° ऋ°. ६. तर्हेण ऋ°; त्वयैव वि° ऋ°. ७. नास्ति वि°; कीर्तेः तम वि° ऋ° मूको.

अभि द्युम्नानि वनिन इन्द्रं सचन्ते अक्षिता । पीत्वी सोमस्य वावृधे ॥ ७ ॥

अभि । द्युम्नानि । वनिनः । इन्द्रम् । सचन्ते । अक्षिता । पीत्वी । सोमस्य । ववृधे ॥ ७ ॥

वेङ्कट० द्युम्नानि 'द्युम्नं द्योततेः, यशो वान्नं वा' (नि ५.५) इत्युक्तम्। [illegible] इन्द्रम् अभि सचन्ते अक्षीणानि। ततः इन्द्रः पीत्वा सोमम् वर्धते ॥ ७ ॥

अर्वावतो न आ गहि परावतश्च वृत्रहन् । इमा जुषस्व नो गिरः ॥ ८ ॥

अर्वाऽवतः । नः । आ । गहि । पराऽवतः । च । वृत्रऽहन् । इमाः । जुषस्व । नः । गिरः ॥ ८ ॥

वेङ्कट० इन्द्र! अर्वाचीनात् अस्मात् आ गच्छ, दूरदेशात् च [illegible]। [illegible] इमाः स्तुतीः सेवस्व ॥ ८ ॥

यदन्तरा परावतमर्वावतं च हूयसे । इन्द्रेह तत आ गहि ॥ ९ ॥

यत् । अन्तरा । पराऽवतम् । अर्वाऽवतम् । च । हूयसे । इन्द्र । इह । ततः । आ । गहि ॥ ९ ॥

वेङ्कट० दूरान्तिकयोः मध्ये वर्तमानस्थानम् यस्मात् अस्माभिः आहूयसे, ततः इन्द्र! अत्र आ गच्छ ॥ ९ ॥

'इति तृतीयाष्टके तृतीयाध्याये द्वितीयो वर्गः' ।

[४१]

'विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । गायत्री छन्दः' ।

आ तू न इन्द्र मद्र्यग्घुवानः सोमपीतये । हरिभ्यां याह्यद्रिवः ॥ १ ॥

आ । तु । नः । इन्द्र । मद्र्यक् । हुवानः । सोमऽपीतये । हरिऽभ्याम् । याहि । अद्रिऽवः ॥ १ ॥

वेङ्कट० आ याहि क्षिप्रम् अस्मान् अस्मदभिमुखम् होतृभिः हूयमानः सोमपानार्थम् अश्वाभ्याम् हे वज्रिन्! ॥ १ ॥

सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक् । अयुज्रन्प्रातरद्रयः ॥ २ ॥

सत्तः । होता । नः । ऋत्वियः । तिस्तिरे । बर्हिः । आनुषक् । अयुज्रन् । प्रातः । अद्रयः ॥ २ ॥

वेङ्कट० निषण्णः होता अस्माकम्, यागकालः प्राप्तः [illegible] ऋत्वियः। [illegible] स्तीर्णं च बर्हिः आनुषक्। युक्ताः [illegible] प्रातः एव अभिषवार्थम् ग्रावाणः ॥ २ ॥

---

१. नास्ति मूको. २. [illegible] वि' मूको. ३-३. [illegible], वि' [illegible], [illegible] वि' [illegible].
४-४. नास्ति मूको. ५. नास्ति वि' [illegible] मूको. ६. नास्ति [illegible].

इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद। वीहि शूर पुरोळाशम्॥ ३॥

इमा। ब्रह्म। ब्रह्मऽवाहः। क्रियन्ते। आ। बर्हिः। सीद। वीहि। शूर। पुरोळाशम्॥ ३॥

वेङ्कट० स्तुतिभिर्वह्यते यस्य तत्सम्बोधनम् ब्रह्मवाहः इति। हे ब्रह्मवाहः![1] इमानि ब्रह्माणि स्तुतय: क्रियन्ते त्वदर्थम्। अतः स्तीर्णम् बर्हिः आ सीद, भक्षय च शूर! पुरोळाशम्॥ ३॥

रारन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन्। उक्थेष्विन्द्र गिर्वणः॥ ४॥

ररन्धि। सवनेषु। नः। एषु। स्तोमेषु। वृत्रऽहन्। उक्थेषु। इन्द्र। गिर्वणः॥ ४॥

वेङ्कट० रमस्व सवनेषु अस्माकम्, एषु[2] स्तोमेषु वृत्रहन्! शस्त्रेषु च[3] इन्द्र! गीर्भिर्वननीय! ॥ ४॥

मतयः सोमपामुरुं रिहन्ति शवसस्पतिम्। इन्द्रं वत्सं न मातरः॥ ५॥

मतयः। सोमऽपाम्। उरुम्। रिहन्ति। शवसः। पतिम्। इन्द्रम्। वत्सम्। न। मातरः॥ ५॥

वेङ्कट० स्तुतयः सोमपातारम् महान्तम् लिहन्ति बलस्य पतिम् इन्द्रम् वत्सम् 'इव मातरः'[4] ॥ ५॥

[5]इति तृतीयाष्टके तृतीयाध्याये तृतीयो वर्गः[6] ॥

स मन्दस्वा ह्यन्धसो राधसे तन्वा महे। न स्तोतारं निदे करः॥ ६॥

सः। मन्दस्व। हि। अन्धसः। राधसे। तन्वा। महे। न। स्तोतारम्। निदे। करः॥ ६॥

वेङ्कट० सः त्वम् मत्स्व अन्नेन महते धनाय शरीरभूतेन सोमेन[7] हि। स्तोतारम् च निन्दायै शत्रूणाम् मा कार्षीः। पञ्चम्यर्थे मद्योगात् षष्ठी 'मन्दस्वान्धसः' इत्यत्र। ... एवं[8] न प्रवर्तते। एके आहुः हि इति पूरणम्॥ ६॥

वयमिन्द्र त्वायवो हविष्मन्तो जरामहे। उत त्वमस्मयुर्वसो॥ ७॥

वयम्। इन्द्र। त्वाऽयवः। हविष्मन्तः। जरामहे। उत। त्वम्। अस्मऽयुः। वसो इति॥ ७॥

वेङ्कट० वयम् इन्द्र! त्वत्कामाः हविष्मन्तः स्तुमः, अपि च त्वम् अपि अस्मत्कामो भव हे वासयितः! ॥ ७॥

मारे अस्मद्वि मुमुचो हरिप्रियार्वाङ् याहि। इन्द्र स्वधावो मत्स्वेह॥ ८॥

मा। आरे। अस्मत्। वि। मुमुचः। हरिऽप्रिय। अर्वाङ्। याहि। इन्द्र। स्वधाऽवः। मत्स्व। इह॥

---

१. नास्ति मूको. २. एषु न वि' अ'; एषु वा वि'. ३. च वि' अपे. ४-४. नास्ति वि'. ५-५. नास्ति मूको ६. 'म मन्दस्व मूको. ७. एतेन ... प्रमादः.

वेङ्कट० अस्मत्तः दूरेऽप्यस्मिन्[1] यज्ञस्थाने मत्ताः मा नि मुच हे हरिप्रिय!, अस्मदभिमुखम्[2] आगच्छ, इन्द्र! अभवत्! इह सोमम् मत्स्व ॥ ८ ॥

अर्वाञ्चं त्वा सुखे रथे वहतामिन्द्र केशिना । घृतस्नू बर्हिरासदे ॥ ९ ॥

अर्वाञ्चम् । त्वा । सुऽखे । रथे । वहताम् । इन्द्र । केशिना । घृतस्नू इति घृतऽस्नू । बर्हिः । आऽसदे ॥९॥

वेङ्कट० अस्मदभिमुखम् त्वाम् सुखे[3] रथे स्थापयित्वा वहताम् हे इन्द्र! अश्वौ केशवन्तौ घृतस्नू[4] "घृतम्" (निघ १,१२) इत्युदकनाम,[5] उदकस्राविणौ बर्हिः इदम् अधिष्ठातुम्[6] ॥ ९ ॥

"इति तृतीयाष्टके तृतीयाध्याये चतुर्थो वर्गः" ॥

[४२]

"विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । गायत्री छन्दः" ।

उप नः सुतमा गहि सोममिन्द्र गवाशिरम् । हरिभ्यां यस्ते अस्मयुः ॥ १ ॥

उप । नः । सुतम् । आ । गहि । सोमम् । इन्द्र । गोऽआशिरम् । हरिऽभ्याम् । यः । ते । अस्मऽयुः ॥१॥

वेङ्कट० उप आ गच्छ अस्माकम् 'सुतम् सोमम्' इन्द्र! पयोमिश्रम्[7], अश्वाभ्याम्, यः ते अस्मत्कामो रथः तेन चेति ॥ १ ॥

तमिन्द्र मदमा गहि बर्हिःष्ठां ग्रावभिः सुतम् । कुविन्न्वस्य तृष्णवः ॥ २ ॥

तम् । इन्द्र । मदम् । आ । गहि । बर्हिःऽस्थाम् । ग्रावऽभिः । सुतम् । कुवित् । नु । अस्य । तृष्णवः ॥२॥

वेङ्कट० तम् इमम् सोमम् इन्द्र! आ गच्छ बर्हिषि स्थितम् ग्रावभिः अभिषुतम् । बहु च अनेन तृप्यस्व ॥ २ ॥

इन्द्रमित्था गिरो ममाच्छागुरिषिता इतः । आवृते सोमपीतये ॥ ३ ॥

इन्द्रम् । इत्था । गिरः । मम । अच्छ । अगुः । इषिताः । इतः । आऽवृते । सोमऽपीतये ॥ ३ ॥

वेङ्कट० इन्द्रम् प्रति गच्छन्ति इत्थं प्रयुज्यमानाः मम स्तुतयः मया प्रेषिताः अस्मत्सकाशात् मां प्रत्यावर्तयितुम् सोमं च पातुम् ॥ ३ ॥

---

१. दूरेऽस्मिन् वि¹. २. ˚सुख वि¹ अपं. ३. सु वि¹; सु रथे वि¹ अ². ४. नास्ति मूको. ५-५. नास्ति वि¹ अपं. ६. अधिष्ठितुं वि¹. ७-७. नास्ति मूको. ८. सोमम् इमम् वि¹ अपं. ९. ˚मिश्रम् अ.

इन्द्रं सोमस्य पीतये स्तोमैरिह हवामहे । उक्थेभिः कुविदागमत् ॥ ४ ॥

इन्द्रम् । सोमस्य । पीतये । स्तोमैः । इह । हवामहे । उक्थेभिः । कुवित् । आऽगमत् ॥ ४ ॥

वेङ्कट० इन्द्रं सोमपानार्थम् स्तोत्रैः अस्मिन्[2] यज्ञे ह्वयामहे । स आऽस्मदीयानि शस्त्राण्युद्दिश्य बहु इह आगच्छतु ॥ ४ ॥

इन्द्र सोमाः सुता इमे तान् दधिष्व शतक्रतो । जठरे वाजिनीवसो ॥ ५ ॥

इन्द्र । सोमाः । सुताः । इमे । तान् । दधिष्व । शतक्रतो इति शतऽक्रतो । जठरे । वाजिनीवसो इति वाजिनीऽवसो ॥ ५ ॥

वेङ्कट० इन्द्र सुतान् सोमान् जठरे कुरु हे शतक्रतो ! अन्नेन वासयितः ! ॥ ५ ॥

[3]इति तृतीयाष्टके तृतीयाध्याये पञ्चमो वर्गः[3] ।

विद्मा हि त्वा धनंजयं वाजेषु दधृषं कवे । अधा ते सुम्नमीमहे ॥ ६ ॥

विद्म । हि । त्वा । धनम्ऽजयम् । वाजेषु । दधृषम् । कवे । अध । ते । सुम्नम् । ईमहे ॥ ६ ॥

वेङ्कट० जानीमः हि वयम् त्वाम्[4] धनानां जेतारम् सङ्ग्रामेषु धर्षकम् हे प्राज्ञ ! । अतो अस्य त्वत्तः सुखं याचामहे ॥ ६ ॥

इममिन्द्र गवाशिरं यवाशिरं च नः पिब । आगत्या वृषभिः सुतम् ॥ ७ ॥

इमम् । इन्द्र । गोऽआशिरम् । यवऽआशिरम् । च । नः । पिब । आऽगत्य । वृषऽभिः । सुतम् ॥

वेङ्कट० इमम् इन्द्र । पयोमिश्रणम् सक्तुमिश्रणम् च अस्मदीयम् पिब सोमम् आगत्य कामवर्षि-भिर्ग्रावभिः सुतम् ॥ ७ ॥

तुभ्येदिन्द्र स्व ओक्ये सोमं चोदामि पीतये । एष रारन्तु ते हृदि ॥ ८ ॥

तुभ्य । इत् । इन्द्र । स्वे । ओक्ये । सोमम् । चोदामि । पीतये । एषः । ररन्तु । ते । हृदि ॥ ८ ॥

वेङ्कट० तुभ्यम् एव इन्द्र ! [5]स्वे ओक्ये आह्वनीये[5] सोमम् प्रेरयामि पानाय[6] । एषः तव हृदये[7] रमताम् ॥ ८ ॥

---

१. नास्ति मूको. २. स्तोत्रैरस्मिन् वि' अ'. ३-३. नास्ति मूको. ४. नास्ति वि' अ'. ५-५. स्वे ओक्ये वि' अ' मूको; स्वे उदके वि' अ. ६. नास्ति वि' अ'. ७. एष वि'; नास्ति अ'.

त्वां सुतस्य पीतये प्रत्नमिन्द्र हवामहे । कुशिकासो अवस्यवः ॥ ९ ॥

त्वाम् । सुतस्य । पीतये । प्रत्नम् । इन्द्र । हवामहे । कुशिकासः । अवस्यवः ॥ ९ ॥

वेङ्कट० निगदव्याख्याता ॥ ९ ॥

[1]इति तृतीयाष्टके तृतीयाध्याये षष्ठो वर्गः[1] ॥

[४३]

[2]विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[2] ।

आ याह्यर्वाङुप वन्धुरेष्ठास्तवेदनु प्रदिवः सोमपेयम् ।
प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवाहो हवन्ते ॥ १ ॥

आ । याहि । अर्वाङ् । उप । वन्धुरेऽस्थाः । तव । इत् । अनु । प्रऽदिवः । सोमऽपेयम् ।
प्रिया । सखाया । वि । मुच । उप । बर्हिः । त्वाम् । इमे । हव्यऽवाहः । हवन्ते ॥ १ ॥

वेङ्कट० इन्द्र आ याहि अभिमुखः रथवन्धुरे तिष्ठन्, वन्धुरस्थाः फलकासङ्घादिरूपः, तव[3] एव स्वभूतम् पुराणम् सोमपानम् लक्ष्य कृत्वा । प्रियौ सखायावश्वौ वि मुच उपेत्य बर्हिः । त्वाम् इमे हविषो वोढारः कुशिकाः ह्वयन्ते ॥ १ ॥

आ याहि पूर्वीरति चर्षणीरा अर्य आशिष उप नो हरिभ्याम् ।
इमा हि त्वा मतयः स्तोमतष्टा इन्द्र हवन्ते सख्यं जुषाणाः ॥ २ ॥

आ । याहि । पूर्वीः । अति । चर्षणीः । आ । अर्यः । आऽशिषः । उप । नः । हरिऽभ्याम् ।
इमाः । हि । त्वा । मतयः । स्तोमऽतष्टाः । इन्द्र । हवन्ते । सख्यम् । जुषाणाः ॥ २ ॥

वेङ्कट० पूर्वीः[4] यजमानान् अतिक्रम्य अस्मान् प्रति आ याहि । एवं आकाङ्क्षाः पूरयन् । स्वामी त्वम् अस्माकम् आशासनानि प्रति उपागच्छ[5] अश्वाभ्याम् । इमाः हि त्वाम् स्तुतयः विद्वद्भिः संस्कृताः[6] इन्द्र! ह्वयन्ति त्वया सख्यम् सेवमानाः ॥ २ ॥

आ नो यज्ञं नमोवृधं सजोषा इन्द्र देव हरिभिर्याहि तूयम् ।
अहं हि त्वा मतिभिर्जोहवीमि घृतप्रयाः सधमादे मधूनाम् ॥ ३ ॥

आ । नः । यज्ञम् । नमःऽवृधम् । सऽजोषाः । इन्द्र । देव । हरिऽभिः । याहि । तूयम् ।
अहम् । हि । त्वा । मतिऽभिः । जोहवीमि । घृतऽप्रयाः । सधऽमादे । मधूनाम् ॥ ३ ॥

१-१. नास्ति मूको. २. वै वि'. ३. नास्ति वि' अ'. ४. पूर्वान् वि'. ५. उपागच्छ वि' अ'. ६. संस्कृता कपं

वेङ्कट० आ याहि अस्माकम् यज्ञम् अर्केण वर्तमानम् मरुद्भिः सहित हे इन्द्र! देव! अश्वैः सुयुक्तैः। अहम् हि त्वा स्तुतिभिः [illegible] सोमानाम् [illegible] ॥ ३ ॥

आ च त्वामेता वृषणा वहातो हरी सखाया सुधुरा स्वङ्गा ।
धानावदिन्द्रः सवनं जुषाणः सखा सख्युः शृणवद्वन्दनानि ॥ ४ ॥

आ । च । त्वाम् । एता । वृषणा । वहातः । हरी इति । सखाया । सुऽधुरा । सुऽअङ्गा ।
धानाऽवत् । इन्द्रः । सवनम् । जुषाणः । सखा । सख्युः । शृणवत् । वन्दनानि ॥ ४ ॥

वेङ्कट० आ वहतः च त्वाम् एतौ वर्षितारौ अश्वौ तव सखायौ शोभनधुरौ शोभनाङ्गौ । [illegible] परोक्षः । धानायुक्तम् सवनम् इन्द्रः सेवमानः सखा सख्युः यजमानस्य शृणुयात् स्तोत्राणि ॥ ४ ॥

कुविन्मा गोपां करसे जनस्य कुविद्राजानं मघवन्नृजीषिन् ।
कुविन्म ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शिक्षाः ॥ ५ ॥

कुवित् । मा । गोपाम् । करसे । जनस्य । कुवित् । राजानम् । मघऽवन् । ऋजीषिन् ।
कुवित् । मा । ऋषिम् । पपिऽवांसम् । सुतस्य । कुवित् । मे । वस्वः । अमृतस्य । शिक्षाः ॥ ५ ॥

वेङ्कट० बहु मा त्वं पुत्रादेः गोपयितारम् करोषि, 'कुवित्' च जनस्येश्वरम् हे धनवन्! ऋजीषवन्! [illegible], तथा बहु माम् ऋषिम् करोषि', सोमम् पपिवांसम् । तथा महत् [illegible] 'बहु प्रयच्छ' । शिक्षतिर्दानकर्मेति ॥ ५ ॥

आ त्वा बृहन्तो हरयो युजाना अर्वागिन्द्र सधमादो वहन्तु ।
प्र ये द्विता दिव ऋञ्जन्त्याताः सुसंमृष्टासो वृषभस्य मूराः ॥ ६ ॥

आ । त्वा । बृहन्तः । हरयः । युजानाः । अर्वाक् । इन्द्र । सधऽमादः । वहन्तु ।
प्र । ये । द्विता । दिवः । ऋञ्जन्ति । आताः । सुऽसंमृष्टासः । वृषभस्य । मूराः ॥ ६ ॥

वेङ्कट० आ वहन्तु त्वाम् महान्तः अश्वाः रथे नियुज्यमानाः अस्मदभिमुखम् इन्द्र! सह माद्यन्तः, ये [illegible], आताः इति दिङ्नाम, दिवः [illegible] प्रकर्षेण [illegible] सुसम्मृष्टाः [illegible] ॥ ६ ॥

---

१. [illegible] वि'. २. स्तोत्राणि [illegible], स्तोत्राणि वि'. ३-३. नास्ति [illegible]. ४-४. [illegible]. ५. [illegible] वि'.

इन्द्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते जभार ।
यस्य मदे च्यावयसि प्र कृष्टीर्यस्य मदे अप गोत्रा ववर्थ ॥ ७ ॥

इन्द्र । पिब । वृषऽधूतस्य । वृष्णः । आ । यम् । ते । श्येनः । उशते । जभार ।
यस्य । मदे । च्यावयसि । प्र । कृष्टीः । यस्य । मदे । अप । गोत्रा । ववर्थ ॥ ७ ॥

वेङ्कट० इन्द्र! पिब ग्रावभिर्वृषभ्योऽवधूतम् वृषाणं सोमम्, यम् श्येनः ते दिवः कामयमानाय आजहार । यस्य पीतस्य मदे मनुष्यान् प्र च्यावयसि, यस्य मदे मेघान् अप ववर्थ ॥ ७ ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ८ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ ८ ॥

वेङ्कट० ऋ ३,३०,२२ द्र. ॥ ८ ॥

'इति तृतीयाष्टके तृतीयाध्याये सप्तमो वर्गः' ।

[४४]

'विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । बृहती छन्दः' ।

अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः ।
जुषाण इन्द्र हरिभिर्न आ गह्या तिष्ठ हरितं रथम् ॥ १ ॥

अयम् । ते । अस्तु । हर्यतः । सोमः । आ । हरिऽभिः । सुतः ।
जुषाणः । इन्द्र । हरिऽभिः । नः । आ । गहि । आ । तिष्ठ । हरितम् । रथम् ॥ १ ॥

वेङ्कट० अयम् तव अस्तु कामयमानः सोमः, आ पूरणः, ग्रावभिः सुतः । तमिमं सेवमानस्त्वम् इन्द्र! अस्मान् अश्वैः आ गच्छ । तदर्थं हरितवर्णम् रथम् आ तिष्ठ इति ॥ १ ॥

हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः ।
विद्वांश्चिकित्वान्हर्यश्व वर्धस इन्द्र विश्वा अभि श्रियः ॥ २ ॥

हर्यन् । उषसम् । अर्चयः । सूर्यम् । हर्यन् । अरोचयः ।
विद्वान् । चिकित्वान् । हरिऽअश्व । वर्धसे । इन्द्र । विश्वाः । अभि । श्रियः ॥ २ ॥

---

१. 'श्वस् वि' २. 'र्द' वि' अ'. ३. अत्र वि'' अ' रूपे. ४-४ नास्ति मूको.
५. नास्ति वि'. ६. नास्ति मूको.

वेङ्कट० इमं कोऽसि [illegible] सूर्यम् [illegible] । [illegible]
[illegible] । स त्वं यजमानानां [illegible] वर्धते दे हरितवर्णाय इन्द्र ॥ २ ॥

द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्पसम् । अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत् ॥ ३ ॥

द्याम् । इन्द्रः । हरिऽधायसम् । पृथिवीम् । हरिऽवर्पसम् ।
अधारयत् । हरितोः । भूरि । भोजनम् । ययोः । अन्तः । हरिः । चरत् ॥ ३ ॥

वेङ्कट० पूर्वोक्तं 'इन्द्रः हरितानां दिवो वा धारकं' [illegible], भूमिं च [illegible]
यथा दिवि च पृथिव्यां च देवमनुष्याणां भूरि भोजनम् अधारयत्, ययोः मध्ये इन्द्रः चरति ॥ ३ ॥

जज्ञानो हरितो वृषा विश्वमा भाति रोचनम् ।
हर्यश्वो हरितं धत्त आयुधमा वज्रं बाह्वोर्हरिम् ॥ ४ ॥

जज्ञानः । हरितः । वृषा । विश्वम् । आ । भाति । रोचनम् ।
हरिऽअश्वः । हरितम् । धत्ते । आयुधम् । आ । वज्रम् । बाह्वोः । हरिम् ॥ ४ ॥

वेङ्कट० जायमानः हरितवर्णः इन्द्रः सर्वम् रोचनम् प्रकाशयति । हरितवर्णाश्वः, हरितवर्णम् आयुधम्
धारयति च [illegible] वज्रम् बाह्वोः [illegible] । [illegible] ॥ ४ ॥

इन्द्रो हर्यन्तमर्जुनं वज्रं शुक्रैरभीवृतम् । अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत ॥ ५ ॥

इन्द्रः । हर्यन्तम् । अर्जुनम् । वज्रम् । शुक्रैः । अभिऽवृतम् ।
अप । अवृणोत् । हरिऽभिः । अद्रिऽभिः । सुतम् । उत् । गाः । हरिऽभिः । आजत ॥ ५ ॥

वेङ्कट० इन्द्रः [illegible] अर्जुनवर्णम् वज्रम् [illegible] परिवृतम् [illegible]
[illegible] सुतम् [illegible] अपावृणोत् । [illegible]
[illegible] आजत इति ॥ ५ ॥

"इति तृतीयाष्टके तृतीयाध्यायेऽष्टमो वर्गः" ॥

[४५]

"विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । बृहती छन्दः" ।

आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि यमन्विं न पाशिनोऽति धन्वेव ताँ इहि ॥ १ ॥

---

१. [illegible] २-२. [illegible] ३-३. [illegible] ४. [illegible] ५. [illegible] ६. [illegible] ७-७. [illegible]

आ । मन्द्रैः । इन्द्र । हरिऽभिः । याहि । मयूररोमऽभिः ।
मा । त्वा । के । चित् । नि । यमन् । विम् । न । पाशिनः । अति । धन्वऽइव । तान् । इहि ॥ १ ॥

वेङ्कट० आ याहि मदकरैः इन्द्र! अश्वैः मयूररोमसदृशरोमभिः । मा त्वा के चित् आगच्छन्तम् नि यच्छन्तु बध्नन्तु पक्षिणम् इव पाशिनः पाशैः । तान् सर्वान् अति गच्छ क्षिप्रम् निरुदकमिव देशमिति ॥ १ ॥

वृत्रखादो वलंरुजः पुरां दर्मो अपामजः ।
स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृळ्हा चिदारुजः ॥ २ ॥

वृत्रऽखादः । वलम्ऽरुजः । पुराम् । दर्मः । अपाम् । अजः ।
स्थाता । रथस्य । हर्योः । अभिऽस्वरे । इन्द्रः । दृळ्हा । चित् । आऽरुजः ॥ २ ॥

वेङ्कट० वृत्रासुरस्य खादिता इन्द्रः तथा बलस्य भङ्क्ता असुरपुराणाम् दारयिता मेघस्थानाम् अपाम् प्रेरकः अधिष्ठाता रथस्य गमनार्थम् अश्वयोः अभिस्वरणे सति इन्द्रः दृढानि अपि असुरपुराणि भञ्जकः ॥ २ ॥

गम्भीराँ उदधीँरिव क्रतुं पुष्यसि गा इव ।
प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥ ३ ॥

गम्भीरान् । उदधीन्ऽइव । क्रतुम् । पुष्यसि । गाःऽइव ।
प्र । सुऽगोपाः । यवसम् । धेनवः । यथा । ह्रदम् । कुल्याःऽइव । आशत ॥ ३ ॥

वेङ्कट० महावकाशानि उदधीन् इव [illegible] गाः इव च यवसेन पशुपाः [illegible] । यथा तृणम् धेनवः प्राश्नुवते, यथा वा ह्रदम् कुल्याः, एवमिन्द्रं [illegible] सोमाः प्राश्नुवत इति ॥ ३ ॥

आ नस्तुजं रयिं भरांशं न प्रतिजानते ।
वृक्षं पक्वं फलमङ्कीव धूनुहीन्द्र संपारणं वसु ॥ ४ ॥

आ । नः । तुजम् । रयिम् । भर । अंशम् । न । प्रतिऽजानते ।
वृक्षम् । पक्वम् । फलम् । अङ्कीऽइव । धूनुहि । इन्द्र । सम्ऽपारणम् । वसु ॥ ४ ॥

वेङ्कट० आ भर अस्मभ्यम् क्षिप्रम् धनम्, अंशम् इव पुत्राय "जानन्तं पितरम्" प्रतिजानते । 'प्रज्ञा हि स्वः स्वं प्रतिजानीते' ([illegible]) इति ब्राह्मणम् । यथा वृक्षात् पक्वम् फलम् अङ्की [illegible] आप्नोति, एवमस्माकम् सम्पादयितृ धनम् त्वम् धूनुहि ॥ ४ ॥

१. अश्वा वि'; मद मूको. २. बलस्य मूको. ३. नास्ति वि' अ' कप. ४. 'धति वि' कप. ५. नास्ति वि' कप. ६. 'न्त मूको ७-७. [illegible] कप. ८-८. [illegible] मूको ९. [illegible] वि' अ' कप.

स्वयुरिन्द्र स्वराळसि स्मद्दिष्टिः स्वयशस्तरः ।
स वावृधान ओजसा पुरुष्टुत भवा नः सुश्रवस्तमः ॥ ५ ॥

स्वऽयुः । इन्द्र । स्वऽराट् । असि । स्मत्ऽदिष्टिः । स्वयशःऽतरः ।
सः । ववृधानः । ओजसा । पुरुऽस्तुत । भव । नः । सुश्रवःऽतमः ॥ ५ ॥

वेङ्कट० हे इन्द्र! धनेप्सुः स्वयमेव राजसे सर्वस्य [illegible] अतिशयेन [illegible] । स त्वम् [illegible] वर्धमानः हे बहुभिः स्तुत! भव अस्माकम् अतिशयेन [illegible] ॥ ५ ॥

[1]इति तृतीयाष्टके तृतीयाध्याये नवमो वर्गः[1] ॥

[४६]

[2]विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[2] ।

युध्मस्य ते वृषभस्य स्वराज उग्रस्य यूनः स्थविरस्य घृष्वेः ।
अजूर्यतो वज्रिणो वीर्याणीन्द्र श्रुतस्य महतो महानि ॥ १ ॥

युध्मस्य । ते । वृषभस्य । स्वऽराजः । उग्रस्य । यूनः । स्थविरस्य । घृष्वेः ।
अजूर्यतः । वज्रिणः । वीर्याणि । इन्द्र । श्रुतस्य । महतः । महानि ॥ १ ॥

वेङ्कट० योद्धव्यस्य [illegible] कामानाम् [illegible] उद्गूर्णस्य तरुणस्य पुराणस्य[3] शत्रूणां घर्षणशील[3]स्य जरारहितस्य [illegible] विश्रुतस्य महतः तव हे इन्द्र! महान्ति[4] वीर्याणि भवन्तीति ॥ १ ॥

महाँ असि महिष वृष्ण्येभिर्धनस्पृदुग्र सहमानो अन्यान् ।
एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान् ॥ २ ॥

महान् । असि । महिष । वृष्ण्येभिः । धनऽस्पृत् । उग्र । सहमानः । अन्यान् ।
एकः । विश्वस्य । भुवनस्य । राजा । सः । योधय । च । क्षयय । च । जनान् ॥ २ ॥

वेङ्कट० [illegible] 'महिषः' इति [illegible] । [illegible] । हे 'महिष! [illegible] भवसि [illegible] एकः[5] सर्वस्य लोकस्य ईश्वरो भवसि । सः त्वम् शत्रून् योधय, [illegible] च[5] [illegible] ॥ २ ॥

प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः ।
प्र मज्मना दिव इन्द्रः पृथिव्याः प्रोरोर्महो अन्तरिक्षादृजीषी ॥ ३ ॥

१-१. नास्ति मूको. २-२. नास्ति वि' अ'. ३-३. [illegible] ४. [illegible] ५. [illegible] मूको.

प्र । मात्राभिः । रिरिचे । रोचमानः । प्र । देवेभिः । विश्वतः । अप्रतिऽइतः ।
प्र । मज्मना । दिवः । इन्द्रः । पृथिव्याः । प्र । उरोः । महः । अन्तरिक्षात् । ऋजीषी ॥ ३ ॥

वेङ्कट० मात्राभिर्मात्राः इन्द्रः प्र रिरिचे मात्राभिः अतिरिक्तपरिमाणो भवति रोचमानः । एवं सर्वेभ्यो देवेभ्यः सर्वत एव शत्रुभिरप्रतिगतः, तथा मज्मना बलेन च रिरिचे । किं बहुना, दिवः पृथिव्याः महतः उरोः अन्तरिक्षाच्च प्र रिरिचे पूर्वावसवनात्मकात् ऋजीषी ॥ ३ ॥

उरुं गभीरं जनुषाभ्युग्रं विश्वव्यचसमवतं मतीनाम् ।
इन्द्रं सोमासः प्रदिवि सुतासः समुद्रं न स्रवत आ विशन्ति ॥ ४ ॥

उरुम् । गभीरम् । जनुषा । अभि । उग्रम् । विश्वऽव्यचसम् । अवतम् । मतीनाम् ।
इन्द्रम् । सोमासः । प्रऽदिवि । सुतासः । समुद्रम् । न । स्रवतः । आ । विशन्ति ॥ ४ ॥

वेङ्कट० विस्तीर्णम् गम्भीरम् जन्मप्रभृति उद्गूर्णम् सर्वव्यापिनम् स्तुतीनाम् रक्षकम् इन्द्रम् सोमाः पुराणेष्वहस्सु सुताः समुद्रम् इव नद्यः अभि आ विशन्ति ॥ ४ ॥

यं सोममिन्द्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया ।
तं ते हिन्वन्ति तमु ते मृजन्त्यध्वर्यवो वृषभ पातवा उ ॥ ५ ॥

यम् । सोमम् । इन्द्र । पृथिवीद्यावा । गर्भम् । न । माता । बिभृतः । त्वाऽया ।
तम् । ते । हिन्वन्ति । तम् । ऊँ इति । ते । मृजन्ति । अध्वर्यवः । वृषभ । पातवै । ऊँ इति ॥

वेङ्कट० यम् 'सोमम् हे इन्द्र' द्यावापृथिवी त्वेषामाभिकामयमाने गर्भम् इव माता बिभृतः‡ त्वत्कामनया, तम् अध्वर्यवः तुभ्यम् सोमम् प्रेरयन्ति अभिषुण्वन्ति, तथा ग्रहेषु गृहीतम् वसतीवरीभिः सृजन्ति हे वर्षितः! तव पानाय ॥ ५ ॥

'इति तृतीयाष्टके तृतीयाध्याये दशमो वर्गः' ॥

[४७]

'विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः' ।

मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम् ॥ १ ॥

मरुत्वान् । इन्द्र । वृषभः । रणाय । पिब । सोमम् । अनुऽस्वधम् । मदाय ।
आ । सिञ्चस्व । जठरे । मध्वः । ऊर्मिम् । त्वम् । राजा । असि । प्रऽदिवः । सुतानाम् ॥ १ ॥

---

१. मात्राभिः क मात्राः   २-२. नास्ति वि॰ क्र॰   † उपसहस्त्र B.   ‡ बिभृतः मूर्ध.

१-१. नास्ति मूको.

वेङ्कट० हे इन्द्र! मरुद्भिः सहितस्त्वम् [illegible] वर्षिता [illegible] सोमम् [illegible] ॥ १ ॥

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥ २ ॥

सऽजोषाः । इन्द्र । सऽगणः । मरुत्ऽभिः । सोमम् । पिब । वृत्रऽहा । शूर । विद्वान् ॥
जहि । शत्रून् । अप । मृधः । नुदस्व । अथ । अभयम् । कृणुहि । विश्वतः । नः ॥ २ ॥

वेङ्कट० इन्द्र! [illegible] मरुतः [illegible] । [illegible] 'वृत्रस्य हन्ता हे शूर' [illegible] । [illegible] ॥ २ ॥

उत ऋतुभिर्ऋतुपाः पाहि सोममिन्द्र देवेभिः सखिभिः सुतं नः ।
याँ आभजो मरुतो ये त्वान्वहन्वृत्रमदधुस्तुभ्यमोजः ॥ ३ ॥

उत । ऋतुऽभिः । ऋतुऽपाः । पाहि । सोमम् । इन्द्र । देवेभिः । सखिऽभिः । सुतम् । नः ॥
यान् । आ । अभजः । मरुतः । ये । त्वा । अनु । अहन् । वृत्रम् । अदधुः । तुभ्यम् । ओजः ॥ ३ ॥

वेङ्कट० अपि [illegible] सह पिब सोमम् [illegible] इन्द्र! [illegible] मरुद्भिः [illegible] । [illegible] ॥ ३ ॥

ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिः ॥ ४ ॥

ये । त्वा । अहिऽहत्ये । मघऽवन् । अवर्धन् । ये । शाम्बरे । हरिऽवः । ये । गोऽइष्टौ ॥
ये । त्वा । नूनम् । अनुऽमदन्ति । विप्राः । पिब । इन्द्र । सोमम् । सऽगणः । मरुत्ऽभिः ॥ ४ ॥

वेङ्कट० ये त्वाम् हे धनवन्! अहिहनने अवर्धयन्, ये [illegible] सह युद्धे हे [illegible], ये वा [illegible] 'ये त्वा' [illegible] त्वाम् अनुमदन्ति मेधाविनः, [illegible] भवति, तैः मरुद्भिः सहितस्त्वम् इन्द्र! [illegible] ॥ ४ ॥

१. [illegible] वि॰ [illegible]. २-२. [illegible] वि॰ [illegible]. ३. [illegible] वि॰ [illegible]. ४-४. [illegible] वि॰ [illegible].
[illegible] वि॰ [illegible] ॥
[illegible] वि॰ [illegible]. ६. [illegible]. ७-७. [illegible] वि॰. [illegible].

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥ ५ ॥

मरुत्वन्तम् । वृषभम् । ववृधानम् । अकवऽअरिम् । दिव्यम् । शासम् । इन्द्रम् ।
विश्वऽसहम् । अवसे । नूतनाय । उग्रम् । सहःऽदाम् । इह । तम् । हुवेम ॥ ५ ॥

वेङ्कट० मरुत्वन्तम् [illegible] वृषभम् वीर्येण 'ववृधानम्' [illegible], [illegible] अकवारिम्, दिवि भवम् शासितारम् इन्द्रम् सर्वस्याभिभवितारम् रक्षणाय नवतराय उद्गूर्णम् बलस्य दातारम् अस्मिन् यज्ञे तम् आह्वयेम ॥ ५ ॥

"इति तृतीयाष्टके तृतीयाध्याये एकादशो वर्गः" ॥

[४८]

"विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः" ।

सद्यो ह जातो वृषभः कनीनः प्रभर्तुमावदन्धसः सुतस्य ।
साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य ॥ १ ॥

सद्यः । ह । जातः । वृषभः । कनीनः । प्रऽभर्तुम् । आवत् । अन्धसः । सुतस्य ।
साधोः । पिब । प्रतिऽकामम् । यथा । ते । रसऽआशिरः । प्रथमम् । सोम्यस्य ॥ १ ॥

वेङ्कट० सद्यः एव जातः इन्द्रः कामयमानः [illegible] सुतस्य सोमस्य प्रभर्तारं यजमानम् अभिगच्छति । अथ प्रत्यक्षः । साधयितारम् पिब कामंकामं प्रति प्रतिकामम् यथा ते कामो भवति, गोरसमिश्रणम् [illegible] एव सोमम्, [illegible], सोमार्हस्य वा तव सम्बन्धिनः [illegible] ॥ १ ॥

यज्जायथास्तदहरस्य कामेंऽशोः पीयूषमपिबो गिरिष्ठाम् ।
तं ते माता परि योषा जनित्री महः पितुर्दम आसिञ्चदग्रे ॥ २ ॥

यत् । जायथाः । तत् । अहः । अस्य । कामे । अंशोः । पीयूषम् । अपिबः । गिरिऽस्थाम् ।
तम् । ते । माता । परि । योषा । जनित्री । महः । पितुः । दमे । आ । असिञ्चत् । अग्रे ॥ २ ॥

वेङ्कट० यस्मिन्नहनि जातः जायथाः तत् अह एव अस्य अंशोः, [illegible] अभिषुतम् अभिषवात् [illegible] पर्वतेषु लतासु स्थितम् [illegible] अपिबः । तम् इमम् तव माता [illegible] पृथिवी महतः [illegible] गृहे [illegible] परितः आ असिञ्चत् इति ॥ २ ॥

१-१. '० कामेः' वि' अ' 'तत् [illegible]' वि' [illegible]. २-२. नास्ति मूको. ३. नास्ति वि'. ४. [illegible] वि' [illegible]. ५. नास्ति मूको. ६. [illegible] वि'. ७. नास्ति वि' [illegible]. ८. [illegible] वि' [illegible]

उपस्थाय मातरमन्नमैट्ट तिग्ममपश्यदभि सोममूधः ।
प्रयावयन्नचरद्गृत्सो अन्यान्महानि चक्रे पुरुधप्रतीकः ॥ ३ ॥

उपऽस्थाय । मातरम् । अन्नम् । ऐट्ट । तिग्मम् । अपश्यत् । अभि । सोमम् । ऊधः ।
प्रऽयवयन् । अचरत् । गृत्सः । अन्यान् । महानि । चक्रे । पुरुधऽप्रतीकः ॥ ३ ॥

वेङ्कट० मातरमदितिम् इन्द्रः उपगम्य पूर्वस्मिन् काले अन्नम् ऐट्ट इति। इच्छतेः रूपम्। अथ तीक्ष्णम् सोमम् मातुः ऊधः नर्मीकृत्य स्थितम् अपश्यत्। अथ तं सोमम् प्रकर्षेण पृथक् कुर्वन् अचरत् मेधावी अन्यान् शत्रून्, महान्ति च कर्म चक्रे बहुप्रकाशरूपः ॥ ३ ॥

उग्रस्तुराषाळभिभूत्योजा यथावशं तन्वं चक्र एषः ।
त्वष्टारमिन्द्रो जनुषाभिभूयामुष्या सोममपिबच्चमूषु ॥ ४ ॥

उग्रः । तुराषाट् । अभिभूतिऽओजाः । यथाऽवशम् । तन्वम् । चक्रे । एषः ।
त्वष्टारम् । इन्द्रः । जनुषा । अभिऽभूय । आऽमुष्य । सोमम् । अपिबत् । चमूषु ॥ ४ ॥

वेङ्कट० उद्गूर्णः तूर्णमभिभविता अभिभवनशीलबलः यथाकामम् शरीरम् करोति, कामरूपो भवति एषः। स इन्द्रः त्वष्टारम् जननेन अभिभूय सोमम् अपिबत्। 'अभिभूय अमुष्य त्वष्टुः सोमम् अपहृत्य अपिबत्'। 'स यज्ञवेशसम् कृत्वा प्रसह्य सोममपिबत्' (शत १२,७,१,१. तै २,४,१२,१) इति ब्राह्मणम् इति ॥ ४ ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ५ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ ५ ॥

वेङ्कट० गतः ३,३०,२२ ॥ ५ ॥

'इति तृतीयाष्टके तृतीयाध्याये द्वादशो वर्गः' ॥

[४९]

'विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः' ।

शंसा महामिन्द्रं यस्मिन्विश्वा आ कृष्टयः सोमपाः काममव्यन् ।
यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयन्त देवाः ॥ १ ॥

१. नास्ति वि°. २. एवम् क. ३. एतस्य स्थाने. ४-४ नास्ति वि° अ°. ५-५ नास्ति मूको.

शंस । महाम् । इन्द्रम् । यस्मिन् । विश्वाः । आ । कृष्टयः । सोमऽपाः । कामम् । अव्यन् ।
यम् । सुऽक्रतुम् । धिषणे इति । विभ्वऽतष्टम् । घनम् । वृत्राणाम् । जनयन्त । देवाः ॥ १ ॥

वेङ्कट० 'स्तुहि महान्तम् इन्द्रम्, यस्मिन् विश्वाः सोमपायिन्यः' प्रजाः स्वाभिलषितम्' [illegible] गच्छन्ति, यम् सुकर्माणम् द्यावापृथिव्यौ [illegible] इन्द्राणाम् देवाः च' अजनयन्, 'विभ्वम्' इति महान्तम्, [illegible] ॥ १ ॥

यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठाम् ।
इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः ॥ २ ॥

यम् । नु । नकिः । पृतनासु । स्वऽराजम् । द्विता । तरति । नृऽतमम् । हरिऽस्थाम् ।
इनऽतमः । सत्वऽभिः । यः । ह । शूषैः । पृथुऽज्रयाः । अमिनात् । आयुः । दस्योः ॥ २ ॥

वेङ्कट० यम् नु न कश्चित् सङ्ग्रामेषु स्वराजम् [illegible] हैयम् [illegible] । [illegible] [illegible] गच्छतीत्यर्थः' । [illegible] [illegible] पृथुवेगः यः' असुरस्य जीवितम् [illegible] ॥ २ ॥

सहावा पृत्सु तरणिर्नार्वा व्यानशी रोदसी मेहनावान् ।
भगो न कारे हव्यो मतीनां पितेव चारुः सुहवो वयोधाः ॥ ३ ॥

सहऽवा । पृत्ऽसु । तरणिः । न । अर्वा । विऽआनशिः । रोदसी इति । मेहनाऽवान् ।
भगः । न । कारे । हव्यः । मतीनाम् । पिताऽइव । चारुः । सुऽहवः । वयःऽधाः ॥ ३ ॥

वेङ्कट० महनवान् सङ्ग्रामेषु [illegible] [illegible] द्यावापृथिव्योः [illegible] [illegible] भगः इव [illegible] कर्तव्यः [illegible] [illegible] [illegible] [illegible] [illegible] ॥ ३ ॥

धर्ता दिवो रजसस्पृष्ट ऊर्ध्वो रथो न वायुर्वसुभिर्नियुत्वान् ।
क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजम् ॥ ४ ॥

धर्ता । दिवः । रजसः । पृष्टः । ऊर्ध्वः । रथः । न । वायुः । वसुऽभिः । नियुत्वान् ।
क्षपाम् । वस्ता । जनिता । सूर्यस्य । विऽभक्ता । भागम् । धिषणाऽइव । वाजम् ॥ ४ ॥

१-१. नास्ति वि' अ'. २. °नाम वि' अ'. ३. नास्ति भ. ४. गच्छन्तीन्द्र° मूको.
५. नास्ति वि' अ'. ६. °न्द्रो [illegible]° वि' अ'.

वेङ्कट० इन्द्र, 'धर्ता दिवः [illegible] सूर्यो [illegible]' [illegible] कर्म [illegible] ।
अथ [illegible] सह मरुद्भिः(?) [illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] (निघ २, ११) इति [illegible], यथा [illegible] [illegible] विविध
[illegible] ॥ ४ ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ५ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ ५ ॥

वेङ्कट० ऋ ३,३०,२२ [illegible] ॥ ५ ॥

'इति तृतीयाष्टके तृतीयाध्याये त्रयोदशो वर्गः' ॥

[५०]

'विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः' ।

इन्द्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान् ।
ओरुव्यचाः पृणतामेभिरन्नैरास्य हविस्तन्वः काममृध्याः ॥ १ ॥

इन्द्रः । स्वाहा । पिबतु । यस्य । सोमः । आऽगत्य । तुम्रः । वृषभः । मरुत्वान् ।
आ । उरुऽव्यचाः । पृणताम् । एभिः । अन्नैः । आ । अस्य । हविः । तन्वः । कामम् । ऋध्याः ॥ १ ॥

वेङ्कट० इन्द्रः स्वादुतं सोमम् पिबतु, यस्य स्वभूतः सोमः भवति, तुम्रः [illegible], [illegible]
[illegible] [illegible] [illegible] मरुत्वान् । आ पूरयतु [illegible] [illegible] अन्नैः [illegible] । [illegible]
[illegible] [illegible] [illegible] कामम् [illegible] ॥ १ ॥

आ ते सपर्यू जवसे युनज्मि ययोरनु प्रदिवः श्रुष्टिमावः ।
इह त्वा धेयुर्हरयः सुशिप्र पिबा त्वस्य सुषुतस्य चारोः ॥ २ ॥

आ । ते । सपर्यू इति । जवसे । युनज्मि । ययोः । अनु । प्रऽदिवः । श्रुष्टिम् । आवः ।
इह । त्वा । धेयुः । हरयः । सुऽशिप्र । पिब । तु । अस्य । सुऽसुतस्य । चारोः ॥ २ ॥

वेङ्कट० आ युनज्मि ते परिचरणशीलौ गमनाय अश्वौ, ययोः [illegible] पुराणः त्वम्,

---

१-१. [illegible] वि[illegible] . २. [illegible] वि[illegible] [illegible] . ३. [illegible] [illegible] .
४. [illegible] वि[illegible]; [illegible] . ५-५. नास्ति मूको. ६. [illegible] वि[illegible] .

गच्छसीति । 'दिवम् अन्तरा अनुकूल ... त्वा हविः । अस्मिन् यज्ञे त्वाम् निवपतु ... सुन्वन्तः । पिब सोमम् सुष्ठु सुतम् कल्याणं सोमम् इमम् इति ॥ २ ॥

गोभिर्मिमिक्षुं दधिरे सुपारमिन्द्रं ज्यैष्ठ्याय धायसे गृणानाः ।
मन्दानः सोमं पपिवाँ ऋजीषिन्त्समस्मभ्यं पुरुधा गा इषण्य ॥ ३ ॥

गोभिः । मिमिक्षुम् । दधिरे । सुऽपारम् । इन्द्रम् । ज्यैष्ठ्याय । धायसे । गृणानाः ।
मन्दानः । सोमम् । पपिऽवान् । ऋजीषिन् । सम् । अस्मभ्यम् । पुरुऽधा । गाः । इषण्य ॥ ३ ॥

वेङ्कट० स्तुतिभिः वर्धयन्ति सेक्तुमिच्छन्तम् धारयन्ति सुष्ठु पारयितारम् इन्द्रम् आत्मनो ज्यैष्ठ्याय धारणाय च स्तुवन्तः । मोदमानः सोमम् पपिवान् हे ऋजीषवन् इन्द्र! सम्प्रेरय अस्मभ्यम् बहुप्रकारम् पशूनिति ॥ ३ ॥

इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च ।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥ ४ ॥

इमम् । कामम् । मन्दय । गोभिः । अश्वैः । चन्द्रऽवता । राधसा । पप्रथः । च ।
स्वःऽयवः । मतिऽभिः । तुभ्यम् । विप्राः । इन्द्राय । वाहः । कुशिकासः । अक्रन् ॥ ४ ॥

वेङ्कट० ३,३०,२० द्र. ॥ ४ ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ५ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ ५ ॥

वेङ्कट० ३,३०,२२ द्र. ॥ ५ ॥

'इति तृतीयाष्टके तृतीयाध्याये चतुर्दशो वर्गः' ॥

[५१]

'विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः
प्रथमादितृचो जगती, दशम्यादितृचो गायत्री' ।

चर्षणीधृतं मघवानमुक्थ्यमिन्द्रं गिरो बृहतीरभ्यनूषत ।
वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥ १ ॥

१-१. दिवः इत्यादि ... वि' ... दिवदुत्वा ... वि' ... ... दिवम् ... इति अ. १-२. नास्ति मूको.

चर्षणिऽधृतम् । मघऽवानम् । उक्थ्यम् । इन्द्रम् । गिरः । बृहतीः । अभि । अनूषत ।
ववृधानम् । पुरुऽहूतम् । सुवृक्तिऽभिः । अमर्त्यम् । जरमाणम् । दिवेऽदिवे ॥ १ ॥

वेङ्कट० मनुष्याणां धर्तारम् धनवन्तम् स्तुत्यम् इन्द्रम् स्तुतयः महत्यः अभि अस्तुवन्, स्तुतिभिः वर्धमानम् बहुभिराहूतम् अमर्त्यम् स्तूयमानम् अन्वहम् ॥ १ ॥

शतक्रतुमर्णवं शाकिनं नरं गिरो म इन्द्रमुप यन्ति विश्वतः ।
वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदम् ॥ २ ॥

शतऽक्रतुम् । अर्णवम् । शाकिनम् । नरम् । गिरः । मे । इन्द्रम् । उप । यन्ति । विश्वतः ।
वाजऽसनिम् । पूःऽभिदम् । तूर्णिम् । अप्ऽतुरम् । धामऽसाचम् । अभिऽसाचम् । स्वःऽविदम् ॥

वेङ्कट० बहुप्रज्ञम्[1] उदकवन्तम् शक्तम् नेतारम् स्तुतयः मम इन्द्रम् सर्वतः उप गच्छन्ति अन्नस्य दातारम् पुरां भेत्तारम् क्षिप्रकारिणम् कर्मसु त्वरमाणम् तेजांसि भजमानम् अभिसम्भक्तारं[2] (? अभिभवितारं) सर्वज्ञम् ॥ २ ॥

आऽकरे । वसोः । जरिता । पनस्यते । अनेहसः । स्तुभः । इन्द्रः । दुवस्यति ।
विवस्वतः । सदने । आ । हि । पिप्रिये । सत्राऽसहम् । अभिमातिऽहनम् । स्तुहि ॥ ३ ॥

वेङ्कट० कर्मणामाकरभूतस्य धनस्य इन्द्रं स्तोता स्तौति । निरवद्याः स्तुतीः इन्द्रः सेवते[3] । यजमानस्य गृहे हि इन्द्र प्रीतो भवसि । बहूनां सोढारम् अभिमातीनां हन्तारम् इन्द्रम् स्तुहि ॥ ३ ॥

नृणामु त्वा नृतमं गीर्भिरुक्थैरभि प्र वीरमर्चता सबाधः ।
सं सहसे पुरुमायो जिहीते नमो अस्य प्रदिव एक ईशे ॥ ४ ॥

नृणाम् । ऊं इति । त्वा । नृऽतमम् । गीःऽभिः । उक्थैः । अभि । प्र । वीरम् । अर्चत । सऽबाधः ।
सम् । सहसे । पुरुऽमायः । जिहीते । नमः । अस्य । प्रऽदिवः । एकः । ईशे ॥ ४ ॥

वेङ्कट० उत्तमं नेतारम् स्तोत्रशस्त्रैः त्वाम् शूर बाधसहिताः मनुष्याः प्र[4] अर्चत । सोऽयमिन्द्रः

१. शरणम् वि॰ अर्थ. २. [illegible] वि॰; [illegible] अर्थ. ३. °समकतराम वि॰. ४. 'पूरय' वि॰ अर्थ. ५. नास्ति मूको.

बहुधनः सखाय स्तोतृभिः सङ्गच्छते । तस्य अस्य नमः अस्तु । सोऽयं पुराणः एव भूत्वा सर्वस्येश्वरो भवति ॥ ४ ॥

पूर्वीरस्य निष्षिधो मर्त्येषु पुरू वसूनि पृथिवी बिभर्ति ।
इन्द्राय द्याव ओषधीरुतापो रयिं रक्षन्ति जीरयो वनानि ॥ ५ ॥

पूर्वीः । अस्य । निःऽसिधः । मर्त्येषु । पुरु । वसूनि । पृथिवी । बिभर्ति ।
इन्द्राय । द्यावः । ओषधीः । उत । आपः । रयिम् । रक्षन्ति । जीरयः । वनानि ॥ ५ ॥

वेङ्कट० पुरस्तनानि अस्य दसनानि भवन्ति शत्रुमनुष्येषु । बहूनि च धनान्युत्पादितानि[1] पृथिवी बिभर्ति । इन्द्रायैश्वर्यम् द्युलोका आपः ओषधयः च मनुष्याणामुपकारकं धनम् रक्षन्ति क्षिप्रगमना अश्वाः अरण्यानि च ॥ ५ ॥

'इति तृतीयाष्टके तृतीयाध्याये पञ्चदशो वर्गः'[2] ॥

तुभ्यं ब्रह्माणि गिर इन्द्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व ।
बोध्यापिरवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः ॥ ६ ॥

तुभ्यम् । ब्रह्माणि । गिरः । इन्द्र । तुभ्यम् । सत्रा । दधिरे । हरिऽवः । जुषस्व ।
बोधि । आपिः । अवसः । नूतनस्य । सखे । वसो इति । जरितृऽभ्यः । वयः । धाः ॥ ६ ॥

वेङ्कट० इन्द्र ! स्तोतारः तुभ्यम् एव स्तोत्रशस्त्राणि धारयन्ति प्रभूतानि, तानि त्वं सेवस्व । बुध्यस्व बन्धुः सन् रक्षणस्य नवतरस्य[3] । हे सखे वासयितः ! स्तोतृभ्यः अन्नम् धेहि ॥ ६ ॥

इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः ॥ ७ ॥

इन्द्र । मरुत्वः । इह । पाहि । सोमम् । यथा । शार्याते । अपिबः । सुतस्य ।
तव । प्रऽनीती । तव । शूर । शर्मन् । आ । विवासन्ति । कवयः । सुऽयज्ञाः ॥ ७ ॥

वेङ्कट० इन्द्र ! मरुत्वन् ! अस्मिन् यज्ञे पिब सोमम्, यथा शार्यातस्याभिषुतं[4] सोममाहरतो यज्ञे बलात् पुरा सुतम् सोमम् अपिबः । हे शूर ! तव प्रणयनेन तव सुखे वर्तन्ते कवयः सोमस्य कर्तारः ॥ ७ ॥

स वावशान इह पाहि सोमं मरुद्भिरिन्द्र सखिभिः सुतं नः ।
जातं यत्त्वा परि देवा अभूषन्महे भराय पुरुहूत विश्वे ॥ ८ ॥

१. बन्धु ने वि° २. °नवतरा° वि° लर्व. ३. नास्ति मूको. ४. नास्ति वि° अर्व.
५. °शर्या° मूको.

स । वावशानः । इह । पाहि । सोमम् । मरुत्ऽभिः । इन्द्र । सखिऽभिः । सुतम् । नः ।
जातम् । यत् । त्वा । परि । देवाः । अभूषन् । महे । भराय । पुरुऽहूत । विश्वे ॥ ८ ॥

वेङ्कट० सः कामयमानः अस्मिन् यज्ञे पिब सोमम् मरुद्भिः सह इन्द्र! समानख्यातैः सुतम् अस्माकम्। जातम् यस्मात् त्वाम् परितः अभूषन् विश्वे देवाः महते सङ्ग्रामाय हे पुरुहूत![1], तस्मात् तैः सह पिबेति ॥ ८ ॥

अप्तूर्ये मरुत आपिरेषोऽमन्दन्निन्द्रमनु दातिवाराः ।
तेभिः साकं पिबतु वृत्रखादः सुतं सोमं दाशुषः स्वे सधस्थे ॥ ९ ॥

अप्ऽतूर्ये । मरुतः । आपिः । एषः । अमन्दन् । इन्द्रम् । अनु । दातिऽवाराः ।
तेभिः । साकम् । पिबतु । वृत्रऽखादः । सुतम् । सोमम् । दाशुषः । स्वे । सधऽस्थे ॥ ९ ॥

वेङ्कट० हे मरुतः! उदकार्थे वृत्रेण सह युद्धे[2] युष्माकम् आप्तिरिन्द्रः सहायो भवति । एष इन्द्रविषयः परोक्षः[3]। इन्द्रम् अप्तूर्ये अनु अमन्दन् धनस्यादातारो दानवारणीयधना मरुतः। तैः सह पिबतु वृत्रहन्ता सुतम् सोमम् यजमानस्य स्वे गृहे ॥ ९ ॥

इदं ह्यन्वोजसा सुतं राधानां पते । पिबा त्वस्य गिर्वणः ॥ १० ॥

इदम् । हि । अनु । ओजसा । सुतम् । राधानाम् । पते । पिब । तु । अस्य । गिर्वणः ॥ १० ॥

वेङ्कट० इदम्[4] हि सोमलक्षणमन्नं हे धनानाम् पते! त्वां वशीकृत्य ओजसा[5] सुतम् । तस्मात् पिब एतत् हे गीर्भिर्वननीय! ॥ १० ॥

यस्ते अनु स्वधामसत् सुते नि यच्छ तन्वम् । स त्वा ममत्तु सोम्यम् ॥ ११ ॥

यः । ते । अनु । स्वधाम् । असत् । सुते । नि । यच्छ । तन्वम् । सः । त्वा । ममत्तु । सोम्यम् ॥ ११ ॥

वेङ्कट० यः तव अन्नम् अनु भवति, तस्मिन् सुते सोमे नि यच्छ शरीरं यजमान । स त्वा मादयतु सोमार्हम् ॥ ११ ॥

प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः । प्र बाहू शूर राधसे ॥ १२ ॥

प्र । ते । अश्नोतु । कुक्ष्योः । प्र । इन्द्र । ब्रह्मणा । शिरः । प्र । बाहू इति । शूर । राधसे ॥ १२ ॥

---

१. नास्ति मूको. २. युद्धे वि° धर्व. ३. ०ेन्द्र वि° मूको. ४. °दम वि° मूको. ५. स्मय वि°.

वेङ्कट० इन्द्र! सोमः तव कुक्ष्योः प्रवर्धन व्याप्नोतु, गिरः च हविषा पुरोडाशादिना सह वायुं च हे शूर! अस्माकं धनाय प्र कामयतु इति ॥ १२ ॥

'इति तृतीयाष्टके तृतीयाध्याये षोडशो वर्गः' ॥

[५२]

'विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः,
आद्याश्चतस्रो गायत्र्यः, षष्ठी जगती' ।

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व नः ॥ १ ॥

धानाऽवन्तम् । करम्भिणम् । अपूपऽवन्तम् । उक्थिनम् । इन्द्र । प्रातः । जुषस्व । नः ॥ १ ॥

वेङ्कट० धानादिभिर्युक्तम् उक्थवन्तं नः सोमम् हे इन्द्र! प्रातःसवने सेवस्वेति ॥ १ ॥

पुरोळाशं पचत्यं जुषस्वेन्द्रा गुरस्व च । तुभ्यं हव्यानि सिस्रते ॥ २ ॥

पुरोळाशम् । पचत्यम् । जुषस्व । इन्द्र । आ । गुरस्व । च । तुभ्यम् । हव्यानि । सिस्रते ॥ २ ॥

वेङ्कट० पुरोडाशम् अस्मदीयं पक्तव्यम् सेवस्व । हे इन्द्र! उद्यतश्च भव कामनाय । तुभ्यम् हवींषि सरन्ति आहवनीयं प्रति ॥ २ ॥

पुरोळाशं च नो घसो जोषयासे गिरश्च नः । वधूयुरिव योषणाम् ॥ ३ ॥

पुरोळाशम् । च । नः । घसः । जोषयासे । गिरः । च । नः । वधूयुःऽइव । योषणाम् ॥ ३ ॥

वेङ्कट० पुरोडाशम् च अस्माकम् भक्षय । सेवस्व स्तुतीः अस्माकम्, वधूयुः यथा सेवते, स यथा कन्याम् स्त्रियं सेवते ॥ ३ ॥

पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः । इन्द्र क्रतुर्हि ते बृहन् ॥ ४ ॥

पुरोळाशम् । सनऽश्रुत । प्रातःऽसावे । जुषस्व । नः । इन्द्र । क्रतुः । हि । ते । बृहन् ॥ ४ ॥

वेङ्कट० पुरोडाशम् हे पुराणश्रुत! प्रातःसवने सेवस्व अस्माकम् । इन्द्र! प्रज्ञा हि तव महती ॥ ४ ॥

माध्यंदिनस्य सवनस्य धानाः पुरोळाशमिन्द्र कृष्वेह चारुम् ।
प्र यत्स्तोता जरिता तूर्ण्यर्थो वृषायमाण उप गीर्भिरीट्टे ॥ ५ ॥

१-१. नास्ति मूको. २. नास्ति मूको. ३. सर्व न सर्व. ४. य अस्माकम् ल'.

माध्यन्दिनस्य । सवनस्य । धानाः । पुरोळाशम् । इन्द्र । कृष्व । इह । चारुम् ।
प्र । यत् । स्तोता । जरिता । तूर्णिऽअर्थः । वृषऽयमाणः । उप । गीःऽभिः । ईट्टे ॥ ५ ॥

वेङ्कट० माध्यन्दिनस्य सवनस्य पुरोडाशस्य धानानां च कल्याणतां कुरुष्वेह । यदा स्तोता 'शंसिता च होता प्रेरितहविष्कः पुरोडाशम् आदाय' प्रकर्षेण उपेत्य त्वां स्तौतीति ॥ ५ ॥

'इति तृतीयाष्टके तृतीयाध्याये सप्तदशो वर्गः' ॥

तृतीये धानाः सवने पुरुष्टुत पुरोळाशमाहुतं मामहस्व नः ।
ऋभुमन्तं वाजवन्तं त्वा कवे प्रयस्वन्त उप शिक्षेम धीतिभिः ॥ ६ ॥

तृतीये । धानाः । सवने । पुरुऽस्तुत । पुरोळाशम् । आऽहुतम् । ममहस्व । नः ।
ऋभुऽमन्तम् । वाजऽवन्तम् । त्वा । कवे । प्रयस्वन्तः । उप । शिक्षेम । धीतिऽभिः ॥ ६ ॥

वेङ्कट० हे पुरुष्टुत! तृतीयसवने धानाः पुरोडाशम् च आहुतम् भजस्व अस्माकम् । ऋभुभिः सार्धं इति तत्र 'ऋभवः । ऋभुभिर्युक्तम्' 'वाजेन च युक्तम् त्वा कवे! अन्नवन्तो वयम् कर्मभिः सेवेम' ॥ ६ ॥

पूषण्वते ते चकृमा करम्भं हरिवते हर्यश्वाय धानाः ।
अपूपमद्धि सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ॥ ७ ॥

पूषण्ऽवते । ते । चकृम । करम्भम् । हरिऽवते । हर्यऽअश्वाय । धानाः ।
अपूपम् । अद्धि । सऽगणः । मरुत्ऽभिः । सोमम् । पिब । वृत्रऽहा । शूर । विद्वान् ॥ ७ ॥

वेङ्कट० 'पूषा सहिताय तुभ्यम् कुर्मः करम्भम् । हरिभ्यां सहिताय हर्यश्वाय धानाः† कुर्मः । जानन् विद्वान् त्वं हे शूर' पुरोडाशम् भक्षय, अद्धि, आहुतः सोमम् च पिब[५] ॥ ७ ॥

प्रति धाना भरत तूयमस्मै पुरोळाशं वीरतमाय नृणाम् ।
दिवेदिवे सदृशीरिन्द्र तुभ्यं वर्धन्तु त्वा सोमपेयाय धृष्णो ॥ ८ ॥

प्रति । धानाः । भरत । तूयम् । अस्मै । पुरोळाशम् । वीरऽतमाय । नृणाम् ।
दिवेऽदिवे । सऽदृशीः । इन्द्र । तुभ्यम् । वर्धन्तु । त्वा । सोमऽपेयाय । धृष्णो इति ॥ ८ ॥

वेङ्कट० 'नृणाम् मध्ये अतिशयेन वीराय अस्मै धानाः पुरोडाशम् च क्षिप्रम् प्रति भरत । समानरूपाः स्तुतयः हे इन्द्र! त्वदर्थे क्रियमाणाः स्वान् वर्धयन्तु ते' धर्षणशील[१२] त्वां सोमपानाय ॥ ८ ॥

'इति तृतीयाष्टके तृतीयाध्यायेऽष्टादशो वर्गः' ॥

१-१. नास्ति वि' अ'. २-२. नास्ति मूको. ३-३. नास्ति वि' अपं. ४ ४. नास्ति वि' अपं. † धानानां क. धानानां वि' अ'. ५. वर्धन' वि' अ'.

[५३]

'विश्वामित्रो गाथिन ऋषिः । इन्द्रो देवता, आद्यस्या इन्द्रापर्वतौ, पञ्चदश्याद्यस्तिस्रो वाक् (ससर्परी), सप्तदश्याद्यास्तिस्रस्तासां रथाङ्गानि, एकविंश्यादिचतुर्विंश्यन्तानामभिशापः । त्रिष्टुप् छन्दः, दशम्येकादश्यौ जगत्यौ, षोडशी गायत्री, द्वादशी विंशीद्वाविंश्योऽनुष्टुभः, त्रयोदशी बृहती[1] ।

इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः ।
वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदन्ता ॥ १ ॥

इन्द्रापर्वता । बृहता । रथेन । वामीः । इषः । आ । वहतम् । सुऽवीराः ।
वीतम् । हव्यानि । अध्वरेषु । देवा । वर्धेथाम् । गीःऽभिः । इळया । मदन्ता ॥ १ ॥

वेङ्कट० हे इन्द्रापर्वतौ ! वननीयानि अन्नानि महता रथेन आ वहतम् शोभनापत्यसहितानि, भक्षयतं च हवींषि यज्ञेषु, देवनशीलौ ! वर्धेथाम्[2] च स्तुतिभिः अन्नेन माद्यन्तौ युवाम् इति ॥ १ ॥

तिष्ठा सु कं मघवन्मा परा गाः सोमस्य नु त्वा सुषुतस्य यक्षि ।
पितुर्न पुत्रः सिचमा रभे त इन्द्र स्वादिष्ठया गिरा शचीवः ॥ २ ॥

तिष्ठ । सु । कम् । मघऽवन् । मा । परा । गाः । सोमस्य । नु । त्वा । सुऽसुतस्य । यक्षि ।
पितुः । न । पुत्रः । सिचम् । आ । रभे । ते । इन्द्र । स्वादिष्ठया । गिरा । शचीऽवः ॥ २ ॥

वेङ्कट० मघवन् ! सुष्ठु सुखं च अस्मद्यज्ञार्थे तिष्ठ । मा अस्मत्तः परागमः[3] । सोमेन सुष्ठु सुतेन यजामि अद्य त्वा क्षिप्रं पितुः इव पुत्रः वस्त्रप्रान्तम्, हे इन्द्र ! अहं हस्तेन गृह्णामि स्वादुतमया स्तुतिवाचा संयुक्तोऽहम्, प्रज्ञावन् ![4] ॥ २ ॥

शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम् ।
एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिन्द्राय शस्तम् ॥ ३ ॥

शंसाव । अध्वर्यो इति । प्रति । मे । गृणीहि । इन्द्राय । वाहः । कृणवाव । जुष्टम् ।
आ । इदम् । बर्हिः । यजमानस्य । सीद । अथ । च । भूत् । उक्थम् । इन्द्राय । शस्तम् ॥ ३ ॥

वेङ्कट० हे अध्वर्यो ! शंसाव आवाम् । तत्र त्वम् मे प्रतिगरं कुरु—'ओथामो दैव' इति । इन्द्राय शस्त्रम् प्रियम् कृणवाव । तदर्थम् आ सीद इदम् बर्हिः यजमानस्य । अथ भवतु इन्द्राय शस्तम् उक्थम् इति ॥ ३ ॥

---

१ १. नास्ति मूको. २. वर्धेथाम् मूको. ३. °म मूको. ४. °नन् वि°° नास्ति.

जायेदस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहन्तु ।
यदा कदा च सुनवाम सोममग्निष्ट्वा दूतो धन्वात्यच्छ ॥ ४ ॥

जाया । इत् । अस्तम् । मघऽवन् । सा । इत् । ऊँ इति । योनिः । तत् । इत् । त्वा । युक्ताः । हरयः । वहन्तु ।
यदा । कदा । च । सुनवाम । सोमम् । अग्निः । त्वा । दूतः । धन्वाति । अच्छ ॥ ४ ॥

वेङ्कट० मघवन्! पुरुषाणाम् जाया एव गृहं भवति, सा एव वसत्यासनम्। तत्र एव त्वामपि पीतसोमम् युक्ताः अश्वाः वहन्तु। पुनश्च वयम् यदा कदा च कर्मार्थम् सोमम् सुनवाम तदा अग्निः दूतः त्वाम् प्रति धन्वान् अभिगच्छति, तदा पुनरागमनम्। अस्यांस्तत्र सूक्ते विवक्षनाथ ॥ ४ ॥

परा याहि मघवन्ना च याहीन्द्र भ्रातरुभयत्रा ते अर्थम् ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो रासभस्य ॥ ५ ॥

परा । याहि । मघऽवन् । आ । च । याहि । इन्द्र । भ्रातः । उभयत्र । ते । अर्थम् ।
यत्र । रथस्य । बृहतः । निऽधानम् । विऽमोचनम् । वाजिनः । रासभस्य ॥ ५ ॥

वेङ्कट० पीते सोमे परा गच्छ मघवन्, आ याहि च इतः प्रस्थाते सोमयागाय। हे इन्द्र! भ्रातृस्थानीय! अर्थ![1] ते उभयत्र च कर्म प्रयोजनम् अस्ति। सोमयागस्य प्रयोजनम् तत्र [2]गाथा। तत्र[3] यत्र महतः रथस्य विमुक्ताश्वस्य निधानम् भवति अश्वमोचनम् च महतस्य वेगवतः, तत्रापाहांति[4]। येषामतन्त्ये-ष्वस्तु शाखियोऽप्यनुक्तानुवाक्यान्त्येषु पूर्वैति ॥ ५ ॥

[5]इति तृतीयाष्टके तृतीयाध्याये एकोनविंशो वर्गः[5] ।

अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ॥ ६ ॥

अपाः । सोमम् । अस्तम् । इन्द्र । प्र । याहि । कल्याणीः । जाया । सुऽरणम् । गृहे । ते ।
यत्र । रथस्य । बृहतः । निऽधानम् । विऽमोचनम् । वाजिनः । दक्षिणाऽवत् ॥ ६ ॥

वेङ्कट० पीतवानसि सोमम्, गृहम् इन्द्र! प्रतिगच्छ। कल्याणीः[6] जाया सुष्ठु रमणसाधनं विद्यते गृहे तव। यत्र इति गतम्। तत्रैव कार्यान्ते रथस्य विमुक्तस्य वाजिनः[7] दक्षिणया विद्यते च दानमिति। दक्षिणा च[8] यागः पात्रे चेति ॥ ६ ॥

इमे भोजा अङ्गिरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः ।
विश्वामित्राय ददतो मघानि सहस्रसावे प्र तिरन्त आयुः ॥ ७ ॥

१. नास्ति वि' ल्पे. २. मनो वि' अ' ३-३. नास्ति वि' अर्थ. ४. °यन्ति मूको ५-५. नास्ति मूको. ६. °णी अर्थ. ७. नास्ति मूको. ८. नास्ति क.

इमे । भोजाः । अङ्गिरसः । विऽरूपाः । दिवः । पुत्रासः । असुरस्य । वीराः ।
विश्वाऽमित्राय । ददतः । मघानि । सहस्रऽसावे । प्र । तिरन्ते । आयुः ॥ ७ ॥

वेङ्कट० इन्द्रानुचराः इमे दातारः विविधरूपाः अङ्गिरसः च दिवः पुत्राश्च मरुतः असुरस्य बलवतो रुद्रस्य वीराः विश्वामित्राय धनम् धनानि प्रयच्छन्तः अनेकस्मिन् सोमाभिषवे आयुः वर्धयन्तीति[1] ॥ ७ ॥

रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१ परि स्वाम् ।
त्रिर्यद् दिवः परि मुहूर्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावा ॥ ८ ॥

रूपम्ऽरूपम् । मघऽवा । बोभवीति । मायाः । कृण्वानः । तन्वम् । परि । स्वाम् ।
त्रिः । यत् । दिवः । परि । मुहूर्तम् । आ । अगात् । स्वैः । मन्त्रैः । अनृतुऽपाः । ऋतऽवा ॥८॥

वेङ्कट० नानाविधं रूपम् भावयति मघवा स्वाम् तनुम् परितः मायाः कुर्वन् । मायिनं नाम मोहयति या माया उच्यते । बहुधा लोकमेव यथा दृश्यन्ते । मुहूर्तम् मुहुः कृतं भवतीति सवनमुच्यते । दिवः परि यत्र[2] सवनान्यागच्छति स्वैः स्तोत्रैर्मन्त्रैः । अन्ये देवा ऋतौ कस्मिंश्चित् काले पिबन्ति अयं तु अनृतुपाः सर्वेषु सवनेषु पिबति यज्ञवानिति । यास्कः 'मुहूर्ते कालमयने नक्षत्रेषा' सवनि' (१०,१७) इति ॥ ८ ॥

महाँ ऋषिर्देवजा देवजूतोऽस्तभ्नात् सिन्धुमर्णवं नृचक्षाः ।
विश्वामित्रो यदवहत् सुदासमप्रियायत कुशिकेभिरिन्द्रः ॥ ९ ॥

महान् । ऋषिः । देवऽजाः । देवऽजूतः । अस्तभ्नात् । सिन्धुम् । अर्णवम् । नृऽचक्षाः ।
विश्वाऽमित्रः । यत् । अवहत् । सुऽदासम् । अप्रियायत । कुशिकेभिः । इन्द्रः ॥ ९ ॥

नास॑त्या ति॒रोअ॑ह्न्यं जुषा॒णा सोमं॑ पिबतम॒स्रिधा॑ सुदानू ॥ ७ ॥

---

१. नास्ति वि' अ'. २. °न वि' अ'. ३. नास्ति मूको. ४-४. नास्ति मूको ५. मानः वि' अ'. ६. तथा वि' ७. मदे वि' अप अ'. ८. समानं वि' अ'.

अश्विना । वायुना । युवम् । सुऽदक्षा । नियुत्ऽभिः । च । सऽजोषसा । युवाना ।
नासत्या । तिरःऽअह्न्यम् । जुषाणा । सोमम् । पिबतम् । अस्रिधा । सुदानू इति सुऽदानू ॥७॥

वेङ्कट० हे अश्विनौ! युवाम् वायुना सह हे शोभनबलौ! नियुद्भिः च सङ्गतौ हे युवानौ! नासत्यौ! तिरोअह्न्यम् सोमम् पिबतम् प्रीयमाणौ अबाधकौ हे शोभनदानौ! ॥ ७ ॥

अश्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः ।
रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः ॥ ८ ॥

अश्विना । परि । वाम् । इषः । पुरूचीः । ईयुः । गीःऽभिः । यतमानाः । अमृध्राः ।
रथः । ह । वाम् । ऋतऽजाः । अद्रिऽजूतः । परि । द्यावापृथिवी इति । याति । सद्यः ॥ ८ ॥

वेङ्कट० 'हे अश्विनौ!' परि गच्छन्ति वाम् अन्नानि बहूनि गतानि मन्त्रैः सह यतमानानि रक्षोभिरहिंसितानि । यततिर्गतिकर्मा (तु. निघ २,१४)। रथः च युवयोः दिवसकरणाय जातः शिलोच्चयेनाहतः परि गच्छति द्यावापृथिव्यौ सद्यः एकेनैवाह्ना । तत्र मन्त्रः 'त्र्यम्बकस्य मूर्धानम्' (ऋ १,३०,१९) इति ॥ ८ ॥

अश्विना मधुषुत्तमो युवाकुः सोमस्तं पातमा गतं दुरोणे ।
रथो ह वां भूरि वर्पः करिक्रत्सुतावतो निष्कृतमागमिष्ठः ॥ ९ ॥

अश्विना । मधुसुत्ऽतमः । युवाकुः । सोमः । तम् । पातम् । आ । गतम् । दुरोणे ।
रथः । ह । वाम् । भूरि । वर्पः । करिक्रत् । सुतऽवतः । निःऽकृतम् । आऽगमिष्ठः ॥ ९ ॥

वेङ्कट० हे अश्विनौ! मधुसुत्तमत्वातिशयेन सोमः युवामेव कामयमानः सोमः भवति, तम् पिबतम् आ गच्छतं च गृहे । रथः ह वाम् बहु रूपम् कुर्वन् सुतवतः यजमानस्य निष्कृतम् सोमम् अतिशयेन आगन्तेति ॥ ९ ॥

इति तृतीयाष्टके चतुर्थाध्याये चतुर्थो वर्गः ॥

[५९]

विश्वामित्रो गाथिन ऋषिः । मित्रो देवता । आदितः पञ्च त्रिष्टुभः छन्दांसि, शिष्टाश्चतस्रो गायत्र्यः ।

मित्रो जनान् यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् ।
मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत ॥ १ ॥

१. नास्ति वर्ध. २. पीतवन्त वर्ध. ३. °यौ सुतवन्त मूको. ४-४ नास्ति पुस्तका दिर्° वर्ध
५. °इत्यत्र° वि°° वर्ध. ६-६. नास्ति मूको.

मित्रः । जनान् । यातयति । ब्रुवाणः । मित्रः । दाधार । पृथिवीम् । उत । द्याम् ।
मित्रः । कृष्टीः । अनिमिषा । अभि । चष्टे । मित्राय । हव्यम् । घृतऽवत् । जुहोत ॥ १ ॥

वेङ्कट० 'प्रातः कार्याधिमो' 'जनान् नियमयति' मित्रः स्तूयमानः शब्दं कुर्वन् । स एव द्यावापृथिवी बिभर्ति । मित्रः एव मनुष्यान् अनिमेषेण अभि पश्यति, तस्मै मित्राय इति. घृतवत् जुहोत' ॥ १ ॥

प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ॥२॥

प्र । सः । मित्र । मर्तः । अस्तु । प्रयस्वान् । यः । ते । आदित्य । शिक्षति । व्रतेन ।
न । हन्यते । न । जीयते । त्वाऽऊतः । न । एनम् । अंहः । अश्नोति । अन्तितः । न । दूरात् ॥

वेङ्कट० 'हे मित्र! सः मर्त्यः प्रकर्षेण अन्नवान् अस्तु, यः 'तुभ्यम्' हे अदितेः पुत्र! हविः प्रयच्छति यज्ञे सत्यादिना व्रतेन युक्तः । न शत्रुभिः हन्यते न च जीयते त्वया रक्षितः, न च एनम् रक्षः व्याप्नोति अन्तिकतः दूरात् वा ॥ २ ॥

अनमीवास इळया मदन्तो मितज्ञवो वरिमन्ना पृथिव्याः ।
आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम ॥ ३ ॥

अनमीवासः । इळया । मदन्तः । मितऽज्ञवः । वरिमन् । आ । पृथिव्याः ।
आदित्यस्य । व्रतम् । उपऽक्षियन्तः । वयम् । मित्रस्य । सुऽमतौ । स्याम ॥ ३ ॥

वेङ्कट० अरोगाः अन्नेन मदन्तः ज्ञायमानजानुकाः प्रकाशमसादात् सम्यक् पृथिव्याः विस्तीर्णे देशे वयम् अदितेः पुत्रस्य व्रतम् उपेत्य निवसन्तः मित्रस्य 'कल्याण्यां मतौ' स्याम ॥ ३ ॥

अयं मित्रो नमस्यः सुशेवो राजा सुक्षत्रो अजनिष्ट वेधाः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ ४ ॥

अयम् । मित्रः । नमस्यः । सुऽशेवः । राजा । सुऽक्षत्रः । अजनिष्ट । वेधाः ।
तस्य । वयम् । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ॥ ४ ॥

वेङ्कट० अयम्' मित्रः नमस्कार्यः सुसुखः अस्माकं सर्वेषां राजा सुबलः प्रादुरभूत् विधाता सर्वस्य । तस्य वयम् यज्ञार्हस्य स्याम तथा भजनीये सौमनसे च । 'सुमतिमनसोरेको भेदः' ॥ ४ ॥

१-१. प्रातःकालस्थ° वि° अ°. २-२. नास्ति वि° अ°. ३. सुशेनि मूको, ४. नास्ति अ°. ५. या अर्थ.
६-६. नास्ति वि° अर्थ. ७. नास्ति वि° अ°. ८. नास्ति वि° अर्थ.

म॒हाँ आ॑दि॒त्यो नम॑सोप॒सद्यो॑ यात॒यज्ज॑नो गृण॒ते सु॒शेवः॑ ।
तस्मा॑ ए॒तत् पन्य॑तमाय॒ जुष्ट॑म॒ग्नौ मि॒त्राय॑ ह॒विरा जु॑होत ॥ ५ ॥

म॒हान् । आ॒दि॒त्यः । नम॑सा । उ॒प॒ऽसद्यः॑ । या॒त॒यत्ऽज॑नः । गृ॒ण॒ते । सु॒ऽशेवः॑ ।
तस्मै॑ । ए॒तत् । पन्य॑ऽतमाय । जुष्ट॑म् । अ॒ग्नौ । मि॒त्राय॑ । ह॒विः । आ । जु॒हो॒त॒ ॥ ५ ॥

वेङ्कट० महान् आदित्यः नमस्कारेण उपसदनीयः यातयज्जनः, नियच्छन्नपि प्रकाशकरणाद् मनुष्यान्, स्तुवते च सुसुखः । 'तस्मै एतत्' स्तुत्यतमाय पर्याप्तम् अग्नौ मित्राय हविः आ जुहोत इति ॥ ५ ॥

'इति तृतीयाष्टके चतुर्थाध्याये पञ्चमो वर्गः' ॥

मि॒त्रस्य॑ चर्षणी॒धृतोऽवो॑ दे॒वस्य॑ सान॒सि । द्यु॒म्नं चि॒त्रश्र॑वस्तमम् ॥ ६ ॥

मि॒त्रस्य॑ । च॒र्ष॒णि॒ऽधृतः॑ । अवः॑ । दे॒वस्य॑ । सा॒न॒सि । द्यु॒म्नम् । चि॒त्रश्र॑वःऽतमम् ॥ ६ ॥

वेङ्कट० मित्रस्य मनुष्याणां धारयितुः देवस्य रक्षणं भजनीयम् द्युम्नम्¹ 'द्युम्नं द्योततेः, यशः' इति यास्कः (५,५), 'अत्र चित्रकीर्ति-तमम्'² ॥ ६ ॥

अ॒भि यो म॑हि॒ना दिवं॑ मि॒त्रो ब॒भूव॑ स॒प्रथाः॑ । अ॒भि श्रवो॑भिः पृथि॒वीम् ॥ ७ ॥

अ॒भि । यः । म॒हि॒ना । दिव॑म् । मि॒त्रः । ब॒भूव॑ । स॒ऽप्रथाः॑ । अ॒भि । श्रवः॑ऽभिः । पृ॒थि॒वीम् ॥ ७ ॥

वेङ्कट० अभि बभूव यः³ महत्त्वेन दिवम् मित्रः सर्वतः पृथुतमः । अपि च कीर्तिभिः⁴ पृथिवीम् अभि बभूवेति⁵ ॥ ७ ॥

मि॒त्राय॒ पञ्च॑ येमिरे॒ जना॑ अ॒भिष्टि॑शवसे । स दे॒वान् विश्वा॑न् बिभर्ति ॥ ८ ॥

मि॒त्राय॑ । पञ्च॑ । ये॒मि॒रे॒ । जनाः॑ । अ॒भिष्टि॑ऽशवसे । सः । दे॒वान् । विश्वा॑न् । बि॒भ॒र्ति॒ ॥ ८ ॥

वेङ्कट० मित्राय पञ्च जनाः आत्मानं नियच्छन्ति⁶ शत्रूणाम् अभ्येषणशीलबलाय, सः देवान् सर्वान् धारयति ॥ ८ ॥

मि॒त्रो दे॒वेष्वा॒युषु॒ जना॑य वृ॒क्तब॑र्हिषे । इष॑ इ॒ष्टव्र॑ता अकः ॥ ९ ॥

मि॒त्रः । दे॒वेषु॑ । आ॒युषु॑ । जना॑य । वृ॒क्तऽब॑र्हिषे । इषः॑ । इ॒ष्टऽव्र॑ताः । अ॒क॒रित्य॑कः ॥ ९ ॥

१. प्रागपस्तुं मूको. २-२. नास्ति वि³ अ³. ३-३. नास्ति मूको. ४. नास्ति मूको. ५. नास्ति वि³ ६. ममवदिति मूको. ७. 'वाल कर्म, 'वक्ष्यति वि¹ ³' अ³ ह कर्म.

वेङ्क० देवमनुष्यर्षीणामर्थे यो यज्ञो वृत्रहाहिंसीरिति[1], तस्मै मित्रः अभिकाङ्क्षितकर्मभाजनानि भजमानानि करोति ॥ ७ ॥

'इति तृतीयाष्टके चतुर्थेऽध्याये षष्ठो वर्गः' ॥

[६०]

'विश्वामित्रो गाथिन ऋषिः । ऋभवो देवता, षष्ठीसप्तम्योः इन्द्र ऋभवश्च जगती छन्दः' ।

इहेह वो मनसा बन्धुता नर उशिजो जग्मुरभि तानि वेदसा ।
याभिर्मायाभिः प्रतिजूतिवर्पसः सौधन्वना यज्ञियं भागमानश ॥ १ ॥

इहऽइह । वः । मनसा । बन्धुता । नरः । उशिजः । जग्मुः । अभि । तानि । वेदसा ।
याभिः । मायाभिः । प्रतिजूतिऽवर्पसः । सौधन्वनाः । यज्ञियम् । भागम् । आनश ॥ १ ॥

वेङ्क० हे नरः![2] युष्माकम् बन्धुता स्तोत्रम् इह च इह च अस्माकम् मनसा सङ्गच्छते, बहूनि कर्माणि स्तुत्यानि प्रादुर्भवन्तीत्यर्थः । तानि च[3] कामयमानाः[4] स्तोतारः अभि गच्छन्ति[5] स्तोत्रेण प्रज्ञानेन । यैः कर्मभिः मनुष्याणां वपूंषि प्रतिगच्छद्रूपाण्येवं अभिगन्तः यूयम् हे सुधन्वनः पुत्राः! यज्ञियम् भागम् प्राप्तवन्तः ॥ १ ॥

याभिः शचीभिश्चमसाँ अपिंशत यया धिया गामरिणीत चर्मणः ।
येन हरी मनसा निरतक्षत तेन देवत्वमृभवः समानश ॥ २ ॥

याभिः । शचीभिः । चमसान् । अपिंशत । यया । धिया । गाम् । अरिणीत । चर्मणः ।
येन । हरी इति । मनसा । निःऽअतक्षत । तेन । देवऽत्वम् । ऋभवः । सम् । आनश ॥ २ ॥

वेङ्क० याभिः प्रज्ञाभिः चमसान् कृतवन्तः । 'एकं चमसं चतुरः कृणोतन' (ऋ १,१६१,२) इति मन्त्रः । यया च प्रज्ञया चर्मणः गाम् अरिणीत निरगमयत । 'निश्चर्मण ऋभवो गामपिंशत' (ऋ १,११०,८) इति मन्त्रः । येन च मनसा इन्द्रस्याश्वौ कृतवन्तः । तेन सर्वेण कर्मणा यूयम् हे ऋभवः! देवत्वम् संप्राप्ताः ॥ २ ॥

इन्द्रस्य सख्यमृभवः समानशुर्मनोर्नपातो अपसो दधन्विरे ।
सौधन्वनासो अमृतत्वमेरिरे विष्ट्वी शमीभिः सुकृतः सुकृत्यया ॥ ३ ॥

इन्द्रस्य । सख्यम् । ऋभवः । सम् । आनशुः । मनोः । नपातः । अपसः । दधन्विरे ।
सौधन्वनासः । अमृतऽत्वम् । आ । ईरिरे । विष्ट्वी । शमीभिः । सुऽकृतः । सुऽकृत्यया ॥ ३ ॥

---

१. °कति यज्ञो वि देवान् मनुष्यांश्च निमिति म° वि° अ° कृपं. २-२. नास्ति मूको. ३. नास्ति कृप. ४. नास्ति वि° अ°. ५. °माय: वि° अ°. ६. °न्ताते वि° अ°.

वेङ्कट० इन्द्रस्य सखायम् ऋभवः सम्राजः तथा मनुष्यस्य सुधन्वनः पुत्राः सन्तः 'देवत्वं सर्व-कर्माणि' धारयन्ति, [illegible] । सुधन्वनः पुत्राः देवत्वम् अभिमुखं [illegible] कृत्वा कर्माणि तैः कर्मभिः [illegible] ॥ ३ ॥

इन्द्रेण याथ सरथं सुते सचाँ अथो वशानां भवथा सह श्रिया ।
न वः प्रतिमै सुकृतानि वाघतः सौधन्वना ऋभवो वीर्याणि च ॥ ४ ॥

इन्द्रेण । याथ । सऽरथम् । सुते । सचा । अथो इति । वशानाम् । भवथ । सह । श्रिया ।
न । वः । प्रतिऽमै । सुऽकृतानि । वाघतः । सौधन्वनाः । ऋभवः । वीर्याणि । च ॥ ४ ॥

वेङ्कट० इन्द्रेण सह गच्छथ समानरथं यज्ञे । अपि च कामयमानानाम् 'श्रिया सह भवथ । न युष्माकं प्रतिमानं [illegible] सुकृतानि हे [illegible] सौधन्वनाः ऋभवः । एवं वीर्याणि अपि ॥ ४ ॥

इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोममा वृषस्वा गभस्त्योः ।
धियेषितो मघवन् दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः ॥ ५ ॥

इन्द्र । ऋभुऽभिः । वाजवत्ऽभिः । सम्ऽउक्षितम् । सुतम् । सोमम् । आ । वृषस्व । गभस्त्योः ।
धिया । इषितः । मघऽवन् । दाशुषः । गृहे । सौधन्वनेभिः । सह । मत्स्व । नृऽभिः ॥ ५ ॥

वेङ्कट० [illegible] देवता । [illegible] ऋभुभिः सह [illegible] समुक्षितम् सुतम् इमम् सोमम् [illegible] । हे मघवन् । कर्मणा प्रेषितः यजमानस्य गृहे सुधन्वनः पुत्रैः सह मत्स्व मनुष्यैः ॥ ५ ॥

इन्द्र ऋभुमान् वाजवान् मत्स्वेह नोऽस्मिन्त्सवने शच्या पुरुष्टुत ।
इमानि तुभ्यं स्वसराणि येमिरे व्रता देवानां मनुषश्च धर्मभिः ॥ ६ ॥

इन्द्र । ऋभुऽमान् । वाजऽवान् । मत्स्व । इह । नः । अस्मिन् । सवने । शच्या । पुरुऽस्तुत ।
इमानि । तुभ्यम् । स्वसराणि । येमिरे । व्रता । देवानाम् । मनुषः । च । धर्मऽभिः ॥ ६ ॥

वेङ्कट० 'हे इन्द्र ! ऋभुणा युक्तः वाजेन च त्वम् मत्स्व अस्माकम् इह अस्मिन् यज्ञे' तृतीयसवने [illegible] सह [illegible] हे बहुभिः स्तुत' । [illegible] इमानि [illegible] मनुष्याणां कर्मभिः सह देवानाम् कर्माणि च [illegible] ॥ ६ ॥

१. इन्द्रेण वि' अ'; इन्द्रे वि' अ'. २ २. देवत्व' वि' अ'. ३. 'पुत्रैस् क. ४. [illegible] वि' अ'. ५. 'साम वि' अ'. ६-६. नास्ति वि' अ'. † नास्ति वि' ऋप. ७. [illegible] वि' अ'.

इन्द्र॑ ऋ॒भुभि॑र्वा॒जिभि॑र्वा॒जय॑न्नि॒ह स्तोमं॑ जरि॒तुरुप॑ याहि य॒ज्ञिय॑म् ।
श॒तं केते॑भिरिषि॒रेभि॑रा॒यवे॑ स॒हस्र॑णीथो अध्व॒रस्य॒ होम॑नि ॥ ७ ॥

इन्द्र॑ । ऋ॒भुऽभिः॑ । वा॒जिऽभिः॑ । वा॒जय॑न् । इ॒ह । स्तोम॑म् । ज॒रि॒तुः । उप॑ । या॒हि॒ । य॒ज्ञिय॑म् ।
श॒तम् । केते॑भिः । इ॒षि॒रेभिः॑ । आ॒यवे॑ । स॒हस्र॑ऽनीथः । अ॒ध्व॒रस्य॑ । होम॑नि ॥ ७ ॥

वेङ्कट० 'हे इन्द्र' वाजेन सहितैः ऋभुभिः इह वाजं कुर्वन् स्तोमम् स्तोतुः' उप गच्छ यज्ञार्हं कल्याणम् । 'शतेन प्रज्ञानैः इष्टैः सह मनुष्याय बहुनयन' भवसि त्वम् यज्ञस्य आह्वाने होमे ॥ ७ ॥

'इति तृतीयाष्टके चतुर्थाध्याये सप्तमो वर्गः' ॥

[६१]

'विश्वामित्रो गाथिन ऋषिः । उषा देवता । त्रिष्टुप् छन्दः' ।

उषो॒ वाजे॑न वाजिनि॒ प्रचे॑ताः॒ स्तोमं॑ जुषस्व गृण॒तो म॑घोनि ।
पु॒रा॒णी दे॑वि युव॒तिः पुरं॑धि॒रनु॑ व्र॒तं च॑रसि विश्ववारे ॥ १ ॥

उषः॑ । वाजे॑न । वा॒जि॒नि॒ । प्रऽचे॑ताः । स्तोम॑म् । जु॒ष॒स्व॒ । गृ॒ण॒तः । म॒घो॒नि॒ ।
पु॒रा॒णी । दे॒वि॒ । यु॒व॒तिः । पुर॑म्ऽधिः । अनु॑ । व्र॒तम् । च॒र॒सि॒ । वि॒श्व॒ऽवा॒रे॒ ॥ १ ॥

वेङ्कट० हे उषः' हविषा सह प्रज्ञावति स्तोतुः स्तोमम् च सेवस्व सुमतिमत्त्वम् 'हे अन्नवति धनवति !' । हे देवि । पुरातनी तरुणी ! बहुधीः' यागविधौ त्वं हे विश्ववरणीये ' यज्ञं लक्षीकृत्य गच्छसि ॥ १ ॥

उषो॑ दे॒व्यम॑र्त्या॒ वि भा॑हि च॒न्द्रर॑था सू॒नृता॑ ई॒रय॑न्ती ।
आ त्वा॑ वहन्तु सु॒यमा॑सो॒ अश्वा॒ हिर॑ण्यवर्णां पृथु॒पाज॑सो॒ ये ॥ २ ॥

उषः॑ । दे॒वि॒ । अम॑र्त्या । वि । भा॒हि॒ । च॒न्द्रऽर॑था । सू॒नृताः॑ । ई॒रय॑न्ती ।
आ । त्वा॒ । व॒ह॒न्तु॒ । सु॒ऽयमा॑सः । अश्वाः॑ । हिर॑ण्यऽवर्णाम् । पृ॒थु॒ऽपाज॑सः । ये ॥ २ ॥

वेङ्कट० हे उषः देवि । अमर्त्या त्वं व्युच्छ कान्तरथा 'मनुष्याणां प्रियाणि च वाचः प्रेरयन्ती । त्वाम् आ वहन्तु सुयमाः अश्वाः, हिरण्यसमानवर्णाम्' पृथुबलाः ये भवन्तीति ॥ २ ॥

उषः॑ प्रती॒ची भुव॑नानि॒ विश्वो॒र्ध्वा ति॑ष्ठस्य॒मृत॑स्य के॒तुः ।
स॒मा॒नमर्थं॑ चरणी॒यमा॑ना च॒क्रमि॑व नव्य॒स्या व॑वृत्स्व ॥ ३ ॥

१-१. इन्द्र हे वि' कपं. २. स्तोतुः वि' ग' कपं. ३-३. नास्ति वि' अ'. ४-४. नास्ति मूको. ५-५. यागः‥‥वहन् वि' अ'. † त्वा वि' अ कपं. ‡ नास्ति वि' कपं.

उषः । प्रतीची । भुवनानि । विश्वा । ऊर्ध्वा । तिष्ठसि । अमृतस्य । केतुः ।

समानम् । अर्थम् । चरणीयमाना । चक्रम्ऽइव । नव्यसि । आ । ववृत्स्व ॥ ३ ॥

वेङ्कट० हे उषः ! त्वम् सर्वाण्येव भुवनानि 'प्रतिमुखा गच्छन्ती ऊर्ध्वा तिष्ठसि [illegible] । [illegible] 'चक्रमिव' [illegible] आ ववृत्स्व इति ॥ ३ ॥

अव॑ स्यूमे॑व चिन्व॒ती म॒घोन्यु॒षा या॑ति॒ स्वस॑रस्य॒ पत्नी॑ ।
स्व१॒॑र्जन॑न्ती सु॒भगा॑ सु॒दंसा॒ आन्ता॑द्दि॒वः प॑प्रथ॒ आ पृ॑थि॒व्याः ॥ ४ ॥

अव॑ । स्यूम॑ऽइव । चि॒न्व॒ती । म॒घोनी॑ । उ॒षाः । या॒ति॒ । स्वस॑रस्य । पत्नी॑ ।

स्वः॑ । जन॑न्ती । सु॒ऽभगा॑ । सु॒ऽदंसाः॑ । आ । अन्ता॑त् । दि॒वः । प॒प्र॒थे॒ । आ । पृ॒थि॒व्याः ॥ ४ ॥

वेङ्कट० '[illegible] सर्वे भूतान्य[illegible] प्राप्नुवन्ति, तत उषाः सुखं मनुष्याणाम्' चिन्वानेव [illegible] दिशि प्रादुर्भवति धनवती उषाः अहः पत्नी । [illegible] 'सर्वमेव जनयन्ती सुभगा शोभनकर्मा [illegible] अन्तात् [illegible] आ च पृथिव्याः अन्तादिति' ॥ ४ ॥

अच्छा॑ वो दे॒वीमु॒षसं॑ विभा॒तीं प्र वो॑ भरध्वं॒ नम॑सा सुवृ॒क्तिम् ।
ऊ॒र्ध्वं म॑धु॒धा दि॒वि पाजो॑ अश्रे॒त् प्र रो॑च॒ना रु॑रुचे र॒ण्वसं॑दृक् ॥ ५ ॥

अच्छ॑ । वः॒ । दे॒वीम् । उ॒षस॑म् । वि॒ऽभा॒तीम् । प्र । वः॒ । भ॒र॒ध्व॒म् । नम॑सा । सु॒ऽवृ॒क्तिम् ।

ऊ॒र्ध्वम् । म॒धु॒ऽधाः । दि॒वि । पाजः॑ । अ॒श्रे॒त् । प्र । रो॒च॒ना । रु॒रु॒चे॒ । र॒ण्वऽसं॑दृक् ॥ ५ ॥

वेङ्कट० 'सुवृक्तीम्' [illegible] 'देवीम्' प्रति यूयं नमस्कारेण सह स्तुतिम् प्र भरध्वम् । [illegible] ॥ ५ ॥

ऋ॒ताव॑री दि॒वो अ॒र्कैर॑बोध्या रे॒वती॒ रोद॑सी चि॒त्रम॑स्थात् ।
आ॒य॒तीम॑ग्न उ॒षसं॑ विभा॒तीं वा॒ममे॑षि॒ द्रवि॑णं॒ भिक्ष॑माणः ॥ ६ ॥

ऋ॒तऽव॑री । दि॒वः । अ॒र्कैः । अ॒बो॒धि॒ । आ । रे॒वती॑ । रोद॑सी॒ इति॑ । चि॒त्रम् । अ॒स्था॒त् ।

आ॒ऽय॒तीम् । अ॒ग्ने॒ । उ॒षस॑म् । वि॒ऽभा॒तीम् । वा॒मम् । ए॒षि॒ । द्रवि॑णम् । भिक्ष॑माणः ॥ ६ ॥

१-१. नास्ति वि' मूँ. † नास्ति वि'. ‡ [illegible] °ती वि' [illegible]. २. नास्ति मूको.
३-३. नास्ति वि' मूँ. †-† [illegible] मूको.

वेङ्कट० वाजिभिर्युक्ता दिवः सकाशात् प्रातः प्रबुध्यमाना स्तोतॄणां स्तुतिभिर्युक्ता 'प्रबुध्यते शायते। ... सर्वा ... द्यावापृथिवी ... आ तिष्ठति' । ... हे अग्ने ! ... ॥ ६ ॥

ऋतस्य बुध्न उषसामिषण्यन् वृषा मही रोदसी आ विवेश ।
मही मित्रस्य वरुणस्य माया चन्द्रेव भानुं वि दधे पुरुत्रा ॥ ७ ॥

ऋतस्य । बुध्ने । उषसाम् । इषण्यन् । वृषा । मही इति । रोदसी इति । आ । विवेश ।
मही । मित्रस्य । वरुणस्य । माया । चन्द्राऽइव । भानुम् । वि । दधे । पुरुऽत्रा ॥ ७ ॥

वेङ्कट० 'उदकस्य मूले इच्छन् इच्छन् अग्निः कामानां वर्षिता द्यावापृथिवी तेजसा व्याप्नोति', 'उषसामन्ते' । अपि वा ... मूले उषसः इच्छन् अग्निः ... व्याप्नोति द्यावापृथिवी इत्यर्थः । महती मित्रावरुणयोः प्रज्ञा । यथा रात्रौ ... चन्द्रम् ... बहुषु देशेषु चकार ... मित्रस्य माया सूर्यम् 'अनेकेषु देशेषु वि दधे इति' ॥ ७ ॥

'इति तृतीयाष्टके चतुर्थाध्याये अष्टमो वर्गः' ॥

[६२]

'विश्वामित्रो गाथिन ऋषिः, अन्त्यस्य तृचस्य जमदग्निर्वा । प्रथमस्य तृचस्य इन्द्रावरुणौ देवता, द्वितीयस्य बृहस्पतिः, तृतीयस्य पूषा, चतुर्थस्य सविता, पञ्चमस्य सोमः, षष्ठस्य मित्रावरुणौ । गायत्री छन्दः, आद्यस्तृचस्त्रिष्टुभः' ।

इमा उ वां भृमयो मन्यमाना युवावते न तुज्या अभूवन् ।
क्व१ त्यदिन्द्रावरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः ॥ १ ॥

इमाः । ऊँ इति । वाम् । भृमयः । मन्यमानाः । युवाऽवते । न । तुज्याः । अभूवन् ।
क्व । त्यत् । इन्द्रावरुणा । यशः । वाम् । येन । स्म । सिनम् । भरथः । सखिऽभ्यः ॥ १ ॥

वेङ्कट० 'भ्रमणशीला अपि इमाः' प्रजाः वाम् अर्चन्त्यः अपि युवाभ्यां सहायाय बाधकानाम् बाधकैः न भवन्ति । 'हे इन्द्रावरुणौ ! क्व तत् यशः युवयोरिदम्, येन यशसा ... अन्नम् भरथः ॥ १ ॥

अयमु वां पुरुतमो रयीयञ्छश्वत्तममवसे जोहवीति ।
सजोषाविन्द्रावरुणा मरुद्भिर्दिवा पृथिव्या शृणुतं हवं मे ॥ २ ॥

१-१. नास्ति वि' अ'. †-† ... वि' ... २-२ नास्ति वि' अ'. ३. ... मूको.
४. '... ... ५-५. नास्ति मूको. ६. नास्ति ...

अयम् । वाम् । पुरुऽतमः । रयिऽयन् । शश्वत्ऽतमम् । अवसे । जोहवीति ।
सऽजोषौ । इन्द्रावरुणा । मरुत्ऽभिः । दिवा । पृथिव्या । शृणुतम् । हवम् । मे ॥ २ ॥

वेङ्कट० अयम् स्तोता रयिमिच्छन् सर्वदा वाम् आह्वयत्यवसे पुरुतमः 'बहुस्तुतिक धनमिच्छन्' । तथा सति हे इन्द्रावरुणौ!¹ द्यावापृथिवीभ्याम् मरुद्भिः च सहितौ शृणुतम् मदीयम् आह्वानम् इति ॥ २ ॥

अस्मे तदिन्द्रावरुणा वसु ष्यादस्मे रयिर्मरुतः सर्ववीरः ।
अस्मान् वरूत्रीः शरणैरवन्त्वस्मान् होत्रा भारती दक्षिणाभिः ॥ ३ ॥

अस्मे इति । तत् । इन्द्रावरुणा । वसु । स्यात् । अस्मे इति । रयिः । मरुतः । सर्वऽवीरः ।
अस्मान् । वरूत्रीः । शरणैः । अवन्तु । अस्मान् । होत्रा । भारती । दक्षिणाभिः ॥ ३ ॥

वेङ्कट० हे इन्द्रावरुणौ! 'युवयोः तत् प्रसिद्धम् वसु अस्माकम् अस्तु । हे मरुतः!' अस्माकमेव सर्ववीरः रयिः अस्तु । देवपत्न्यश्च अस्मान् एव गृहैः समृद्धधनैः अवन्तु, अस्मान् एव 'होत्रा भारती च देव्यौ धनैरिति' ॥ ३ ॥

बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य । रास्व रत्नानि दाशुषे ॥ ४ ॥

बृहस्पते । जुषस्व । नः । हव्यानि । विश्वऽदेव्य । रास्व । रत्नानि । दाशुषे ॥ ४ ॥

वेङ्कट० 'हे बृहस्पते! सेवस्व अस्माकम् हव्यानि हे विश्वेभ्यो देवेभ्यो हित! । देहि† च धनानि प्रयच्छते मह्यम्' ॥ ४ ॥

शुचिमर्कैर्बृहस्पतिमध्वरेषु नमस्यत । अनाम्योज आ चके ॥ ५ ॥

शुचिम् । अर्कैः । बृहस्पतिम् । अध्वरेषु । नमस्यत । अनामि । ओजः । आ । चके ॥ ५ ॥

वेङ्कट० 'शुचिम् बृहस्पतिम् स्तोत्रैः हविर्भिः यज्ञेषु परिचरत, ‡तस्य अनमनशीलम्‡ बलम् कामये' ॥ ५ ॥

⁵इति तृतीयाष्टके चतुर्थाध्याये नवमो वर्गः⁵ ॥

वृषभं चर्षणीनां विश्वरूपमदाभ्यम् । बृहस्पतिं वरेण्यम् ॥ ६ ॥

वृषभम् । चर्षणीनाम् । विश्वऽरूपम् । अदाभ्यम् । बृहस्पतिम् । वरेण्यम् ॥ ६ ॥

वेङ्कट० 'वर्षितारम् मनुष्याणाम् बहुरूपम्' हिंसितुमशक्यम् बृहस्पतिम् वरणीयं नमस्यतेति ॥ ६ ॥

इयं ते पूषन्नाघृणे सुष्टुतिर्देव नव्यसी । अस्माभिस्तुभ्यं शस्यते ॥ ७ ॥

इयम् । ते । पूषन् । आघृणे । सुऽस्तुतिः । देव । नव्यसी । अस्माभिः । तुभ्यम् । शस्यते ॥ ७ ॥

१-१. नास्ति वि॰ अ॰. २-२. युक्तिमत् वि॰ अ॰. ३-३. नास्ति वि॰ अ॰. † देहि धनं
४-४. नास्ति वि॰ अ॰. ‡-‡ 'नमनशीलम्' मूको; नमयासमर्थीलं इति सम्भाव्यः. ५-५ नास्ति मूको.
६-६. नास्ति वि॰, युक्तिम् अ॰.

वेङ्कट० हे पूषन्! आघृणीवसो! 'देव, मधस्त' इयम् शोभना स्तुतिः अस्माकम्, त्वदीयत्वर्थम् शस्यते ॥ ७ ॥

तां जु॑षस्व॒ गिरं॒ मम॑ वाज॒यन्ती॑मवा॒ धिय॑म् । व॒धू॒युरि॑व॒ योष॑णाम् ॥ ८ ॥

ताम् । जु॒षस्व॒ । गिर॑म् । मम॑ । वा॒ज॒ऽयन्ती॑म् । अ॒व॒ । धिय॑म् । व॒धू॒युःऽइ॑व । योष॑णाम् ॥ ८ ॥

वेङ्कट० 'ताम् मम गिरम्' सेवस्व । अन्नमिच्छन्तीम् मम बुद्धिम् अन्नप्रदानेन' रक्षस्व अभिगच्छ वा, वधूयुः वरः । 'सोमो वधूयुरभवत्' (ऋ १०,८५,९) इति मन्त्रः । स यथा योषितं युवतिमभिगच्छति ॥ ८ ॥

यो विश्वा॑भि वि॒पश्य॑ति॒ भुव॑ना॒ सं च॒ पश्य॑ति । स नः॑ पू॒षावि॒ता भु॑वत् ॥ ९ ॥

यः । विश्वा॑ । अ॒भि । वि॒ऽपश्य॑ति । भुव॑ना । सम् । च॒ । पश्य॑ति । सः । नः॒ । पू॒षा । अ॒वि॒ता । भु॒व॒त् ॥ ९ ॥

वेङ्कट० 'यः पूषा सर्वाण्येव भुवनानि' अभि विपश्यति, 'सह च पश्यति' । प्रत्येकं च कात्स्न्र्येन च' योजयति सर्वाण्यपीत्यर्थः । सः पूषा अस्माकम् रक्षकः भवतु ॥ ९ ॥

तत् स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि । धियो॒ यो नः॑ प्रचो॒दया॑त् ॥ १० ॥

तत् । स॒वि॒तुः । वरे॑ण्यम् । भर्गः॑ । दे॒वस्य॑ । धी॒म॒हि॒ । धियः॑ । यः । नः॒ । प्र॒ऽचो॒दया॑त् ॥ १० ॥

वेङ्कट० 'तत् सवितुः देवस्य वरणीयं तेजः ध्यायेम, यः अस्माकम्' बुद्धिम् कर्मसु प्रचोदयति ॥ १० ॥

'इति तृतीयाष्टके चतुर्थाध्याये दशमो वर्गः' ॥

दे॒वस्य॑ सवि॒तुर्व॒यं वा॑ज॒यन्तः॒ पुरं॑ध्या । भग॑स्य रा॒तिमी॑महे ॥ ११ ॥

दे॒वस्य॑ । स॒वि॒तुः । व॒यम् । वा॒ज॒ऽयन्तः॑ । पुर॑म्ऽध्या । भग॑स्य । रा॒तिम् । ई॒म॒हे॒ ॥ ११ ॥

वेङ्कट० देवस्य सवितुः वयम् अन्नमिच्छन्तः प्रज्ञया भगस्य दानम् याचामहे ॥ ११ ॥

दे॒वं नरः॑ सवि॒तारं॒ विप्रा॑ य॒ज्ञैः सु॑वृ॒क्तिभिः॑ । न॒म॒स्यन्ति॑ धि॒येषि॒ताः ॥ १२ ॥

दे॒वम् । नरः॑ । स॒वि॒तार॑म् । विप्राः॑ । य॒ज्ञैः । सु॒वृ॒क्तिऽभिः॑ । न॒म॒स्यन्ति॑ । धि॒या । इ॒षि॒ताः ॥ १२ ॥

वेङ्कट० "देवम् मेधाविनः† मनुष्याः सवितारम् यज्ञैः शोभनस्तुतिभिः" परिचरन्ति प्रज्ञया प्रेरिताः ॥ १२ ॥

सोमो॑ जिगाति गातु॒विद् दे॒वाना॑मेति निष्कृ॒तम् । ऋ॒तस्य॒ योनि॑मा॒सद॑म् ॥ १३ ॥

सोमः॑ । जि॒गा॒ति॒ । गा॒तु॒ऽवित् । दे॒वाना॑म् । ए॒ति॒ । निः॒ऽकृ॒तम् । ऋ॒तस्य॑ । योनि॑म् । आ॒ऽसद॑म् ॥

वेङ्कट० सोमः गच्छति मार्गवित्', देवानाम् प्राप्नोति संस्कृतस्थानम्, "(स्थो?)‌ऽयम् विशाद्यदात यज्ञस्य स्थानम् आसदम्† इति" ॥ १३ ॥

१-१. हे मनस्वे वि' अ'. २-२. नास्ति वि' अ'. ३. °धाने कपं; °आने वि'. ४-४ नास्ति वि' † नास्ति अ'. ५. ऋजुं म' वि' कपं. ६-६. नास्ति मूको. ७-७ नास्ति वि' अ'. † नास्ति वि' अपं. ८. मा.†' वि' कपं. ९. संस्तुत. वि'; °स्तुतयो वि'; °स्तो·· अ' १०-१०. नास्ति वि' अ'. † नास्तनिति मूको.

सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे । अनमीवा इषस्करत् ॥ १४ ॥

सोमः । अस्मभ्यम् । द्विऽपदे । चतुःऽपदे । च । पशवे । अनमीवाः । इषः । करत् ॥ १४ ॥

वेङ्कट० सोमः अस्मभ्यम् आरोग्याणि अन्नानि करोतु, एवमन्यस्मै द्विपदे चतुष्पदे च इति ॥ १४ ॥

अस्माकमायुर्वर्धयन्नभिमातीः सहमानः । सोमः सधस्थमासदत् ॥ १५ ॥

अस्माकम् । आयुः । वर्धयन् । अभिऽमातीः । सहमानः । सोमः । सधऽस्थम् । आ । असदत् ॥ १५ ॥

वेङ्कट० अस्माकम् 'जीवितम् वर्धयन् शत्रून् अभिभवन् सोमः सदनम् आ सीदतु' ॥ १५ ॥

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजांसि सुक्रतू ॥ १६ ॥

आ । नः । मित्रावरुणा । घृतैः । गव्यूतिम् । उक्षतम् । मध्वा । रजांसि । सुक्रतू इति सुऽक्रतू ॥ १६ ॥

वेङ्कट० अस्त्यस्मिन् 'ऋचो' ग्रामदास्य [illegible], वैश्वामित्र एवैत्यपरमिति । हे मित्रावरुणौ ! अस्माकम् गवां मार्गम् उदकेन सिञ्चतम्, एवं सर्वानेव लोकान् पार्थिवान् उदकेन सिञ्चतम् हे सुकर्माणौ ! इति ॥ १६ ॥

उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः । द्राघिष्ठाभिः शुचिव्रता ॥ १७ ॥

उरुऽशंसा । नमःऽवृधा । मह्ना । दक्षस्य । राजथः । द्राघिष्ठाभिः । शुचिऽव्रता ॥ १७ ॥

वेङ्कट० बहुस्तुतौ वर्धयितारावन्नस्य बलस्य महत्त्वेन 'राजथः दीर्घतमाभिः [illegible]' हे शुचिकर्माणौ ! इति ॥ १७ ॥

गृणाना जमदग्निना योनावृतस्य सीदतम् । पातं सोममृतावृधा ॥ १८ ॥

गृणाना । जमत्ऽअग्निना । योनौ । ऋतस्य । सीदतम् । पातम् । सोमम् । ऋतऽवृधा ॥ १८ ॥

वेङ्कट० स्तूयमानौ जमदग्निना यज्ञस्य स्थाने वेद्याम् निषीदतम् । पिबतम् च सोमम् यज्ञस्य 'वर्धयितारम्' । अथ यथा विश्वामित्र एव [illegible] — जमदग्निना पुरा स्तूयमानौ युवाम् तस्य यज्ञ इति ॥ १८ ॥

'इति तृतीयाष्टके चतुर्थोऽध्याये एकादशो वर्गः' ॥



इति ऋग्वेदे सभाष्ये तृतीयं मण्डलं समाप्तम् ॥



१. [illegible] वि[illegible] मूको. २-२. नास्ति वि॰ मूको. ३. [illegible] वि॰ [illegible]. ४-४. [illegible] वि॰ मू॰. † [illegible] वि॰ [illegible]. ५. नास्ति वि॰ मू॰, [illegible] वि॰ [illegible]. ६-६. नास्ति मू॰. ७-७. नास्ति मूको.

ऋग्वेदे सभाष्ये

चतुर्थं मण्डलम्

[१]

¹वामदेवो गौतम ऋषिः । अग्निर्देवता, द्वितीयादितिसृणां वरुणो वा । त्रिष्टुप् छन्दः,
प्रथमा अष्टिः, द्वितीया अतिजगती, तृतीया धृतिः¹ ।

त्वां ह्यग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वा न्येरिरे ।
अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं विश्वमादेवं जनत प्रचेतसम् ॥१॥

त्वाम् । हि । अग्ने । सदम् । इत् । सऽमन्यवः । देवासः । देवम् । अरतिम् । निऽएरिरे । इति । क्रत्वा ।
निऽएरिरे । अमर्त्यम् । यजत । मर्त्येषु । आ । देवम् । आऽदेवम् । जनत । प्रऽचेतसम् ।
विश्वम् । आऽदेवम् । जनत । प्रऽचेतसम् ॥ १ ॥

वेङ्कट० गौतमो वामदेवश्चतुर्थमण्डलमपश्यत् (बृ. सर्वा २,४,१) । त्वाम् हि 'अग्ने' सदा एव सकामाः देवाः देवम् गमनशीलम् न्येरिरे, मनुष्यलोके प्रेरितवन्तः, प्रज्ञया कर्मणा² वा । पुनः न्येरिरे इत्यादिकं पूरणं पादस्येवमिति । तमिमं 'मर्त्येषु वर्तमानम् अमर्त्यम् देवम् यजत‡ । तमिमम् आदेवम् [कर्मणि देवयमानाः] जनयत प्रकृष्टज्ञानं³ सर्वेषु... ॥ १ ॥

स भ्रातरं वरुणमग्न आ ववृत्स्व देवाँ अच्छा सुमती यज्ञवनसं ज्येष्ठं यज्ञवनसम् ।
ऋतावानमादित्यं चर्षणीधृतं राजानं चर्षणीधृतम् ॥ २ ॥

सः । भ्रातरम् । वरुणम् । अग्ने । आ । ववृत्स्व । देवान् । अच्छ । सुऽमती । यज्ञऽवनसम् ।
ज्येष्ठम् । यज्ञऽवनसम् । ऋतऽवानम् । आदित्यम् । चर्षणिऽधृतम् । राजानम् । चर्षणिऽधृतम् ॥२॥

वेङ्कट० अग्निवरुणयोः... भवन्ति । ...⁴ । स त्वम् अग्ने [अभिमुखम् देवान् प्रति तव भ्रातृस्थानीयं वरुणम्] अपि आवर्तय, ...⁵, स्तोतृविषयया सुमत्या सह । यज्ञस्य संभक्तारम्⁴ प्रशस्यतमम् सत्यवन्तम् अदितेः पुत्रम् मनुष्याणां धारयितारम् राजानम् इति ॥ २ ॥

१-१ नास्ति मूको. २-२. न ' कर्मणा वि' को. † वर्जयित्वा मूको. ३. ... वि' को. †-† ... मूको; ... प्रस्तावः ‡ द्र. वेंप ६,२५५,८ c. ४-४. ... वि' को †-† ... वि' छपं. ५. मनुष्या... वि' को.

सखे सखायमभ्या ववृत्स्वाशुं न चक्रं रथ्येव रंह्यास्मभ्यं दस्म रंह्या ।
अग्ने मृळीकं वरुणे सचा विदो मरुत्सु विश्वभानुषु ।
तोकाय तुजे शुशुचान शं कृध्यस्मभ्यं दस्म शं कृधि ॥ ३ ॥

सखे । सखायम् । अभि । आ । ववृत्स्व । आशुम् । न । चक्रम् । रथ्याऽइव । रंह्या । अस्मभ्यम् । दस्म । रंह्या ।
अग्ने । मृळीकम् । वरुणे । सचा । विदः । मरुत्ऽसु । विश्वऽभानुषु ।
तोकाय । तुजे । शुशुचान । शम् । कृधि । अस्मभ्यम् । दस्म । शम् । कृधि ॥ ३ ॥

संस्कृत० 'हे सखायस्य सखे! त्वमस्मान् अभि आ वर्तय सखायम्' शीघ्रगामिनम् इव रथस्य चक्रम् रथ्येव रंहणशीलेनास्मान् अभिमुखय हे 'दर्शनीय'। हे अग्ने! सुखकरं वरुणे सह विन्दस्व तेन सह सर्वदीप्ति तथा मरुत्सु च सर्वतोदीप्तेषु। शं त्वं 'पुत्राय तत्पुत्राय' च सुखं कुरु हे दीप्यमान! अस्मभ्यम् कुरु ॥ ३ ॥

त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेळोऽव यासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् ॥ ४ ॥

त्वम् । नः । अग्ने । वरुणस्य । विद्वान् । देवस्य । हेळः । अव । यासिसीष्ठाः ।
यजिष्ठः । वह्निऽतमः । शोशुचानः । विश्वा । द्वेषांसि । प्र । मुमुग्धि । अस्मत् ॥ ४ ॥

संस्कृत० 'त्वम् अस्माकम् हे अग्ने' वरुणस्य क्रोधम् अपाकुरु (जानन् अव यजस्व)। यष्टृतमः वोढृतमः शोशुचानः सर्वाण्येव द्वेष्टॄणि पापानि अस्मत्तः प्र मुञ्च ॥ ४ ॥

स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणं रराणो वीहि मृळीकं सुहवो न एधि ॥ ५ ॥

सः । त्वम् । नः । अग्ने । अवमः । भव । ऊती । नेदिष्ठः । अस्याः । उषसः । विऽउष्टौ ।
अव । यक्ष्व । नः । वरुणम् । रराणः । वीहि । मृळीकम् । सुऽहवः । नः । एधि ॥ ५ ॥

संस्कृत० 'स त्वम्' 'अस्माकम् हे अग्ने! रक्षणेन सह रक्षणेन भव।' उषसः व्युष्टौ अन्तिकतमः। स त्वमस्माकम् अव यज वरुणम् शान्तहृदयं कुरु, रममाणः सुखकरं हविश्च भक्षय। स्वाह्वानैः आह्वानार्हः भव ॥ ५ ॥

इति तृतीयाष्टके चतुर्थाध्याये द्वादशो वर्गः ॥

१-१. नास्ति वि॰ अ॰. २. 'रंहणशीलया' रूपं. ३-३. 'शीघ्र…म वि॰ अ॰'. ४-४. तत्पुत्राय पुत्राय वि॰ रूपे. ५-५. नास्ति वि॰ अ॰. ६-६. … मूको. ७-७. नास्ति वि॰. ८. 'व वि॰' क. ९. 'क्रय वि॰' क. १०. नास्ति मूको. ११-११. नास्ति मूको.

अस्य श्रेष्ठा सुभगस्य संदृग्देवस्य चित्रतमा मर्त्येषु ।
शुचि घृतं न तप्तमघ्न्यायाः स्पार्हा देवस्य मंहनेव धेनोः ॥ ६ ॥

अस्य । श्रेष्ठा । सुऽभगस्य । सम्ऽदृक् । देवस्य । चित्रऽतमा । मर्त्येषु ।
शुचि । घृतम् । न । तप्तम् । अघ्न्यायाः । स्पार्हा । देवस्य । मंहनाऽइव । धेनोः ॥ ६ ॥

वेङ्कट० अस्य प्रशस्यतमा शोभनधनस्य सन्दृष्टिः अनुग्रहात्मिका देवस्य पूज्यतमा स्तोतृषु मर्त्येषु दीप्तम् घृतम् इव तप्तं गोः स्पृहणीया भवति संदृक् यथा धेनोः पूजेव एव प्रदानात्मिका स्पृहणीयेति ॥ ६ ॥

त्रिरस्य ता परमा सन्ति सत्या स्पार्हा देवस्य जनिमान्यग्नेः ।
अनन्ते अन्तः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः ॥ ७ ॥

त्रिः । अस्य । ता । परमा । सन्ति । सत्या । स्पार्हा । देवस्य । जनिमानि । अग्नेः ।
अनन्ते । अन्तः । परिऽवीतः । आ । अगात् । शुचिः । शुक्रः । अर्यः । रोरुचानः ॥ ७ ॥

वेङ्कट० त्रीणि अस्य अग्नेः देवस्य तानि पुराणानि सत्यानि स्पृहणीयानि जन्मानि सन्ति । "दिवस्परि प्रथमं जज्ञे अग्निः" (ऋ १०,४५,१) इति । सोऽयम् अनन्तेऽन्तरिक्षे मध्ये ज्वालाभिः परिवीतः आ गच्छति शुचिरूपः शुक्रः [illegible] (ऋ ८,[illegible]), सर्वस्वामि इव भृशं दीप्यमानः ॥ ७ ॥

स दूतो विश्वेदभि वष्टि सद्मा होता हिरण्यरथो रंसुजिह्वः ।
रोहिदश्वो वपुष्यो विभावा सदा रण्वः पितुमतीव संसत् ॥ ८ ॥

सः । दूतः । विश्वा । इत् । अभि । वष्टि । सद्म । होता । हिरण्यऽरथः । रंसुऽजिह्वः ।
रोहित्ऽअश्वः । वपुष्यः । विभाऽवा । सदा । रण्वः । पितुमतीऽइव । सम्ऽसत् ॥ ८ ॥

वेङ्कट० 'स' देवानां दूतः सर्वाणि एव अभि कामयते गृहाणि होता हिरण्मयरथः रमणीयजिह्वः ज्वालाजिह्वः रोहिद्वर्णाश्वः वपुषे हितः, विभावा प्रकाशनवान्, [illegible] सदा रमणीयः अन्नवतीव गृहम् ॥ ८ ॥

स चेतयन्मनुषो यज्ञबन्धुः प्र तं मह्या रशनया नयन्ति ।
स क्षेत्यस्य दुर्यासु साधन्देवो मर्तस्य सधनित्वमाप ॥ ९ ॥

१. नास्ति वि' अ' २-२. नास्ति वि' अ'. † नास्ति वि' अ' [illegible] ३. पूजेव वि' अ'. पूजेव च वि' अप. ४-४. पुराण…नि वि' अ'. ५. नास्ति मूको. ६-६ [illegible] वि' अ' ७. [illegible] वि' अ' ८-८. [illegible] वि' अप.

सः । चेतयत् । मनुषः । यज्ञऽबन्धुः । प्र । तम् । मह्या । रशनया । नयन्ति ।
सः । क्षेति । अस्य । दुर्यासु । साधन् । देवः । मर्तस्य । सधनिऽत्वम् । आप ॥ ९ ॥

वेङ्कट० सः चेतयति मनुष्यान् यज्ञबन्धुः । प्र नयन्ति तम् पुरस्तात् महत्या रशनया, रश्मिभिर्ज्वलनकर्मा[1] । सः क्षेति वसति यजमानस्य अस्य गृहेषु कर्माणि साधयन् । किं बहुना देवः मर्त्यस्यापि सधनित्वम् आप्नोति सधनो भवति, प्रयच्छतीत्यर्थः ॥ ९ ॥

स नु नो अग्निर्नयतु प्रजानन्नच्छा रत्नं देवभक्तं यदस्य ।
धिया यद्विश्वे अमृता अकृण्वन्द्यौष्पिता जनिता सत्यमुक्षन् ॥ १० ॥

सः । नु । नः । अग्निः । नयतु । प्रऽजानन् । अच्छ । रत्नम् । देवऽभक्तम् । यत् । अस्य ।
धिया । यत् । विश्वे । अमृताः । अकृण्वन् । द्यौः । पिता । जनिता । सत्यम् । उक्षन् ॥ १० ॥

वेङ्कट० सः क्षिप्रम् अस्मान् आप्नोतु प्रकर्षेण जानन्, यत् अस्य अग्नेः देवैरपि सम्भजनीयम् उत्तमम् रत्नम् तत् प्रतीति । कर्मणा[2] यत् विश्वे देवाः अकुर्वन् उत्पादितवन्तः, सत्यभूतं तत् अत्र द्युप्रभृतयः स्वकर्मणा सिञ्चन् । तत्र पिता[3] इत्यन्तरिक्षलोकमाह । जनिता[†] इति पार्थिवम् अग्निम् । त्रयो लोका हविर्भिरुक्षन्तीत्यर्थः[4] ॥ १० ॥

'इति तृतीयाष्टके चतुर्थाध्याये त्रयोदशो वर्गः' ॥

स जायत प्रथमः पस्त्यासु महो बुध्ने रजसो अस्य योनौ ।
अपादशीर्षा गुहमानो अन्तायोयुवानो वृषभस्य नीळे ॥ ११ ॥

सः । जायत । प्रथमः । पस्त्यासु । महः । बुध्ने । रजसः । अस्य । योनौ ।
अपात् । अशीर्षा । गुहमानः । अन्ता । आऽयोयुवानः । वृषभस्य । नीळे ॥ ११ ॥

वेङ्कट० सः प्रादुरभूत् पूर्वम्, पस्त्या इति नदीनामधेयम्, नदीषु 'पस्त्यासु चक्रे वरुणः सधस्थम्' (ऋ १०,७) इति मन्त्रः[5] । महतः अन्तरिक्षस्य मूले अस्य पार्थिवस्य लोकस्य उत्पत्तिकारणे[‡] पादरहितः शिरोवर्जितः पिण्डीभूतः[6] छादयन् तेजसा अन्तानि पुनःपुनरात्मना मिश्रयन् पर्जन्यस्य वर्षकस्य वा नीळे अन्तरिक्षे । एष्योऽग्निः ... ॥ ११ ॥

प्र शर्ध आर्त प्रथमं विपन्याँ ऋतस्य योना वृषभस्य नीळे ।
स्पार्हो युवा वपुष्यो विभावा सप्त प्रियासोऽजनयन्त वृष्णे ॥ १२ ॥

१-१. 'सततमो·· वा म° वि' आ'. २-२. नास्ति वि' अ'. † ग मूको. ३-३. 'रिख· ·वि' आ'. ‡ कनवितः वि' छपे. ४-४. नास्ति मूको. ५-५. मन्त्र···रहे वि' आ'. ६. 'ने वि' छपे.

प । शर्धः । आर्त । प्रथमम् । विपन्या । ऋतस्य । योना । वृषभस्य । नीळे ।
स्पार्हः । युवा । वपुष्यः । विभाऽवा । सप्त । प्रियासः । अजनयन्त । वृष्णे ॥ १२ ॥

वेङ्कट० [illegible] प्र [illegible] ऋतस्य योनौ [illegible] 'स्पार्हः [illegible] युवा वपुष्यः [illegible]' । [illegible] सप्त [illegible] प्रियाः [illegible] ॥ १२ ॥

अस्माकमत्र पितरो मनुष्या अभि प्र सेदुर्ऋतमाशुषाणाः ।
अश्मव्रजाः सुदुघा वव्रे अन्तरुदुस्रा आजन्नुषसो हुवानाः ॥ १३ ॥

अस्माकम् । अत्र । पितरः । मनुष्याः । अभि । प्र । सेदुः । ऋतम् । आशुषाणाः ।
अश्मऽव्रजाः । सुऽदुघाः । वव्रे । अन्तः । उत् । उस्राः । आजन् । उषसः । हुवानाः ॥ १३ ॥

वेङ्कट० अस्माकम् अत्र [illegible] मनुष्याः अङ्गिरसः अभि प्र [illegible] [illegible] । [illegible] अन्तः [illegible] अङ्गिरसः उषसः [illegible] ॥ १३ ॥

ते मर्मृजत ददृवांसो अद्रिं तदेषामन्ये अभितो वि वोचन् ।
पश्वयन्त्रासो अभि कारमर्चन्विदन्त ज्योतिश्चकृपन्त धीभिः ॥ १४ ॥

ते । मर्मृजत । ददृऽवांसः । अद्रिम् । तत् । एषाम् । अन्ये । अभितः । वि । वोचन् ।
पश्वऽयन्त्रासः । अभि । कारम् । अर्चन् । विदन्त । ज्योतिः । चकृपन्त । धीभिः ॥ १४ ॥

वेङ्कट० ते अङ्गिरसः पणीन् [illegible] । [illegible] अन्ये [illegible] मनुष्याः [illegible] वि वोचन् । [illegible] कारम् अभि [illegible] । [illegible] ज्योतिः [illegible] ॥ १४ ॥

ते गव्यता मनसा दृध्रमुब्धं गा येमानं परि षन्तमद्रिम् ।
दृळ्हं नरो वचसा दैव्येन व्रजं गोमन्तमुशिजो वि वव्रुः ॥ १५ ॥

१-१ [illegible] वि[१] मू[१]. २. [illegible]. ३-३. [illegible] वि[१] मू[१], [illegible] वि[१] मू[१]. † [illegible] वि[१] [illegible]. ४. [illegible]. ५-५. [illegible] वि[१] मू[१]. † [illegible] वि[१] [illegible] ‡ [illegible] वि[१] ६. [illegible] वि[१] [illegible]. ७. [illegible] वि[१] [illegible].

ते । गव्यता । मनसा । दृध्रम् । उब्धम् । गाः । येमानम् । परि । सन्तम् । अद्रिम् ।
दृळ्हम् । नरः । वचसा । दैव्येन । व्रजम् । गोऽमन्तम् । उशिजः । वि । वव्रुरिति वव्रुः ॥१५॥

वेङ्कट० 'अङ्गिरसः [illegible] मनसा [illegible] [illegible] परितः सन्तम्' अद्रिम् [illegible] मनुष्याः दैव्येन 'देवसम्बन्धिना स्तुत्या' व्रजम् गोमन्तम् [illegible] 'विवृतद्वारं कृतवन्तः । [illegible] । तथैव' मन्त्रः — 'यदा [illegible]' (ऋ १०,६८,११) इति ॥ १५ ॥

'इति तृतीयाष्टके चतुर्थाध्याये चतुर्दशो वर्गः' ॥

ते मन्वत प्रथमं नाम धेनोस्त्रिः सप्त मातुः परमाणि विन्दन् ।
तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः ॥ १६ ॥

ते । मन्वत । प्रथमम् । नाम । धेनोः । त्रिः । सप्त । मातुः । परमाणि । विन्दन् ।
तत् । जानतीः । अभि । अनूषत । व्राः । आविः । भुवत् । अरुणीः । यशसा । गोः ॥ १६ ॥

वेङ्कट० [illegible] । [illegible] इति ब्राह्मणम् [illegible] — [illegible] (तै [illegible]) [illegible] ॥ १६ ॥

नेशत्तमो दुधितं रोचत द्यौरुद्देव्या उषसो भानुरर्त ।
आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन् ॥ १७ ॥

नेशत् । तमः । दुधितम् । रोचत । द्यौः । उत् । देव्याः । उषसः । भानुः । अर्त ।
आ । सूर्यः । बृहतः । तिष्ठत् । अज्रान् । ऋजु । मर्तेषु । वृजिना । च । पश्यन् ॥ १७ ॥

वेङ्कट० [illegible] [illegible] दुर्धितं [illegible] । [illegible] [illegible]

१-१. नास्ति वि' अ'. २-२. [illegible] मूको. ३-३. नास्ति मूको. ४-४. [illegible] वि' अ'. ५-५. नास्ति अ'. * [illegible] वि' [illegible] क कपे. ‡ नास्ति वि' कपे. ६-६. नास्ति वि' अ'. † [illegible] कपे. ‡ [illegible] मूको. ७. [illegible] मूको. ८. [illegible] वि' अ' क. ९-९. [illegible] वि' अ'. १०. नास्ति वि' अ'. ११. नास्ति कपे.

दीः च अरोचत । इद् उक्तं भवति — देव्याः 'उषसः च तेजः । तथा सूर्यः च गमनपरान् महतः रश्मीन् आ मिमत मनुष्येषु' वृजनानि प्रभूतानि' कर्माणि कुटिलानि पापानि च जहत् इति ॥ १७ ॥

आदित् पश्चा बुबुधाना व्यख्यन्नादिद्रत्नं धारयन्त द्युभक्तम् ।
विश्वे विश्वासु दुर्यासु देवा मित्र धिये वरुण सत्यमस्तु ॥ १८ ॥

आत् । इत् । पश्चा । बुबुधानाः । वि । अख्यन् । आत् । इत् । रत्नम् । धारयन्त । द्युऽभक्तम् ।
विश्वे । विश्वासु । दुर्यासु । देवाः । मित्र । धिये । वरुण । सत्यम् । अस्तु ॥ १८ ॥

वेङ्कट० अनन्तरम् एव उषस्यागतायां 'बुध्यमानाः गवादिपदार्थान्† विविधम् अपश्यन् । तथा अनन्तरम् एव अह्नि' सम्भक्तम् रत्नम् च अधारयन् । तथा विश्वे 'देवाः विश्वासु दुर्यासु यजमानगृहेषु यज्ञमभ्यागताः†, दिवा हि यज्ञो भवति न तु रात्रौ इति । सोऽयमेकैकशः' अहोरात्रविभागो हे मित्रावरुणौ ! मनुष्याणां कर्मकरणाय सत्यम् भवतु । मित्रावरुणावहोरात्रयोरीश्वरौ '[illegible] इति' ॥ १८ ॥

अच्छा वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठम् ।
शुच्यूधो अतृणन्न गवामन्धो न पूतं परिषिक्तमंशोः ॥ १९ ॥

अच्छ । वोचेय । शुशुचानम् । अग्निम् । होतारम् । विश्वऽभरसम् । यजिष्ठम् ।
शुचि । ऊधः । अतृणत् । न । गवाम् । अन्धः । न । पूतम् । परिऽसिक्तम् । अंशोः ॥ १९ ॥

वेङ्कट० 'अभिब्रवाणि‡ दीप्यमानम् अग्निम्' होतारम् सर्वस्य भर्तारं यष्टृतमम् । यथा गवाम् ऊधः कश्चित् शुचि पयः तृणत्ति, सोमलतायाः अभिषुतायाः रसम् इव 'पूतम् पात्रेषु परिषिक्तं पयः, एवं यजमानाः† शुचिम् अग्निम् अनुवद् रत्नानि ददतमस्मभ्यमिति' ॥ १९ ॥

विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामव आवृणानः सुमृळीको भवतु जातवेदाः ॥ २० ॥

विश्वेषाम् । अदितिः । यज्ञियानाम् । विश्वेषाम् । अतिथिः । मानुषाणाम् ।
अग्निः । देवानाम् । अवः । आऽवृणानः । सुऽमृळीकः । भवतु । जातऽवेदाः ॥ २० ॥

वेङ्कट० विश्वेषाम् अपि यज्ञार्हाणाम् अदीनः तथा विश्वेषाम् अपि मानुषाणाम् अतिथिः भवति

१-१. उष…मनु° वि° अ°.　२. °नि च वि° अ°.　३-३. नास्ति वि° अ°.　† भोऽङ्गवान् पश्यन्ति मूको.　४-४. नास्ति वि° अ°.　† °ता नास्ति वि° भ्रं.　५-५. नास्ति वि° अ°.　‡ °ब्रुवा° मूको.　६-६. पूर्व ''गमन्त'' वि° अ°.　† नास्ति मू° ?.

'गृहेषु । ... अपि देवानाम् ... [illegible] ... मुख्यं ... भवतु ज्ञातव्यः ॥ १० ॥

'इति तृतीयाष्टके चतुर्थाध्याये एकादशो वर्गः' ॥

[२]

'वामदेवो गौतम ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः' ।

यो मर्त्येष्वमृत ऋतावा देवो देवेष्वरतिर्निधायि ।
होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै ॥ १ ॥

यः । मर्त्येषु । अमृतः । ऋतऽवा । देवः । देवेषु । अरतिः । निऽधायि ।
होता । यजिष्ठः । मह्ना । शुचध्यै । हव्यैः । अग्निः । मनुषः । ईरयध्यै ॥ १ ॥

वेङ्कट० यः अमरणः देवः देवेषु हविरादाय गच्छन् कर्मवान् मनुष्येषु निहितः, होता अयं यष्टृतमः महत्त्वेन [illegible] हव्यैः सह यजमानस्य देवान् प्रति गन्तुं च ॥ १ ॥

इह त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अन्तरग्ने ।
दूत ईयसे युयुजान ऋष्व ऋजुमुष्कान्वृषणः शुक्रांश्च ॥ २ ॥

इह । त्वम् । सूनो इति । सहसः । नः । अद्य । जातः । जातान् । उभयान् । अन्तः । अग्ने ।
दूतः । ईयसे । युयुजानः । ऋष्व । ऋजुऽमुष्कान् । वृषणः । शुक्रान् । च ॥ २ ॥

वेङ्कट० हे सहसः पुत्र! अस्मिन्निह जातः अद्य उभयान् अपि जातान् अन्तरेण गच्छसि । दूतः भूत्वा गच्छसि हविर्वहन् आत्मानम् युञ्जान हे दर्शनीय! कान्? अश्वान् इत्याह — ऋजुमुष्कान् युवतः यजमानान् मनुष्यान् दीप्तान् देवान् च ॥ २ ॥

अत्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा ।
अन्तरीयसे अरुषा युजानो युष्मांश्च देवान्विश आ च मर्तान् ॥ ३ ॥

अत्या । वृधस्नू इति वृधऽस्नू । रोहिता । घृतस्नू इति घृतऽस्नू । ऋतस्य । मन्ये । मनसा । जविष्ठा ।
अन्तः । ईयसे । अरुषा । युजानः । युष्मान् । च । देवान् । विशः । आ । च । मर्तान् ॥ ३ ॥

वेङ्कट० 'अश्वौ वर्धमानौ प्रति [illegible] रोहितवर्णौ घृतं पाने गन्तारौ यज्ञस्य 'अहम् मनसा' वेगवत्तमौ मन्ये । तौ हि त्वं 'अरुषौ' युञ्जानः मध्ये गच्छसि [illegible] । [illegible] इत्याह — युष्मान् इति । [illegible] देवान् आ विशश्च मनुष्यान् च इति ॥ ३ ॥

१-१. [illegible] वि' भ'. २-२. [illegible]. ३-३ [illegible] वि' भ'. ४-४. [illegible] वि' भ'. ५. [illegible] वि' [illegible] वि' भ'. ६ ६. [illegible] वि' भ'. ७-७. [illegible] वि' भ'. ८ ८. [illegible] वि' भ'. ९ [illegible] वि' भ'. ९ [illegible] वि' भ'.

अर्यमणं वरुणं मित्रमेषामिन्द्राविष्णू मरुतो अश्विनोत ।
स्वश्वो अग्ने सुरथः सुराधा एदु वह सुहविषे जनाय ॥ ४ ॥

अर्यमणम् । वरुणम् । मित्रम् । एषाम् । इन्द्राविष्णू इति । मरुतः । अश्विना । उत ।
सुऽअश्वः । अग्ने । सुऽरथः । सुऽराधाः । आ । इत् । ऊँ इति । वह । सुऽहविषे । जनाय ॥ ४ ॥

वेङ्कट० एषाम् 'मनुष्याणां मध्ये शोभनहविष्काय यजमानाय अर्यमप्रभृतीन्' स्वश्वः सुरथः शोभनधनः त्वम् हे अग्ने' आ वह ॥ ४ ॥

गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।
इळावाँ एषो असुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावान् ॥ ५ ॥

गोऽमान् । अग्ने । अविऽमान् । अश्वी । यज्ञः । नृवत्ऽसखा । सदम् । इत् । अप्रऽमृष्यः ।
इळाऽवान् । एषः । असुर । प्रजाऽवान् । दीर्घः । रयिः । पृथुऽबुध्नः । सभाऽवान् ॥ ५ ॥

वेङ्कट० अग्ने! अयं यज्ञः स्वयाऽपि गवादिहेतुर्भवति । नेतृयुक्ता 'यस्य सखायः सदा' ... । ... एषः[1] हे असुर! प्रजायुक्तः ... धनहेतुः पृथुमूलः परिषद्युक्त इति ॥ ५ ॥

[1]इति तृतीयाष्टके चतुर्थाध्याये षोडशो वर्गः[1] ॥

यस्त इध्मं जभरत्सिष्विदानो मूर्धानं वा ततपते त्वाया ।
भुवस्तस्य स्वतवाँः पायुरग्ने विश्वस्मात्सीमघायत उरुष्य ॥ ६ ॥

यः । ते । इध्मम् । जभरत् । सिष्विदानः । मूर्धानम् । वा । ततपते । त्वाऽया ।
भुवः । तस्य । स्वऽतवान् । पायुः । अग्ने । विश्वस्मात् । सीम् । अघऽयतः । उरुष्य ॥ ६ ॥

वेङ्कट० यः तुभ्यम् 'इध्मम् भरति स्विद्यन्, मूर्धानम् च तापयति त्वत्कामनया[‡], भव त्वं तस्य स्वायत्तबलः रक्षकः[4] हे अग्ने! । सर्वस्मात् पापमिच्छतः[4] एनं रक्षेति ॥ ६ ॥

यस्ते भरादन्नियते चिदन्नं निशिषन्मन्द्रमतिथिमुदीरत् ।
आ देवयुरिनधते दुरोणे तस्मिन्रयिर्ध्रुवो अस्तु दास्वान् ॥ ७ ॥

यः । ते । भरात् । अन्निऽयते । चित् । अन्नम् । निऽशिषत् । मन्द्रम् । अतिथिम् । उत्ऽईरत् ।
आ । देवऽयुः । इनधते । दुरोणे । तस्मिन् । रयिः । ध्रुवः । अस्तु । दास्वान् ॥ ७ ॥

१-१. नास्ति वि॰ अ॰. २. नास्ति मूको. ३-३. °ईदृशः वि॰ अ॰. ‡ नास्ति मूको.
४-४. नास्ति मूको. ५-५. नास्ति वि॰ अ॰. † °ञ्च वि॰ अपं. ६. पापि° वि॰ अ॰.

वेङ्कट० यः तुभ्यं भवति अवमित्सन्? कलशम्, यो वा भद्रकं 'सोमं[1] निवर्तेन शालि, यो[2] वा अभिनिधत् त्वाम् उद्दीपयति नरश्चोभ्यादयति, तथा देवान्[3] कामयमानः समिद्धं करोति गृहे, अभिमत रयिः, नियतः भातु द्वारान् 'वर्धिष्णो दीप्यमानः' ॥ ७ ॥

यस्त्वा दोषा य उषसि प्रशंसात् प्रियं वा त्वा कृणवते हविष्मान् ।
अश्वो न स्वे दम आ हेम्यावान् तमंहसः पीपरो दाश्वांसम् ॥ ८ ॥

यः । त्वा । दोषा । यः । उषसि । प्रऽशंसात् । प्रियम् । वा । त्वा । कृणवते । हविष्मान् ।
अश्वः । न । स्वे । दमे । आ । हेम्याऽवान् । तम् । अंहसः । पीपरः । दाश्वांसम् ॥ ८ ॥

वेङ्कट० यः त्वा रात्रौ 'स्तौति, यो वा उषसि, यो वा हविषा युक्तः त्वाम् प्रियम्[4] करोति', तम् यजमानं दारिद्र्यात् पारय, यथा अश्वः स्वगृहे स्थितः वेगवान् । आ-कारः महत्त्वार्थे स्फुटीकरोति ॥ ८ ॥

यस्तुभ्यमग्ने अमृताय दाशद् दुवस्त्वे कृणवते यतस्रुक् ।
न स राया शशमानो वि योषन्नैनमंहः परि वरदघायोः ॥ ९ ॥

यः । तुभ्यम् । अग्ने । अमृताय । दाशत् । दुवः । त्वे इति । कृणवते । यतऽस्रुक् ।
न । सः । राया । शशमानः । वि । योषत् । न । एनम् । अंहः । परि । वरत् । अघऽयोः ॥ ९ ॥

वेङ्कट० 'यः तुभ्यम् हे अग्ने! अमृताय हविः प्रयच्छति, यश्च त्वयि परिचरणम्[5] करोति यज्ञार्थं यतस्रुक्, न[6] सः[7] राया भजमानः धनेन वियुक्तो भवतु । न च एनम् अघायोः अंहः 'परि वृणोतु'[8] ॥ ९ ॥

यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्तस्य सुधितं रराणः ।
प्रीतेदसद्धोत्रा सा यविष्ठासाम यस्य विधतो वृधासः ॥ १० ॥

यस्य । त्वम् । अग्ने । अध्वरम् । जुजोषः । देवः । मर्तस्य । सुऽधितम् । रराणः ।
प्रीता । इत् । असत् । होत्रा । सा । यविष्ठ । असाम । यस्य । विधतः । वृधासः ॥ १० ॥

वेङ्कट० 'यस्य त्वम् अग्ने! यज्ञं सेवसे देव[9] मनुष्यस्य सुनिहितम् रममाण[10] । प्रियः एव भवति यज्ञः[11] अयं[12] हे युवतम! देवानाम् । स्याम च यस्य वयं परिचरतः वर्धकाः[13] ॥ १० ॥

"इति तृतीयाष्टके चतुर्थाध्याये सप्तदशो वर्गः" ॥

१-१. नास्ति वि' अ'. † सोमम् वि' कर्पं ‡ नास्ति वि' कर्पं. २-२. "ष्णो धनो दीप्यमानः वि'' अ'. ३ ३. नास्ति वि' अ'. † गृहे वि' कर्पं. ४-४. नास्ति वि' अ'. ५. नास्ति वि' कर्पं. ६. नास्ति मूको. ७-७. परि···वि' अ'. ८. 'माणम् वि' कर्पं. ९. 'णम् वि' अ' कर्पं. १०. नु वि'' अ' कर्प. ११. नास्ति वि' अ'. १२-१२. नास्ति मूको.

चित्तिमचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता वृजिना च मर्तान् ।
राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य ॥ ११ ॥

चित्तिम् । अचित्तिम् । चिनवत् । वि । विद्वान् । पृष्ठाऽइव । वीता । वृजिना । च । मर्तान् ।
राये । च । नः । सुऽअपत्याय । देव । दितिम् । च । रास्व । अदितिम् । उरुष्य ॥ ११ ॥

वेङ्कट० 'ज्ञातव्यम् अज्ञातव्यं च विद्वान् अग्निः पृथक् करोतु । पृष्ठे स्पृष्टानीः, पृष्ठ' उच्यन्ते । पृष्ठानिव' विविक्तान् करोतु कान्तस्वभावान्' पापकृतः च 'मनुष्यान् । एवं कृत्वा अस्मभ्यं शोभनापत्याय धनाय हे देव ! देयकामम्' प्रयच्छ अदेयम्' च अस्मत्तः पृथक् कुरु इति ॥ ११ ॥

कविं शशासुः कवयोऽदब्धा निधारयन्तो दुर्यास्वायोः ।
अतस्त्वं दृश्याँ अग्न एतान्पड्भिः पश्येरद्भुताँ अर्य एवैः ॥ १२ ॥

कविम् । शशासुः । कवयः । अदब्धाः । निऽधारयन्तः । दुर्यासु । आयोः ।
अतः । त्वम् । दृश्यान् । अग्ने । एतान् । पट्ऽभिः । पश्येः । अद्भुतान् । अर्यः । एवैः ॥ १२ ॥

वेङ्कट० कर्तव्यम् अग्निम् एतत् दातव्यम् एतत् कर्तव्यम् इति अदब्धाः कवयः 'अहिंसिताः' नियमेन धारयन्तः गृहेषु मनुष्यस्य । अतः' त्वम् अनुग्राह्यान् अग्ने ! एतान् 'अस्मान्' अद्भुतान्' गमनस्वभावैः ज्वालाख्यैः पादैः द्रष्टुमर्हसि' स्वामी ॥ १२ ॥

त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ ।
रत्नं भर शशमानाय घृष्वे पृथु श्चन्द्रमवसे चर्षणिप्राः ॥ १३ ॥

त्वम् । अग्ने । वाघते । सुऽप्रनीतिः । सुतऽसोमाय । विधते । यविष्ठ ।
रत्नम् । भर । शशमानाय । घृष्वे । पृथु । चन्द्रम् । अवसे । चर्षणिऽप्राः ॥ १३ ॥

वेङ्कट० 'त्वम् अग्ने ! ऋत्विजे सुप्रणयनः सुतसोमाय' देवान् परिचरते हे युवतम ! रत्नम् देहि भजमानाय हे घर्षणशील !' विस्तीर्णं हृदयङ्गमं' रक्षणाय मनुष्याणां पूरयिता' ॥ १३ ॥

अधा ह यद्वयमग्ने त्वाया पड्भिर्हस्तेभिश्चकृमा तनूभिः ।
रथं न क्रन्तो अपसा भुरिजोरृतं येमुः सुध्य आशुषाणाः ॥ १४ ॥

---

१. नास्ति वि' अ'. २. पृष्ठव वि' अ' ल. ३. गमन वि' अ'. ४ कान्त° वि' अ'. ५-५. °नान्……मनान् वि' अ'. †-† नास्ति मूको. ‡ देय [illegible] वि' [illegible]. ६. [illegible] वि' अ'. ७-७ 'मनन्नुनात् [illegible]. ८ °हेंस वि'. ९-९. सोमाय वि' अ'. † [illegible] वि' [illegible]. १०. [illegible] वि' अ' [illegible]. ११. °वनतम् वि'. १२. नास्ति वि' अ'.

अध । ह । यत् । वयम् । अग्ने । त्वाऽया । पत्ऽभिः । हस्तेभिः । चकृम । तनूभिः ।
रथम् । न । क्रन्तः । अपसा । भुरिजोः । ऋतम् । येमुः । सुऽध्यः । आशुषाणाः ॥ १४ ॥

वेङ्कट० [illegible] ॥ १४ ॥

अधा मातुरुषसः सप्त विप्रा जायेमहि प्रथमा वेधसो नॄन् ।
दिवस्पुत्रा अङ्गिरसो भवेमाऽद्रिं रुजेम धनिनं शुचन्तः ॥ १५ ॥

अध । मातुः । उषसः । सप्त । विप्राः । जायेमहि । प्रथमाः । वेधसः । नॄन् ।
दिवः । पुत्राः । अङ्गिरसः । भवेम । अद्रिम् । रुजेम । धनिनम् । शुचन्तः ॥ १५ ॥

वेङ्कट० [illegible] ॥ १५ ॥

'इति तृतीयाष्टके चतुर्थाध्यायेऽष्टादशो वर्गः' ॥

अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।
शुचीदयन् दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥ १६ ॥

अध । यथा । नः । पितरः । परासः । प्रत्नासः । अग्ने । ऋतम् । आशुषाणाः ।
शुचि । इत् । अयन् । दीधितिम् । उक्थऽशासः । क्षाम । भिन्दन्तः । अरुणीः । अप । व्रन् ॥ १६ ॥

वेङ्कट० [illegible] ॥ १६ ॥

सुकर्माणः सुरुचो देवयन्तोऽयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं ववृधन्त इन्द्रमूर्वं गव्यं परिषदन्तो अग्मन् ॥ १७ ॥

सुऽकर्माणः । सुऽरुचः । देवऽयन्तः । अयः । न । देवाः । जनिम । धमन्तः ।
शुचन्तः । अग्निम् । ववृधन्तः । इन्द्रम् । ऊर्वम् । गव्यम् । परिऽसदन्तः । अग्मन् ॥ १७ ॥

[illegible]

वेङ्कट० गोमनकर्मदीक्षिताः देवानिच्छन्तः ... इव ... 'देवाः अग्निम् दीपयन्तः वर्धयन्तः इन्द्रम् ... गोमन्तम्' ... ॥ १७ ॥

आ यूथेव क्षुमति पश्वो अख्यद् देवानां यज्जनिमान्त्युग्र ।
मर्तानां चिदुर्वशीरकृप्रन् वृधे चिदर्य उपरस्यायोः ॥ १८ ॥

आ । यूथाऽइव । क्षुऽमति । पश्वः । अख्यत् । देवानाम् । यत् । जनिम । अन्ति । उग्र ।
मर्तानाम् । चित् । उर्वशीः । अकृप्रन् । वृधे । चित् । अर्यः । उपरस्य । आयोः ॥ १८ ॥

वेङ्कट० यथा कश्चित् क्षुधायुक्ते वने ... यूथानि ... एवं पश्यन् 'आ अख्यत्' देवानाम् जनिम ... मनुष्येषु ... प्रजाः ... तथा ... स्वामी च मनुष्यस्य ... वर्धनाय ... इति ॥ १८ ॥

अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
अनूनमग्निं पुरुधा सुश्चन्द्रं देवस्य मर्मृजतश्चारु चक्षुः ॥ १९ ॥

अकर्म । ते । सुऽअपसः । अभूम । ऋतम् । अवस्रन् । उषसः । विऽभातीः ।
अनूनम् । अग्निम् । पुरुधा । सुऽचन्द्रम् । देवस्य । मर्मृजतः । चारु । चक्षुः ॥ १९ ॥

वेङ्कट० कृतवन्तः तुभ्यं कर्म, सुकर्माणश्च अभूम ... । तेजः ... 'अनूनम्' ... अग्निम् ... बहुधा ... देवस्य ... तेजः ॥ १९ ॥

एता ते अग्न उचथानि वेधोऽवोचाम कवये ता जुषस्व ।
उच्छोचस्व कृणुहि वस्यसो नो महो रायः पुरुवार प्र यन्धि ॥ २० ॥

एता । ते । अग्ने । उचथानि । वेधः । अवोचाम । कवये । ता । जुषस्व ।
उत् । शोचस्व । कृणुहि । वस्यसः । नः । महः । रायः । पुरुऽवार । प्र । यन्धि ॥ २० ॥

वेङ्कट० एतानि तुभ्यम् 'अग्ने ! स्तोत्राणि हे ... विधातः ' ... तानि त्वं

१. ... २-२. नास्ति वि' ... ३. ... ४-४. ... वि' ... † ... ‡ ... ५. ... ६-६. ... ७-७. ... ८. ... ९-९. ... † नास्ति मूको. ‡ ... मूको.

सेवस्व, वर्धीष्वस्त्र[1], कुरु च[2] अस्मान् श्रेयसः, तदर्थं हे बहुभिर्वरणीय! अन्नानि धनानि प्र यच्छ ॥ २० ॥

'इति तृतीयाष्टके चतुर्थेऽध्याये एकोनविंशो वर्गः'॥

[३]

'वामदेवो गौतम ऋषिः । अग्निर्देवता, प्रथमायाः रुद्रः । त्रिष्टुप् छन्दः'।

आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ १ ॥

आ । वः । राजानम् । अध्वरस्य । रुद्रम् । होतारम् । सत्यऽयजम् । रोदस्योः ।
अग्निम् । पुरा । तनयित्नोः । अचित्तात् । हिरण्यऽरूपम् । अवसे । कृणुध्वम् ॥ १ ॥

वेङ्क० 'अग्निमुखं पुरं कुरुतं यज्ञस्य स्वामिनं देवानां स्तोतारम्' यजमानां होतारं सत्येन यागानुष्ठितोः एतावितारम् अग्निम् प्रागेव अविज्ञातमरणात्' तनयित्नो हिरण्यरूपम् 'रक्षणार्थम्'। अस्यार्थमाह — तनयित्नुरिति मेघगर्जनवद् भयङ्कर इति[1] ॥ १ ॥

अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासाः ।
अर्वाचीनः परिवीतो नि षीदेमा उ ते स्वपाक प्रतीचीः ॥ २ ॥

अयम् । योनिः । चकृम । यम् । वयम् । ते । जायाऽइव । पत्ये । उशती । सुऽवासाः ।
अर्वाचीनः । परिऽवीतः । नि । सीद । इमाः । ऊँ इति । ते । सुऽअपाक । प्रतीचीः ॥ २ ॥

वेङ्क० अयम्[7] योनिः 'वेदिरित्यर्थः', यम् योनिम् वयम्[8] कृतवन्तः सुष्ठु, 'यथा जाया भर्त्रे कामयमाना शोभनवस्त्रा स्वसमीपे स्थानं करोति। तथा अर्वाङ्[9] अस्मदभिमुखः ज्वालाभिः परिगतः[10] तस्मिन् नि षीद । इमाः स्तुतयः ते हे सुष्ठुपचनकर्मन्[11] प्रतिमुखगमनाः ॥ २ ॥

आशृण्वते अदृपिताय मन्म नृचक्षसे सुमृळीकाय वेधः ।
देवाय शस्तिममृताय शंस ग्रावेव सोता मधुषुद्यमीळे ॥ ३ ॥

आऽशृण्वते । अदृपिताय । मन्म । नृऽचक्षसे । सुऽमृळीकाय । वेधः ।
देवाय । शस्तिम् । अमृताय । शंस । ग्रावाऽइव । सोता । मधुऽसुत् । यम् । ईळे ॥ ३ ॥

---

1. °वस्व मूको. 2. ना वि[?] अ[?] नास्ति. 3-3. नास्ति मूको. 4-4. नास्ति वि' अ'. 5. भवावि° वि' अ'. 6-6. °वल···यि'अ'. 7 मैत्रिन्द्र ग्रन्थ निर्देश (ऋ १, १०४, १) इति क्रमः अवसं वि'[?] अ' नास्ति. 8 नास्ति वि'. 9-9. नास्ति वि' अ'. † स्थाने क. 10. °तः अ'. 11. °सकाम° मूको.

वेङ्कट० 'स्तोतॄणामभिमतप्रियमर्थमभिमुखं गच्छते देवं हिताय[1] मनुष्याणां हृष्टः सुष्ठु सुखयिता हे देवः ! देवाय 'मन्म स्तोत्रम्'[2] शत्रूणाम् शमयित्रे ब्रूहि इति होतारमृत्विजमनुशास्ति[3] । 'यथा माता अभिषवणवृक्ष मधुरसस्य सन्ता शब्दं करोति, एवमहं यम् अग्निम्' सामभिः स्तौमि ॥ ३ ॥

त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित्स्वाधीः ।
कदा त उक्था सधमाद्यानि कदा भवन्ति सख्या गृहे ते ॥ ४ ॥

त्वम् । चित् । नः । शम्यै । अग्ने । अस्याः । ऋतस्य । बोधि । ऋतऽचित् । सुऽआधीः ।
कदा । ते । उक्था । सधऽमाद्यानि । कदा । भवन्ति । सख्या । गृहे । ते ॥ ४ ॥

वेङ्कट० त्वम् एव अग्ने ! अस्माद् यज्ञस्य अस्याः स्तुतेः कर्मणो सम्बोधं कुरु ; कृत्वा च तां [4]पुष्कल हे सत्य ! शोभमानाध्यान । कदा तव उक्थानि मदीयानि देवैः सह सदर्शनमितानि[5] भवन्ति । कदा[6] सख्यानि स्वर्गीयाणि अस्माकम् गृहे ॥ ४ ॥

कथा ह तद्वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न आगः ।
कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कदर्यम्णे कद्भगाय ॥ ५ ॥

कथा । ह । तत् । वरुणाय । त्वम् । अग्ने । कथा । दिवे । गर्हसे । कत् । नः । आगः ।
कथा । मित्राय । मीळ्हुषे । पृथिव्यै । ब्रवः । कत् । अर्यम्णे । कत् । भगाय ॥ ५ ॥

वेङ्कट० अग्ने ! त्वम् अस्मदीयम् एनः कथम् वरुणाय गर्हसे, कथं वा दिवे । एनः पापं कृतम् इति गर्हा । किं वा अस्माकम् एनः[7] कथं वा मित्राय कामानां सेक्त्रे पृथिव्यै च[8] अस्मान् ब्रूयाः, किं वा अर्यम्णे[9] भगाय चेति ॥ ५ ॥

'इति तृतीयाष्टके चतुर्थाध्याये त्रिंशो वर्गः' ॥

कद्धिष्ण्यासु वृधसानो अग्ने कद्वाताय प्रतवसे शुभंये ।
परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ॥ ६ ॥

कत् । धिष्ण्यासु । वृधसानः । अग्ने । कत् । वाताय । प्रऽतवसे । शुभम्ऽये ।
परिऽज्मने । नासत्याय । क्षे । ब्रवः । कत् । अग्ने । रुद्राय । नृऽघ्ने ॥ ६ ॥

वेङ्कट० 'किम् आयतनेषु वर्धमानः त्वम् अग्ने ! प्रकृष्टबलाय' कल्याणं गच्छते वाताय ब्रूयाः । क्षियति पृथ्वीलोके [illegible] । परितो गन्त्रे नासत्याय, [10]'अश्विनोरन्यतरस्य ग्रहणम्, क्षां पृथिवीं [illegible], मनुष्याणां पापकृताम्'[10] निहन्त्रे रुद्राय चेति ॥ ६ ॥

१-१. नास्ति वि अ. † 'नाय पृथ्वीव वि' ह सर्व. २-२. नास्ति मूको. ३. होता [illegible] वि अ. ४-४. [illegible] वि अ. ५-५. पुष्कल - निर्मितानि वि अ. ६. नास्ति मूको. ७-७. नास्ति वि अ. † गैः वि सर्व. ८. ना वि अ. ९. नास्ति वि सर्व. १०-१०. 'नहन…कृतां' वि अ. † सा क सर्व.

वेङ्कट० मा कस्य चित् सर्वदा एव धनम् अपहरत पुत्रो गमः, 'मा च[1] अनुष्यस्य हिंसकः, मा च अस्माकं बन्धोः । तथाऽस्माकं भ्रातुः अपि[2] अग्ने![3] कुटिलस्य धनम् हविः मा वेः । वेतिः कान्तिकर्मा । चयत्[4] मा[5] सन्तुः वामोचो धनम् भुंक्षम[6], अपि तत्कालीनमेव भुङ्क्ष्व । तत्प्रमस्माकं वामच्छेति[7] ॥ १३ ॥

रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुमख प्रीणानः ।
प्रति ष्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद् वावृधानम् ॥ १४ ॥

रक्ष । नः । अग्ने । तव । रक्षणेभिः । ररक्षाणः । सुऽमख । प्रीणानः ।
प्रति । स्फुर । वि । रुज । वीळु । अंहः । जहि । रक्षः । महि । चित् । ववृधानम् ॥ १४ ॥

वेङ्कट० रक्ष अस्मान् अग्ने! त्वदीयैः रक्षणैः, रक्षणशीलस्त्वं[8] हे शोभनयज्ञ! प्रीयमाणः, प्रति गच्छ, भग्नं च 'कुरु दृढम् दुःखमूलम्' । एतदेवाह—मारय रक्षः[9] महत् अपि वर्धमानम् इति[10] ॥ १४ ॥

एभिर्भव सुमना अग्ने अर्कैरिमान्त्स्पृश मन्मभिः शूर वाजान् ।
उत ब्रह्माण्यङ्गिरो जुषस्व सं ते शस्तिर्देववाता जरेत ॥ १५ ॥

एभिः । भव । सुऽमनाः । अग्ने । अर्कैः । इमान् । स्पृश । मन्मऽभिः । शूर । वाजान् ।
उत । ब्रह्माणि । अङ्गिरः । जुषस्व । सम् । ते । शस्तिः । देवऽवाता । जरेत ॥ १५ ॥

वेङ्कट० एभिः अस्मैः स्वम् अग्ने! सुमतिः[11] भव । तथा शूर! इमानि हवींषि च स्पृश मननकुशलैः स्तोतृभिः 'तेजोभिः । अपि च[12] स्तोत्राणि हे अग्ने! सेवस्व । तैः सह "ते हे अग्ने!" देवैरभिवद्गुणस्तवनवती प्रार्थिता स्तुतिश्च[13] सम् अग्ने भवद्गुणं स्तुयात्[14] इति ॥ १५ ॥

एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि ।
निवचना कवये काव्यान्यशंसिषं मतिभिर्विप्र उक्थैः ॥ १६ ॥

एता । विश्वा । विदुषे । तुभ्यम् । वेधः । नीथानि । अग्ने । निण्या । वचांसि ।
निऽवचना । कवये । काव्यानि । अशंसिषम् । मतिऽभिः । विप्रः । उक्थैः ॥ १६ ॥

वेङ्कट० एतानि विश्वानि "विदुषे तुभ्यम् हे विधातः!"[15] अग्ने![16] "प्रशस्यानि अन्तर्हितभवद्गुणानि" वचांसि

१-१. नास्ति वि[1]. २. [अग्ने] क. ३. नास्ति मूको. ४-४. नास्ति वि[2] अ[1]. ५. मंत्रम क. ६. °स्तेन ए° वि[2] अ[1]. ७. °न त्वम् वि[2]. ८-८. कुरु °मूल वि[2] अ[1], °दृढतन्° वि[1] सर्व. ९. नास्ति क मूको. १०. हन्यात वि[1]. ११-११. तेजे वि[2] अ[1]. १२. °तीत क सर्व. १३. स्तु° वि[1] सर्व. १४-१४. विदुषे…इति नास्ति वि[2] अ[1].

कान्तप्रज्ञाय तुभ्यम् अभिमुख्येन वचनीयानि काव्यानि करोमि। मम कर्माणि महत् अतिशयम् प्रज्ञानैः 'सुकृतः मेधावी' ॥ १६ ॥

'इति तृतीयाष्टके चतुर्थाध्याये द्वादशो वर्गः' ॥

[४]

'वामदेवो गौतम ऋषिः । रक्षोहाऽग्निः देवता । त्रिष्टुप् छन्दः' ।

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ १ ॥

कृणुष्व । पाजः । प्रऽसितिम् । न । पृथ्वीम् । याहि । राजाऽइव । अमऽवान् । इभेन ।
तृष्वीम् । अनु । प्रऽसितिम् । द्रूणानः । अस्ता । असि । विध्य । रक्षसः । तपिष्ठैः ॥ १ ॥

वेङ्कट० 'विस्तारय ज्वालाजालं बलम्। तेज' एव वा पाजः[1]। प्रसितिं ' प्रबन्धनात्, जालमिव[2] जालं वा मृगग्रहणाय, पृथ्वीम्। प्रसितिम् इव याहि राजेव अमात्यवान् हस्तिना 'क्षिप्रकारिणीम् प्रसितिम् राक्षसेषु अनु दूणानः। दूणातिर्हिंसाकर्मा[3]। निरसिता असि, राक्षसान् तप्ततमैस्ते-जोभिः[4] विध्य इति ॥ १ ॥

तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतङ्गानसंदितो वि सृज विष्वगुल्काः ॥ २ ॥

तव । भ्रमासः । आशुऽया । पतन्ति । अनु । स्पृश । धृषता । शोशुचानः ।
तपूंषि । अग्ने । जुह्वा । पतङ्गान् । असम्ऽदितः । वि । सृज । विष्वक् । उल्काः ॥ २ ॥

वेङ्कट० तव भ्रमणशीला रश्मयः आशवः पतन्ति। हे अग्ने! तेषामन्वागमेन धर्षकेणतेजसा 'अनु स्पृश[5] दीप्यमानः तापयितॄणि[6] रक्षांसि' पतनशीलान्[7] असुरान्[8] हिंसासाधनभूतेन। किं बहुना। रश्मिभिर-सम्बद्धः[9] त्वं सर्वतः 'रक्षसां हननाय उल्काः वि सृज' ॥ २ ॥

प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥ ३ ॥

प्रति । स्पशः । वि । सृज । तूर्णिऽतमः । भव । पायुः । विशः । अस्याः । अदब्धः ।
यः । नः । दूरे । अघऽशंसः । यः । अन्ति । अग्ने । माकिः । ते । व्यथिः । आ । दधर्षीत् ॥ ३ ॥

१-१. नास्ति वि' भ'. २-२. नास्ति मूको. ३. पाजः वि' भ' रूपं. ४. 'सुतैः भ'. ५. तनूर्षा वा ६,१२. ६-६. क्षि⋯दूणा' वि' भ'. ७. तप्त' रूपं. ८-८. नास्ति वि' भ'. † त्वदग्नि मूको; पृ्रोति क प्रस्तावः. ९. 'सि च वि' भ'. १०. स्पनशा' मूको. ११. 'स्मनः वि' भ'.

वेङ्कट० 'स्पशः' निर्गमनकर्मा । प्रति वि सृज त्वदीयाः अतिशयेन शत्रून् तरन् । भव रक्षकः अस्याः विशः त्वं रक्षोभिः अहिंसितः । यः अस्माकम् दूरे अघायुः यो वा अन्तिके अस्ति । स त्वा अस्मात् व्यथयिता मा 'धर्षयतु त्वत् समृद्धम्' ॥ ३ ॥

उद॑ग्ने तिष्ठ॒ प्रत्या त॑नुष्व॒ न्य१॒॑मित्राँ॑ ओषतात्तिग्महेते ।
यो नो॒ अरा॑तिं समिधान च॒क्रे नी॒चा तं ध॑क्ष्यत॒सं न शुष्क॑म् ॥ ४ ॥

उत् । अ॒ग्ने॒ । ति॒ष्ठ॒ । प्रति॑ । आ । त॒नु॒ष्व॒ । नि । अ॒मित्रा॑न् । ओ॒ष॒ता॒त् । ति॒ग्म॒ऽहे॒ते॒ ।
यः । नः॒ । अरा॑तिम् । स॒म्ऽइ॒धा॒न॒ । च॒क्रे । नी॒चा । तम् । ध॒क्षि॒ । अ॒त॒सम् । न । शुष्क॑म् ॥ ४ ॥

वेङ्कट० उत् तिष्ठ अग्ने!, प्रति विस्तारय आत्मानम् । नि दह अमित्रान् आभिमुख्येन दह हे तिग्मदीप्त्यायुध! । यः अस्माकम् अरातित्वं करोति हे समिधान!, न्यग्भूतं कृत्वा तम् दह अतसम् इव शुष्कम् । अतसान् धमायमानान् इव काष्ठेभ्यः ॥ ४ ॥

ऊ॒र्ध्वो भ॑व॒ प्रति॑ वि॒ध्याध्य१॒॑स्मदा॒विष्कृ॑णुष्व॒ दैव्या॑न्यग्ने ।
अव॑ स्थि॒रा त॑नुहि यातु॒जूनां॑ जा॒मिमजा॑मिं॒ प्र मृ॑णीहि॒ शत्रू॑न् ॥ ५ ॥

ऊ॒र्ध्वः । भ॒व॒ । प्रति॑ । वि॒ध्य॒ । अधि॑ । अ॒स्मत् । आ॒विः । कृ॒णु॒ष्व॒ । दैव्या॑नि । अ॒ग्ने॒ ।
अव॑ । स्थि॒रा । त॒नु॒हि॒ । या॒तु॒ऽजूना॑म् । जा॒मिम् । अजा॑मिम् । प्र । मृ॒णी॒हि॒ । शत्रू॑न् ॥ ५ ॥

वेङ्कट० ऊर्ध्वम् उत्तिष्ठ । अस्मत् अधि रक्षांसि च प्रति विध्य । आविः कुरु च दैव्यानि तेजांसि अग्ने! । स्थिराणि च अव कुरु धनूंषि हिंसार्थं ज्यां कुर्वतां राक्षसानाम् । ज्ञातिम् अज्ञातिं वा शत्रून् प्र मृणीहि विनाशयेति ॥ ५ ॥

इति तृतीयाष्टके चतुर्थाध्याये त्रयोविंशो वर्गः ॥

स ते॑ जानाति सुम॒तिं य॑विष्ठ॒ य ईव॑ते॒ ब्रह्म॑णे गा॒तुमैर॑त् ।
विश्वा॑न्यस्मै सु॒दिना॑नि रा॒यो द्यु॒म्नान्य॒र्यो वि दुरो॑ अ॒भि द्यौ॑त् ॥ ६ ॥

सः । ते॒ । जा॒ना॒ति॒ । सु॒ऽम॒तिम् । य॒वि॒ष्ठ॒ । यः । ईव॑ते । ब्रह्म॑णे । गा॒तुम् । ऐर॑त् ।
विश्वा॑नि । अ॒स्मै॒ । सु॒ऽदिना॑नि । रा॒यः । द्यु॒म्नानि॑ । अ॒र्यः । वि । दुरः॑ । अ॒भि । द्यौ॒त् ॥ ६ ॥

वेङ्कट० सः तव जानाति शोभनां मतिं हे युवतम!, यः गमनवते ब्रह्मणे तुभ्यं स्तुतिं प्रेरयति ।

१ १. नास्ति वि[3] अ[1]. २. व्यायविता वि[1] अ; व्यथयिता वि[3] अ[1]. ३. मन्त्रपाठतः मूको. ४. नास्ति वि[1] अप. ५. नास्ति अ[1]. ६. जानि वि[1] अप; जाति अ[1]. ७. नास्ति वि[3] अ[1]. ८-८. नास्ति मूको. ९-९. °कर्म न मे वि[1] अ[1]; °कर्म न म वि[1] अप. १०. नास्ति मूको. ११. °रीः अ[1].

'धातिः शब्दकर्मा'। तत्कथमित्याह — विश्वानि एव अस्मै सुदिनानि भवन्ति अहानि, धनानि च भवन्ति । तथाऽयम् ईश्वरो भूत्वा धनानि तद्द्वाराणि च स्वीकृत्य वि शासते[१] ॥ ६ ॥

सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥ ७ ॥

सः । इत् । अग्ने । अस्तु । सुऽभगः । सुऽदानुः । यः । त्वा । नित्येन । हविषा । यः । उक्थैः ।
पिप्रीषति । स्वे । आयुषि । दुरोणे । विश्वा । इत् । अस्मै । सुऽदिना । सा । असत् । इष्टिः ॥

वेङ्कट० सः[३] एव अग्ने! अस्तु शोभनधनः शोभनदानश्च यः[४] त्वाम् अनवरतेन[५] हविषा प्रीणयितुमिच्छति, यः च उक्थैः आत्मीये जीवनार्थम् गृहे । तथा विश्वानि एव अस्मै सुदिनानि । सा भवतु इष्टिः । इत्युपसंहारः[६] इयं फलप्रदा भवत्विति ॥ ७ ॥

अर्चामि ते सुमतिं घोष्यर्वाक् सं ते वावाता जरतामियं गीः ।
स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥ ८ ॥

अर्चामि । ते । सुऽमतिम् । घोषि । अर्वाक् । सम् । ते । ववाता । जरताम् । इयम् । गीः ।
सुऽअश्वाः । त्वा । सुऽरथाः । मर्जयेम । अस्मे इति । क्षत्राणि । धारयेः । अनु । द्यून् ॥ ८ ॥

वेङ्कट० उच्चारयामि तव सुमतिम् घोषयुक्तम् उच्चैः, यथा अर्वाक् सा[७] भवत्वस्मदभिमुखी । सम्[८] स्तौतु ते[९] प्रियतमा इयम् गीः त्वाम् । स्वश्वाः सुरथाः च सन्तो वय यज्ञसाधने परिचरेम त्वाम् । अस्मासु बलानि स्थापय[१०] दिवसेषु ॥ ८ ॥

इह त्वा भूर्या चरेदुप त्मन् दोषावस्तर्दीदिवांसमनु द्यून् ।
क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम् ॥ ९ ॥

इह । त्वा । भूरि । आ । चरेत् । उप । त्मन् । दोषाऽवस्तः । दीदिऽवांसम् । अनु । द्यून् ।
क्रीळन्तः । त्वा । सुऽमनसः । सपेम । अभि । द्युम्ना । तस्थिऽवांसः । जनानाम् ॥ ९ ॥

वेङ्कट० हे अग्ने![११] अस्मिन् लोके आत्मनि भूयिष्ठं प्रजाः त्वाम् उप आ चरति रात्रावह्नि च दीप्यमानं दिनेदिने । वयं च पुत्रैर्नप्तृभिश्च क्रीडन्तः सुमनसः मोदमानाः[१२] त्वां भजेम शत्रुजनानाम् धनानि अभि तिष्ठन्तः ॥ ९ ॥

१-१. नास्ति वि[१] अ[१]. २. °ते कर वि[१] अ[१] ३. सः वि[१] अ[१]. ४. यद वि[१] अ[१]. ५. °रत तेन मूको. ६. इत्युपसंहार मूको. ७. त वि[१] अ[१]. ८. नास्ति वि[१] अ[१]. ९. नास्ति अ[१]. १०. स्थापय मूको. ११. अग्ने वि[१] अ[१] अ[१]. १२. मदाम वि[१] अ[१].

यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ॥ १० ॥

यः । त्वा । सुऽअश्वः । सुऽहिरण्यः । अग्ने । उपऽयाति । वसुऽमता । रथेन ।
तस्य । त्राता । भवसि । तस्य । सखा । यः । ते । आतिथ्यम् । आनुषक् । जुजोषत् ॥ १० ॥

वेङ्कट० यः त्वाम् अग्ने स्वश्वः सुहिरण्यः वसुपूर्णेन रथेन च युक्तः त्वत्परिचरणार्थम् उपगच्छति, तस्य त्वम् त्राता भवसि सखा च। उपगमनप्रकारमाह — यः तवातिथ्यम् आनुषक् सेवत इति ॥ १० ॥

"इति तृतीयाष्टके चतुर्थाध्याये चतुर्विंशो वर्गः" ॥

महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥ ११ ॥

महः । रुजामि । बन्धुता । वचःऽभिः । तत् । मा । पितुः । गोतमात् । अनु । इयाय ।
त्वम् । नः । अस्य । वचसः । चिकिद्धि । होतः । यविष्ठ । सुक्रतो इति सुऽक्रतो । दमूनाः ॥ ११ ॥

वेङ्कट० महतोऽपि शत्रून् अहम् रुजामि। मम हि त्वया हे अग्ने! बान्धवमस्ति स्तुतिवचनैः। तत् बान्धवं मम पितुः गोतमात् माम् अनु इयाय। यथा पित्रा च तवास्ति बान्धवमित्यर्थः। तथा सति त्वम् अस्माकम् इदं वचनं बुध्यस्व। हे होतः! युवतम! सुप्रज्ञ! इदमर्थं दमनमनाः त्वमिति ॥ ११ ॥

अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।
ते पायवः सध्र्यञ्चो निषद्याग्ने तव नः पान्त्वमूर ॥ १२ ॥

अस्वप्नऽजः । तरणयः । सुऽशेवाः । अतन्द्रासः । अवृकाः । अश्रमिष्ठाः ।
ते । पायवः । सध्र्यञ्चः । निऽसद्य । अग्ने । तव । नः । पान्तु । अमूर ॥ १२ ॥

वेङ्कट० स्वापमकुर्वन्तः क्षिप्रगतयः सुसुखाः अनलसाः स्तेनरहिताः अश्रान्ततमाः ते तव रश्मयः सहाञ्चन्तः निषद्य अग्ने! अस्मान् रक्षन्तु अमूढ ॥ १२ ॥

ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ १३ ॥

ये । पायवः । मामतेयम् । ते । अग्ने । पश्यन्तः । अन्धम् । दुःऽइतात् । अरक्षन् ।
ररक्ष । तान् । सुऽकृतः । विश्वऽवेदाः । दिप्सन्तः । इत् । रिपवः । न । अह । देभुः ॥ १३ ॥

---

१. सर्वेऽप्यश्वः वि' ख'. २. "गौ वि' ख'. ३. कुमार वि' अ'. ४-४. नास्ति मूको. ५. स्तव ख्पं. ६-६. "मानायन्वि" अ'. ७. नास्ति वि' ख्पं. ८. ०मू: ख.

वेङ्कट० ये रक्षसः समवायाः अयन्ते दीर्घतमसं तव अग्ने! 'प्रजानतीः अन्धम्' दामि. पीडयमानं तस्मात् दुःखात् अरक्षन्। परोक्षः शेष। लयशत्रुभिः विश्ववेदाः तान् रक्षणेन शोभनकर्मणः कर्तृन् रक्षन् न परित्यजति। ततोऽस्मान्[1] हन्तुमिच्छन्तः 'एव शत्रवः' न एवं दम्भुः तस्मात्रक्षयाद्रिति[1] ॥ १३ ॥

त्वया॑ व॒यं स॑ध॒न्य१॒॑स्त्वोता॒स्तव॒ प्रणी॑त्यश्याम॒ वाजा॑न् ।
उ॒भा शंसा॑ सूदय सत्यताते॒ऽनुष्ठु॒या कृ॑णुह्यह्रयाण ॥ १४ ॥

त्वया॑ । व॒यम् । स॒ध॒ऽन्यः॑ । त्वाऽऊ॑ताः । तव॑ । प्रऽनी॑ती । अ॒श्या॒म॒ । वाजा॑न् ।
उ॒भा । शंसा॑ । सू॒द॒य॒ । स॒त्य॒ऽता॒ते॒ । अ॒नु॒ष्ठु॒या । कृ॒णु॒हि॒ । अ॒ह्र॒या॒ण॒ ॥ १४ ॥

वेङ्कट० त्वया वयम् हे अग्ने! सदा[2] मघवन्तः, त्वया रक्षिताः तव प्रणयनेन प्राप्नुयामहि[3] अन्नानि। स त्वं शत्रूणां प्रत्यक्षाभिशापं 'परोक्षाभिशापं च विनाशय हे सत्यस्य विस्तारयितः!'। साध्वेवास्माकं कुरु हे अह्रीतगमन![6] कामप्रदानादिति ॥ १४ ॥

अ॒या ते॑ अग्ने स॒मिधा॑ विधेम॒ प्रति॒ स्तोमं॑ श॒स्यमा॑नं गृभाय ।
दहा॒शसो॑ र॒क्षसः॑ पा॒ह्य१॒॑स्मान्द्रु॒हो नि॒दो मि॑त्रमहो अव॒द्यात् ॥ १५ ॥

अ॒या । ते॒ । अ॒ग्ने॒ । स॒म्ऽइधा॑ । वि॒धे॒म॒ । प्रति॑ । स्तोम॑म् । श॒स्यमा॑नम् । गृ॒भा॒य॒ ।
दह॑ । अ॒शसः॑ । र॒क्षसः॑ । पा॒हि । अ॒स्मान् । द्रु॒हः । नि॒दः । मि॒त्र॒ऽम॒हः॒ । अ॒व॒द्यात् ॥ १५ ॥

वेङ्कट० अनया समिधा तुभ्यम् अग्ने! परिचरामः[9]। स्तोमम् च अस्माभिः शस्यमानम् [10]प्रतिगृहाण, दह च अशंसनपरान् राक्षसान्†, पाहि[10] च अस्मान् द्रोग्धृभ्यः निन्दितृभ्यः अवद्यात् हे मित्राणां पूजक! इति ॥ १५ ॥

[11]इति तृतीयाष्टके चतुर्थाध्याये पञ्चविंशो वर्गः[11] ॥

व्याख्यच्चतुर्थमध्यायं तृतीयस्याष्टकस्य सः ।
सप्तलोकेषु बहुले यस्य [12]मातुराशीत्र समुद्भवः[12] ॥

[13]इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने तृतीयाष्टके चतुर्थोऽध्यायः[13] ॥



इति ऋग्वेदे सभाष्ये तृतीयाष्टके चतुर्थोऽध्यायः ॥

१-१. नास्ति वि[२] अ[१]. २. ०ऽस्मान् वि[२१] अ[१] लपं. ते तोऽस्मान् क. ३. सदे वि[२] अ[१]. ४. सं प्राप्नुयामि वि[१] लपं. ५. सदा वि[१] लपं. ६. सुरी वि[१] अ[१]. ७-७. 'प्रति…विस्तार' वि[२] अ[१]. ८. सु. मा ५,१५. ९. 'चरेम वि[१] लपं. १०-१०. प्रति…पाहि वि[२] अ[१]. † नास्ति वि[१] लपं. ११-११. नास्ति मूकोः. १२-१२. नास्ति वि[१] १३-१३. नास्ति वि[१] लपं, इति वेङ्कटमाधवाचार्यकृतो ऋग्वेदभाष्ये तृतीये अष्टके चतुर्थोऽध्यायः समाप्तः वि[१] अ[१]; इति तृतीयाष्टके चतुर्थोऽध्याय क.

अथ तृतीयाष्टके पञ्चमोऽध्यायः

वेङ्क०

"वैश्वानराय मीळ्हुषे" व्याचिख्यासति माधवः ।
नाहो "अद्यर्थयत्सर्वपूर्णा वा" द्विभिरन्विताः ॥ १ ॥

वाक्यार्थस्य पदार्थस्य हिशब्दोऽयं प्रयुज्यते ।
'इद्गृह्णाति च वाक्यार्थम् 'इन्द्रो वाम् ... हि'† । ७ ॥

वद्गृह्णाणो वाक्यार्थौ न स्वस्मिन् पर्यवस्यति ।
कामयन्ते हि वां सोमा अस्मान्नागन्तुं मुवाम् ॥ ३ ॥

'भुजे हि त्वा हवामहे', 'स हि नः पर्यन्विद्' ।
'नहि त्वा रोदसी "उभे"† सर्वेषूद्भवम्' स्फुटम् ॥ ४ ॥

पादपाल्यैष्यन्न्यार्थमप्यर्थं हि: प्रयुज्यते ।
असत्यपि च हेतुत्वे तदर्थोद्भवत्यस्ति ॥ ५ ॥

'गुत्सा हि देवं ...' , 'उग्रो वज्री हि "वंस्व नः"‡ ।
'नहि ते शुल्कं न ... "¶", 'इन्द्रं हि ग्राजा ...' ॥ ६ ॥

कथाद् स्वे सोचयिता तेनागस्य विपरीत च ।
विस्मयं प्रथमं ... पद्मानुपावह ॥ ७ ॥

अत्रार्दीनि "कर्मो नानुनाथ्याय" बंगवचमाः ।
विस्वांतमार्गवरमात पादाङ्कः भणितात्वे ॥ ८ ॥

आश्चर्ये हि प्रसिद्धतां च तथौचित्ये च दृश्यते ।
तस्मिन् वांद्भवणे तेषु सर्वेष्विति विनिश्चयः ॥ ९ ॥

'एता हि नु विमन्यवः', 'आ हि ष्मा सूनवे पिता' ।
'नह रस्मसि दूरक' आश्चर्यार्थे इमे इव ॥ १० ॥

१-१. नास्ति वि' अ'. २-२. 'तेव मि' वि' अ'; 'इन्द्र गृणे ... वेङ्कव. ३-३. "अद्‌-गृप' वि' अ' † ऋ १,२,४. ४. "आ ... अ' "नल्पाक्स" कप, "स्यादशक्य वि'. ५. ऋ १, १६,४. ६. ऋ ६,४५,४ ७-७ नास्ति वि' अ' 'युभे निश्चोऽत्र ... वेङ्कव. † ऋ १,१०,८. ८. वि अ'. ९. ... १० ऋ ८.३४,१. ११-११. नास्ति वि' अ'. † नास्ति वेङ्कव. ‡ ऋ १,४८,१६. ¶ ऋ १,२४,६. १२. ऋ १,२४,८. १३. 'कानुमान्न इ वि' अ'; 'नुगमं च वेङ्कव १४-१४. नास्ति वि' अ'. † एते वि' कप. ‡ 'पुनेवा' वेङ्कव. १५. ऋ १,३७,८; एतद् ... १६ ... वि' कप. १७. 'तो अ'. १८ तेन वि' अ'; तेषां वेङ्कव. १९. ऋ १,२०,४. २०. ऋ १,३६,६. २१. ऋ १,३७,४. २२. 'वो अ.

'स इद् धनुस्पृः'[1], 'त्व अग्ने'[2] पाविकथा[3] द्वौ कुत्सविमौ[4] ।
सर्वा 'त्वां ह्यग्ने सदमित्'[5] बहवः सन्ति तादृशाः ॥ ११ ॥
'एवा ह्यस्य सूनृता (तौ)[6] इ)ति सूक्ते द्वयो[7] इयत्ययः ।
नीचिस्थायां भवन्त्येते सन्त्यन्येऽपि च तादृशाः ॥ १२ ॥
समुच्चये च विरोधः 'स मन्द्रया च जिह्वया'[8] ।
मध्यस्थानुदात्तसिद्ध[9] सन्त्यन्येऽपि च तादृशाः ॥ १३ ॥
ईदृशं यो विजानाति च स मन्त्रेषु मुह्यति ।
तेन प्रदर्शितोऽस्माभिरर्थस्य[10] प्रपञ्चतः[11] ॥ १४ ॥ इति ॥

[५]

[12]वामदेवो गौतम ऋषिः । वैश्वानरोऽग्निर्देवता । त्रिष्टुप् छन्दः[12] ।

वैश्वानराय मीळ्हुषे सजोषाः कथा दाशेमाग्नये बृहद् भाः ।
अनूनेन बृहता वक्षथेनोप स्तभायदुपमिन्न रोधः ॥ १ ॥

वैश्वानराय । मीळ्हुषे । सऽजोषाः । कथा । दाशेम । अग्नये । बृहत् । भाः ।
अनूनेन । बृहता । वक्षथेन । उप । स्तभायत् । उपऽमित् । न । रोधः ॥ १ ॥

वेङ्कट० वामदेवः । वैश्वानराय अग्नये[13] सेक्त्रे समीचयः कथं हविर्दास्याम । योऽयमन्तं भासते, सोऽयम् अविकलेन महता वहनकुशलेन तेजसा रोधः स्वाम् अधः स्थित्वा उप स्तभायत् यथा उपमित् स्थूणा वंशम् इति ॥ १ ॥

मा निन्दत य इमां मह्यं रातिं देवो ददौ मर्त्याय स्वधावान् ।
पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृतमो यह्वो अग्निः ॥ २ ॥

मा । निन्दत । यः । इमाम् । मह्यम् । रातिम् । देवः । ददौ । मर्त्याय । स्वधाऽवान् ।
पाकाय । गृत्सः । अमृतः । विऽचेता । वैश्वानरः । नृऽतमः । यह्वः । अग्निः ॥ २ ॥

वेङ्कट० मा निन्दत[14] यम्[15], यः इमाम् महाम् रातिम् धनम् देवः ददौ[16] मर्त्याय अन्नवान् अपक्वप्रज्ञाय स्तुत्यः मेधावी अमरणधर्मा विशिष्टचेता वैश्वानरः नेतृतमः महान् अग्निः ॥ २ ॥

१. ऋ १,५५,६. २. ऋ १,१४४,१. ३. °यो मूको. ४. तदा वि मूको. ५. ऋ ४,१,१. ६. ऋ १,८,८. ७. इत्था वि. ८. ऋ ३,४१,६. ९. तदा मूको. १०. °मिद्धेरर्थ मूको नेत्रक, °मीमांसस्य वि. ११. प्रपञ्चितः वि वि मूको. १२-१२. नास्ति मूको. १३. नास्ति मूको. १४. निन्द मूको. १५. नास्ति वि. १६. ददे वि मूको.

साम॑ द्वि॒बर्हा॒ महि॑ ति॒ग्मभृ॑ष्टिः स॒हस्र॑रेता वृष॒भस्तुवि॑ष्मान् ।
प॒दं न गोरप॑गूळ्हं विवि॒द्वान॒ग्निर्मह्यं॒ प्रेदु॑ वोचन्मनी॒षाम् ॥ ३ ॥

साम॑ । द्वि॒ऽबर्हाः॑ । महि॑ । ति॒ग्मऽभृ॑ष्टिः । स॒हस्र॑ऽरेताः । वृ॒ष॒भः । तुवि॑ष्मान् ।
प॒दम् । न । गोः । अप॑ऽगूळ्हम् । वि॒वि॒द्वान् । अ॒ग्निः । मह्य॑म् । प्र । इत् । ऊँ इति॑ । वो॒च॒त् । म॒नी॒षाम् ॥ ३ ॥

वेङ्कट० स्तुत्यं[1] साम द्वयोः परिवृढ्ह[2] महद् [illegible] तिग्मभृष्टि[3], भृष्टि [illegible], सहस्ररेताः नानाविधानां [illegible]. 'तद् वैश्वानरस्य [illegible]' (तैब्रा १,३,१,६) इति ब्राह्मणम्. कामानां वर्षिता बहुधनः स्थानम् इव चोरैरपगूढस्य गोः. निगूढं[4] [illegible] जानन्[5] अग्निः मह्यम् प्र एव वोचत् मनीषाम्[6]। 'साम वै रक्षोहा' (तै ६,६,३,१) इति ब्राह्मणमिति ॥ ३ ॥

प्र ताँ अ॒ग्निर्ब॑भसत् ति॒ग्मज॑म्भ॒स्तपि॑ष्ठेन शो॒चिषा॒ यः सु॒राधाः॑ ।
प्र ये मि॒नन्ति॒ वरु॑णस्य॒ धाम॑ प्रि॒या मि॒त्रस्य॒ चेत॑तो ध्रु॒वाणि॑ ॥ ४ ॥

प्र । तान् । अ॒ग्निः । ब॒भ॒स॒त् । ति॒ग्मऽज॑म्भः । तपि॑ष्ठेन । शो॒चिषा॑ । यः । सु॒ऽराधाः॑ ।
प्र । ये । मि॒नन्ति॑ । वरु॑णस्य । धाम॑ । प्रि॒या । मि॒त्रस्य॑ । चेत॑तः । ध्रु॒वाणि॑ ॥ ४ ॥

वेङ्कट० प्र 'भक्षयतु तान्[7]' अग्निः तीक्ष्णदंष्ट्रः तप्ततमेन तेजसा, यः अपि सुधनो भवति, ये राक्षसाः प्र मिनन्ति वरुणस्य स्थानानि, व्रतानीत्यर्थः, प्रियाणि मित्रस्य जानतः [illegible] मनुष्याणाम् स्थिराणि[8] ॥ ४ ॥

अ॒भ्रा॒तरो॒ न योष॑णो॒ व्यन्तः॑ पति॒रिपो॒ न जन॑यो दु॒रेवाः॑ ।
पा॒पासः॒ सन्तो॑ अनृ॒ता अ॑स॒त्या इ॒दं प॒दम॑जनता गभी॒रम् ॥ ५ ॥

अ॒भ्रा॒तरः॑ । न । योष॑णः । व्यन्तः॑ । प॒ति॒ऽरिपः॑ । न । जन॑यः । दुः॒ऽएवाः॑ ।
पा॒पासः॑ । सन्तः॑ । अ॒नृ॒ताः । अ॒स॒त्याः । इ॒दम् । प॒दम् । अ॒ज॒न॒त॒ । ग॒भी॒रम् ॥ ५ ॥

वेङ्कट० यथा 'भ्रातृवर्जिताः स्त्रियः[9] पुंसः प्रतीच्यो गच्छन्ति एवं राक्षसा मां दृष्ट्वा [illegible]। यथा वा पतिरिषः पतिघ्नाः जायाः[10] परेषां दर्शनात् प्रतीच्यः कुटिलगमना भवन्ति। पापस्वभावाः सन्तः[10] राक्षसाः अनृतयुक्ताः। 'मनु वै [illegible] करोति। [illegible] हरते। [illegible] ब्राह्मणम्। [illegible]' (तैब्रा १,७,२,६) इति ब्राह्मणम्। [illegible]।

१. स्तुत्यं वि' कर्प. २. [illegible] वि' कर्प. ३ [illegible] वि' ख' कर्प. ४. नास्ति वि' अ'. ५. नास्ति मूको. ६-६. [illegible] वि' अ'. ७. [illegible] क. ८-८. [illegible] वि'. ९. [illegible] वि' कर्प. १०. नास्ति कर्प.

एवंविधाः इदम् महीयं वैश्वानरस्य स्थानभूतं प्राप्नन्ति हिंसार्थमभिगच्छन्तो गुप्यन्तो' गम्भीरम् । 'उपरस्य सम्बन्धः' ॥ ५ ॥

'इति तृतीयाष्टके पञ्चमाध्याये प्रथमो वर्गः' ॥

इदं मे अग्ने कियते पावकामिनते गुरुं भारं न मन्म ।
बृहद्दधाथ धृषता गभीरं यह्वं पृष्ठं प्रयसा सप्तधातु ॥ ६ ॥

इदम् । मे । अग्ने । कियते । पावक । अमिनते । गुरुम् । भारम् । न । मन्म ।
बृहत् । दधाथ । धृषता । गभीरम् । यह्वम् । पृष्ठम् । प्रयसा । सप्तऽधातु ॥ ६ ॥

वेङ्कट० 'इदम् महत् अग्ने! स्वल्परूपाय साधवे पावक! साधूनहिंसते गुरुम् इव भारम् मननीयं बृहत् धारय. एतेन अन्नेन गम्भीरे महान्तं महीयम् पृष्ठम्, †पृष्ठः' सप्तधातु च† शरीरवचनः । त्वङ्मांसमेदोऽस्थिमज्जानः सप्त धातव इति ॥ ६ ॥

तमिन्न्वे३व समना समानमभि क्रत्वा पुनती धीतिरश्याः ।
ससस्य चर्मन्नधि चारु पृश्नेरग्रे रुप आरुपितं जबारु ॥ ७ ॥

तम् । इत् । नु । एव । समना । समानम् । अभि । क्रत्वा । पुनती । धीतिः । अश्याः ।
ससस्य । चर्मन् । अधि । चारु । पृश्नेः । अग्रे । रुपः । आऽरुपितम् । जबारु ॥ ७ ॥

वेङ्कट० तम् एव सततं समानम् 'अभि व्याप्नोति कर्मणा शोधयन्ती बुद्धिः । कर्मैव मतिः 'कल्याणी भवतीत्यर्थः । सस्यस्याभिव्यक्तिं' ददातीति वैश्वानरः स उच्यते । सस्यतिः स्वप्नकर्मा' । गौः पृश्निः । गोः अधि स्थाने । येन वैश्वानरस्य भागेन रोपयति' शरीराणीति 'वैश्वानरो रुप् उच्यते(?) तस्य आरोपितम् अभिगन्तारम्' जबारु जवेन रोहन्तीति' स्वहेतुर्वा'' सोमांशुरिति ॥ ७ ॥

प्रवाच्यं वचसः किं मे अस्य गुहा हितमुप निणिग्वदन्ति ।
यदुस्रियाणामप वारिव व्रन् पाति प्रियं रुपो अग्रं पदं वेः ॥ ८ ॥

प्रऽवाच्यम् । वचसः । किम् । मे । अस्य । गुहा । हितम् । उप । निणिक् । वदन्ति ।
यत् । उस्रियाणाम् । अप । वाःऽइव । व्रन् । पाति । प्रियम् । रुपः । अग्रम् । पदम् । वेरिति वेः ॥ ८ ॥

वेङ्कट० गवां गुहायां निहितम् । निणिक् इति ''रूपनाम, निर्णेजनादिहेतुरुपयोगवचनः । यत्† उस्रियाणाम् गुहायां निहितं'' मनुष्याः पय उदकमिव अप वृण्वन् । गुप्तवन्त इत्यर्थः । तत्

१. गु॰ वि॰ अ॰. २-२. नास्ति वि॰ अ॰. ३-३. नास्ति मूको. ४-४. नास्ति वि॰ अ॰. †-† नास्ति मूको. ५. नास्ति वि॰ अ॰. ६-६ स्था॰॰॰शयि वि॰ अ॰. ७. स्वन॰ वि॰ अ॰. ८. रोच॰ वि॰ अ॰. ९ ९. 'अ॰॰॰रोति' वि॰ अ॰. १०. अभि॰ वि॰ अ॰. ११. 'हनु ना छेदं. १२-१२ "नाम॰॰॰निहि॰ वि॰ अ॰. † का मूको.

[illegible] इति दुग्धाऽऽहरणादिना भित्त्वा [illegible] गृह्णन्ति [illegible]। तस्य अस्य [illegible] किम् मे [illegible] प्रकर्षेण [illegible] एवंविधे [illegible] प्रतिपत्तुं पूर्णं न [illegible] इत्यर्थः। यद्वि वैश्वानरस्य [illegible] स्थाने शरीरस्य [illegible] इति ॥ ८ ॥

इदमु त्यन्महि महामनीकं यदुस्रिया सचत पूर्व्यं गौः ।
ऋतस्य पदे अधि दीद्यानं गुहा रघुष्यद् रघुयद् विवेद ॥ ९ ॥

इदम् । ऊँ इति । त्यत् । महि । महाम् । अनीकम् । यत् । उस्रिया । सचत । पूर्व्यम् । गौः ।
ऋतस्य । पदे । अधि । दीद्यानम् । गुहा । रघुऽस्यत् । रघुऽयत् । विवेद ॥ ९ ॥

वेङ्कट० इदम् एव तत् महत् 'देवानाम् महत् अनीकम्। अनीकशब्दः [illegible]। [illegible] प्रति गच्छन्तो' देवानाम् [illegible] इत्यर्थः। यत् अनीकम् [illegible] गौः अग्रे [illegible] सेवते स्म। तदेवाह— यज्ञस्य स्थाने [illegible] 'दीप्यमानम् पर्वतस्य गुहायाम् [illegible]' [illegible] गच्छत् [illegible] गौः [illegible] वेद ॥ ९ ॥

अध द्युतानः पित्रोः सचासामनुत गुह्यं चारु पृश्नेः ।
मातुष्पदे परमे अन्ति षद् गोर्वृष्णः शोचिषः प्रयतस्य जिह्वा ॥ १० ॥

अध । द्युतानः । पित्रोः । सचा । आसा । अमनुत । गुह्यम् । चारु । पृश्नेः ।
मातुः । पदे । परमे । अन्ति । सत् । गोः । वृष्णः । शोचिषः । प्रऽयतस्य । जिह्वा ॥ १० ॥

वेङ्कट० अथ दीप्यमानः द्यावापृथिव्यो सह आस्येन सहभूतो वैश्वानरः पृश्नेः [illegible] गुह्यं निहितं चारु पयः अमनुत। [illegible] । मातुः गोः पृथिव्या इत्यर्थः। तस्याः परमे पदे [illegible] समीपे [illegible] दीप्यमानस्य [illegible] जिह्वा [illegible]। [illegible] वैश्वानर इति ॥ १० ॥

"इति तृतीयाष्टके पञ्चमाध्याये द्वितीयो वर्गः"॥

ऋतं वोचे नमसा पृच्छ्यमानस्तवाशसा जातवेदो यदीदम् ।
त्वमस्य क्षयसि यद्ध विश्वं दिवि यदु द्रविणं यत् पृथिव्याम् ॥ ११ ॥

ऋतम् । वोचे । नमसा । पृच्छ्यमानः । तव । आऽशसा । जातऽवेदः । यदि । इदम् ।
त्वम् । अस्य । क्षयसि । यत् । ह । विश्वम् । दिवि । यत् । ऊँ इति । द्रविणम् । यत् । पृथिव्याम् ॥

१-१. नास्ति वि[१] अ[१]. † [illegible] वि[१] अपे. २. [illegible] वि[१] अपे. ३-३. नास्ति अ[१]. † नास्ति वि[१]. ४. [illegible] वि[१] अ[१]. ५-५. [illegible] वि[१] अ[१]. ६. नास्ति अपे. ७. नास्ति वि[१]. ८. गोः मूको. ९. नास्ति वि[१] अपे. १०-१०. नास्ति मूको.

वेङ्कट० सत्यम् अहं ब्रवीमि जिह्वास्तुभिर्नमस्कारेण पृच्छ्यमानः । अनुष्ठ्यमानम् यदि तव ज्ञानमस्ति भवति । किं तर्हि इति चेत् । त्वम् अस्य ईश्वरो भवसि, यत् ह नाम गच्छति 'मही रश्मये' । किञ्च यत् द्यावापृथिव्योः धर्म सर्वेषामिति ॥ ११ ॥

किं नो॑ अ॒स्य द्रवि॑णं॒ कद्ध॒ रत्नं॒ वि नो॑ वोचो जातवेदश्चिकि॒त्वान् ।
गुहाध्व॑नः पर॒मं यन्नो॑ अ॒स्य रेकु॑ प॒दं न नि॑दा॒ना अग॑न्म ॥ १२ ॥

किम् । नः॒ । अ॒स्य । द्रवि॑णम् । कत् । ह॒ । रत्न॑म् । वि । नः॒ । वो॒चः॒ । जा॒त॒ऽवे॒दः॒ । चि॒कि॒त्वान् ।
गुहा॑ । अध्व॑नः । प॒र॒मम् । यत् । नः॒ । अ॒स्य । रेकु॑ । प॒दम् । न । नि॒दा॒नाः । अग॑न्म ॥ १२ ॥

वेङ्कट० किम् नः अस्य स्तोतुरस्य धनम् किं वा रत्नम् रमणम् वि नः[1] ब्रूहि, हे जातवेदः ! विद्वान् । विवक्षते दास्यामीति विस्पष्टवचनम् । अस्य अन्तरिक्षस्य गुहायां निहितम् यत् परमं तदस्माकमस्तु । येन रेचकम् सुखरहितं स्थाने मनसा निन्दन्तः[2] न गच्छेमेति ॥ १२ ॥

का म॒र्यादा॑ व॒युना॒ कद्ध॑ वा॒मम॑च्छा॑ गमेम र॒घवो॒ न वाज॑म् ।
क॒दा नो॑ दे॒वीर॒मृत॑स्य॒ पत्नीः॒ सूरो॒ वर्णे॑न ततनन्नु॒षासः॑ ॥ १३ ॥

का । म॒र्यादा॑ । व॒युना॑ । कत् । ह॒ । वा॒मम् । अच्छ॑ । ग॒मे॒म॒ । र॒घवः॑ । न । वाज॑म् ।
क॒दा । नः॒ । दे॒वीः । अ॒मृत॑स्य । पत्नीः॑ । सूरः॑ । वर्णे॑न । त॒त॒न॒न् । उ॒षसः॑ ॥ १३ ॥

वेङ्कट० का[1] काष्ठा कान्ता, किम् वा वननीयम्, तद् वयं लघुशरीराः सद्गमनम् इव अभिगच्छेम । कदा नः देव्यः 'अमरणस्य सूर्यस्य' पत्न्यः उषसः सूर्यस्य तेजसा विस्तृता भवन्ति, व्युच्छन्तीत्यर्थः ॥ १३ ॥

अ॒नि॒रेण॒ वच॑सा फ॒ल्ग्वे॑न प्र॒तीत्ये॑न कृ॒धुना॑तृ॒पासः॑ ।
अधा॒ ते अ॑ग्ने॒ किमि॒हा व॑दन्त्यनायु॒धास॒ आस॑ता सचन्ताम् ॥ १४ ॥

अ॒नि॒रेण॑ । वच॑सा । फ॒ल्ग्वे॑न । प्र॒तीत्ये॑न । कृ॒धुना॑ । अ॒तृ॒पासः॑ ।
अध॑ । ते॒ । अ॒ग्ने॒ । किम् । इ॒ह । व॒द॒न्ति॒ । अ॒ना॒यु॒धासः॑ । अस॑ता । स॒च॒न्ता॒म् ॥ १४ ॥

वेङ्कट० अन्नेन रहितेन[1] वचसा फल्गुना 'प्रतिगम्यमानेन, आगताः[2] पुरुषो यद्वत्[3] प्रतिगच्छन्ति न तृप्यन्ति, कद्रुको[4] नूनं कृधुनाऽल्पेन वचसा हे अग्ने ! पुरो समुपस्थिताः किम् तव वदन्ति तृप्तिरहिता राक्षसाः । तथा सति ते अधुना आयुधवर्जिताः अनृतेन[5] संयुज्यन्तां प्रतिभवन्तु ॥ १४ ॥

१-१. रहितेन वि॰ मू॰.　२. आगता वि॰ मू॰.　३-३. यद्वत् पुरुषं वि॰ मू॰.　४. *भ्येन वि॰ मू॰.
५-५. गम्यन्ते वा॰ मू॰.　६. कद्रुको वि॰ मू॰; कद्रुतो ख.　७॰ अनायुधेन वि॰ मू॰.

अस्य श्रिये समिधानस्य वृष्णो वसोरनीकं दम आ रुरोच ।
रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरुवारो अद्यौत् ॥ १५ ॥

अस्य । श्रिये । सम्ऽइधानस्य । वृष्णः । वसोः । अनीकम् । दमे । आ । रुरोच ।
रुशत् । वसानः । सुदृशीकऽरूपः । क्षितिः । न । राया । पुरुऽवारः । अद्यौत् ॥ १५ ॥

वेङ्कट० अस्य स्तोतुः अस्मद्रक्षार्थं दीप्यमानस्य वर्षितुः 'वासयितुः' ज्वालाग्रम् यजमानगृहे आ रोचते। रुशन्तं रूपम् वसानः सुतरां दर्शनीयरूपः सोऽयं †पृथिवीव धनेन, सा यथा सर्वं धनमुत्पादयत्येवम् अयं बहुभिर्वरणीयः द्योतते' ॥ १५ ॥

'इति तृतीयाष्टके पञ्चमाध्याये तृतीयो वर्गः' ॥

[६]

'वामदेवो गौतम ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः' ।

ऊर्ध्व ऊ षु णो अध्वरस्य होतरग्ने तिष्ठ देवताता यजीयान् ।
त्वं हि विश्वमभ्यसि मन्म प्र वेधसश्चित्तिरसि मनीषाम् ॥ १ ॥

ऊर्ध्वः । ऊँ इति । सु । नः । अध्वरस्य । होतः । अग्ने । तिष्ठ । देवऽताता । यजीयान् ।
त्वम् । हि । विश्वम् । अभि । असि । मन्म । प्र । वेधसः । चित् । तिरसि । मनीषाम् ॥ १ ॥

वेङ्कट० 'ऊर्ध्व! यष्टृतरः' त्वम् अस्माकं हे यज्ञस्य होतः! यस्मिन् काले देवास्तर्प्यन्ते इज्यन्ते तत्र सुष्ठु त्वमुत्तिष्ठ। त्वम् हि विश्वम् मननीयमभ्यान्ताभ्यं जगत् अभि भवसि, तथा विधातुर्यजमानस्य अपि मनीषाम् वर्धयसि ॥ १ ॥

अमूरो होता न्यसादि विक्ष्वग्निर्मन्द्रो विदथेषु प्रचेताः ।
ऊर्ध्वं भानुं सवितेवाश्रेन्मेतेव धूमं स्तभायदुप द्याम् ॥ २ ॥

अमूरः । होता । नि । असादि । विक्षु । अग्निः । मन्द्रः । विदथेषु । प्रऽचेताः ।
ऊर्ध्वम् । भानुम् । सविताऽइव । अश्रेत् । मेताऽइव । धूमम् । स्तभायत् । उप । द्याम् ॥ २ ॥

वेङ्कट० अमूढः होता निषण्णः मनुष्येषु मदनशीलो यज्ञेषु प्रकृष्टज्ञानः अग्निः ऊर्ध्वम् च भानुम् तत्र सविता इव अश्रयत्'। सोऽयं यथा माता पुरुषः मानदण्डम् उपस्तभ्नाति एवं दिवं' प्रति वर्तमानम् धूमम् उप स्तभ्नाति ॥ २ ॥

१-१. वासयितु···वि' मूको. १-१ 'दीप्यमा' मूको. २-२. नास्ति मूको. ३-३. नास्ति वि' मूको. 'तर वर्ध. ४. नास्ति मूको.

यता सुजूर्णी रातिनी घृताची प्रदक्षिणिद् देवतातिमुराणः ।
उदु स्वरुर्नवजा नाक्रः पश्वो अनक्ति सुधितः सुमेकः ॥ ३ ॥

यता । सुऽजूर्णिः । रातिनी । घृताची । प्रऽदक्षिणित् । देवऽतातिम् । उराणः ।
उत् । ऊँ इति । स्वरुः । नवऽजाः । न । अक्रः । पश्वः । अनक्ति । सुऽधितः । सुऽमेकः ॥ ३ ॥

वेङ्कट० अध्वर्युणा संयता स्रुग् आहवनीयं प्रति गमनस्य कर्त्री हविर्दानवती जुहूः, घृताची इति स्रुङ्नाम । तया प्रदक्षिणं गच्छति यज्ञम् उरु कुर्वाणः ॥ ३ ॥

स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्थात् ।
पर्यग्निः पशुपा न होता त्रिविष्ट्येति प्रदिव उराणः ॥ ४ ॥

स्तीर्णे । बर्हिषि । सम्ऽइधाने । अग्नौ । ऊर्ध्वः । अध्वर्युः । जुजुषाणः । अस्थात् ।
परि । अग्निः । पशुऽपाः । न । होता । त्रिऽविष्टि । एति । प्रऽदिवः । उराणः ॥ ४ ॥

वेङ्कट० यथा गोपालः पशून् परि एति तद्वदिति ॥ ४ ॥

परि त्मना मितद्रुरेति होताग्निर्मन्द्रो मधुवचा ऋतावा ।
द्रवन्त्यस्य वाजिनो न शोका भयन्ते विश्वा भुवना यदभ्राट् ॥ ५ ॥

परि । त्मना । मितऽद्रुः । एति । होता । अग्निः । मन्द्रः । मधुऽवचाः । ऋतऽवा ।
द्रवन्ति । अस्य । वाजिनः । न । शोकाः । भयन्ते । विश्वा । भुवना । यत् । अभ्राट् ॥ ५ ॥

वेङ्कट० परि गच्छति स्वयमेव मितगतिः होता अग्निः मदयिता मधुरवचनः यज्ञवान् । द्रवन्ति अस्य अश्वाः इव शोचका रश्मयः । तस्मा अग्नये विश्वान्येव भुवनानि बिभ्यति, यदाऽसौ[२] भ्राजत इति ॥ ५ ॥

[३]इति तृतीयाष्टके पञ्चमाध्याये चतुर्थो वर्गः[३] ॥

भद्रा ते अग्ने स्वनीक संदृग् घोरस्य सतो विषुणस्य चारुः ।
न यत् ते शोचिस्तमसा वरन्त न ध्वस्मानस्तन्वी रेप आ धुः ॥ ६ ॥

भद्रा । ते । अग्ने । सुऽअनीक । सम्ऽदृक् । घोरस्य । सतः । विषुणस्य । चारुः ।
न । यत् । ते । शोचिः । तमसा । वरन्त । न । ध्वस्मानः । तन्वि । रेपः । आ । धुरिति धुः ॥ ६ ॥

वेङ्कट० भजनीया ते हे अग्ने! शोभनरश्म्यनीक! सन्दृष्टिः घोरस्य सतः विष्वग्गमनस्य शोभना ।

---

१. °र्यूणाम् वि' कपं. २. यथा क'. ३-३. नास्ति मूको.

यस्मात् ध्वंसनशीला राक्षसाः न तस्य देवः सहसा अस्मान्नादर्शयन्ति, न केऽपि[6] मम शरीरे 'रेप †
पापं च मा वधुः, तस्मात्[1] कोऽवतीति ॥ ६ ॥

न यस्य सातुर्जनितोरवारि न मातरापितरा नू चिदिष्टौ ।
अधा मित्रो न सुधितः पावकोऽग्निर्दीदाय मानुषीषु विक्षु ॥ ७ ॥

न । यस्य । सातुः । जनितोः । अवारि । न । मातरापितरा । नु । चित् । इष्टौ ।
अध । मित्रः । न । सुऽधितः । पावकः । अग्निः । दीदाय । मानुषीषु । विक्षु ॥ ७ ॥

वेङ्कट० यस्य कौषध्यादेः उत्पत्तिनुदादिकस्यापि समुच्छ्रितो रश्मिः[1] न वार्यते, न येन यागस्यैव जातेन माता पिता वा[2] [3]अरकार्यमिष्यते। क्षिप्रम् एव[3] स्वयमेव वर्धत इत्यर्थः। सोऽयम् एवंविधः सखा इव सुष्ठु निहितः पावकः अग्निः दीप्यते मानुषीषु प्रजासु यजमानासु ॥ ७ ॥

द्विर्यं पञ्च जीजनन्त्संवसानाः स्वसारो अग्निं मानुषीषु विक्षु ।
उषर्बुधमथर्यो न दन्तं शुक्रं स्वासं परशुं न तिग्मम् ॥ ८ ॥

द्विः । यम् । पञ्च । जीजनन् । सम्ऽवसानाः । स्वसारः । अग्निम् । मानुषीषु । विक्षु ।
उषःऽबुधम् । अथर्यः । न । दन्तम् । शुक्रम् । सुऽआसम् । परशुम् । न । तिग्मम् ॥ ८ ॥

वेङ्कट० द्विः पञ्च दश स्वसारः स्थिताः सर्वदा 'आच्छादयन्त्यः मानुषीषु' प्रजासु यम् अग्निम् अजीजनन्। 'दशेमं त्वष्टुर्जनयन्त गर्भम्' (ऋ १,९५,२) इति मन्त्रः। उषसि प्रबुध्यमानम् अथर्यः स्त्रियः मैथुनऽर्थाः भवन्तीति स्त्रियः इव दन्तम् दीप्तं 'शोभनास्यम् परशुम् इव तीक्ष्णमिति' ॥ ८ ॥

तव त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वञ्चः स्वञ्चः ।
अरुषासो वृषण ऋजुमुष्का आ देवतातिमह्वन्त दस्माः ॥ ९ ॥

तव । त्ये । अग्ने । हरितः । घृतऽस्नाः । रोहितासः । ऋजुऽअञ्चः । सुऽअञ्चः ।
अरुषासः । वृषणः । ऋजुऽमुष्काः । आ । देवऽतातिम् । अह्वन्त । दस्माः ॥ ९ ॥

वेङ्कट० 'तव एव ते[7] अग्ने! अश्वाः घृतस्य स्नातारः रोहितवर्णाः ऋजु गच्छन्तः च गन्तारः आरोहणशीलाः[8] सेक्तारः अकुटिलवृषणाः यज्ञम् आह्वयन्ति यज्ञो यज्ञ इति 'दर्शनीयाः' ॥ ९ ॥

---

१. च ते मू'. २-२. नास्ति वि' अ'. † रेतः स्पर्श ३. रश्मिन् वि' अ'. ४. नास्ति मूको. ५-५. नन्दिश···तेव वि', स्त्रिय अ'. ६-६. नास्ति वि' अ'. ७-७. शोभना·· वि' अ'. ८. रोचनशो' वि' अपे. ९-९. सुस्थितः वि' अ'.

ये ह त्ये ते सहमाना अयासस्त्वेषासो अग्ने अर्चयश्चरन्ति ।
श्येनासो न दुवसनासो अर्थं तुविष्वणसो मारुतं न शर्धः ॥ १० ॥

ये । ह । त्ये । ते । सहमानाः । अयासः । त्वेषासः । अग्ने । अर्चयः । चरन्ति ।
श्येनासः । न । दुवसनासः । अर्थम् । तुविऽस्वनसः । मारुतम् । न । शर्धः ॥ १० ॥

वेङ्कट० 'ये खलु अमी' सहमानाः अभिभवन्तः गमनशीलाः दीप्ताः अग्ने! अर्चयः चरन्ति । श्येनाः इव शीघ्रम् अभिलषितम् परिचरन्तः ते भवन्ति यथा बहुशब्दाः ते मारुतः इव वेगः ॥ १० ॥

अकारि ब्रह्म समिधान तुभ्यं शंसात्युक्थं यजते व्यू धाः ।
होतारमग्निं मनुषो नि षेदुर्नमस्यन्त उशिजः शंसमायोः ॥ ११ ॥

अकारि । ब्रह्म । सम्ऽइधान । तुभ्यम् । शंसाति । उक्थम् । यजते । वि । ऊँ इति । धाः ।
होतारम् । अग्निम् । मनुषः । नि । सेदुः । नमस्यन्तः । उशिजः । शंसम् । आयोः ॥ ११ ॥

वेङ्कट० कृतम् स्तोत्रम् मया हे समिधान अग्ने[1] तुभ्यम् । स्तुत्या च शंसति उक्थम् यजते चार्थं त्वाम्, यदिदं सर्वे विशेषेण धारय त्वम् अग्ने[1] । अकारिषत परोक्षः । होतारम् अग्निम् मनुष्याः [2]नमस्यन्तः नि सेदुः कामयमानाः[3] शंसनीयम् उर्वशीपुत्रस्य आयोः[4] ॥ ११ ॥

[5]इति तृतीयाष्टके पञ्चमाध्याये पञ्चमो वर्गः[5] ॥

[७]

[6]वामदेवो गौतम ऋषिः । अग्निर्देवता । आद्या जगती, द्वितीयाद्याः पञ्चानुष्टुभः, शिष्टास्त्रिष्टुभः[7] ।

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥ १ ॥

अयम् । इह । प्रथमः । धायि । धातृऽभिः । होता । यजिष्ठः । अध्वरेषु । ईड्यः ।
यम् । अप्नवानः । भृगवः । विऽरुरुचुः । वनेषु । चित्रम् । विऽभ्वम् । विशेऽविशे ॥ १ ॥

वेङ्कट० अयम् इह यज्ञे प्रथममेव निधीयते ऋत्विग्भिः धारयितृभिः होता यष्टृतमः यज्ञेषु स्तोतव्यः । यम् अप्नवानः[8] भृगवः च ऋषयः विरोचयामासुः अरण्येषु चित्ररूपम्[9] मनुष्याय मनुष्याय अनेकप्रकारेण ॥ १ ॥

१-१. नास्ति वि[1] अ[1]. २. 'नि दर्शनीयाः वि[1] अ[1]. ३. यत्[1] वि[1] अ[1]. ४. नास्ति वि[1]; °नः यथा अ[1]. ५-५. नमस्यन्तः निषेदुः कामयेमानः वि[1] अप; 'नम्स'''मना वि[1] अ[1]. ६. °देति वि[1] अ[1]. ७-७. नास्ति मूको. ८. यान वि[1] अ[1]. ९. चित्रार्ण वि[1]; चित्र॰णं रूप अ[1].

अग्ने॑ क॒दा त॑ आनु॒षग्भुव॑द्दे॒वस्य॒ चेत॑नम् ।
अधा॒ हि त्वा॑ जगृभ्रि॒रे मर्ता॑सो वि॒क्ष्वीड्य॑म् ॥ २ ॥

अग्ने॑ । क॒दा । ते॒ । आ॒नु॒षक् । भुव॑त् । दे॒वस्य॑ । चेत॑नम् ।
अध॑ । हि । त्वा॒ । ज॒गृ॒भ्रि॒रे । मर्ता॑सः । वि॒क्षु । ई॒ड्य॑म् ॥ २ ॥

वेङ्कट० कदा हे अग्ने! देवस्य तव मनुष्यकं प्रज्ञापनं तेजः भवतीति प्रश्नस्य प्रयोजनम् । अध हि त्वाम् परिगृह्णन्ति मनुष्या यज्ञार्थं मनुष्येषु[1] स्तुत्यमिति[2] ॥ २ ॥

ऋ॒तावा॑नं॒ विचे॑तसं॒ पश्य॑न्तो॒ द्यामि॑व॒ स्तृभि॑: ।
विश्वे॑षामध्व॒राणां॑ हस्क॒र्तारं॒ दमे॑दमे ॥ ३ ॥

ऋ॒तऽवा॑नम् । वि॒ऽचे॑तसम् । पश्य॑न्तः । द्याम्ऽइ॑व । स्तृऽभि॑: ।
विश्वे॑षाम् । अ॒ध्व॒राणा॑म् । ह॒स्क॒र्तार॑म् । दमे॑ऽदमे ॥ ३ ॥

वेङ्कट० 'सत्यम् सुमतिम्' पश्यन्तः[3] द्याम् इव नक्षत्रैस्तेजोभिः स्थितं सर्वेषामेव यज्ञानां विकासस्य कर्तारम् यजमानगृहेषु । कृतस्य सम्बन्धः ॥ ३ ॥

आ॒शुं दू॒तं वि॒वस्व॑तो॒ विश्वा॒ यश्च॑र्ष॒णीर॒भि ।
आ ज॑भ्रुः के॒तुमा॒यवो॒ भृग॑वाणं वि॒शेवि॑शे ॥ ४ ॥

आ॒शुम् । दू॒तम् । वि॒वस्व॑तः । विश्वा॑: । यः । च॒र्ष॒णीः । अ॒भि ।
आ । ज॒भ्रुः॒ । के॒तुम् । आ॒यव॑: । भृग॑वाणम् । वि॒शेऽवि॑शे ॥ ४ ॥

वेङ्कट० क्षिप्रम् दूतम् यजमानस्य विश्वाः प्रजाः यः अभि भवति तम् आहृतवन्तः 'मनुष्याः यज्ञस्य[4] प्रज्ञापकम्[5] यजमानम्[6] मनुष्यार्थं मनुष्याय । भृगुः पाको भृज्जते[7], भरद्वाजमित्याहुः । भृगूणां यज्ञकर्मिस्वपरमिति ॥ ४ ॥

तमीं॒ होता॑रमानु॒षक् चि॑कि॒त्वांसं॒ नि षे॑दिरे ।
र॒ण्वं पा॑व॒कशो॑चिषं॒ यजि॑ष्ठं स॒प्त धाम॑भिः ॥ ५ ॥

तम् । ई॒म् । होता॑रम् । आ॒नु॒षक् । चि॒कि॒त्वांस॑म् । नि । से॒दि॒रे॒ ।
र॒ण्वम् । पा॒व॒कऽशो॑चिषम् । यजि॑ष्ठम् । स॒प्त । धाम॑ऽभिः ॥ ५ ॥

---

१. हार्द वि॰, ज्ञापकं छर्प. २. °तु वि॰ छर्प. ३. कलिष्ठि वि॰ अ॰. ४-४. नास्ति वि॰ अ॰. ५. सर्व वि॰ अ॰. ६-६. मनुष्यय° वि॰ अ॰. ७. मारके अ॰. ८. यजमान्त्र वि॰ अ॰. ९. नास्ति वि॰ अ॰. १०. पचतेः वि॰, भृजेः वि॰ अ॰, पचतेः क छर्प; भृज्जतेः क मन्त्रार्थः.

वेङ्कट० तम् एतम् होतारम् अनुषक्तम्[१] प्राञ्चम्[२] प्रति नि षेदिरे स्तवनीयम् शोचिष्केशम् मधुतमम् सप्तभिः छन्दोभिः ॥ ५ ॥

'इति तृतीयाष्टके पञ्चमाध्याये षष्ठो वर्गः'[३] ॥

तं शश्वतीषु मातृषु वन आ वीतमश्रितम् ।
चित्रं सन्तं गुहा हितं सुवेदं कूचिदर्थिनम् ॥ ६ ॥

तम् । शश्वतीषु । मातृषु । वने । आ । वीतम् । अश्रितम् ।
चित्रम् । सन्तम् । गुहा । हितम् । सुऽवेदम् । कूचित्ऽअर्थिनम् ॥ ६ ॥

वेङ्कट० तम् शश्वतीषु मही:[४] मातृषु ओषधीषु वने गतम् आत्मन्यवस्थितम् चित्रम् सन्तम् गुहायाम्[५] निहितम् शोभनप्रज्ञानम्, यः काष्ठमर्थयते[६] स कूचिदर्थी, तं निषेदिरे देवा इति ॥ ६ ॥

ससस्य यद् वियुता सस्मिन्नूधन्नृतस्य धामन् रणयन्त देवाः ।
महाँ अग्निर्नमसा रातहव्यो वेरध्वराय सदमिदृतावा ॥ ७ ॥

ससस्य । यत् । विऽयुता । सस्मिन् । ऊधन् । ऋतस्य । धामन् । रणयन्त । देवाः ।
महान् । अग्निः । नमसा । रातऽहव्यः । वेः । अध्वराय । सदम् । इत् । ऋतऽवा ॥ ७ ॥

वेङ्कट० [७]स्वपतोऽस्य यदा वियुते सर्वस्मिन् ऊधनि आदित्ये यज्ञस्य स्थाने रमन्ते देवाः, तदा महान् अग्निः नमस्कारेण देवेभ्यो दत्तहविष्कः सन् यज्ञाय गच्छति[७] 'सदैव सत्यवान्'[८] ॥ ७ ॥

वेरध्वरस्य दूत्यानि विद्वानुभे अन्ता रोदसी संचिकित्वान् ।
दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि ॥ ८ ॥

वेः । अध्वरस्य । दूत्यानि । विद्वान् । उभे इति । अन्तरिति । रोदसी इति । सम्ऽचिकित्वान् ।
दूतः । ईयसे । प्रऽदिवः । उराणः । विदुःऽतरः । दिवः । आऽरोधनानि ॥ ८ ॥

वेङ्कट० कामयसे[९] यज्ञस्य दूत्यानि विद्वान्। अथ द्यावापृथिवी मध्येन ते उभे अपि[९] जानन् दूतो भूत्वा गच्छसि पुराणः[१०] उरु कुर्वाणः विद्वत्तरः द्युलोकस्य आरोधनानि[११] रक्षांसि ॥ ८ ॥

---

१. °क्तम् होतारं वि' अ'. २. प्रा अञ्चं वि' अ'; प्राञ्चं वि'. ३-३. नास्ति मूको. ४. मही कपं ५. °याम् वि'. ६. यह्वं° वि' कपं, यह्वर्थं वि' अ', यत्प्रर्थ क. ७-७. नास्ति वि' अ'. ८. °त्यो क कपं. ९. नास्ति वि' अ'. १० °पुराणः वि' अ', °राण वि' कपं ११. रोध° अ' कपं.

कृष्णं त एम रुशतः पुरो भाश्चरिष्ण्व१र्चिर्वपुषामिदेकम् ।
यदप्रवीता दधते ह गर्भं सद्यश्चिज्जातो भवसीदु दूतः ॥ ९ ॥

कृष्णम् । ते । एम । रुशतः । पुरः । भाः । चरिष्णु । अर्चिः । वपुषाम् । इत् । एकम् ।
यत् । अप्रऽवीता । दधते । ह । गर्भम् । सद्यः । चित् । जातः । भवसि । इत् । ऊँ इति । दूतः ॥९॥

वेङ्कट० कृष्णः तव गमनमार्गः श्वेतवर्णस्य, पुरः च दीप्तिः । वपुषाम् सर्वेषाम् एव प्रकाशयितृत्वम्¹ 'इदम् एकम्' तेजः । यस्मात् अनिर्गच्छन्त्योऽपि धारयन्ति ह गर्भम् अरण्यस्त्वामित्यर्थः । ²'तस्माद् ... ... देवान्'² (तैब्रा ३ १,४,३) इति ब्राह्मणम् । किञ्च जातः सद्यः तदानीम् एव भवसि देवानाम् दूतः ॥ ९ ॥

सद्यो जातस्य ददृशानमोजो यदस्य वातो अनुवाति शोचिः ।
वृणक्ति तिग्मामतसेषु जिह्वां स्थिरा चिदन्ना दयते वि जम्भैः ॥ १० ॥

सद्यः । जातस्य । ददृशानम् । ओजः । यत् । अस्य । वातः । अनुऽवाति । शोचिः ।
वृणक्ति । तिग्माम् । अतसेषु । जिह्वाम् । स्थिरा । चित् । अन्ना । दयते । वि । जम्भैः ॥१०॥

वेङ्कट० तदानीमेव जातस्य दृश्यमानम् बलम् भवति यदा अस्य जातस्य तेजः वातः अनुयाति शोचयति । वृणक्तिश्छेदनकर्मा⁴ । ⁵'तीक्ष्णां ज्वालाम् जिह्वाम्'⁵ अतसेषु छिनत्ति । एतमपि भवति प्रयोगः । तथा स्थिराणि अपि काष्ठान्यन्नानि दंष्ट्राभिः विशेषेण दहति ॥ १० ॥

तृषु यदन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः ।
वातस्य मेळिं सचते निजूर्वन्नाशुं न वाजयते हिन्वे अर्वा ॥ ११ ॥

तृषु । यत् । अन्ना । तृषुणा । ववक्ष । तृषुम् । दूतम् । कृणुते । यह्वः । अग्निः ।
वातस्य । मेळिम् । सचते । निऽजूर्वन् । आशुम् । न । वाजयते । हिन्वे । अर्वा ॥ ११ ॥

वेङ्कट० क्षिप्रं यदा अन्नानि⁶ क्षिप्रेण तेजसा वहति⁷, तदानीम् क्षिप्रकारिणम् आत्मानम् दूतम् करोति महान् अग्निः, वातस्य च सम्पर्कम् सेवते निःशेषम् हिंसन्, अश्वम् इव आत्मानं प्रेरयति गमनाय गमनस्वभावः⁸ ॥ ११ ॥

⁹इति तृतीयाष्टके पञ्चमाध्याये सप्तमो वर्गः⁹ ॥

---

1. प्रकाशयितृ° वि¹ अ¹. २-२. नास्ति वि¹ अ¹. ३-३. 'तस्माद् ...' मूको. ४. वृक्ति° वि¹ अ¹; वृक्तिश्छेदन° वि¹ अ¹. ५-५. तीक्ष्णज्वालात्मिकाम्° वि¹ अ¹; तीक्ष्णा ज्वाला जिह्वाम् वि¹; तीक्ष्णा ज्वाला जिह्वा अ¹. ६. अन्नानि वि¹ अ¹. ७. वहन् वि¹ अ¹. ८. °स्वभाव वि¹ अ¹; स्वभावः वि², स्वभाव इति अ¹. ९-९. नास्ति मूको.

[८]

'वामदेवो गौतम ऋषिः । अग्निर्देवता । गायत्री छन्दः' ।

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा ॥ १ ॥

दूतम् । वः । विश्वऽवेदसम् । हव्यऽवाहम् । अमर्त्यम् । यजिष्ठम् । ऋञ्जसे । गिरा ॥ १ ॥

वेङ्कट० होतः ! त्वम् अध्वराणाम् दूतम् सर्ववेदसम् हविषां वोढारम् अमर्त्यम् यष्टृतमम् प्रसाधयसि गिरा ॥ १ ॥

स हि वेदा वसुधितिं महाँ आरोधनं दिवः । स देवाँ एह वक्षति ॥ २ ॥

सः । हि । वेद । वसुऽधितिम् । महान् । आऽरोधनम् । दिवः । सः । देवान् । आ । इह । वक्षति ॥ २ ॥

वेङ्कट० स हि अग्निः वसुनो निधानम् वेत्ति महान् दिवः च आरोधनम् वशीकरणम् । सः एव देवान् इह आ वहति ॥ २ ॥

स वेद देव आनमं देवाँ ऋतायते दमे । दाति प्रियाणि चिद्वसु ॥ ३ ॥

सः । वेद । देवः । आऽनमम् । देवान् । ऋतऽयते । दमे । दाति । प्रियाणि । चित् । वसु ॥ ३ ॥

वेङ्कट० सः वेत्ति देवः आनमयितुम् देवान् यज्ञमिच्छते गृहे प्रयच्छति 'च प्रियाणि धनानि' ॥ ३ ॥

स होता सेदु दूत्यं चिकित्वाँ अन्तरीयते । विद्वाँ आरोधनं दिवः ॥ ४ ॥

सः । होता । सः । इत् । ऊँ इति । दूत्यम् । चिकित्वान् । अन्तः । ईयते । विद्वान् । आऽरोधनम् । दिवः ॥

वेङ्कट० 'सः होता, सः एव दूतकर्म जानन् द्यावापृथिव्योः अन्तः गच्छति जानन् दिवः आगमनप्रकारम्' ॥ ४ ॥

ते स्याम ये अग्नये ददाशुर्हव्यदातिभिः । य ईं पुष्यन्त इन्धते ॥ ५ ॥

ते । स्याम । ये । अग्नये । ददाशुः । हव्यदातिऽभिः । ये । ईम् । पुष्यन्तः । इन्धते ॥ ५ ॥

वेङ्कट० 'वयमपि अग्नये ते स्याम, ये दत्तवन्तः हव्यैः हविषां दानैः, ये च एनं पोषयन्तः संदीपयन्ति' ॥ ५ ॥

ते राया ते सुवीर्यैः ससवांसो वि शृण्विरे । ये अग्ना दधिरे दुवः ॥ ६ ॥

१-१. नास्ति मूको. २. 'सर्व वि', सर्वम् मूको. ३-३. नास्ति वि' अपे. † विदा' वि' अ'.
४-४. नास्ति वि' अपे. ५-५. नास्ति वि' अपे. † दत्त्वा' वि' अ'.

ते । रायः । ते । सुऽवीर्यैः । ससऽवांसः । वि । शृण्विरे । ये । अग्ना । दधिरे । दुवः ॥ ६ ॥

वेङ्कट० ते त्वां भजमानाः धनेन सुवीर्यैः च विश्रुताः भवन्ति ये अग्नावेव परिचर्यां धारयन्ति[1] ॥६॥

अस्मे रायो दिवेदिवे सं चरन्तु पुरुस्पृहः । अस्मे वाजास ईरताम् ॥ ७ ॥

अस्मे इति । रायः । दिवेऽदिवे । सम् । चरन्तु । पुरुऽस्पृहः । अस्मे इति । वाजासः । ईरताम् ॥७॥

वेङ्कट० 'अस्मासु धनानि अन्वहम्' सम् चरन्तु' बहुभिः स्पृहणीयानि अन्नानि च अस्मासु' उद्युक्तानि भवन्तु ॥ ७ ॥

स विप्रश्चर्षणीनां शवसा मानुषाणाम् । अति क्षिप्रेव विध्यति ॥ ८ ॥

सः । विप्रः । चर्षणीनाम् । शवसा । मानुषाणाम् । अति । क्षिप्राऽइव । विध्यति ॥ ८ ॥

वेङ्कट० सः विप्रः मनुष्येषु मनुष्याणाम् बलेन मनुष्य 'अति विध्यति' धानुष्क इव क्षेप्ता शरान्, इत्यग्नेः स्तोतारमाह' ॥ ८ ॥

"इति तृतीयाष्टके पञ्चमाध्यायेऽष्टमो वर्गः" ॥

[९]

"वामदेवो गौतम ऋषिः । अग्निर्देवता । गायत्री छन्दः" ।

अग्ने मृळ महाँ असि य ईमा देवयुं जनम् । इयेथ बर्हिरासदम् ॥ १ ॥

अग्ने । मृळ । महान् । असि । यः । ईम् । आ । देवऽयुम् । जनम् । इयेथ । बर्हिः । आऽसदम् ॥ १ ॥

वेङ्कट० अग्ने! सुखय', महान् त्वम् असि, यः त्वम् इमम् 'देवयुम् जनम्' रक्षितुम् आ गच्छसि आसदनाय बर्हिः ॥ १ ॥

स मानुषीषु दूळभो विक्षु प्रावीरमर्त्यः । दूतो विश्वेषां भुवत् ॥ २ ॥

सः । मानुषीषु । दुःऽदभः । विक्षु । प्रऽअवीः । अमर्त्यः । दूतः । विश्वेषाम् । भुवत् ॥ २ ॥

वेङ्कट० सः मानुषेषु दुर्दभः[10] विक्षु प्रकर्षेण रक्षकः अमर्त्यः दूतः विश्वेषाम् देवानाम् अभवत् अग्निः ॥२॥

१-१. नास्ति वि' कर्त. २-२. मन्दे ···नाई वि' अ'. ३. "रन्ति वि' अ'. ४. अस्माकं वि'. ५-५. "सिश्रि" वि' अ'; "ति धारयन्ति वि' कर्त. ६. नास्ति वि' अ'. ७-७. नास्ति मूको. ८. एतत् वि' कर्त ९-९. देव जनम् वि' स कर्त; देवजनम् वि' अ'. १०. दुर्दभो वि' अ'.

स सद्म परि णीयते होता मन्द्रो दिविष्टिषु । उत पोता नि षीदति ॥ ३ ॥

सः । सद्म । परि । नीयते । होता । मन्द्रः । दिविष्टिषु । उत । पोता । नि । सीदति ॥ ३ ॥

वेङ्कट० 'सः सद्म' यज्ञसदनं परितो नीयते मोदमानः दिवः अन्वेषणेषु होता सन्' यजमानैः । अपि च पोता सन् नि सीदति ॥ ३ ॥

उत ग्ना अग्निरध्वर उतो गृहपतिर्दमे । उत ब्रह्मा नि षीदति ॥ ४ ॥

उत । ग्नाः । अग्निः । अध्वरे । उतो इति । गृहऽपतिः । दमे । उत । ब्रह्मा । नि । सीदति ॥ ४ ॥

वेङ्कट० अपि च अग्निः यज्ञे 'ग्नाः च' भवति' । देवपत्न्यो ग्ना उच्यन्ते । एवम् यज्ञगृहे यजमानश्च भूत्वा नि सीदति, ब्रह्मा च भवतीति ॥ ४ ॥

वेषि ह्यध्वरीयतामुपवक्ता जनानाम् । हव्या च मानुषाणाम् ॥ ५ ॥

वेषि । हि । अध्वरिऽयताम् । उपऽवक्ता । जनानाम् । हव्या । च । मानुषाणाम् ॥ ५ ॥

वेङ्कट० यज्ञमिच्छताम् जनानाम् उपवक्ता सन् गच्छसि । हव्यानि च मानुषाणाम् गच्छसि ॥ ५ ॥

वेषीद्वस्य दूत्यं यस्य जुजोषो अध्वरम् । हव्यं मर्तस्य वोळ्हवे ॥ ६ ॥

वेषि । इत् । ऊँ इति । अस्य । दूत्यम् । यस्य । जुजोषः । अध्वरम् । हव्यम् । मर्तस्य । वोळ्हवे ॥ ६ ॥

वेङ्कट० गच्छसि एव अस्य दूत्यम् यस्य सजसे यज्ञम् । हविः वोढुम् मनुष्यस्य दूत्यं वेषीति ॥ ६ ॥

अस्माकं जोष्यध्वरमस्माकं यज्ञमङ्गिरः । अस्माकं शृणुधी हवम् ॥ ७ ॥

अस्माकम् । जोषि । अध्वरम् । अस्माकम् । यज्ञम् । अङ्गिरः । अस्माकम् । शृणुधि । हवम् ॥ ७ ॥

वेङ्कट० निगदव्याख्याता ॥ ७ ॥

परि ते दूळभो रथोऽस्माँ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥ ८ ॥

परि । ते । दुःऽदभः । रथः । अस्मान् । अश्नोतु । विश्वतः । येन । रक्षसि । दाशुषः ॥ ८ ॥

---

१ १. नास्ति वि° भा°. २. यजमानं वि° भा°. ३-३. नास्ति वि° भा°. ४. °षि वि° भा°.

वेङ्कट० यत्र स्थापयेम ते कर्माणि [illegible] ततः अस्मान्, [illegible] एव [illegible] इति ॥ ८ ॥

इति तृतीयाष्टके पञ्चमाध्याये नवमो वर्गः ॥

[१०]

वामदेवो गौतम ऋषिः । अग्निर्देवता । पदपङ्क्तिः छन्दः, चतुर्थीषष्ठीसप्तम्यः उष्णिह, पदपङ्क्तिर्वा, पञ्चमी महापदपङ्क्तिः, अष्टमी उष्णिक् ।

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् । ऋध्यामा त ओहैः ॥१॥

अग्ने । तम् । अद्य । अश्वम् । न । स्तोमैः । क्रतुम् । न । भद्रम् । हृदिऽस्पृशम् । ऋध्याम । ते । ओहैः ॥

वेङ्कट० अग्ने! तम् त्वाम् अद्य स्तोतारः हृदिस्पृशम् कल्याणम् [illegible] अश्वम् इव यज्ञम् इव [illegible] स्तोमैः समर्धयेम । [illegible] कर्म [illegible] इति । [illegible] ([illegible]) इति ब्राह्मणम् ॥ १ ॥

अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीरृतस्य बृहतो बभूथ ॥२॥

अध । हि । अग्ने । क्रतोः । भद्रस्य । दक्षस्य । साधोः । रथीः । ऋतस्य । बृहतः । बभूथ ॥ २ ॥

वेङ्कट० अथ त्वम् अग्ने! कर्मणः [illegible] साधयितुः सत्यभूतस्य महतः रथ इव हविषां वोढा भवसि ॥ २ ॥

एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः । अग्ने विश्वेभिः सुमना अनीकैः ॥

एभिः । नः । अर्कैः । भव । नः । अर्वाङ् । स्वः । न । ज्योतिः । अग्ने । विश्वेभिः । सुऽमनाः । अनीकैः ॥

वेङ्कट० एभिः अस्माकम् मन्त्रैः अस्मदभिमुखः भव । आदित्यात्मकम् इव ज्योतिः अग्ने! [illegible] तेजोभिः । [illegible] (तैब्रा [illegible]) इति ब्राह्मणम् । [illegible] ॥ ३ ॥

आभिष्टे अद्य गीर्भिर्गृणन्तोऽग्ने दाशेम । प्र ते दिवो न स्तनयन्ति शुष्माः ॥ ४ ॥

आभिः । ते । अद्य । गीःऽभिः । गृणन्तः । अग्ने । दाशेम । प्र । ते । दिवः । न । स्तनयन्ति । शुष्माः ॥४॥

वेङ्कट० आभिः स्तुतिभिः [illegible] अद्य [illegible] अग्ने! हवींषि ददाम । [illegible] इति ॥ ४ ॥

१. [illegible] २-२. नास्ति मूको. ३. [illegible] ४. [illegible] ५. नास्ति मूको. ६. नास्ति [illegible] ७. [illegible] ८. [illegible] ९. नास्ति [illegible] १०. [illegible]

तव॑ स्वादि॒ष्ठाग्ने॒ संदृ॑ष्टिरि॒दा चि॒दह्न॑ इ॒दा चि॑द॒क्तोः । श्रि॒ये रु॒क्मो न रो॑चत उपा॒के ॥५॥

तव॑ । स्वादि॑ष्ठा । अग्ने॑ । सम्ऽदृ॑ष्टिः । इ॒दा । चि॒त् । अह्नः॑ । इ॒दा । चि॒त् । अ॒क्तोः ।
श्रि॒ये । रु॒क्मः । न । रो॒च॒ते॒ । उ॒पा॒के ॥ ५ ॥

वेङ्कट० तव स्वादुतमा अग्ने! सन्दृष्टिः, यथा त्वादृशा सन्दृश्यन्ते । इदाचिदह्नः इदाचिदक्तोरुपाके । सा[1] कदाचित् अह्नि श्रियै[3] दीप्यते कदाचित् रात्रेः रुक्मः इव तयोः समीपे ॥ ५ ॥

घृ॒तं न पू॒तं त॒नूर॑रे॒पाः शुचि॒ हिर॑ण्यम् । तत् ते॑ रु॒क्मो न रो॑चत स्वधावः ॥ ६॥

घृ॒तम् । न । पू॒तम् । त॒नूः । अ॒रे॒पाः । शुचि॑ । हिर॑ण्यम् । तत् । ते॒ । रु॒क्मः । न । रो॒च॒त॒ । स्व॒धा॒ऽवः॒ ॥ ६ ॥

वेङ्कट० घृतम् इव पवित्रपूतम् तव शरीरम् 'निर्मलम् शुचिम्' हिरण्यवर्णम् तत् तव रुक्मः इव[4] रोचते हे हविष्मन्! ॥ ६ ॥

कृ॒तं चि॒द्धि ष्मा॒ सने॑मि॒ द्वेषोऽग्न॑ इ॒नोषि॒ मर्ता॑त् । इ॒त्था यज॑मानादृतावः ॥७॥

कृ॒तम् । चि॒त् । हि । स्म॒ । सने॑मि । द्वेषः॑ । अग्ने॑ । इ॒नोषि॑ । मर्ता॑त् । इ॒त्था । यज॑मानात् । ऋ॒त॒ऽवः॒ ॥ ७ ॥

वेङ्कट० कृतम् पुराणम् पापमपि[6] शत्रुमिव द्वेष्टृ अग्ने सत्यमेव यजमानात्[7] मनुष्यात्[8] त्वम् प्रेरयसि हे यज्ञवन्! इति ॥ ७ ॥

शि॒वा नः॑ स॒ख्या सन्तु॑ भ्रा॒त्राग्ने॑ दे॒वेषु॑ यु॒ष्मे । सा नो॒ नाभिः॒ सद॑ने॒ सस्मि॒न्नूध॑न् ॥८॥

शि॒वा । नः॒ । स॒ख्या । सन्तु॑ । भ्रा॒त्रा । अग्ने॑ । दे॒वेषु॑ । यु॒ष्मे इति॑ ।
सा । नः॒ । नाभिः॑ । सद॑ने । सस्मि॑न् । ऊध॑न् ॥ ८ ॥

वेङ्कट० शिवानि नः सख्यानि भवन्तु[9] भ्रात्रा त्वया हेतुना अग्ने! युष्मासु[10] देवेषु हे देव! । सर्वं हि अस्माकम् सदनम् सर्वस्मिन् कामानामुत्पत्तिस्थाने भवति ॥ ८ ॥

"इति तृतीयाष्टके पञ्चमाध्याये दशमो वर्गः" ॥

[११]

"वामदेवो गौतम ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः" ।

भ॒द्रं ते॑ अग्ने सहसि॒न्ननी॑कमुपा॒क आ रो॑चते॒ सूर्य॑स्य ।
रुश॑द् दृ॒शे द॑दृशे नक्त॒या चि॒दरू॑क्षितं दृ॒श आ रू॒पे अन्न॑म् ॥ १ ॥

---

१. नास्ति वि' कप. २. नास्ति वि' अ'; न वि' ल कपं. ३. श्रियै वि' अ'. ४-४. °ऽऽ.° कप ५. °निर्मल् कप. ६. °मिव अ'. ७. नास्ति अ'. ८. °ष्यात् अ' कपं. ९. सन्तु वि' कपं. १०. पुनरुक्तः मूको. ११-११. नास्ति मूको.

भद्रम् । ते । अग्ने । सहसिन् । अनीकम् । उपाके । आ । रोचते । सूर्यस्य ।
रुशत् । दृशे । ददृशे । नक्तऽया । चित् । अरूक्षितम् । दृशा । आ । रूपे । अन्नम् ॥ १ ॥

वेङ्कट० हे अग्ने बलवन्[1] कल्याणं तव दर्शनीयम् अनीकम् अह्नि सूर्यस्य समीपे दीप्यते[2] । नक्ता रात्र्या च सह अनुरूपम् [illegible] दर्शनाय भवति । किञ्च तव रूपे स्निग्धम्[3] अन्नम् [illegible] भवति कल्याणम् इति ॥ १ ॥

वि षाह्यग्ने गृणते मनीषां खं वेपसा तुविजात स्तवानः ।
विश्वेभिर्यद् वावनः शुक्र देवैस्तन्नो रास्व सुमहो भूरि मन्म ॥ २ ॥

वि । साहि । अग्ने । गृणते । मनीषाम् । खम् । वेपसा । तुविऽजात । स्तवानः ।
विश्वेभिः । यत् । वावनः । शुक्र । देवैः । तत् । नः । रास्व । सुऽमहः । भूरि । मन्म ॥ २ ॥

वेङ्कट० वि वहस्व अग्ने! स्तुतिम् स्तुवते [illegible] वेपसा [illegible] हे बहुजनन! स्तूयमानः । हे दीप्त! सर्वैः देवैः सह यत्[4] त्वं भजसे । पञ्चम्यर्थे तृतीया । तत्[5] धनम् अस्मभ्यं देहि हे शोभनदान! प्रभूतं मननीयम् ॥ २ ॥

त्वदग्ने काव्या त्वन्मनीषास्त्वदुक्था जायन्ते राध्यानि ।
त्वदेति द्रविणं वीरपेशा इत्थाधिये दाशुषे मर्त्याय ॥ ३ ॥

त्वत् । अग्ने । काव्या । त्वत् । मनीषाः । त्वत् । उक्था । जायन्ते । राध्यानि ।
त्वत् । एति । द्रविणम् । वीरऽपेशाः । इत्थाऽधिये । दाशुषे । मर्त्याय ॥ ३ ॥

वेङ्कट० त्वत्तः अग्ने! कविकर्माणि स्तुतयः शस्त्राणि च आराधनीयानि यज्ञार्थं प्रादुर्भवन्ति । तथा त्वत्तः आगच्छति धनमपि वीररूपं वीरपरिवृतं सत्यकर्मणे प्रयच्छते मनुष्याय ॥ ३ ॥

त्वद् वाजी वाजम्भरो विहाया अभिष्टिकृज्जायते सत्यशुष्मः ।
त्वद् रयिर्देवजूतो मयोभुस्त्वदाशुर्जूजुवाँ अग्ने अर्वा ॥ ४ ॥

त्वत् । वाजी । वाजम्ऽभरः । विऽहायाः । अभिष्टिऽकृत् । जायते । सत्यऽशुष्मः ।
त्वत् । रयिः । देवऽजूतः । मयःऽभुः । त्वत् । आशुः । जूजुऽवान् । अग्ने । अर्वा ॥ ४ ॥

वेङ्कट० त्वत्त एव अश्वः अन्नस्याहर्ता महान् [illegible] कर्ता जायते, त्वत्त एव धनमपि जायते देवैः प्रेरितं सुखस्य भावयितृ, त्वत्त एव वेगवान् गमनपरः अग्ने! अश्वः ॥ ४ ॥

---

१. [illegible] २. [illegible] विं कर्प. ३. [illegible] विं कर्प. ४. [illegible] विं कर्प. ५. [illegible] विं कर्प.

त्वाम॑ग्ने प्रथ॒मं दे॑व॒यन्तो॑ दे॒वं मर्ता॑ अमृत म॒न्द्रजि॑ह्वम् ।
द्वे॒षो॒युत॒मा वि॑वासन्ति धी॒भिर्दमू॑नसं गृ॒हप॑तिम॒मूर॑म् ॥ ५ ॥

त्वाम् । अ॒ग्ने॒ । प्र॒थ॒मम् । दे॒व॒ऽयन्तः॑ । दे॒वम् । मर्ताः॑ । अ॒मृ॒त॒ । म॒न्द्रऽजि॑ह्वम् ।
द्वे॒षः॒ऽयुत॑म् । आ । वि॒वा॒स॒न्ति॒ । धी॒भिः । दमू॑नसम् । गृ॒हऽप॑तिम् । अमू॑रम् ॥ ५ ॥

वेङ्कट० त्वाम् अग्ने! प्रथमम् एव देवान् यष्टुमिच्छन्तः देवम्[1] मनुष्याः अमृत! मोदनजिह्वम्[2] राक्षसानां पृथक्कर्तारम् परिचरन्ति कर्मभिः, दमनमनसम् गृहाणां पतिम् अमूढम् ॥ ५ ॥

आ॒रे अ॒स्मदम॑तिमा॒रे अंह॑ आ॒रे विश्वां॑ दुर्म॒तिं यन्नि॒पासि॑ ।
दो॒षा शि॒वः स॑हसः सूनो अग्ने॒ यं दे॒व आ चि॒त्सच॑से स्व॒स्ति ॥ ६ ॥

आ॒रे । अ॒स्मत् । अम॑तिम् । आ॒रे । अंहः॑ । आ॒रे । विश्वा॑म् । दुः॒ऽम॒तिम् । यत् । नि॒ऽपासि॑ ।
दो॒षा । शि॒वः । स॒ह॒सः॒ । सू॒नो॒ इति॑ । अ॒ग्ने॒ । यम् । दे॒वः । आ । चि॒त् । सच॑से । स्व॒स्ति ॥ ६ ॥

वेङ्कट० आरे[3] अस्मत्तः मतिविपर्यासम् पापम्[4] सर्वाम् दुर्मतिम्[5] च यस्मात् त्वं नितरां रक्षसि । तस्मादस्मान् नैतानि प्राप्नुवन्ति तथा कुरु च । रात्रौ कल्याणः त्वम् हे सहसः सूनो अग्ने! यम्[6] च देवनशीलः त्वम् आ सेवसे सोऽविनाशं प्राप्नोति ॥ ६ ॥

[7]इति तृतीयाष्टके पञ्चमाध्याये एकादशो वर्गः[7] ॥

[१२]

[8]वामदेवो गौतम ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[8] ।

यस्त्वाम॑ग्न इ॒नध॑ते य॒तस्रु॒क्त्रिस्ते॒ अन्नं॑ कृ॒णव॒त्सस्मि॒न्नह॑न् ।
स सु द्यु॒म्नैर॒भ्य॑स्तु प्र॒सक्ष॒त्तव॒ क्रत्वा॑ जातवेदश्चिकि॒त्वान् ॥ १ ॥

यः । त्वाम् । अ॒ग्ने॒ । इ॒नध॑ते । य॒तऽस्रु॑क् । त्रिः । ते॒ । अन्न॑म् । कृ॒णव॑त् । सस्मि॑न् । अह॑न् ।
सः । सु । द्यु॒म्नैः । अ॒भि । अ॒स्तु॒ । प्र॒ऽसक्ष॑त् । तव॑ । क्रत्वा॑ । जा॒त॒ऽवे॒दः॒ । चि॒कि॒त्वान् ॥ १ ॥

वेङ्कट० यः त्वाम् अग्ने! इन्धनैर्दीपयति यतस्रुक्, यज्ञ समाने अहनि त्रिः तुभ्यं हविः कृणोति, सः धनैः अन्नैः सुष्ठु अभि भवतु[9] शत्रून् प्रकर्षेण सहमानः प्रभवन् तव कर्मणा हे जातवेदः![10] प्राज्ञ[10] ॥ १ ॥

१-१. °मान् कपे. २. सर्वं वि[3] अ[1]. ३. नास्ति वि[3]. ४. नाशम् वि[3] अ[1]. ५. नास्ति वि[1]. ६. ऽयम् वि[3]. ७-७. नास्ति मूको. ८. °ति वि[3] अ[1]. ९. °भवतु वि[1]. °भवतु कपे. १०. नास्ति वि[1]; प्राज्ञम् वि[3] अ[3]; प्राज्ञ क कपे.

इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमा सपर्यन् ।
स इधानः प्रति दोषामुषासं पुष्यन्रयिं सचते घ्नन्नमित्रान् ॥ २ ॥

इध्मम् । यः । ते । जभरत् । शश्रमाणः । महः । अग्ने । अनीकम् । आ । सपर्यन् ।
सः । इधानः । प्रति । दोषाम् । उषसम् । पुष्यन् । रयिम् । सचते । घ्नन् । अमित्रान् ॥ २ ॥

वेङ्कट० इध्मम् यः ते आहरति श्राम्यन् महतस्तव अग्ने! तेजसाम् अनीकम् परिचरन्, सः रात्रिम् उषसं च प्रति अहरहः इन्धानः[1] प्रजाभिः पशुभिश्च पुष्यन् धनं सेवते घ्नन् शत्रून् ॥ २ ॥

अग्निरीशे बृहतः क्षत्रियस्याग्निर्वाजस्य परमस्य रायः ।
दधाति रत्नं विधते यविष्ठो व्यानुषङ्मर्त्याय स्वधावान् ॥ ३ ॥

अग्निः । ईशे । बृहतः । क्षत्रियस्य । अग्निः । वाजस्य । परमस्य । रायः ।
दधाति । रत्नम् । विधते । यविष्ठः । वि । आनुषक् । मर्त्याय । स्वधाऽवान् ॥ ३ ॥

वेङ्कट० अयम् अग्निः ईश्वरो भवति महतः क्षतात्त्राणसमर्थस्य[2] बलस्य, अग्निः अन्नस्य उत्कृष्टस्य । स च धनस्येश्वरो भवति, वि दधाति च रत्नम् परिचरते युवतमः आनुषक्[3] मनुष्याय[4] अन्नवान् ॥ ३ ॥

यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः ।
कृधी ष्व१स्माँ अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने ॥ ४ ॥

यत् । चित् । हि । ते । पुरुषऽत्रा । यविष्ठ । अचित्तिऽभिः । चकृम । कत् । चित् । आगः ।
कृधि । सु । अस्मान् । अदितेः । अनागान् । वि । एनांसि । शिश्रथः । विष्वक् । अग्ने ॥ ४ ॥

वेङ्कट० मनुष्यसमूहे वयं[5] तव हे युवतम अग्ने! अज्ञानैः कृतवन्तः यत् किञ्चित् एनः, ततः अस्मान् 'कुरु अस्माः[6]' पृथिव्याः अनागसस्त्वम्[7] । पृथ्वी हि पापकृतो न धारयति । सर्वम् एनांसि विष्वक् वि श्लथय हे अग्ने! ॥ ४ ॥

महश्चिदग्न एनसो अभीक ऊर्वाद्देवानामुत मर्त्यानाम् ।
मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः ॥ ५ ॥

महः । चित् । अग्ने । एनसः । अभीके । ऊर्वात् । देवानाम् । उत । मर्त्यानाम् ।
मा । ते । सखायः । सदम् । इत् । रिषाम । यच्छ । तोकाय । तनयाय । शम् । योः ॥ ५ ॥

१. इन्धानम् वि' अ'. २. क्षतात्त्रा' मूको'. ३. नास्ति वि' अप'. ४. मनुष्य वि' अप'. ५. वयम् वि' अ'. ६-६. नास्ति वि' अ'. ७. अनागस्कान् अ'.

वेङ्कट० हे अग्ने ! देवमनुष्यविषयस्य महतः किल्बिषस्य पापस्य त्वमेव शमयिता । अथ ते वयम् । यथा एव मा हिंसाम । अस्तु पुत्राय नप्त्राय च शम् च योः च ॥ ५ ॥

यथा॑ ह॒ त्यद् व॑सवो गौ॒र्यं॑ चित् प॒दि षि॒ताममु॑ञ्चता यजत्राः ।
ए॒वो ष्व१॒॑स्मन्मु॑ञ्चता॒ व्यंहः॒ प्र ता॑र्यग्ने प्रत॒रं न॒ आयुः॑ ॥ ६ ॥

यथा॑ । ह॒ । त्यत् । व॒स॒वः॒ । गौ॒र्यम् । चि॒त् । प॒दि । सि॒ताम् । अमु॑ञ्चत । य॒ज॒त्राः॒ ।
ए॒वो इति॑ । सु । अ॒स्मत् । मु॒ञ्च॒त॒ । वि । अंहः॑ । प्र । ता॒रि॒ । अ॒ग्ने॒ । प्र॒ऽत॒रम् । नः॒ । आयुः॑ ॥ ६ ॥

वेङ्कट० हे वसवः ! यथा पुरा पदबन्धने बद्धां गौरीम् अमुञ्चत हे यजत्राः ! । एवमेव अस्मत्तः पापं सुष्ठु विमुञ्चत । अपि हे अग्ने ! त्वया च अस्माकं प्रवृद्धतरम् आयुः प्रवर्धताम् ॥ ६ ॥

इति तृतीयाष्टके पञ्चमाध्याये द्वादशो वर्गः ॥

[१३]

वामदेवो गौतम ऋषिः । अग्निर्देवता (लिङ्गोक्तदेवता इत्येके)। त्रिष्टुप् छन्दः ।

प्रत्य॒ग्निरु॒षसा॒मग्र॑मख्यद् वि॒भाती॑नां सु॒मना॑ रत्न॒धेय॑म् ।
या॒तम॑श्विना सु॒कृतो॑ दुरो॒णमुत् सूर्यो॒ ज्योति॑षा दे॒व ए॑ति ॥ १ ॥

प्रति॑ । अ॒ग्निः । उ॒षसा॑म् । अग्र॑म् । अ॒ख्य॒त् । वि॒ऽभाती॑नाम् । सु॒ऽमनाः॑ । र॒त्न॒ऽधेय॑म् ।
या॒तम् । अ॒श्वि॒ना॒ । सु॒ऽकृतः॑ । दु॒रो॒णम् । उत् । सूर्यः॑ । ज्योति॑षा । दे॒वः । ए॒ति॒ ॥ १ ॥

वेङ्कट० आग्नेयमेव सूक्तम् । लिङ्गोक्तदेवतमेके । मनुष्याणां रत्नाधानभूतम् उषसाम् अग्रम् सुमनाः अग्निः प्रकाशयति । अस्मिन् काले हे अश्विनौ ! यजमानस्य गृहं प्रति आगच्छतम् । उद् एति सूर्यः च देवः ज्योतिषा सह ॥ १ ॥

ऊ॒र्ध्वं भा॒नुं स॑वि॒ता दे॒वो अ॑श्रेद् द्र॒प्सं दवि॑ध्वद् गवि॒षो न सत्वा॑ ।
अनु॑ व्र॒तं वरु॑णो यन्ति मि॒त्रो यत् सूर्यं॑ दि॒व्या॑रो॒हय॑न्ति ॥ २ ॥

ऊ॒र्ध्वम् । भा॒नुम् । स॒वि॒ता । दे॒वः । अ॒श्रे॒त् । द्र॒प्सम् । दवि॑ध्वत् । गो॒ऽइ॒षः । न । सत्वा॑ ।
अनु॑ । व्र॒तम् । वरु॑णः । य॒न्ति॒ । मि॒त्रः । यत् । सूर्य॑म् । दि॒वि । आ॒ऽरो॒हय॑न्ति ॥ २ ॥

---

१. [illegible] २. [illegible] ३. [illegible] ४-४. [illegible] ५. [illegible] ६-६. नास्ति मूको. ७. [illegible] तृ. अष्ट २,४,१३.

वेङ्कट० ऊर्ध्वमुखं तेन सविता देवाः अयानि तेजसा केन सूर्यं भूत्वा । कथा सर्वे सततं भवाम इत्यर्थः ... तद्वदिति । सवितुर्व्रतम् ... मित्रः ये सूर्यं दिवि आरोहयन्ति, ते सर्वेऽनुगच्छन्ति ॥ २ ॥

यं सीमकृण्वन्तमसे विपृचे ध्रुवक्षेमा अनवस्यन्तो अर्थम् ।
तं सूर्यं हरितः सप्त यह्वीः स्पशं विश्वस्य जगतो वहन्ति ॥ ३ ॥

यम् । सीम् । अकृण्वन् । तमसे । विऽपृचे । ध्रुवऽक्षेमाः । अनवऽस्यन्तः । अर्थम् ।
तम् । सूर्यम् । हरितः । सप्त । यह्वीः । स्पशम् । विश्वस्य । जगतः । वहन्ति ॥ ३ ॥

वेङ्कट० यमेतं सततं वियोजनाय तमसः अकुर्वन् स्थिरक्षेमाः अनवहस्यमानमकम् सूर्यं अवसानरहिताः 'सर्वेऽनुतिष्ठन्तः', तम् सूर्यम् अश्वाः सप्त महत्यः विश्वस्य जगतः कृताकृतस्य ज्ञातारम् वहन्ति ॥ ३ ॥

वहिष्ठेभिर्विहरन्यासि तन्तुमवव्ययन्नसितं देव वस्म ।
दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्वन्तः ॥ ४ ॥

वहिष्ठेभिः । विऽहरन् । यासि । तन्तुम् । अवऽव्ययन् । असितम् । देव । वस्म ।
दविध्वतः । रश्मयः । सूर्यस्य । चर्मऽइव । अव । अधुः । तमः । अप्ऽसु । अन्तरिति ॥ ४ ॥

वेङ्कट० हे देव सूर्य! वोढृतमैरश्वैः आत्मीयं सूत्रसदृशं तेजः विविधं हरन् गच्छसि, तत् तमोलक्षणं वासः यथा तस्य तन्तोरपस्तात् भवति 'तथा अवव्ययन्'। ... सूर्यं विधुन्वन्तः रश्मयः सूर्यस्य तेजस्तमः चर्म इव अव अधुः अन्तरिक्षस्य मध्ये ॥ ४ ॥

अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न ।
कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम् ॥ ५ ॥

अनायतः । अनिऽबद्धः । कथा । अयम् । न्यङ् । उत्तानः । अव । पद्यते । न ।
कया । याति । स्वधया । कः । ददर्श । दिवः । स्कम्भः । सम्ऽऋतः । पाति । नाकम् ॥ ५ ॥

वेङ्कट० कथमुपरि माहात्म्यं न तत्र केनचित् बद्धः नाधःपातः । तथाविधः अयम् कथम् न्यङ् न अवपतति । कथं चोर्ध्वम् ... । केन वा बलेन ध्रियमाणोऽयम् अन्तरिक्षे गच्छति । कश्चैनं ददर्श । सोऽयं द्युलोकस्य स्कम्भयिता सन् तेन संगतः नाकम् लोकं पाति ॥ ५ ॥

"इति तृतीयाष्टके पञ्चमाध्याये त्रयोदशो वर्गः" ॥

---

१. तेन वि[१]. २-३. ... वि[१]. ४. नास्ति वि[१] अर्थ. ४. समार्थ वि[१] अर्थ. ५. ... वि[१] अर्थ. ६. न मूको. ७. नास्ति मूको. ८-८. ... वि[१] अ[१]. ९. ... मूको. १०. तथा वि[१] अर्थ. ११-११. नास्ति मूको.

[१४]

¹वामदेवो गौतम ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः¹ ।

प्रत्यग्निरुषसो जातवेदा अख्यद्देवो रोचमाना महोभिः ।
आ नासत्योरुगाया रथेनेमं यज्ञमुप नो यातमच्छ ॥ १ ॥

प्रति । अग्निः । उषसः । जातऽवेदाः । अख्यत् । देवः । रोचमानाः । महःऽभिः ।
आ । नासत्या । उरुऽगाया । रथेन । इमम् । यज्ञम् । उप । नः । यातम् । अच्छ ॥ १ ॥

वेङ्कट० प्रत्यग्निः² इति समानं पूर्वेण सूक्तेन । प्रकाशयति उषसः जातप्रज्ञः देवः तेजोभिः दीप्यमानाः । तथा सति इमम् नः यज्ञम् प्रति उप आ गच्छतम् रथेन बहुभिः स्तोतव्यौ हे अश्विनौ ! इति ॥ १ ॥

ऊर्ध्वं केतुं सविता देवो अश्रेज्ज्योतिर्विश्वस्मै भुवनाय कृण्वन् ।
आप्रा द्यावापृथिवी अन्तरिक्षं वि सूर्यो रश्मिभिश्चेकितानः ॥ २ ॥

ऊर्ध्वम् । केतुम् । सविता । देवः । अश्रेत् । ज्योतिः । विश्वस्मै । भुवनाय । कृण्वन् ।
आ । अप्राः । द्यावापृथिवी इति । अन्तरिक्षम् । वि । सूर्यः । रश्मिऽभिः । चेकितानः ॥ २ ॥

वेङ्कट० ऊर्ध्वम् तेजः सविता देवः³ श्रयति सर्वस्मै लोकाय ज्योतिः कुर्वन् । आ पूरयति च त्रीन् लोकान् विविधम् सूर्यः⁴ रश्मिभिः सर्वं जानन् इति ॥ २ ॥

आवहन्त्यरुणीर्ज्योतिषागान्मही चित्रा रश्मिभिश्चेकिताना ।
प्रबोधयन्ती सुविताय देव्युषा ईयते सुयुजा रथेन ॥ ३ ॥

आऽवहन्ती । अरुणीः । ज्योतिषा । आ । अगात् । मही । चित्रा । रश्मिऽभिः । चेकिताना ।
प्रऽबोधयन्ती । सुविताय । देवी । उषाः । ईयते । सुऽयुजा । रथेन ॥ ३ ॥

वेङ्कट० आरक्तीः अरुणवर्णाः गाः आवहन्ती ज्योतिषा सह आ गच्छति महती चित्ररूपा रश्मिभिः ज्ञायमाना⁵ । सुप्तं जगत् प्रबोधयन्ती अभ्युदयाय देवी उषाः गच्छति सुष्ठु युक्तेन रथेन ॥ ३ ॥

आ वां वहिष्ठा इह ते वहन्तु रथा अश्वास उषसो व्युष्टौ ।
इमे हि वां मधुपेयाय सोमा अस्मिन् यज्ञे वृषणा मादयेथाम् ॥ ४ ॥

१-१. नास्ति मूको. २. नास्ति ऋपं. ३. देव इदं. ४. लोके वि° अ°. ५. चाद° वि°.

आ । वाम् । वहि॑ष्ठाः । इ॒ह । ते । व॒ह॒न्तु॒ । रथाः॑ । अश्वा॑सः । उ॒षसः॑ । विऽउ॑ष्टौ ।
इ॒मे । हि । वा॒म् । म॒धु॒ऽपेया॑य । सोमाः॑ । अ॒स्मिन् । य॒ज्ञे । वृ॒ष॒णा॒ । मा॒द॒ये॒था॒म् ॥ ४ ॥

वेङ्कट० आ वहन्तु वाम् वोढृतमाः अश्वाः ते अस्मिन् यज्ञे रथाः उषसः व्युच्छन्त्याः रथा च । इमे हि मधुकरस्य सोमस्य पानाय इमे सोमाः अभिषुताः । अस्मिन् यज्ञे हे वर्षितारौ 'मादयेथाम्' ॥ ४ ॥

अना॑यतो॒ अनि॑बद्धः क॒थायं न्य॑ङ्ङुत्ता॒नोऽव॑ पद्यते॒ न ।
कया॑ याति स्व॒धया॒ को द॑दर्श दि॒वः स्क॒म्भः सम॑ृतः पाति॒ नाक॑म् ॥ ५ ॥

अना॑यतः । अनि॑ऽबद्धः । क॒था । अ॒यम् । न्य॑ङ् । उ॒त्ता॒नः । अव॑ । प॒द्य॒ते॒ । न ।
कया॑ । या॒ति॒ । स्व॒धया॑ । कः । द॒द॒र्श॒ । दि॒वः । स्क॒म्भः । सम्ऽऋ॑तः । पा॒ति॒ । नाक॑म् ॥ ५ ॥

वेङ्कट० पूर्वं (४.१३,५) व्याख्याता ॥ ५ ॥

'इति तृतीयाष्टके पञ्चमाध्याये चतुर्दशो वर्गः' ॥

[१५]

'वामदेवो गौतम ऋषिः । आग्निर्देवता, सप्तम्यष्टम्योः सोमकः साहदेव्यः,
नवमीदशम्योः अश्विनौ । गायत्री छन्दः' ।

अ॒ग्निर्होता॑ नो अध्व॒रे वा॒जी सन्परि॑ णीयते । दे॒वो दे॒वेषु॑ य॒ज्ञियः॑ ॥ १ ॥

अ॒ग्निः । होता॑ । नः॒ । अ॒ध्व॒रे । वा॒जी । सन् । परि॑ । नी॒य॒ते॒ । दे॒वः । दे॒वेषु॑ । य॒ज्ञियः॑ ॥ १ ॥

वेङ्कट० अग्निः होता अस्माकं यज्ञे 'अश्वः भूत्वा' परितः नीयते पर्यग्निकरणे देव देवानां मध्ये यज्ञियः ॥ १ ॥

परि॑ त्रिवि॒ष्ट्य॑ध्व॒रं यात्य॒ग्नी र॒थीरि॑व । आ दे॒वेषु॒ प्रयो॒ दध॑त् ॥ २ ॥

परि॑ । त्रि॒ऽवि॒ष्टि । अ॒ध्व॒रम् । याति॑ । अ॒ग्निः । र॒थीःऽइ॑व । आ । दे॒वेषु॑ । प्रयः॑ । दध॑त् ॥ २ ॥

वेङ्कट० सारथिरिव परि याति अध्वरं यज्ञं त्रिवेष्टनं त्रिरावृत्त्या, देवेषु अन्नम् आ दधत् इति ॥ २ ॥

परि॒ वाज॑पतिः क॒विर॒ग्निर्ह॒व्यान्य॑क्रमीत् । दध॒द्रत्ना॑नि दा॒शुषे॑ ॥ ३ ॥

परि॑ । वाज॑ऽपतिः । क॒विः । अ॒ग्निः । ह॒व्यानि॑ । अ॒क्र॒मी॒त् । दध॑त् । रत्ना॑नि । दा॒शुषे॑ ॥ ३ ॥

वेङ्कट० परि अक्रमीत् हवींषि अन्नपतिः कविः अग्निः, यजमानाय रत्नानि प्रयच्छन् इति ॥ ३ ॥

---

१. व्याख्याता वि॰ अ॰; 'सोम० अ॰. २-२. नास्ति मूको. ३-३. अश्वभूतः वि॰ अ॰.

अयं यः सृञ्जये पुरो दैववाते समिध्यते । द्युमाँ अमित्रदम्भनः ॥ ४ ॥

अयम् । यः । सृञ्जये । पुरः । दैवऽवाते । सम्ऽइध्यते । द्युऽमान् । अमित्रऽदम्भनः ॥ ४ ॥

वेङ्कट० अयम् सोऽग्निः यः पूर्वम् सृञ्जये राजनि दैववाते[1] समिध्यते[2] स दीप्तिमान् अमित्राणां हिंसकः ॥४॥

अस्य घा वीर ईवतोऽग्नेरीशीत मर्त्यः । तिग्मजम्भस्य मीळ्हुषः ॥ ५ ॥

अस्य । घ । वीरः । ईवतः । अग्नेः । ईशीत । मर्त्यः । तिग्मऽजम्भस्य । मीळ्हुषः ॥ ५ ॥

वेङ्कट० एवं गमनवन्तम् अग्निम् तिग्मदंष्ट्रम् सेक्तारम् मनुष्यः वीरः[3] भर्तुम् ईश्वरो भवेदिति[4] मन्त्रः ॥५॥

"इति तृतीयाष्टके पञ्चमाध्याये पञ्चदशो वर्गः" ॥

तमर्वन्तं न सानसिमरुषं न दिवः शिशुम् । मर्मृज्यन्ते दिवेदिवे ॥ ६ ॥

तम् । अर्वन्तम् । न । सानसिम् । अरुषम् । न । दिवः । शिशुम् । मर्मृज्यन्ते । दिवेऽदिवे ॥६॥

वेङ्कट० तम् अश्वम् इव सम्भजनीयम् आरोचमानम्[5] दिवः पुत्रम् इवादित्यम् परिचरन्ति अध्वर्यवः ऋत्विजः ॥ ६ ॥

बोधद्यन्मा हरिभ्यां कुमारः साहदेव्यः । अच्छा न हूत उदरम् ॥ ७ ॥

बोधत् । यत् । मा । हरिऽभ्याम् । कुमारः । साहऽदेव्यः । अच्छ । न । हूतः । उत् । अरम् ॥ ७ ॥

वेङ्कट० वामदेवाय सहदेवपुत्रः प्रादादश्वौ रक्षणार्थं । तथाह—बोधद् इति । स एव हयोर्दैवता भवति, बोधयामास मामुत्तिष्ठेति यदा अश्वाभ्याम् कुमारः सहदेवपुत्रः तदा गमिष्यामीत्यहम् आभिमुख्येन आहूत पुरुष इव शत्रून् प्रति उद्गतवानस्मि ॥ ७ ॥

उत त्या यजता हरी कुमारात्साहदेव्यात् । प्रयता सद्य आ ददे ॥ ८ ॥

उत । त्या । यजता । हरी इति । कुमारात् । साहऽदेव्यात् । प्रऽयता । सद्यः । आ । ददे ॥८॥

वेङ्कट० अपि च इमौ पूजनीयौ हरी[6] कुमारात् सहदेवस्य[7] पुत्रात् प्रदत्तौ सद्यः एव अहं लब्धवानस्मि ॥८॥

एष वां देवावश्विना कुमारः साहदेव्यः । दीर्घायुरस्तु सोमकः ॥ ९ ॥

एषः । वाम् । देवौ । अश्विना । कुमारः । साहऽदेव्यः । दीर्घऽआयुः । अस्तु । सोमकः ॥ ९ ॥

वेङ्कट० अथैतद्देवमश्विनौ अनुख्यापयति[8] 'एष वाम्' इति । हे देवौ अश्विनौ! युवयोः स्वभूतः अयमस्मद् "कुमारः साहदेव्यः"[9] सोमकः नाम दीर्घायुः अस्तु ॥ ९ ॥

---

१. दैववाते वि', दैवाते कर्प. २. °ध्यते वि' अ'. ३. वीर° वि' कर्प. ४-४. नास्ति मूको. ५. °चमानं वि'' अ'. ६. नास्ति कप. ७. °देव्यस्य वि'. ८. अनुख्यापयति मूको. ९-९. एष नाम वि', एतनाम कर्प.

तं युवं देवावश्विना कुमारं साहदेव्यम् । दीर्घायुषं कृणोतन ॥ १० ॥

तम् । युवम् । देवौ । अश्विना । कुमारम् । साहऽदेव्यम् । दीर्घऽआयुषम् । कृणोतन ॥ १० ॥

वेङ्कट० कृणोतन कुरुतम् । द्विवचनेऽपि तनबादेशः छन्द इति ॥ १० ॥

'इति तृतीयाष्टके पञ्चमाध्याये षोडशो वर्गः' ॥

[१६]

'वामदेवो गौतम ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः' ।

आ सत्यो यातु मघवाँ ऋजीषी द्रवन्त्वस्य हरय उप नः ।
तस्मा इदन्धः सुषुमा सुदक्षमिहाभिपित्वं करते गृणानः ॥ १ ॥

आ । सत्यः । यातु । मघऽवान् । ऋजीषी । द्रवन्तु । अस्य । हरयः । उप । नः ।
तस्मै । इत् । अन्धः । सुसुम । सुऽदक्षम् । इह । अभिऽपित्वम् । करते । गृणानः ॥ १ ॥

वेङ्कट० आ यातु सत्यकर्मा मघवान् ऋजीषेण सहितः । अस्य अश्वाः अस्मान् उप आगच्छन्तु । तस्मै एव इदम् अन्धः सोमं सुतवन्तो वयं सुबलम् । इह अभिप्राप्तिं करोतीन्द्रः स्तूयमानः ॥ १ ॥

अव स्य शूराध्वनो नान्तेऽस्मिन्नो अद्य सवने मन्दध्यै ।
शंसात्युक्थमुशनेव वेधाश्चिकितुषे असुर्याय मन्म ॥ २ ॥

अव । स्य । शूर । अध्वनः । न । अन्ते । अस्मिन् । नः । अद्य । सवने । मन्दध्यै ।
शंसाति । उक्थम् । उशनाऽइव । वेधाः । चिकितुषे । असुर्याय । मन्म ॥ २ ॥

वेङ्कट० अध्वनः अन्ते यथा पथिकः विश्राम्यति एवं हे शूर । अद्य अस्मिन् नः माध्यन्दिने सवने सोमेन मदितुम् अवस्य । अवस्यतिरवसानार्थः । शंसाति स्तोत्रं शस्त्रम् उशना इव प्राज्ञः चिकितुषे जानते असुराणां हन्त्रे मननीयम्¹ कुर्यामिति ॥ २ ॥

कविर्न निण्यं विदथानि साधन्वृषा यत्सेकं विपिपानो अर्चात् ।
दिव इत्था जीजनत्सप्त कारूनह्ना चिच्चक्रुर्वयुना गृणन्तः ॥ ३ ॥

कविः । न । निण्यम् । विदथानि । साधन् । वृषा । यत् । सेकम् । विऽपिपानः । अर्चात् ।
दिवः । इत्था । जीजनत् । सप्त । कारून् । अह्ना । चित् । चक्रुः । वयुना । गृणन्तः ॥ ३ ॥

१-१. नास्ति मूको. २. °ः चि° क°.

वेङ्कट० यथाना इव अन्तर्हितं स्तोत्रं करोति वामदेवश्च । कर्माणि लाभयन् इन्द्रः यदा सोमस्य शेषम् विविधं पिबन् अवर्तत । यजमानो यज्ञार्थं होतात् तत्र वषट्कर्तृन् ऋत्विजः इत्थं परि-क्रमेण समयति । ते च प्रतिदिनं कुर्वन्ति प्रज्ञानानि[1] इन्द्रं स्तुवन्तः ॥ ३ ॥

स्व१र्यद्वेदि सुदृशीकमर्कैर्महि ज्योती रुरुचुर्यद्ध वस्तोः ।
अन्धा तमांसि दुधिता विचक्षे नृभ्यश्चकार नृतमो अभिष्टौ ॥ ४ ॥

स्वः । यत् । वेदि । सुऽदृशीकम् । अर्कैः । महि । ज्योतिः । रुरुचुः । यत् । ह । वस्तोः ।
अन्धा । तमांसि । दुधिता । विऽचक्षे । नृऽभ्यः । चकार । नृऽतमः । अभिष्टौ ॥ ४ ॥

वेङ्कट० स्वरित्यादित्यनाम (नि. निघ १,४)। यदैनं [2]रश्मिभिः सुदर्शनम् स्वः यदा ज्ञायते, यदा च महत् ज्योतिः रश्मयः रोचयन्ति अह्नि, तदानीम् अन्धीकरणानि तमांसि दुर्निहितानि मनुष्येभ्यः विशेषेण[3] दर्शनाय करोति नेतृतमः अभ्येषणे प्रार्थनायामिति ॥ ४ ॥

ववक्ष इन्द्रो अमितमृजीष्यु१भे आ पप्रौ रोदसी महित्वा ।
अतश्चिदस्य महिमा वि रेच्यभि यो विश्वा भुवना बभूव ॥ ५ ॥

ववक्षे । इन्द्रः । अमितम् । ऋजीषी । उभे इति । आ । पप्रौ । रोदसी इति । महिऽत्वा ।
अतः । चित् । अस्य । महिमा । वि । रेचि । अभि । यः । विश्वा । भुवना । बभूव ॥ ५ ॥

वेङ्कट० वहति इन्द्रः अमितम् स्थावरं जङ्गमं च ऋजीषेण सहान् । उभे च[4] द्यावापृथिवी महत्त्वेन आ पूरयति । योऽयं महिम्ना विश्वान्यपि भुवनानि अभि बभूव, तस्य महिमा [5]विश्वेभ्यः अपि भुवनेभ्यः विरिक्तो भवति बहिर्निश्चरति[5] ॥ ५ ॥

[6]इति तृतीयाष्टके प्रथमाध्याये सप्तदशो वर्गः[6] ।

विश्वानि शक्रो नर्याणि विद्वानपो रिरेच सखिभिर्निकामैः ।
अश्मानं चिद्ये बिभिदुर्वचोभिर्व्रजं गोमन्तमुशिजो वि वव्रुः ॥ ६ ॥

विश्वानि । शक्रः । नर्याणि । विद्वान् । अपः । रिरेच । सखिऽभिः । निऽकामैः ।
अश्मानम् । चित् । ये । बिभिदुः । वचःऽभिः । व्रजम् । गोऽमन्तम् । उशिजः । वि । वव्रुरिति वव्रुः ॥ ६ ॥

वेङ्कट० [1]सर्वाणि शक्रः नृहितानि† जानन् उदकानि निर्गमयति मरुद्भिः हितार्थैः । ये मरुतः अश्मानं प्रेषिताः शिलोच्चयं पूर्वम् ‡ बिभिदुः ते पर्वतस्थाः पणिभिः[1] अपहृतैर्गोभिर्युक्तं गोष्ठम् अपि विवृतवन्तः कामयमानाः ॥ ६ ॥

---

1. प्रज्ञानानि वि[1]; प्रज्ञानानि अ[1]; प्रज्ञानानि वि[1] क दर्प. २. सुदर्शनम् अ[1]; ... वि[1]. ३. नास्ति क दर्प. ४-४. नास्ति दर्प. ५-५. नास्ति मूको. ६-६. ... दर्प. † निहिता० वि[1] अ[1]. ‡ पूर्वे वि[1].

अपो वृत्रं वव्रिवांसं पराहन् प्रावत् ते वज्रं पृथिवी सचेताः ।
प्रार्णांसि समुद्रियाण्यैनोः पतिर्भवञ्छवसा शूर धृष्णो ॥ ७ ॥

अपः । वृत्रम् । वव्रिऽवांसम् । परा । अहन् । प्र । आवत् । ते । वज्रम् । पृथिवी । सऽचेताः ।
प्र । अर्णांसि । समुद्रियाणि । ऐनोः । पतिः । भवन् । शवसा । शूर । धृष्णो इति ॥ ७ ॥

वेङ्कट० 'उदकानि आवृण्वन्तम् अहिं यदा त्वं हतवानसि तदा समनस्का पृथिवी तव आयुधं प्रकर्षेण रक्षितवती । समुद्रभवानि अन्तरिक्षभवानि उदकानि प्र गमयसि स्वामी भवन् सर्वस्य बलेन हे शूर धृष्णो!' ॥ ७ ॥

अपो यदद्रिं पुरुहूत दर्दराविर्भुवत् सरमा पूर्व्यं ते ।
स नो नेता वाजमा दर्षि भूरिं गोत्रा रुजन्नङ्गिरोभिर्गृणानः ॥ ८ ॥

अपः । यत् । अद्रिम् । पुरुऽहूत । दर्दः । आविः । भुवत् । सरमा । पूर्व्यम् । ते ।
सः । नः । नेता । वाजम् । आ । दर्षि । भूरिम् । गोत्रा । रुजन् । अङ्गिरःऽभिः । गृणानः ॥ ८ ॥

वेङ्कट० हे पुरुहूत! यदा त्वं देवानामागमनार्थं शिलोच्चयं परिवेष्ट्य शयानं मेघम् उदकानि दारितवानसि । ततः प्रादुर्भूते पर्वते तव पुरातनं गोधनम् सरमा नाम शुनी पणिषु त्वया प्रेषिता पुनरागत्य त्वत्समीपे वर्तमाना दर्शयामास । अथ नः स्वम नेता गवात्मकं बहु धनम् अस्मदर्थम् आ दारितवानसि शिलोच्चयात्' उदकानि' मेघान् भिन्दन् अङ्गिरोभिः स्तूयमानः ॥ ८ ॥

अच्छा कविं नृमणो गा अभिष्टौ स्वर्षाता मघवन्नाधमानम् ।
ऊतिभिस्तमिषणो द्युम्नहूतौ नि मायावानब्रह्मा दस्युरर्त ॥ ९ ॥

अच्छ । कविम् । नृऽमनः । गाः । अभिष्टौ । स्वःऽसाता । मघऽवन् । नाधमानम् ।
ऊतिऽभिः । तम् । इषणः । द्युम्नऽहूतौ । नि । मायाऽवान् । अब्रह्मा । दस्युः । अर्त ॥ ९ ॥

वेङ्कट० अभिगन्तासि कविम् कुत्सं हे नृमणः!, नृषु मनो यस्य स तथोक्तः । स्वर्गे सम्भजनीये' सङ्ग्रामे मघवन्! याचमानं रक्षणैः सह तम् कुत्सम् ऐच्छः अस्माकं यस्याह्वाने सति । तस्य तदाह्वाने सति मायायुक्तः मन्त्ररहितः शत्रुः शुष्णासुरः विनष्टः कामादिति' ॥ ९ ॥

आ दस्युघ्ना मनसा याह्यस्तं भुवत् ते कुत्सः सख्ये निकामः ।
स्वे योनौ नि षदतं सरूपा वि वां चिकित्सदृतचिद्ध नारी ॥ १० ॥

१-१. पादांश वि' म'. २. 'स्वर्गं मूको ३. नास्ति मूको. ४. 'नीये वि' अ मूको.
५. 'नाति वि'.

आ । दस्युऽघ्ना । मनसा । याहि । अस्तम् । भुवत् । ते । कुत्सः । सख्ये । निऽकामः ।
स्वे । योनौ । नि । सदतम् । सऽरूपा । वि । वाम् । चिकित्सत् । ऋतऽचित् । ह । नारी ॥

वेङ्कट० कुत्सस्य अस्तम् गृहम् आगतवानसि तस्य दस्यून् हन्तुमिच्छता मनसा । आगते च सति त्वयि[1] तत्र तस्ये कुत्सः सख्यानः अभवत् । तथा...स्वे योनौ आसने समान-रूपाकारौ कुत्सश्च त्वं च निषण्णौ । किञ्च स्थे सदृशौ स्थितौ वाम् ऋतचित् नाम इन्द्रस्य भार्या कः कुत्सः[2] क इन्द्र इति व्यचिकित्सत्[3] इति । अत्र शाट्यायनकम् — 'कुत्सो ह वा औरव इन्द्रस्योरुतोऽमात्य[4]' आस । ... एतत्...[5] ... 'अयमिन्द्रस्'... तं ... ह ... इत्ता... । तां होवाच ... । सा होवाच न ... स होवाच ... एतं ... विजानीयाम्' (जैमि ३,१९९) इत्यादि ॥ १० ॥

इति तृतीयाष्टके पञ्चमाध्यायेऽष्टादशो वर्गः ॥

यासि कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशानः ।
ऋज्रा वाजं न गध्यं युयूषन् कविर्यदहन् पार्याय भूषात् ॥ ११ ॥

यासि । कुत्सेन । सऽरथम् । अवस्युः । तोदः । वातस्य । हर्योः । ईशानः ।
ऋज्रा । वाजम् । न । गध्यम् । युयूषन् । कविः । यत् । अहन् । पार्याय । भूषात् ॥ ११ ॥

वेङ्कट० कुत्सं रक्षितुमिच्छन् यस्य गृहादिकं ... 'वेगेन वातस्य' प्रेरकः ... ईश्वरो भवन् । ऋजुगामिनौ ... इव ... । 'गध्यम् ...' इति यास्कः (५, १५) । ... । ... शत्रुभिर्युद्धकामेभ्यः ... यदा भवति तदर्थम् अभवत् । ... युद्धं ... इत्यर्थः ॥ ११ ॥

कुत्साय शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा ।
सद्यो दस्यून् प्र मृण कुत्स्येन प्र सूरश्चक्रं वृहतादभीके ॥ १२ ॥

कुत्साय । शुष्णम् । अशुषम् । नि । बर्हीः । प्रऽपित्वे । अह्नः । कुयवम् । सहस्रा ।
सद्यः । दस्यून् । प्र । मृण । कुत्स्येन । प्र । सूरः । चक्रम् । वृहतात् । अभीके ॥ १२ ॥

वेङ्कट० कुत्सप्रीत्यर्थं शत्रुभिरशोष्यम् "शुष्णम् नामासुरम्" अमारयः । किं च अह्नः प्रपित्वे प्राप्ते प्रातःकाले कुयवम् च "असुरम् नि बर्हीः" असुराणां सहस्रेण सह । स त्वम् इदानीम्

1. ... . 2. नास्ति वि॰ अ॰. 3. ...वि॰. 4. ... वि॰ अ॰ .... 5. ... वि॰ अ॰. 6-6. ... वि॰ अ॰. 7-7 नास्ति मूको. 8-8. ... वि॰ अ॰. 9. ... वि॰ ... 10-10. ... वि॰. 11-11. नास्ति वि॰ ...

अस्माकमपि यथा [illegible] प्रकाशो [illegible] । [illegible]
[illegible] ॥ १२ ॥

त्वं पि॒प्रुं मृ॒गयं॑ शूशु॒वांस॑मृ॒जिश्व॑ने वैदथि॒नाय॑ रन्धीः ।
प॒ञ्चा॒शत्कृ॒ष्णा नि व॑पः स॒हस्रात्कं॒ न पुरो॑ जरि॒मा वि द॑र्दः ॥ १३ ॥

त्वम् । पि॒प्रुम् । मृ॒गय॑म् । शू॒शु॒ऽवांस॑म् । ऋ॒जिश्व॑ने । वै॒द॒थि॒नाय॑ । र॒न्धीः॒ ।
प॒ञ्चा॒शत् । कृ॒ष्णा । नि । व॒पः॒ । स॒हस्रा॑ । अत्क॑म् । न । पुरः॑ । ज॒रि॒मा । वि । द॒र्द॒रिति॑ दर्दः ॥ १३ ॥

वेङ्कट० 'हे इन्द्र! त्वम् पिप्रुम्' असुरम् मृगयम्' [illegible] ऋजिश्वने [illegible] ।
तथा कृष्णासुर[illegible] पञ्चाशतं सहस्राणि [illegible] नि वपः । [illegible]
पुराणि च [illegible] । [illegible] इति [illegible] । यथा जरिमा [illegible]
[illegible] ॥ १३ ॥

सूर॑ उपा॒के त॒न्वं१॒॑ दधा॑नो॒ वि यत्ते॒ चेत्य॒मृत॑स्य॒ वर्पः॑ ।
मृ॒गो न ह॒स्ती तवि॑षीमुषा॒णः सिं॒हो न भी॒म आयु॑धानि॒ बिभ्र॑त् ॥ १४ ॥

सूरः॑ । उ॒पा॒के । त॒न्व॑म् । दधा॑नः । वि । यत् । ते॒ । चेति॑ । अ॒मृत॑स्य । वर्पः॑ ।
मृ॒गः । न । ह॒स्ती । तवि॑षीम् । उ॒षा॒णः । सिं॒हः । न । भी॒मः । आयु॑धानि । बिभ्र॑त् ॥ १४ ॥

वेङ्कट० यत् तव [illegible] [illegible] [illegible] [illegible] [illegible] समीपे सूर्येण [illegible]
[illegible] [illegible] भवति । [illegible] [illegible] [illegible] । [illegible] हस्ती इव त्वं
[illegible] [illegible] । तथा सिंह इव [illegible] आयुधानि धारयसीति ॥ १४ ॥

इन्द्रं॒ कामा॑ वसू॒यन्तो॑ अग्म॒न्त्स्व॑र्मीळ्हे॒ न सव॑ने चका॒नाः ।
श्र॒व॒स्यवः॑ शशमा॒नास॑ उ॒क्थैरोको॒ न र॒ण्वा सु॒दृशी॑व पु॒ष्टिः ॥ १५ ॥

इन्द्र॑म् । कामाः॑ । व॒सु॒ऽयन्तः॑ । अ॒ग्म॒न् । स्वः॑ऽमीळ्हे । न । सव॑ने । च॒का॒नाः ।
श्र॒व॒स्यवः॑ । श॒श॒मा॒नासः॑ । उ॒क्थैः । ओकः॑ । न । र॒ण्वा । सु॒दृशी॑ऽइव । पु॒ष्टिः ॥ १५ ॥

वेङ्कट० इन्द्रम् कामयमानाः [illegible] [illegible] इव [illegible] च [illegible] [illegible],
[illegible], उक्थैः इन्द्रम् [illegible] । सोऽयमिन्द्रो गृहम् इव [illegible] भवति । [illegible]
च पुष्टिः इति ॥ १५ ॥

'इति तृतीयाष्टके पञ्चमाध्याये एकविंशो वर्गः' ॥

१-१. नास्ति मूको. २ [illegible] कर्त. ३. [illegible] ४. [illegible] ५. [illegible]
६ नास्ति मूको. ७. [illegible] ८ नास्ति [illegible]. †-† [illegible]

तमिद्व इन्द्रं सुहवं हुवेम यस्ता चकार नर्या पुरूणि ।
यो मावते जरित्रे गध्यं चिन्मक्षू वाजं भरति स्पार्हराधाः ॥ १६ ॥

तम् । इत् । वः । इन्द्रम् । सुऽहवम् । हुवेम । यः । ता । चकार । नर्या । पुरूणि ।
यः । माऽवते । जरित्रे । गध्यम् । चित् । मक्षु । वाजम् । भरति । स्पार्हऽराधाः ॥ १६ ॥

वेङ्कट० 'तम् एव वयं सुष्ठ्वाह्वानम् आह्वयेम, यः तानि ‡चकार नृभ्यो हितानि‡ बहूनि', यः च मत्सदृशाय स्तोत्रे भोजनयोग्यम् अन्नम् भरति क्षिप्रम् एव स्पृहणीयधनः ॥ १६ ॥

तिग्मा यदन्तरशनिः पताति कस्मिञ्चिच्छूर मुहुके जनानाम् ।
घोरा यदर्य समृतिर्भवात्यध स्मा नस्तन्वो बोधि गोपाः ॥ १७ ॥

तिग्मा । यत् । अन्तः । अशनिः । पताति । कस्मिन् । चित् । शूर । मुहुके । जनानाम् ।
घोरा । यत् । अर्य । सम्ऽऋतिः । भवाति । अध । स्म । नः । तन्वः । बोधि । गोपाः ॥ १७ ॥

वेङ्कट० तीक्ष्णा अशनिः यदा[1] मध्ये पतति कस्मिन् चित् हे शूर! जनानाम् मोहके सङ्ग्रामे। घोरश्च यदा[1] हे स्वामिन्! मनुष्याणां सङ्ग्रामः[2] भवति। समृतिशब्दः सङ्ग्रामनामः। तदानीमस्माकं शरीराणि गोपायिता भवामीति बुध्यस्वेति ॥ १७ ॥

भुवोऽविता वामदेवस्य धीनां भुवः सखावृको वाजसातौ ।
त्वामनु प्रमतिमा जगन्मोरुशंसो जरित्रे विश्वध स्याः ॥ १८ ॥

भुवः । अविता । वामऽदेवस्य । धीनाम् । भुवः । सखा । अवृकः । वाजऽसातौ ।
त्वाम् । अनु । प्रऽमतिम् । आ । जगन्म । उरुऽशंसः । जरित्रे । विश्वध । स्याः ॥ १८ ॥

वेङ्कट० भव वामदेवस्य मम कर्मणां रक्षकः[3]। भव च सखा अबाधयिता त्वं सङ्ग्रामे। त्वां प्रमतिम् वयम् अनु गच्छामः। त्वं चासि स्तोत्रे सर्वदा बहुप्रशंसनः[4] स्याः इति ॥ १८ ॥

एभिर्नृभिरिन्द्र त्वायुभिष्ट्वा मघवद्भिर्मघवन् विश्व आजौ ।
द्यावो न द्युम्नैरभि सन्तो अर्यः क्षपो मदेम शरदश्च पूर्वीः ॥ १९ ॥

एभिः । नृऽभिः । इन्द्र । त्वायुऽभिः । त्वा । मघवत्ऽभिः । मघऽवन् । विश्वे । आजौ ।
द्यावः । न । द्युम्नैः । अभि । सन्तः । अर्यः । क्षपः । मदेम । शरदः । च । पूर्वीः ॥ १९ ॥

१-१. नास्ति मूको. † स्मात्तं मूको. ‡-‡ नास्ति ल'. १. यास्तेषे वि', वस्तेषे ल'.
२. मध्ये ल'. ३. रक्षकः मूको. ४. 'शंसन मूको.

वेङ्कट० एभिः मनुष्यैः हे इन्द्र मघवन्! त्वत्कामैः [illegible] सह [illegible] वयं [illegible], [illegible]. [illegible] हेमाभिः अस्मदीयम्, अपि [illegible] सर्वाः रात्रीः, [illegible] च बहून् पर्याप्नुयाम ॥ १९ ॥

एवेदिन्द्राय वृषभाय वृष्णे ब्रह्माकर्म भृगवो न रथम् ।
नू चिद्यथा नः सख्या वियोषदसन्न उग्रोऽविता तनूपाः ॥ २० ॥

एव । इत् । इन्द्राय । वृषभाय । वृष्णे । ब्रह्म । अकर्म । भृगवः । न । रथम् ।
नु । चित् । यथा । नः । सख्या । विऽयोषत् । असत् । नः । उग्रः । अविता । तनूऽपाः ॥ २० ॥

वेङ्कट० एवम् एव इन्द्राय कामानां वर्षित्रे वृष्णे स्तोत्रं कृतवन्तः [illegible] इव स्तोतारः रथम् । इन्द्राय भृगवो रथमारोहणाय नूनं कृतवन्तः । अथवा भृगव इव रथम् स्तोत्रं कृतवन्त इति । क्षिप्रम् एव यथा अस्माकमिन्द्रः सख्यानि [illegible] । [illegible] अस्माकम् [illegible] रक्षिता [illegible] ॥ २० ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ २१ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ २१ ॥

वेङ्कट० हे इन्द्र । क्षिप्रमेव पूर्वैः स्तुतः क्षिप्रमेव [illegible] स्तूयमानः अन्नं [illegible] पूरय नदीर्नदी इव । हे हरिवः । [illegible] नूतनं स्तोत्रं कृतम् । तथा सति वयं रथयुक्ताः कर्मणा [illegible] सदा [illegible] स्याम ॥ २१ ॥

"इति तृतीयाष्टके पञ्चमाध्याये विंशो वर्गः" ॥

[१७]

'वामदेवो गौतम ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः । पञ्चदशी एकपदा विराट्' ।

त्वं महाँ इन्द्र तुभ्यं ह क्षा अनु क्षत्रं मंहना मन्यत द्यौः ।
त्वं वृत्रं शवसा जघन्वान्सृजः सिन्धूँरहिना जग्रसानान् ॥ १ ॥

त्वम् । महान् । इन्द्र । तुभ्यम् । ह । क्षाः । अनु । क्षत्रम् । मंहना । मन्यत । द्यौः ।
त्वम् । वृत्रम् । शवसा । जघन्वान् । सृजः । सिन्धून् । अहिना । जग्रसानान् ॥ १ ॥

वेङ्कट० त्वम् महान् असि हे इन्द्र । तुभ्यम् ह पृथिवी बलम् अनु [illegible] महती द्यौः च । त्वम् वृत्रम् बलेन हतवान् [illegible] ग्रस्यमानान् सिन्धून् असृजः । [illegible] इति ॥ १ ॥

१. मूको. २. रथमिव वि° को. ३. पूर्वे लभ. ४-४. नास्ति मूको. ५. नास्ति को. ६. [illegible] वि° क.

तव॑ त्वि॒षो जनि॑मन् रेजत॒ द्यौ रेज॒द् भूमि॑र्भि॒यसा॒ स्वस्य॑ म॒न्योः ।
ऋ॒घा॒यन्त॑ सु॒भ्व१॒॑: पर्व॑तास॒ आर्द॑न् धन्वा॑नि स॒रय॑न्त॒ आप॑: ॥ २ ॥

तव॑ । त्विषः॑ । जनि॑मन् । रे॒ज॒त॒ । द्यौः । रेज॑त् । भूमि॑ः । भि॒यसा॑ । स्वस्य॑ । म॒न्योः ।
ऋ॒घा॒यन्त॑ । सु॒ऽभ्व॑: । पर्व॑तासः । आर्द॑न् । धन्वा॑नि । स॒रय॑न्ते । आप॑: ॥ २ ॥

वेङ्कट० तव 'तेजसः प्रादुर्भावे' द्यौः रेजत' कम्पते । भूमिः च अरेजत् स्वकीयस्य क्रोधस्य भयेन । तथा [illegible] [illegible] [illegible] [illegible][1] । [illegible][2] । तथा [illegible] भवन्ति [illegible] । आपः च स्वस्थानात् गच्छन्तीति ॥ २ ॥

भि॒नद् गि॒रिं शव॑सा॒ वज्र॑मि॒ष्णन्ना॑वि॒ष्कृ॒ण्वा॒नः स॑हसा॒न ओज॑: ।
वधी॑द् वृ॒त्रं वज्रे॑ण मन्दसा॒नः सर॒न्नापो॒ जव॑सा ह॒तवृ॑ष्णीः ॥ ३ ॥

भि॒नत् । गि॒रिम् । शव॑सा । वज्र॑म् । इ॒ष्णन् । आ॒विः॒ऽकृ॒ण्वा॒नः । स॒ह॒सा॒नः । ओज॑: ।
वधी॑त् । वृ॒त्रम् । वज्रे॑ण । म॒न्द॒सा॒नः । सर॑न् । आप॑: । जव॑सा । ह॒तऽवृ॑ष्णीः ॥ ३ ॥

वेङ्कट० भिनत्[3] गिरिम्[3] बलेन आत्मीयम् वज्रम् प्रेरयन् आत्मीयम् ओजः प्रकाशयन् [illegible]ऽभिभवन्[4] । सोऽयम् अवधीत् वृत्रं वज्रेण मोदमानः । 'अथ आपः वेगेन असरन्† हतवृष्णयः‡ । वृत्रे हते तस्मात् निर्गता इत्यर्थः[5] ॥ ३ ॥

सु॒वीर॑स्ते जनि॒ता म॑न्यत॒ द्यौरिन्द्र॑स्य क॒र्ता स्व॒पस्त॑मो भूत् ।
य ईं॑ ज॒जान॑ स्व॒र्यं॑ सु॒वज्र॒मन॑पच्युतं॒ सद॑सो॒ न भूम॑ ॥ ४ ॥

सु॒ऽवीर॑: । ते॒ । ज॒नि॒ता । म॒न्य॒त॒ । द्यौः । इन्द्र॑स्य । क॒र्ता । स्व॒पःऽत॑मः । भू॒त् ।
यः । ई॒म् । ज॒जान॑ । स्व॒र्य॑म् । सु॒ऽवज्र॑म् । अन॑पऽच्युतम् । सद॑सः । न । भूम॑ ॥ ४ ॥

वेङ्कट० शोभनपुत्रः तव जनयिता द्यौः [illegible] [illegible] । [illegible] [illegible] । इन्द्रस्य कर्ता [illegible] [illegible] [illegible] अभवत् । यः एनम्[8] जजान सर्वहितम् [illegible] [illegible] [illegible] [illegible] एव भूमानमिति ॥ ४ ॥

य एक॒ इच्च्या॒वय॑ति॒ प्र भूमा॒ राजा॑ कृष्टी॒नां पु॑रुहू॒त इन्द्र॑: ।
स॒त्यमे॑न॒मनु॒ विश्वे॑ मदन्ति रा॒तिं दे॒वस्य॑ गृण॒तो म॒घोन॑: ॥ ५ ॥

१-१. [illegible] मूको. २ [illegible] मूको. ३ [illegible]; [illegible] वि[1] अप. ४. [illegible] वि[1] अ[1] अप. ५ [illegible] वि[1] अप. ६. नास्ति वि[3]. ७ [illegible] वि[1] अ[1]. ८-८. वि[3] ([illegible] २१,३ आस्वत) † [illegible] अ[1]. ‡ [illegible] वि[2] अ[1]. ९. [illegible] वि[3].

[illegible] । एकः । इति । [illegible] । प्र । भूम । [illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । [illegible] । विश्वे । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ॥ ५ ॥

वे॰ मा॰ '[illegible] एक एव सन्' [illegible] मनुष्याणाम् [illegible] बहुभिः [illegible] इन्द्र । [illegible] सर्वे देवाः' [illegible] मघवतः [illegible] मनुष्यम् ॥ ५ ॥

'इति तृतीयाष्टके पञ्चमाध्याये एकविंशो वर्गः' ।

स॒त्रा सोमा॑ अभवन्नस्य॒ विश्वे॑ स॒त्रा मदा॑सो बृह॒तो मदि॑ष्ठाः ।
स॒त्राभ॑वो॒ वसु॑पति॒र्वसू॑नां द॒त्रे विश्वा॑ अधिथा इन्द्र कृ॒ष्टीः ॥ ६ ॥

स॒त्रा । सोमाः॑ । अ॒भ॒व॒न् । अ॒स्य॒ । विश्वे॑ । स॒त्रा । मदा॑सः । बृ॒ह॒तः । मदि॑ष्ठाः ।
स॒त्रा । अ॒भ॒वः॒ । वसु॑ऽपतिः । वसू॑नाम् । द॒त्रे । विश्वाः॑ । अ॒धि॒थाः॒ । इ॒न्द्र॒ । कृ॒ष्टीः ॥ ६ ॥

वे॰ मा॰ इन्द्रस्य [illegible] सत्यमेव सर्वे [illegible] भवन्ति । [illegible] प्रकाशान्तरेणाह—सत्यमेव' [illegible] मादयितृतमाः' महतः इन्द्रस्य भवन्तीति । [illegible] सत्यमेव हे इन्द्र ! त्वम् वसूनाम् पतिः अभवः । [illegible] त्वम् [illegible] सर्वाः' प्रजाः अधिधेहि ॥ ६ ॥

त्वम॑ध प्रथ॒मं जाय॑मा॒नोऽमे॒ विश्वा॑ अधिथा इन्द्र कृ॒ष्टीः ।
त्वं प्रति॑ प्र॒वत॑ आ॒शया॑न॒महिं॒ वज्रे॑ण मघव॒न्वि वृ॑श्चः ॥ ७ ॥

त्वम् । अध॑ । प्र॒थ॒मम् । जाय॑मानः । अमे॑ । विश्वाः॑ । अ॒धि॒थाः॒ । इ॒न्द्र॒ । कृ॒ष्टीः ।
त्वम् । प्रति॑ । प्र॒ऽवतः॑ । आ॒ऽशया॑नम् । अहि॑म् । वज्रे॑ण । म॒घ॒ऽव॒न् । वि । वृ॒श्च॒ः ॥ ७ ॥

वे॰ मा॰ हे इन्द्र ! [illegible] सर्वेषाम्' देवानां [illegible] मघो [illegible] प्रजाः [illegible] । [illegible] आशयानम् [illegible] अहिम् इति [illegible] ॥ ७ ॥

स॒त्रा॒हणं॒ दाधृ॑षिं॒ तुम्र॒मिन्द्रं॑ म॒हाम॑पा॒रं वृ॑ष॒भं सु॒वज्र॑म् ।
हन्ता॒ यो वृ॒त्रं सनि॑तो॒त वाजं॒ दाता॑ म॒घानि॑ म॒घवा॑ सु॒राधाः॑ ॥ ८ ॥

स॒त्रा॒ऽहन॑म् । दाधृ॑षिम् । तुम्र॑म् । इन्द्र॑म् । म॒हाम् । अ॒पा॒रम् । वृ॒ष॒भम् । सु॒ऽवज्र॑म् ।
हन्ता॑ । यः । वृ॒त्रम् । सनि॑ता । उ॒त । वाज॑म् । दाता॑ । म॒घानि॑ । म॒घऽवा॑ । सु॒ऽराधाः॑ ॥ ८ ॥

वे॰ मा॰ सत्यमेव शत्रूणां हन्तारम् अभिभवितारम् [illegible]' [illegible] [illegible] [illegible]

१-१. नास्ति वि॰ [illegible]. २-२. [illegible] वि॰ [illegible]. ३-३. नास्ति मूको. ४. [illegible] वि॰ [illegible]. ५. [illegible] वि॰. ६. नास्ति [illegible]. ७. [illegible]. ८. [illegible] वि॰ [illegible]. ९. [illegible] वि॰ [illegible]. १०. नास्ति वि॰ [illegible].

महान्तम् [illegible] पर्यन्तम् परितारम् [illegible] अहं स्तौमि, स [illegible] तृणामुपकारकेण [illegible] [illegible] भवति, अपि च दाता भवति[1] अयम्, प्रयच्छति धनम् [illegible] [illegible] । सर्वेण [illegible] ॥ ८ ॥

अयं वृतश्चातयते समीचीर्य आजिषु मघवा शृण्व एकः ।
अयं वाजं भरति यं सनोत्यस्य प्रियासः सख्ये स्याम ॥ ९ ॥

अयम् । वृतः । चातयते । सम्ऽईचीः । यः । आजिषु । मघऽवा । शृण्वे । एकः ।
अयम् । वाजम् । भरति । यम् । सनोति । अस्य । प्रियासः । सख्ये । स्याम ॥ ९ ॥

स्कन्द० [illegible] [illegible] [illegible] विनाशयति[2], यः सङ्ग्रामेषु [illegible] [illegible] एव कार्यकरणे श्रूयते । अयम् [illegible] 'तस्मै प्रयच्छति' यम्[3] [illegible] [illegible] । [illegible] अस्य सख्ये वर्तमानाः प्रियाः स्याम [illegible] ॥ ९ ॥

अयं शृण्वे अध जयन्नुत घ्नन्नयमुत प्र कृणुते युधा गाः ।
यदा सत्यं कृणुते मन्युमिन्द्रो विश्वं दृळ्हं भयत एजदस्मात् ॥ १० ॥

अयम् । शृण्वे । अध । जयन् । उत । घ्नन् । अयम् । उत । प्र । कृणुते । युधा । गाः ।
यदा । सत्यम् । कृणुते । मन्युम् । इन्द्रः । विश्वम् । दृळ्हम् । भयते । एजत् । अस्मात् ॥ १० ॥

स्कन्द० युद्धे[4] [illegible] अयम् [illegible] शत्रून्[5] [illegible] 'तेन च'[6] श्रूयते । अयम् अपि च [illegible] [illegible] [illegible] गाः प्रकाशयति[7] । यदा अयम् एव क्रोधं करोति इन्द्रः सर्वमेव अस्मात् [illegible] [illegible] च तदा बिभेति ॥ १० ॥

[11]इति तृतीयाष्टके पञ्चमाध्याये द्वाविंशो वर्गः[11] ॥

समिन्द्रो गा अजयत्सं हिरण्या समश्विया मघवा यो ह पूर्वीः ।
एभिर्नृभिर्नृतमो अस्य शाकै रायो विभक्ता सम्भरश्च वस्वः ॥ ११ ॥

सम् । इन्द्रः । गाः । अजयत् । सम् । हिरण्या । सम् । अश्विया । मघऽवा । यः । ह । पूर्वीः ।
एभिः । नृऽभिः । नृऽतमः । अस्य । शाकैः । रायः । विऽभक्ता । सम्ऽभरः । च । वस्वः ॥ ११ ॥

---

१. नास्ति वि[1] मू[1]. २. भवेत् ना[1] मूर्ध. ३-३. [illegible] [illegible] मू[1]. ४. [illegible] वि[1] मूर्ध ५. [illegible] [illegible] वि[1]. ६. [illegible] वि[1] मू[1] ७-७. नास्ति मू[1]. ८. [illegible] [illegible] वि[1] मूर्ध ९. नास्ति मूर्ध
१०. [illegible] वि[1] मूर्ध. ११-११. नास्ति मूको.

वेङ्कट० स[1] इन्द्रः पूर्वैः सखिभिः सिनाय, स एवः सेनाः गोभिरश्वाश्वमगृभात्[2] अथ अजयत्[3]। पूर्वैः नेतृभिः सखिभिः सह नेतृतम अस्मै[4] इन्द्रस्य महान्[5] स्तोतृषु धनस्य विसर्गं कुर्वन् ... न धनस्य वातुकः ॥ ११ ॥

कियत् स्विदिन्द्रो अध्येति मातुः कियत् पितुर्जनितुर्यो जजान ।
यो अस्य शुष्मं मुहुकैरियर्ति वातो न जूतः स्तनयद्भिरभ्रैः ॥ १२ ॥

कियत् । स्वित् । इन्द्रः । अधि । एति । मातुः । कियत् । पितुः । जनितुः । यः । जजान ।
यः । अस्य । शुष्मम् । मुहुकैः । इयर्ति । वातः । न । जूतः । स्तनयत्ऽभिः । अभ्रैः ॥ १२ ॥

वेङ्कट० 'कियात्या ... भवाति'[6] (ऋ १,११३,१०) इत्यनेन समानार्थो मन्त्रोऽयम्। मातुः मातृभवन द्यावापृथिव्योः पर्यन्तात् मातृसंबन्ति। तत्रास्य पृथिवी मातरमाह पितरं दिवम्[7]। ... इन्द्र पृथिव्याः कियत् स्वित् अधि गच्छति। ... कियन्तं[8] देशं ... गच्छतीत्यर्थः। कियत् च पितुः अभ्येति, यः पितरमिन्द्रम् जजान। यः इन्द्रस्य बलम् मुहुर्मुहुः प्रेरयति। दिवि हीन्द्रो ... बलिष्ठो भवति। सोऽयम् वात इव क्रुद्धो[9] भवति स्तनयद्भिः मेघैः ॥ १२ ॥

क्षियन्तं त्वमक्षियन्तं कृणोतीयर्ति रेणुं मघवा समोहम् ।
विभञ्जनुरशनिमाँ इव द्यौरुत स्तोतारं मघवा वसौ धात् ॥ १३ ॥

क्षियन्तम् । त्वम् । अक्षियन्तम् । कृणोति । इयर्ति । रेणुम् । मघऽवा । सम्ऽओहम् ।
विभञ्जनुः । अशनिमान्ऽइव । द्यौः । उत । स्तोतारम् । मघऽवा । वसौ । धात् ॥ १३ ॥

वेङ्कट० निवसन्तमपि अनिवसन्तम् ... करोति। ... प्रेरयति च ... रेणुम् ... शत्रूणां विभञ्जनशीलः यथा अशनिमान् द्यौः प्रजानां ... करोति। सोऽयम् मघवा स्तोतारम् धने दधाति[10] ॥ १३ ॥

अयं चक्रमिषणत् सूर्यस्य न्येतशं रीरमत् ससृमाणम् ।
आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो बुध्ने रजसो अस्य योनौ ॥ १४ ॥

अयम् । चक्रम् । इषणत् । सूर्यस्य । नि । एतशम् । रीरमत् । ससृमाणम् ।
आ । कृष्णः । ईम् । जुहुराणः । जिघर्ति । त्वचः । बुध्ने । रजसः । अस्य । योनौ ॥ १४ ॥

---

१. नास्ति वि॰ ... २. ...रा॰ वि॰ ... ३. ... ४. ... वि॰ ... ५. ... मूको॰. ६. भवति वि॰ ... ७. ... वि॰ ... ८. ... वि॰ ... ९. ... वि॰ ... १०. दधाति वि॰ ...

वेङ्कट० एकस्तोमपरा ... हवेककाचकम् । इषिः[1] प्रेमकर्मा । सूर्यस्य सम्बन्धि ... इषणा याङ्कृतम् । अथ तेन ... 'शत्रुसकाशात् पलायमानम्' ... इति 'मन्त्रः । ... † ... संवरणकर्मा । तेन उच्यते । तस्य मूलमूले ... स्थानभूते वर्तमानम्[2] ॥ १५ ॥

असिक्न्यां यजमानो न होता ॥ १५ ॥

असिक्न्याम् । यजमानः । न । होता ॥ १५ ॥

वेङ्कट० ... ... ॥ १५ ॥

'इति तृतीयाष्टके पञ्चमाध्याये त्रयोविंशो वर्गः' ॥

गृणन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ।
जनीयन्तो जनिदामक्षितोतिमा च्यावयामोऽवते न कोशम् ॥ १६ ॥

गृणन्तः । इन्द्रम् । सख्याय । विप्राः । अश्वऽयन्तः । वृषणम् । वाजऽयन्तः ।
जनिऽयन्तः । जनिऽदाम् । अक्षितऽऊतिम् । आ । च्यवयाम । अवते । न । कोशम् ॥ १६ ॥

वेङ्कट० 'इन्द्रम् स्तुवन्तः मेधाविनः गाः अश्वान् अन्नं इच्छन्तः वयम् सख्याय आच्यावयामः, ... आशंसिच्छन्तः जनीनां दातारम् अक्षीणपरिरक्षणम् । यथा ... कूपे ... अवतारयन्ति ... सरस्वतीतीरे कोशं ... न यद्वत्' ॥ १६ ॥

त्राता नो बोधि ददृशान आपिरभिख्याता मर्डिता सोम्यानाम् ।
सखा पिता पितृतमः पितॄणां कर्तेमु लोकमुशते वयोधाः ॥ १७ ॥

त्राता । नः । बोधि । ददृशानः । आपिः । अभिऽख्याता । मर्डिता । सोम्यानाम् ।
सखा । पिता । पितृऽतमः । पितॄणाम् । कर्ता । ईम् । ऊँ इति । लोकम् । उशते । वयःऽधाः ॥ १७ ॥

वेङ्कट० 'रक्षकः अस्माकं भवात्मरिति[3] दृश्यमानः आपिः ... सोमार्हाणाम् अभिख्याता[4] कुर्वन् सुखयिता ... । सखा ... पिता, पितृतमः च पितॄणाम् अतिशयेन पाता पितॄणामपि[5], कर्ता च इमम् लोकम्, कामयमानाय अन्नस्य 'दाता चेति' ॥ १७ ॥

सखीयतामविता बोधि सखा गृणान इन्द्र स्तुवते वयो धाः ।
वयं ह्या ते चकृमा सबाध आभिः शमीभिर्महयन्त इन्द्र ॥ १८ ॥

---

1. नास्ति ... 2-2. नास्ति ... † '... ... 3-3. नास्ति वि[1] ... † '... मूको. 4-4. नास्ति मूको. 5-5. नास्ति वि[1] ... †-† ... वि[1] ... 6-6. नास्ति वि[1] ... 7. ... 8. ... वि[1] ... 9-9. ... ...

सखिऽयताम् । अविता । बोधि । सखा । गृणानः । इन्द्र । स्तुवते । वयः । धाः ।
वयम् । हि । आ । ते । चकृम । सऽबाधः । आभिः । शमीभिः । महयन्तः । इन्द्र ॥ १८ ॥

वेङ्कट० सखित्वमिच्छतां रक्षिता सखा अवगच्छ स्तूयमानः। स्तूयमानस्त्वम् हे इन्द्र! स्तुवते धेहि अन्नम्। वयम् हि तुभ्यम् आभिः कर्मभिः आ चकृम पूजां कुर्वन्तः बाधमानाः ॥ १८ ॥

स्तुत इन्द्रो मघवा यद्ध वृत्रा भूरीण्येको अप्रतीनि हन्ति ।
अस्य प्रियो जरिता यस्य शर्मन्नकिर्देवा वारयन्ते न मर्ताः ॥ १९ ॥

स्तुतः । इन्द्रः । मघऽवा । यत् । ह । वृत्रा । भूरीणि । एकः । अप्रतीनि । हन्ति ।
अस्य । प्रियः । जरिता । यस्य । शर्मन् । नकिः । देवाः । वारयन्ते । न । मर्ताः ॥ १९ ॥

वेङ्कट० स्तुतः इन्द्रः धनवान् यस्मात् शत्रून् बहून् एकः एव अप्रतिगतान् हन्ति तस्मात्। अस्य प्रियः स्तोता। यस्य इन्द्रस्य निधौ स्तोत्रं क्रियमाणं स्तोतारम् देवाः न मनुष्याश्च न वारयन्ते अपि तर्हि रक्षन्ति ॥ १९ ॥

एवा न इन्द्रो मघवा विरप्शी करत्सत्या चर्षणीधृदनर्वा ।
त्वं राजा जनुषां धेह्यस्मे अधि श्रवो माहिनं यज्जरित्रे ॥ २० ॥

एव । नः । इन्द्रः । मघऽवा । विऽरप्शी । करत् । सत्या । चर्षणिऽधृत् । अनर्वा ।
त्वम् । राजा । जनुषाम् । धेहि । अस्मे इति । अधि । श्रवः । माहिनम् । यत् । जरित्रे ॥ २० ॥

वेङ्कट० एवम् अस्माकं इन्द्रः धनवान् महान् करोतु सत्यानि मनुष्याणां धर्ता अनभिगन्तव्यः। त्वम् हे इन्द्र! राजा जातानाम् अस्मासु आधेहि अन्नं महत् धनं च, यत् जरित्रे प्रयच्छसि ददासि ॥ २० ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ २१ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ २१ ॥

वेङ्कट० ऋ ४,१६,२१ द्र. ॥ २१ ॥

'इति तृतीयाष्टके पञ्चमाध्याये चतुर्विंशो वर्गः' ॥

१-१. धन एव ता वि' मू'. २. 'बधन्तो' वि' अ. ३. स्तवक [illegible] ४. 'मि: स्य' वि' मू'. ५. देवैः वि'. ६-६. नास्ति मूको.

[१८]

'वामदेवोऽदितिश्च ऋषी, अन्त्याया इन्द्रः, अनुष्टुभा सकलार्धर्चस्य प्रथमस्य च अदितिः ।
प्रथमायाश्चतुर्थ्या उत्तरार्धर्चस्य पञ्चमीसप्तम्योश्च वामदेवो देवता, द्वितीयादिचतुर्थ्यन्तानाम्
पूर्वार्धर्चानाम् अष्टम्यादित्रयोदश्यन्तानां च इन्द्रः । त्रिष्टुप् छन्दः[1] ।

अयं पन्था अनुवित्तः पुराणो यतो देवा उदजायन्त विश्वे ।
अतश्चिदा जनिषीष्ट प्रवृद्धो मा मातरममुया पत्तवे कः ॥ १ ॥

अयम् । पन्थाः । अनुऽवित्तः । पुराणः । यतः । देवाः । उत्ऽअजायन्त । विश्वे ।
अतः । चित् । आ । जनिषीष्ट । प्रऽवृद्धः । मा । मातरम् । अमुया । पत्तवे । कः ॥१॥

वेङ्कट० इन्द्रादितिवामदेवानां संवाद (ऋ अ २.४.१८) । तत्र दीर्घकाले वामदेवो गर्भे स्थितः । तत्र इन्द्र आह — अयम् इति । अयम् योनिमार्गः सर्वैरेव जायमानैरनुक्रमेण लब्धः पुराणः । यतः सर्वे देवा अपि उद् अजायन्त सर्वे वामदेव तस्मादेव मार्गाद् जायितुमर्हसि गर्भे एव प्रवृद्धस्त्वं मा मातरम् अमुया 'द्वितीयया वाचा', पतितुं कार्षीरिति । परोक्षेण वामदेवमाहेति ॥ १ ॥

नाहमतो निरया दुर्गहैतत् तिरश्चता पार्श्वान्निर्गमाणि ।
बहूनि मे अकृता कर्त्वानि युध्यै त्वेन सं त्वेन पृच्छै ॥ २ ॥

न । अहम् । अतः । निः । अय । दुःऽगहा । एतत् । तिरश्चता । पार्श्वात् । निः । गमानि ।
बहूनि । मे । अकृता । कर्त्वानि । युध्यै । त्वेन । सम् । त्वेन । पृच्छै ॥ २ ॥

वेङ्कट० गर्भे शयानस्य वामदेवस्य बुद्धिप्रकारं स्वयमेवाह — न अहम् अस्माद् योनिमार्गात् निर्गच्छामि । दुःखेन गाहितव्यं हि एतत् ... स्थाने सङ्कटम् । तस्मात् तिरश्चीनात् पार्श्वात् अहं निर्गच्छामि । तिर्यक्शब्दस्य 'अग्रतो चाङ्गिरसाम्' (ऋ ५.४.८५) इति ..., ततो निष्क्रान्त आह[2] — बहूनि मे जातस्य अकृतानि ... कर्तव्यानि कर्माणि । केनचिद् ... युद्धं करवाणि । अन्यं पृच्छै च केनचित् ... ॥ २ ॥

परायतीं मातरमन्वचष्ट न नानु गान्यनु नू गमानि ।
त्वष्टुर्गृहे अपिबत् सोममिन्द्रः शतधन्यं चम्वोः सुतस्य ॥ ३ ॥

पराऽयतीम् । मातरम् । अनु । अचष्ट । न । न । अनु । गानि । अनु । नु । गमानि ।
त्वष्टुः । गृहे । अपिबत् । सोमम् । इन्द्रः । शतऽधन्यम् । चम्वोः । सुतस्य ॥ ३ ॥

वेङ्कट० प्रसवानिर्गमनेन मातरम् परागच्छन्तीं म्रियमाणाम् इन्द्रः अनु पश्यति । ततोऽहम् न न अनु गच्छामि अपि तर्हि क्षिप्रमेव 'अनु गमानि' अचिरेण गच्छामि । यथा ग्रामवृत्तो ...

१-१. नास्ति मूको. २-२. 'पार्श्वादेते वि' म'; 'दाश्वतः' ... ३. ... ४-४. ...

च्छिन्ने शिरसि तथेन्द्रस्याऽदितिर्माता अद्रष्टे शिरसि । अत्र ... आह — बभ्रुः इति । ... । ... कृतम् । ... । ... कर्म ॥ ३ ॥

किं स ऋधक् कृणवद्यं सहस्रं मासो जभार शरदश्च पूर्वीः ।
नही न्वस्य प्रतिमानमस्त्यन्तर्जातेषूत ये जनित्वाः ॥ ४ ॥

किम् । सः । ऋधक् । कृणवत् । यम् । सहस्रम् । मासः । जभार । शरदः । च । पूर्वीः ।
नहि । नु । अस्य । प्रतिऽमानम् । अस्ति । अन्तः । जातेषु । उत । ये । जनिऽत्वाः ॥ ४ ॥

वेङ्कट० अथ किम् सः इन्द्रः ऋधक् कर्म कृतवान्, यम् एनम् अनेकान् मासान् बह्वीः च शरदः मातोदरे धारयति । अथेन्द्रमाताऽदितिराह — नहि इति । नहि अस्ति इन्द्रस्य प्रतिमानम् सदृशम् जातेषु भूतेषु अन्तः, अपि च ये जनिष्यमाणाः तेषु च । ... — अकरोत् इति ॥ ४ ॥

अवद्यमिव मन्यमाना गुहाकरिन्द्रं माता वीर्येणा न्यृष्टम् ।
अथोदस्थात्स्वयमत्कं वसान आ रोदसी अपृणाज्जायमानः ॥ ५ ॥

अवद्यम्ऽइव । मन्यमाना । गुहा । अकः । इन्द्रम् । माता । वीर्येण । निऽऋष्टम् ।
अथ । उत् । अस्थात् । स्वयम् । अत्कम् । वसानः । आ । रोदसी इति । अपृणात् । जायमानः ॥ ५ ॥

वेङ्कट० गर्भम् इव इन्द्रम् मन्यमाना गुहायाम् कृतवती माता वीर्येण न्यृष्टम् । यथा ... । सोऽयं गर्भात् ... गुहायाम् करणात् । अथ स्वयम् उत् अस्थात् स्वयम् एव तेजोरूपम् आच्छादयन् आ अपूरयत् द्यावापृथिवी तेजसा जायमानः ॥ ५ ॥

इति तृतीयाष्टके पञ्चमाध्याये षड्विंशो वर्गः ॥

एता अर्षन्त्यललाभवन्तीरृतावरीरिव संक्रोशमानाः ।
एता वि पृच्छ किमिदं भनन्ति कमापो अद्रिं परिधिं रुजन्ति ॥ ६ ॥

एताः । अर्षन्ति । अललाऽभवन्तीः । ऋतवरीःऽइव । सम्ऽक्रोशमानाः ।
एताः । वि । पृच्छ । किम् । इदम् । भनन्ति । कम् । आपः । अद्रिम् । परिऽधिम् । रुजन्ति ॥ ६ ॥

वेङ्कट० एताः आपः समुद्रं प्रति गच्छन्ति अललाशब्दं कुर्वन्त्यः ... इव सह संक्रोशमानाः । ... । त्वम् एताः वि पृच्छ । किमेतास्तु ... किम् इदम् आपः ... ।

१. नास्ति क. २-२ ... ३. ... ४. नास्ति ... ५. नास्ति ... ६-६ नास्ति मूको ७. नास्ति ... ८. नास्ति वि° ... ९. ... १०. शब्दं वि°.

सति काले इन्द्रस्य । अथादित्यस्य शक्त्यापन्ना इत्यभिप्रायः । कर्म[1] च मेनम् कर्तुं निवारयन्त् तावन्तो निर्गमनाय मन्त्रयन्तीति[2] । स मेन्द्रहत्यो वृत्र इति ॥ ६ ॥

किमु ष्विदस्मै निविदो भनन्तेन्द्रस्यावद्यं दिधिषन्त आपः ।
ममैतान् पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद् वि सिन्धून् ॥ ७ ॥

किम् । ऊँ इति । स्वित् । अस्मै । निऽविदः । भनन्त । इन्द्रस्य । अवद्यम् । दिधिषन्ते । आपः ॥
मम । एतान् । पुत्रः । महता । वधेन । वृत्रम् । जघन्वान् । असृजत् । वि । सिन्धून् ॥ ७ ॥

वेङ्कट० 'निवित्' (निघ १, ११) इति वाङ्नाम । कौशिकास्तौ वाचः किमु भवन्त्यु इन्द्राय वदन्ति । यत अस्य अवद्यं वृत्रवधादि, तदपि धारयन्ति आपः । तथा च इन्द्रोक्तः— पाप्मानमिन्द्रस्य मह्यं कर्ने च प्रक्षाल्य कामं अगद्धु [illegible]' इति । एतान् मम पुत्रः वृत्रम् महता[3] वधेन हत्वा वि असृजत् सिन्धून् इति ॥ ७ ॥

ममच्चन त्वा युवतिः परास ममच्चन त्वा कुषवा जगार ।
ममच्चिदापः शिशवे ममृड्युर्ममच्चिदिन्द्रः सहसोदतिष्ठत् ॥ ८ ॥

ममत् । चन । त्वा । युवतिः । पराऽआस । ममत् । चन । त्वा । कुषवा । जगार ॥
ममत् । चित् । आपः । शिशवे । ममृड्युः । ममत् । चित् । इन्द्रः । सहसा । उत् । अतिष्ठत् ॥

वेङ्कट० अथ सूक्तशेषेण वामदेव इन्द्रं स्तौति । माद्यन्ती[4] एव[5] त्वाम् युवतिः अदितिः स्नेहेन परास्यवती[6] । तथा 'गर्भेण परास्तं त्वाम् † माद्यन्ती एव कुषवा †, कुत्सितनिष्कर्मकर्मा, निष्कृतोदरी ‡ जगार । तथा माद्यन्त्य एव आपः च आलाय शिशवे स्नापनवेलायां सुखमुत्पादयामासुः । अथ परोक्षः । माद्यन्[7] एव इन्द्रः तदानीमेव बलेन उत् अतिष्ठत् इति ॥ ८ ॥

ममच्चन ते मघवन् व्यंसो निविविध्वाँ अप हनू जघान ।
अधा निविद्ध उत्तरो बभूवाञ्छिरो दासस्य सं पिणग्वधेन ॥ ९ ॥

ममत् । चन । ते । मघऽवन् । विऽअंसः । निऽविविध्वान् । अप । हनू इति । जघान ।
अध । निऽविद्धः । उत्ऽतरः । बभूवान् । शिरः । दासस्य । सम् । पिणक् । वधेन ॥ ९ ॥

वेङ्कट० माद्यन् एव तव हे इन्द्र । व्यंसासुरः विद्ध्वा हनू अप जघान । अथ व्यंसेन त्वम् 'विद्धः सन्' बलेन व्यंसस्य उत्तरः भवन् तस्यासुरस्य शिरः त्वं वज्रेण 'सम् पिणक्' चूर्णीकृतवानिति ॥ ९ ॥

१ कि वि[8] अ[9]. २. मन्त्री[10] मूको. ३. नास्ति मूको. ४. माद्यन्तो वि[11] अ कर्प. ५ परास्य[12] वि[13] कर्प. ६-६. नास्ति कर्प. † नास्ति मूको. ‡ निष्कु[14] वि[15]. ७-७. नास्ति वि[16] अ[17]. ८-८. स विणक् वि[18]; स विनद् अ[19].

गृष्टिः ससूव स्थविरं तवागामनाधृष्यं वृषभं तुम्रमिन्द्रम् ।
अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्व इच्छमानम् ॥ १० ॥

गृष्टिः । ससूव । स्थविरम् । तवागाम् । अनाधृष्यम् । वृषभम् । तुम्रम् । इन्द्रम् ।
अरीळ्हम् । वत्सम् । चरथाय । माता । स्वयम् । गातुम् । तन्वे । इच्छमानम् ॥ १० ॥

वेङ्कट० "यज्ञो दक्षिणामभ्यध्यायत् तां समभवत् तदिन्द्रोऽचायत् सोऽमन्यत यो वा इतो जनिष्यते स इदं भविष्यतीति तां प्राविशत् तस्या इन्द्र एवाजायत सोऽमन्यत यो वै मदितोऽपरो जनिष्यते स इदं भविष्यतीति तस्या अनुमृश्य योनिमाच्छिनत् सा सूतवशाऽभवत्" (तै ६,१,३,६) इति ब्राह्मणम् । सकृत्प्रसूता गौर्गृष्टिरित्युच्यते । सा सूतवती पुरातनम् [illegible] अनाधृष्यम् वृषभम् तरुणं प्रेरकम् इन्द्रम् । सोऽयं [illegible] गतः तस्मात् मातुः जिह्मः [illegible] वत्स इव, [illegible] स्वयम् एव परलोकम् [illegible] शरीरस्य गमनम् इच्छमानम् ॥ १० ॥

उत माता महिषमन्ववेनदमी त्वा जहति पुत्र देवाः ।
अथाब्रवीद्वृत्रमिन्द्रो हनिष्यन्त्सखे विष्णो वितरं वि क्रमस्व ॥ ११ ॥

उत । माता । महिषम् । अनु । अवेनत् । अमी इति । त्वा । जहति । पुत्र । देवाः ।
अथ । अब्रवीत् । वृत्रम् । इन्द्रः । हनिष्यन् । सखे । विष्णो इति । विऽतरम् । वि । क्रमस्व ॥

वेङ्कट० अपि च माता महान्तं पुत्रमिन्द्रम् [illegible] अनु अकामयत, अमी देवाः हे पुत्र! वृत्रस्य भीष्यमाणाः त्वाम् परित्यजन्ति [illegible], तस्मात् वृत्रं जहीति । अथ अब्रवीत् इन्द्रः वृत्रम् हनिष्यन् हे सखे विष्णो! आत्मानम् वि क्रमस्व, अहं वृत्रं हनिष्यामि [illegible] सहायो भवेति ॥ ११ ॥

कस्ते मातरं विधवामचक्रच्छयुं कस्त्वामजिघांसच्चरन्तम् ।
कस्ते देवो अधि मार्डीक आसीद्यत्प्राक्षिणाः पितरं पादगृह्य ॥ १२ ॥

कः । ते । मातरम् । विधवाम् । अचक्रत् । शयुम् । कः । त्वाम् । अजिघांसत् । चरन्तम् ।
कः । ते । देवः । अधि । मार्डीके । आसीत् । यत् । प्र । अक्षिणाः । पितरम् । पादऽगृह्य ॥

वेङ्कट० जातमात्रमिन्द्रो दृष्ट्वा [illegible] । यत्र च पितरम् क्रोधात् पादेषु गृहीत्वा परिभ्रमय्य देशान्तरे प्राक्षिपत् । तदेतदाह कस्ते इति । हे इन्द्र! कः त्वाम् जाते

१. °न्द्रोऽजायत ल. २-२. नास्ति ज' अर्थ. ३. इन्द्रेतु° वि' क अर्थ. ४-४. मातृ । तस्या° ज. ५. °कस्य सः मूको. ६. नास्ति वि' अ'. ७. °एव गृ अ'. ८. नास्ति वि''' अ' अर्थ. ९. प्राक्षि- णोत् वि' अ अर्थ.

स्वमातरम् विधवाम् करोति । यत्र भवतो मध्येऽहं यो वा युवां प्रतिस्यते स मां [illegible] वान्तम् वा हनिष्यति सर्वस्य च स्वामी भविष्यतीति । तथाह शयुन इति । एवंविधवलम् कः स्याम् हन्तुमिच्छति कः वा देवः अन्यः¹ ²सुखयितृकर्मे त्वयि भवति² [illegible] ॥ १२ ॥

अव॑र्त्या॒ शुन॑ आ॒न्त्राणि॑ पेचे॒ न दे॒वेषु॑ विविदे मर्डि॒तार॑म् ।
अप॑श्यं जा॒याममही॑यमाना॒मधा॑ मे श्ये॒नो मध्वा ज॑भार ॥ १३ ॥

अव॑र्त्या । शुनः॑ । आ॒न्त्राणि॑ । पे॒चे॒ । न । दे॒वेषु॑ । वि॒वि॒दे॒ । म॒र्डि॒तार॑म् ।
अप॑श्यम् । जा॒याम् । अम॑हीयमानाम् । अध॑ । मे॒ । श्ये॒नः । मधु॑ । आ । ज॒भा॒र॒ ॥ १३ ॥

वेङ्कट० अहं दुष्पमायाम् शुनः आन्त्राणि पेचे सम्पत्त्यर्थम् । न च देवेषु [illegible] सुखयितारम् । दृष्टवानस्मि जायाम् [illegible] अपूज्यमानाम् । अथेन्द्रश्येनोऽस्य [illegible] मह्यम् मधु आ जभार ॥ १३ ॥

³इति तृतीयाष्टके पञ्चमाध्याये षड्विंशो वर्गः³ ॥

व्याख्यत् पञ्चममध्यायं तृतीयस्याष्टकस्य सः ।
यज्ञनारायणसूनुः वस्य माधवः ससुदयः ॥

⁴इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने तृतीयाष्टके पञ्चमोऽध्यायः⁴ ॥

— • —

इति ऋग्वेदे सभाष्ये तृतीयाष्टके पञ्चमोऽध्यायः ॥



१. °न्न गु° छर्व. २-२. °भर्त्रै भवति वि° अर्थ; °गै [illegible] ३-३. नास्ति मूको. ४-४ नास्ति वि' अर्थ; इति वेङ्कटमाधवाचार्यस्य कृतौ ऋग्वेदभाष्ये तृतीयेऽष्टके पञ्चमोऽध्यायः समाप्तः अ'.

अथ तृतीयाऽष्टके षष्ठोऽध्याय.[1]

वेङ्कट०

ऋचे(अ 'ए)षा त्वामिन्द्र नमिन्न[†] व्याचिख्यासति माधवः ।
निपातैरध्येन वश्यन्ते श्राव्यमुक्त प्रबन्धोऽयम् ॥ १ ॥

समाऽश्नेति समासादी तौ पठन्ति च बह्वृचाः ।
अवधानेन महता 'क्रामेत् तौ यथा पृथक्'[2-3] ॥ २ ॥

न गुणत्वे प्रधुत्वे वा कर्ममीमांसाभिधेय च ।
अयनः[3] उच्यमा किन्तु यमनेऽस्य प्रपञ्चिते ॥ ३ ॥

यथा सर्वंसमेषु[4] करोति सुस्थावयम् ।
समरेषुक्तथा वेदे प्रयतो कर्मगोचरः ॥ ४ ॥

एवं कन्धौ च वर्णांसौ प्रसिद्धेः प्रतिपादकौ ।
पृथक्-पृथक् प्रयुज्येते बहुवेशयमागतः[5] ॥ ५ ॥

'नो नु मन् विधुर इव'[6], 'वधू नता ने पनीयसी'[7] ।
'आ धा गमदि श्रवत्'[8], 'आ सु ते सुमतिस्तुते'[9] ॥ ६ ॥

'इषुहिका नापुमन्तुका'[10], 'नूनं सिन्धा मन्त्र मि'[11] ।
समवोऽन्योऽर्थे द्विविध दृश्यते पदे ॥ ७ ॥

कथीयोत हि द्विविधं सो दृश्यति स[12] दृश्यति ।
न लिङ नातमामेव वचन्ती मन्यते यथा ॥ ८ ॥

यथा(था 'अ)सु शुभासुमनिस्[13]', 'अस्थितस्मा नुहुतें[14]' ।
'गुहेभोऽस्त्यान्नः'[15] इति पदद्वैविध्यदर्शनम्[16] ॥ ९ ॥

न[17] तत्र श्रेयः पूर्वेषां पृथक् मिथश्च कीर्त्यते ।
तदस्मेति द्वितीयस्यात् एकेनोत्तानुमावयी ॥ १० ॥

१. षष्ठोऽध्यायः । श्रीरस्तु ऋग्वेदभाष्ये वेङ्कटमाधवाचार्यकृतं तृतीयाष्टके षष्ठोऽध्यायः । आदौ ऋग्वेदार्थ-
दीपिका अ॰ २-३. आ यथा तत् पृथक् पृथक् वेदन. † नास्ति वि॰ अ॰. ३. नास्ति वि॰.
४. °नासर्वेमने° वि॰, °यासमसर्मे° अ॰, °आ सर्वेनमे° वि॰ कर्व ५. °प्रमिथः श वि॰. ६. ऋ १,
११,१. ७. ऋ ५,३,८. ८. ऋ १,१०,८. ९. ऋ ८,४०,१ १०. ऋ १,१६१,११.
११. ऋ १,१६१,१०. १२. नास्ति कव. १३. ऋ ५,६१,७ १४ ऋ ५,६२,६ १५. °वे श
वि॰. १६. नास्ति वि॰ कवे.

तस्मादत्रापि वक्तव्यं [illegible] ।
तदुच्यते 'मा मो अमा', 'सो चित्नु [illegible]' ॥ ९ ॥

"सः चित्नु [illegible]" [illegible] ।
[illegible] ॥ १० ॥

[illegible] ।
[illegible] ॥ ११ ॥

[illegible] ।
[illegible] ॥ १२ ॥

[illegible] ।
[illegible] ॥ १३ ॥

[illegible] ।
[illegible] ॥ १४ ॥

[१९]

वामदेवो गौतम ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

एवा त्वामिन्द्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः ।
महामुभे रोदसी वृद्धमृष्वं निरेकमिद्वृणते वृत्रहत्ये ॥ १ ॥

एव । त्वाम् । इन्द्र । वज्रिन् । अत्र । विश्वे । देवासः । सुऽहवासः । ऊमाः ।
महाम् । उभे इति । रोदसी इति । वृद्धम् । ऋष्वम् । निः । एकम् । इत् । वृणते । वृत्रऽहत्ये ॥ १ ॥

वेङ्कट० वामदेवः । [illegible] ॥ १ ॥

अवासृजन्त जिव्रयो न देवा भुवः सम्राळिन्द्र सत्ययोनिः ।
अहन्नहिं परिशयानमर्णः प्र वर्तनीररदो विश्वधेनाः ॥ २ ॥

अव । असृजन्त । जिव्रयः । न । देवाः । भुवः । सम्ऽराट् । इन्द्र । सत्यऽयोनिः ।
अहन् । अहिम् । परिऽशयानम् । अर्णः । प्र । वर्तनीः । अरदः । विश्वऽधेनाः ॥ २ ॥

१. ऋ १०,६१,१६ २. ऋ १०,११,३ [illegible]
[illegible]

वेङ्कट० यथा जीर्णाः पुमांसः कार्येष्वसमर्था भवन्ति एवं त्वत्तो देवा वृत्रहत्ये अव सृजन्त। त्वं च वृत्रवधार्थं गच्छता तेषां मध्ये 'इन्द्र' असुर्यं [illegible] सत्यम् इत्यादि [illegible] परिहृत्य गच्छन् । अथ मारुतान् [illegible] ॥ २ ॥

अतृप्णुवन्तं वियतमबुध्यमबुध्यमानं सुषुपाणमिन्द्र ।
सप्त प्रति प्रवत आशयानमहिं वज्रेण वि रिणा अपर्वन् ॥ ३ ॥

अतृप्णुवन्तम् । विऽयतम् । अबुध्यम् । अबुध्यमानम् । सुसुपानम् । इन्द्र ।
सप्त । प्रति । प्रऽवतः । आऽशयानम् । अहिम् । वज्रेण । वि । रिणाः । अपर्वन् ॥ ३ ॥

वेङ्कट० ≈निद्रायाम् अनुपरतम् [illegible] पृथिव्यां [illegible] एव अबुध्यमानम् [illegible] इन्द्र! सप्त प्रवणयुक्ता नदीः आवृत्य शयानम् [illegible] 'वज्रेण वि हिंसितवानसि' [illegible] ॥ ३ ॥≈

अक्षोदयच्छवसा क्षाम बुध्नं वार्ण वातस्तविषीभिरिन्द्रः ।
दृळ्हान्यौभ्नादुशमान ओजोऽवाभिनत्ककुभः पर्वतानाम् ॥ ४ ॥

अक्षोदयत् । शवसा । क्षाम । बुध्नम् । वाः । न । वातः । तविषीभिः । इन्द्रः ।
दृळ्हानि । औभ्नात् । उशमानः । ओजः । अव । अभिनत् । ककुभः । पर्वतानाम् ॥ ४ ॥

वेङ्कट० ≈उदकस्य मूलं मेघम् इन्द्रः अक्षोदयत् [illegible] भवति बलेन। तत्रोपमानम्—उदकम् इव वायुः [illegible]। तत्र कामयमानः [illegible] मेघस्य दृढानि स्थानानि हिंसितवानिति। एतदेवाह—अभिनदिति। [illegible] इति ॥ ४ ॥≈

अभि प्र दद्रुर्जनयो न गर्भं रथा इव प्र ययुः साकमद्रयः ।
अतर्पयो विसृत उब्ज ऊर्मीन्त्वं वृताँ अरिणा इन्द्र सिन्धून् ॥ ५ ॥

अभि । प्र । दद्रुः । जनयः । न । गर्भम् । रथाःऽइव । प्र । ययुः । साकम् । अद्रयः ।
अतर्पयः । विऽसृतः । उब्जः । ऊर्मीन् । त्वम् । वृतान् । अरिणाः । इन्द्र । सिन्धून् ॥ ५ ॥

वेङ्कट० ≈[illegible] मेघा उदकं [illegible] इव गर्भम्, रथाः इव च प्र यान्ति साकम् मेघाः। इन्द्र! त्वम् विविधं गच्छतो मनुष्यादीन् तर्पितवान् [illegible] उदकोर्मीन्, [illegible] परिवृतान् [illegible] सिन्धून् [illegible] ॥ ५ ॥≈

≈इति तृतीयाष्टके षष्ठाध्याये प्रथमो वर्गः ॥≈

≈१. [illegible] वि° ऋ°. २-२. इन्द्रो मा. वि° ऋ°. ३. [illegible] वि° [illegible]. ४. [illegible] ऋ°. ५. [illegible] वि° ऋ°. ६-६. [illegible] वि°. ७. [illegible] वि°. ८. [illegible] ऋ°. ९. [illegible] वि° ऋ°. १०. मर्दिता मूको. ११. [illegible] ऋ°. १२-१२. नास्ति मूको.≈

त्वं म॒हीम॒वनिं॑ वि॒श्वधे॑नां तु॒र्वीत॑ये व॒य्या॑य॒ क्षर॑न्तीम् ।
अर॑मयो॒ नम॒सैज॒दर्णः॑ सुतर॒णाँ अ॑कृणोरिन्द्र॒ सिन्धू॑न् ॥ ६ ॥

त्वम् । म॒हीम् । अ॒वनि॑म् । वि॒श्वऽधे॑नाम् । तु॒र्वीत॑ये । व॒य्या॑य । क्षर॑न्तीम् ।
अर॑मयः । नम॑सा । एज॑त् । अर्णः॑ । सु॒ऽत॒र॒णान् । अ॒कृ॒णोः॒ । इ॒न्द्र॒ । सिन्धू॑न् ॥ ६ ॥

वेङ्कट० त्वम् महतीं पृथिवीं विश्वस्य प्रीणयित्रीं तुर्वीतये वय्याय च क्षरन्तीम् [illegible] उदकम् एजत् अरमयः इति द्विकर्मकः उदकं [illegible] कृत्वा तत्र पृथिवीं स्थापितवानसि । महतामप्युदकानामेतान् सिन्धून् च हे इन्द्र! सुतरणान् कृतवानसीति ॥ ६ ॥

प्राग्रुवो॑ नभ॒न्वो॒३॒॑ न वक्वा॑ ध्व॒स्रा अ॑पिन्वद्युव॒तीॠ॑त॒ज्ञाः ।
धन्वा॒न्यज्रा॑ँ अपृणक्तृषा॒णाँ अधो॒गिन्द्रः॑ स्त॒र्यो॒३॒॑ दंसु॑पत्नीः ॥ ७ ॥

प्र । अ॒ग्रुवः॑ । न॒भ॒न्वः॑ । न । वक्वाः॑ । ध्व॒स्राः । अ॒पि॒न्व॒त् । यु॒व॒तीः । ऋ॒त॒ऽज्ञाः ।
धन्वा॑नि । अज्रा॑न् । अ॒पृ॒ण॒क् । तृ॒षा॒णान् । अधो॑क् । इन्द्रः॑ । स्त॒र्यः॑ । दम्ऽसु॑पत्नीः ॥ ७ ॥

वेङ्कट० प्र अपिन्वत् नदीः, नभांसि इव आक्रोशन्तीः, सेना इव शब्दकारिणीः, ध्वंसनशीलाः युवतीः सत्यज्ञाः । तदर्थाय निरुदकात् देशान् ये प्राप्नुवन्ति, तान् तृष्यतोऽपि उदकेन प्रीणयति । मेघाद् दुग्धवान् इन्द्रः गमनशीलाः आपः [illegible] दमसुपत्नीः असुरस्य याः सोमवा [illegible] ॥ ७ ॥

पू॒र्वीरु॒षसः॑ श॒रद॑श्च गू॒र्ता वृ॒त्रं ज॑घ॒न्वाँ असृज॒द्वि सिन्धू॑न् ।
परि॑ष्ठिता अतृणद्बद्बधा॒नाः सी॒रा इन्द्रः॒ स्रवि॑तवे पृथि॒व्या ॥ ८ ॥

पू॒र्वीः । उ॒षसः॑ । श॒रदः॑ । च॒ । गू॒र्ताः । वृ॒त्रम् । ज॒घ॒न्वान् । अ॒सृ॒ज॒त् । वि । सिन्धू॑न् ।
परि॑ऽस्थिताः । अ॒तृ॒ण॒त् । ब॒द्ब॒धा॒नाः । सी॒राः । इन्द्रः॑ । स्रवि॑तवे । पृ॒थि॒व्या ॥ ८ ॥

वेङ्कट० बह्वीरुषसः संवत्सरान् च वृत्रेण गूर्ताः [illegible] वृत्रम् जघन्वान् इन्द्रः 'वि असृजत्', तथा सिन्धून् च । तथा परितः स्थिताः सर्वे [illegible] बाध्यमानाः [illegible] नदीः वज्रेण समुद्रं प्रति स्रवितुम् [illegible] पृथिव्याः । नद्यः हि [illegible] ॥ ८ ॥

व॒म्रीभिः॑ पु॒त्रम॒ग्रुवो॑ अदा॒नं नि॒वेश॑नाद्धरिव॒ आ ज॑भर्थ ।
व्यं१॒॑धो अ॑ख्य॒दहि॑माददा॒नो निर्भू॑दुख॒च्छित्सम॑रन्त॒ पर्व॑ ॥ ९ ॥

व॒म्रीभिः॑ । पु॒त्रम् । अ॒ग्रुवः॑ । अ॒दा॒नम् । नि॒ऽवेश॑नात् । ह॒रि॒ऽवः॒ । आ । ज॒भ॒र्थ॒ ।
वि । अ॒न्धः । अ॒ख्य॒त् । अहि॑म् । आ॒ऽद॒दा॒नः । निः । भू॒त् । उ॒ख॒ऽछित् । सम् । अ॒र॒न्त॒ । पर्व॑ ॥

---

१. नास्ति मू. २. नास्ति वि' अ मूको. ३. [illegible] ४-४. [illegible] ५. [illegible]

वेङ्कट० वम्रीभिः भक्ष्यमाणम् पुत्रम् अग्रुवः अद्यमानम् हे हरिवः! तस्मात् वल्मीकनिवेशनात् आ हृतवानसि । भवत्प्रसादादन्धेन सर्पम् प्रमादात् 'आददान अग्रुवः' पुत्रः अन्धः सन् चक्षुष्मान् सर्पम् वि अख्यत् । तथा स ऋषिः वल्मीकनिवासाद्देशात् तस्मात् स्थानात् निः भूत् पृथग् भूत । तस्य विच्छिन्नानि सर्वाण्यङ्गानि च इन्द्रप्रसादात् समगच्छन्त ॥ ९ ॥

प्र ते पूर्वाणि करणानि विप्राविद्वाँ आह विदुषे करांसि ।
यथायथा वृष्ण्यानि स्वगूर्ताऽपांसि राजन्नर्याविवेषीः ॥ १० ॥

प्र । ते । पूर्वाणि । करणानि । विप्र । आऽविद्वान् । आह । विदुषे । करांसि ।
यथाऽयथा । वृष्ण्यानि । स्वऽगूर्ता । अपांसि । राजन् । नर्या । अविवेषीः ॥ १० ॥

वेङ्कट० हे मेधाविन्निन्द्र! तव पुरातनानि क्रियमाणानि च कर्माणि जानन् विदुषे तुभ्यम् प्र ब्रवीति । यथायथा नरे वर्षणनिमित्तानि स्वयमुद्योगसमानि कर्माणि राजन्! कृतवानसि ॥ १० ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

वेङ्कट० ऋ ४. १६, २१ द. ॥ ११ ॥

'इति तृतीयाष्टके षष्ठाध्याये द्वितीयो वर्गः' ॥

[२०]

'वामदेवो गौतम ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः' ।

आ न इन्द्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुः सङ्गे समत्सु तुर्वणिः पृतन्यून् ॥ १ ॥

आ । नः । इन्द्रः । दूरात् । आ । नः । आसात् । अभिष्टिऽकृत् । अवसे । यासत् । उग्रः ।
ओजिष्ठेभिः । नृऽपतिः । वज्रऽबाहुः । सम्ऽगे । समत्ऽसु । तुर्वणिः । पृतन्यून् ॥ १ ॥

वेङ्कट० आ गच्छतु अस्मान् पूजनमिच्छन् इन्द्रः दूरात् अभ्याशात् च, अभ्याशात् आगच्छतु रक्षणाय 'उद्गूर्णः बलवद्भिः नृणां पालयिता वज्रबाहुः सङ्ग्रामेषु शत्रुभिः संगे भवति तरणशीलः' ॥ १ ॥

---

१. वम्रीभि° वि° कर्प. २-२. 'वम्रीभिः' कर्प. ३. यथा वि°; नास्ति कर्प. ४-४. नास्ति मूको. ५. अभिवर्तिनात् कर्प. ६-६. नास्ति वि° कर्प.

आ न इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च ।
तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥ २ ॥

आ । नः । इन्द्रः । हरिऽभिः । यातु । अच्छ । अर्वाचीनः । अवसे । राधसे । च ।
तिष्ठाति । वज्री । मघऽवा । विऽरप्शी । इमम् । यज्ञम् । अनु । नः । वाजऽसातौ ॥ २ ॥

वेङ्कट० [1]आ यातु अस्मान् प्रति इन्द्रः अश्वैः इतोमुखः रक्षणाय[1] धनाय च । तिष्ठतु वज्री धनवान् महान् इमम् यज्ञम् अनु यज्ञस्य पश्चात् अस्मदीयम् संग्रामे ॥ २ ॥

इमं यज्ञं त्वमस्माकमिन्द्र पुरो दधत्सनिष्यसि क्रतुं नः ।
श्वघ्नीव वज्रिन्त्सनये धनानां त्वया वयमर्य आजिं जयेम ॥ ३ ॥

इमम् । यज्ञम् । त्वम् । अस्माकम् । इन्द्र । पुरः । दधत् । सनिष्यसि । क्रतुम् । नः ।
श्वघ्नीऽइव । वज्रिन् । सनये । धनानाम् । त्वया । वयम् । अर्यः । आजिम् । जयेम ॥ ३ ॥

वेङ्कट० इन्द्र ! अस्मदीयम् इमम्[2] यज्ञम् त्वम् पुरस्तात् धारयन् यथास्मदीयं सुखं संभजसि । यथा लुब्धकस्त्री पक्षिणो जयति एवम् वज्रिन् ! धनानाम् लाभाय त्वया वयम् अरेः[3] संग्रामम् जयेम ॥ ३ ॥

उशन्नु षु णः सुमना उपाके सोमस्य नु सुषुतस्य स्वधावः ।
पा इन्द्र प्रतिभृतस्य मध्वः समन्धसा ममदः पृष्ठ्येन ॥ ४ ॥

उशन् । ऊं इति । सु । नः । सुऽमनाः । उपाके । सोमस्य । नु । सुऽसुतस्य । स्वधाऽवः ।
पाः । इन्द्र । प्रतिऽभृतस्य । मध्वः । सम् । अन्धसा । ममदः । पृष्ठ्येन ॥ ४ ॥

वेङ्कट० अस्माकम् अन्तिके सुष्ठु सुतं सोमम् हे अन्नवन् इन्द्र ! कामयमानः सुमना[4] इन्द्र आहवनीये 'प्रति हृतं' सोममयं मधु सुष्ठु पिब, पीत्वा च पृष्ठस्य फलकारेण अन्धसा तेन माद्यतु मनो तव ॥ ४ ॥

वि यो ररप्श ऋषिभिर्नवेभिर्वृक्षो न पक्वः सृण्यो न जेता ।
मर्यो न योषामभि मन्यमानोऽच्छा विवक्मि पुरुहूतमिन्द्रम् ॥ ५ ॥

वि । यः । ररप्शे । ऋषिऽभिः । नवेभिः । वृक्षः । न । पक्वः । सृण्यः । न । जेता ।
मर्यः । न । योषाम् । अभि । मन्यमानः । अच्छ । विवक्मि । पुरुऽहूतम् । इन्द्रम् ॥ ५ ॥

वेङ्कट० यः इन्द्रः नवैः ऋषिभिः स्तूयते पक्वफलः वृक्षः इव भवन्, सृण्यः कुञ्जरः अङ्कुशेन

१-१. सुविशम् वि° को°. २. नास्ति मूको. ३. अरे वि° अपं. ४-४. प्रतिहृतम् वि.

गम्यते स इव जेता. तम् पुरुहूतम् इन्द्रम् प्रति महान्ति विविधं वदामि. यथा मनुष्यः [illegible] कल्याणकामः[1] [illegible] ॥ ५ ॥

'इति [illegible] तृतीयो वर्गः' ॥

गिरिर्न यः स्वत॑वाँ ऋ॒ष्व इन्द्रः॑ स॒नादे॒व सह॑से जा॒त उ॒ग्रः ।
आद॑र्ता॒ वज्रं॒ स्थवि॑रं॒ न भी॒म उ॒द्नेव॒ कोशं॒ वसु॑ना॒ न्यृ॑ष्टम् ॥ ६ ॥

गि॒रिः । न । यः । स्वऽत॑वान् । ऋ॒ष्वः । इन्द्रः॑ । स॒नात् । ए॒व । सह॑से । जा॒तः । उ॒ग्रः ।
आऽद॑र्ता । वज्र॑म् । स्थवि॑रम् । न । भी॒मः । उ॒द्नाऽइ॑व । कोश॑म् । वसु॑ना । निऽऋ॑ष्टम् ॥ ६ ॥

वेङ्कट० स्वायत्तबलः यः इन्द्रः[1] गिरिः इव महान् [illegible] एव [illegible] आत्तवद्गुणं, सः आदर्ता[2] वज्रम्[3], [illegible] परिवृतम् यथा स्थविरम् पर्वतादिकं [illegible] ॥ ६ ॥

न यस्य॑ व॒र्ता ज॒नुषा॒ न्वस्ति॒ न राध॑स आमरी॒ता म॒घस्य॑ ।
उ॒द्वा॒वृ॒षा॒णस्त॑विषीव उग्रा॒स्मभ्यं॑ दद्धि पुरुहूत रा॒यः ॥ ७ ॥

न । यस्य॑ । व॒र्ता । ज॒नुषा॑ । नु । अस्ति॑ । न । राध॑सः । आ॒ऽम॒री॒ता । म॒घस्य॑ ।
उ॒त्ऽव॒वृ॒षा॒णः । त॒वि॒षी॒ऽइ॒व॒ । उ॒ग्र॒ । अ॒स्मभ्य॑म् । द॒द्धि । पु॒रु॒ऽहू॒त॒ । रा॒यः ॥ ७ ॥

वेङ्कट० यस्य [illegible] जन्मना[4] [illegible] न विद्यते [illegible] वा । [illegible] हे [illegible] पुरुहूत ! [illegible] धनम् अस्मभ्यम् देहि ॥ ७ ॥

ईक्षे॑ रा॒यः क्षय॑स्य चर्षणी॒नामु॒त व्र॒जम॑पव॒र्तासि॒ गोना॑म् ।
शि॒क्षा॒न॒रः स॑मि॒थेषु॑ प्र॒हावा॒न्वस्वो॑ रा॒शिम॑भिने॒तासि॒ भूरि॑म् ॥ ८ ॥

ईक्षे॑ । रा॒यः । क्षय॑स्य । च॒र्ष॒णी॒नाम् । उ॒त । व्र॒जम् । अ॒प॒ऽव॒र्ता । अ॒सि॒ । गोना॑म् ।
शि॒क्षा॒ऽन॒रः । स॒म्ऽइ॒थेषु॑ । प्र॒हाऽवा॑न् । वस्वः॑ । रा॒शिम् । अ॒भि॒ऽने॒ता । अ॒सि॒ । भूरि॑म् ॥ ८ ॥

वेङ्कट० मनुष्याणां धनगृहयोः त्वम् ईशिषे, अपि च [illegible] अपावृणोषि [illegible] । शिक्षिता नेता [illegible]'° धनस्य महान्तम् राशिम् [illegible] प्रापयिता असि ॥ ८ ॥

---

१. [illegible] वि' अ'. २-३. नास्ति मूको. ३. नास्ति वि' अ'. ४. [illegible] मूको.
५. [illegible] वि' अ'. ६. [illegible] अ'. ७. [illegible] मूको. ८. [illegible] अ'; [illegible] वि'.
९. नास्ति वि'. १०. [illegible] वि' अ'.

कथा तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहु का चिदृष्वः ।
पुरु दाशुषे विचयिष्ठो अंहोऽथा दधाति द्रविणं जरित्रे ॥ ९ ॥

कथा । तत् । शृण्वे । शच्या । शचिष्ठः । यया । कृणोति । मुहु । का । चित् । ऋष्वः ।
पुरु । दाशुषे । विऽचयिष्ठः । अंहः । अथ । दधाति । द्रविणम् । जरित्रे ॥ ९ ॥

वेङ्कट० कया प्रज्ञया तत् विदेयमानं कार्यजातं शृणोति अभिलषितेन प्रज्ञया[1] । यया प्रज्ञया स्तोत्रे मुहुर्मुहुः कानिचित् करोति महान् इन्द्रः । सोऽयं महदपि पापम् विचयिष्ठः अतिशयेन अपनेता दाशुषः, अनन्तरं प्रयच्छति धनम् जरित्रे ॥ ९ ॥

मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत्ते ।
नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः ॥ १० ॥

मा । नः । मर्धीः । आ । भर । दद्धि । तत् । नः । प्र । दाशुषे । दातवे । भूरि । यत् । ते ।
नव्ये । देष्णे । शस्ते । अस्मिन् । ते । उक्थे । प्र । ब्रवाम । वयम् । इन्द्र । स्तुवन्तः ॥ १० ॥

वेङ्कट० मा अस्मान् हिंसीः । आ हर अस्मदर्थं धनम् । आहृत्य चास्मभ्यम् तत् प्रयच्छ यजमानाय प्र दाशुषे यत् तव 'बहु धनं' विद्यते । नवतरे दानकाले शस्ते अस्मिन् तव उक्थे वयम् इन्द्र! त्वाम् स्तुवन्तः अभिलषित तुभ्यम् प्र ब्रवाम इति ॥ १० ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

वेङ्कट० पूर्वं (४, १६, २१) व्याख्याता ॥ ११ ॥

'इति तृतीयाष्टके षष्ठाध्याये चतुर्थो वर्गः' ॥

[२१]

'वामदेवो गौतम ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः' ।

आ यात्विन्द्रोऽवस उप न इह स्तुतः सधमादस्तु शूरः ।
वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥ १ ॥

---

१. महः वि¹ अ². २-२ 'इन्द्रम् अ' १-२ नास्ति मूको.

आ । यातु । इन्द्रः । अवसे । उप । नः । इह । स्तुतः । सधऽमात् । अस्तु । शूरः ।
ववृधानः । तविषीः । यस्य । पूर्वीः । द्यौः । न । क्षत्रम् । अभिऽभूति । पुष्यात् ॥ १ ॥

वेङ्कट० आयात्वस्माकं रक्षणाय अस्मान् इन्द्रः। तथा अस्मिन् यज्ञे अस्माभिः स्तुतः सन् अस्माभिः सह मादन् भवतु शूरः। यस्य पुरातनानि बलानि हविर्भिर्वर्धयन् पुष्यत्यभिभावुकं[1] बलम् पुष्यति द्युलोक इव। स हि वीर्यकर्मा देवानामाश्रयः सन् बलवान् भवति ॥ १ ॥

तस्येदिह स्तवथ वृष्ण्यानि तुविद्युम्नस्य तुविराधसो नॄन् ।
यस्य क्रतुर्विदथ्यो न सम्राट् साह्वान् तरुत्रो अभ्यस्ति कृष्टीः ॥ २ ॥

तस्य । इत् । इह । स्तवथ । वृष्ण्यानि । तुविऽद्युम्नस्य । तुविऽराधसः । नॄन् ।
यस्य । क्रतुः । विदथ्यः । न । सम्ऽराट् । सह्वान् । तरुत्रः । अभि । अस्ति । कृष्टीः ॥ २ ॥

वेङ्कट० तस्य एव कर्माणि स्तुत इह वर्धमानानि[2] बहुद्युतिध्काद् मनुष्यान् प्रति बहुद्युम्नस्येन्द्रस्य, यस्य कर्म नगरस्थितः राजा इव रमणीयं, यश्च शत्रूणां सहनशीलः तारकः शत्रून् अभि भवति ॥ २ ॥

आ यात्विन्द्रो दिव आ पृथिव्या मक्षू समुद्रादुत वा पुरीषात् ।
स्वर्णरादवसे नो मरुत्वान् परावतो वा सदनादृतस्य ॥ ३ ॥

आ । यातु । इन्द्रः । दिवः । आ । पृथिव्याः । मक्षु । समुद्रात् । उत । वा । पुरीषात् ।
स्वःऽनरात् । अवसे । नः । मरुत्वान् । पराऽवतः । वा । सदनात् । ऋतस्य ॥ ३ ॥

वेङ्कट० आ गच्छतु इन्द्रः अस्मान् द्युलोकात्, अपि च पृथिव्याः, शीघ्रम् अन्तरिक्षात्, अपि वा उदकात्, अपि च सर्वमनुष्यात् रक्षणार्थम् अस्मान् मरुत्वान्। अपि च 'अत्यन्तदूरस्थात्'[3] सत्यस्य स्थानात् आगच्छत्विति[4] ॥ ३ ॥

स्थूरस्य रायो बृहतो य ईशे तमु ष्टवाम विदथेष्विन्द्रम् ।
यो वायुना जयति गोमतीषु प्र धृष्णुया नयति वस्यो अच्छ ॥ ४ ॥

स्थूरस्य । रायः । बृहतः । यः । ईशे । तम् । ऊँ इति । स्तवाम । विदथेषु । इन्द्रम् ।
यः । वायुना । जयति । गोऽमतीषु । प्र । धृष्णुऽया । नयति । वस्यः । अच्छ ॥ ४ ॥

वेङ्कट० विपुलस्य महतः धनस्य यः ईश्वरो भवति, तम् एव स्तवाम यज्ञेषु इन्द्रम्। यः

---

१. भातुकम् वि' अ'. २. 'नानि कर्माणि वि' अ'. ३-३. 'द्युम्न' वि'. ४. वागा … अ'.

वायुना सह गत्वा पशुमतीषु समृद्धेनासु अयति द्वेषम्। यद्वा प्र यमति धनुः(?) इन्द्रः अन्नमुदकम् प्रति ॥ ४ ॥

उप यो नमो नमसि स्तभायन्नियर्ति वाचं जनयन्यजध्यै ।
ऋञ्जसानः पुरुवार उक्थैरेन्द्रं कृण्वीत सदनेषु होता ॥ ५ ॥

उप । यः । नमः । नमसि । स्तभायन् । इयर्ति । वाचम् । जनयन् । यजध्यै ।
ऋञ्जसानः । पुरुऽवारः । उक्थैः । आ । इन्द्रम् । कृण्वीत । सदनेषु । होता । ५ ॥

वेङ्कट० यः अग्निः मन्त्रं नमः पुराणोऽन्नेऽनुस्यूतं स्तम्भयन्[1] मनुष्याणां यज्ञार्थम् उप[2] प्रेरयति मन्त्रात्मिकाम् वाचम् यज्ञाय जनयन्। स देवान् उक्थैः प्रसाधयन् बहुभिर्वरणीयोऽस्ति होता[3] इन्द्रम् अस्मद्गृहेषु आ कृणोतु ॥ ५ ॥

'इति तृतीयाष्टके षष्ठाध्याये पञ्चमो वर्गः' ॥

धिषा यदि धिषण्यन्तः सरण्यान्त्सदन्तो अद्रिमौशिजस्य गोहे ।
आ दुरोषाः पास्त्यस्य होता यो नो महान्त्संवरणेषु वह्निः ॥ ६ ॥

धिषा । यदि । धिषण्यन्तः । सरण्यान् । सदन्तः । अद्रिम् । औशिजस्य । गोहे ।
आ । दुरोषाः । पास्त्यस्य । होता । यः । नः । महान् । सम्ऽवरणेषु । वह्निः ॥ ६ ॥

वेङ्कट० स्तुतिशाखा यदि स्तुतिवाक्यमिच्छन्तः सरणं पर्वतमार्गमिच्छन्तीत आसीदन्तः शिलोच्चयम् औशिजस्य कक्षीवतः पर्वतमध्ये राक्षसैः संवरणे सति साहाय्यं कर्तुमेते यामन्नेवा। ततस्त्वम् हे अग्ने! शीघ्रम् अस्मास्विन्द्रम् आवह राक्षसानां दुःखावहहन्तः, पास्त्यस्य गृहस्थस्य यजमानस्य यस्त्वं देवानां ह्वाता भवसि, यः इन्द्र अस्माकम् महान् राक्षसानाम् संवरणेषु सत्सु वोढा भवति ॥६॥

सत्रा यदीं भार्वरस्य वृष्णः सिषक्ति शुष्मः स्तुवते भराय ।
गुहा यदीमौशिजस्य गोहे प्र यद्धिये प्रायसे मदाय ॥ ७ ॥

सत्रा । यत् । ईम् । भार्वरस्य । वृष्णः । सिसक्ति । शुष्मः । स्तुवते । भराय ।
गुहा । यत् । ईम् । औशिजस्य । गोहे । प्र । यत् । धिये । प्र । अयसे । मदाय ॥ ७ ॥

वेङ्कट० सत्यामावर्ते स्तुवते वामदेवाय तत्प्रीत्यर्थं सत्यमेव पुनरौशिजं भार्वर वृष्णो वारकस्य इन्द्रस्य बलं सेवते। यदि च[4] पर्वतस्य गुहायाम् अस्य औशिजस्य वरणे सति कर्मणे त्वम् हे अग्ने! कर्मणे प्र गच्छसि[5]। यदि वा अस्मिन् सोमस्य[6] मदाय प्र गच्छसि। तदा त्वमिन्द्रमाहृणुहीति तद्धत् हवं पौशिजो यजमानः। तदयं चेन्द्रमस्या आवहेति। एको यच्छब्दः पूरणः[8] ॥ ७ ॥

---

१. स्तम्भयन् वि॰ अ॰. २. अच वि॰ अ॰. ३. नास्ति मूको. ४-४. नास्ति मूको. ५. नास्ति मू. ६. यच्छ॰ वि॰ अ॰ ७. नास्ति वि॰ अ॰. ८. पूरणः वि॰ अ॰.

वि यद् वरांसि पर्वतस्य वृण्वे पयोभिर्जिन्वे अपां जवांसि ।
विदद् गौरस्य गवयस्य गोहे यदी वाजाय सुध्यो३ वहन्ति ॥ ८ ॥

वि । यत् । वरांसि । पर्वतस्य । वृण्वे । पयःऽभिः । जिन्वे । अपाम् । जवांसि ।
विदत् । गौरस्य । गवयस्य । गोहे । यदि । वाजाय । सुऽध्यः । वहन्ति ॥ ८ ॥

वेङ्कट० यदि इन्द्र! पर्वतस्य वरांसि प्रवेशमार्गान् रोधनानि द्वाराणि वि वृणोमीति मन्यसे, तथा अपाम् जवांसि [illegible] निरुद्धानि पयोभिः [illegible] पूरयसि, यदि च [illegible] गौरगवयौ पशू [illegible] वीर्यिणम् [illegible] तावत् [illegible] इति, यदि [illegible] सुकर्माणः [illegible] वहन्ति, तत [illegible] ॥ ८ ॥

भद्रा ते हस्ता सुकृतोत पाणी प्रयन्तारा स्तुवते राध इन्द्र ।
का ते निषत्तिः किमु नो ममत्सि किं नोदुदु हर्षसे दातवा उ ॥ ९ ॥

भद्रा । ते । हस्ता । सुऽकृता । उत । पाणी इति । प्रऽयन्तारा । स्तुवते । राधः । इन्द्र ।
का । ते । निऽसत्तिः । किम् । ऊँ इति । नो इति । ममत्सि । किम् । न । उत्ऽउत् । ऊँ इति । हर्षसे । दातवै ।
ऊँ इति ॥ ९ ॥

वेङ्कट० इन्द्र! भद्रवीर्यौ तव हस्तौ, [illegible] पाणिः, अपि च सुकर्माणौ पाणी प्रयच्छन्तौ स्तुवते धनम् । तथा सति का ते इयं [illegible] निषत्तिः [illegible] । किम् [illegible] न मादयसि [illegible] दातुम् न उद् हर्षसे ॥ ९ ॥

एवा वस्व इन्द्रः सत्यः सम्राड्ढन्ता वृत्रं वरिवः पूरवे कः ।
पुरुष्टुत क्रत्वा नः शग्धि रायो भक्षीय तेऽवसो दैव्यस्य ॥ १० ॥

एव । वस्वः । इन्द्रः । सत्यः । सम्ऽराट् । हन्ता । वृत्रम् । वरिवः । पूरवे । करिति कः ।
पुरुऽस्तुत । क्रत्वा । नः । शग्धि । रायः । भक्षीय । ते । अवसः । दैव्यस्य ॥ १० ॥

वेङ्कट० एवं धनस्य इन्द्रः सम्राट्, सत्यमेव ईश्वरो भवति, वृत्रम् [illegible] हन्ति, धनं च मनुष्याय करोति । तथा सति स्तुतः हे इन्द्र पुरुष्टुत! प्रज्ञया अस्मभ्यम् धनानि देहि । तव [illegible] भक्षीय [illegible] ॥ १० ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

१. [illegible] २. [illegible] ३. [illegible] ४. [illegible]
५. [illegible] ६. [illegible] ७. [illegible] ८. [illegible]

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

वेङ्कट० = ४, १६, २१ द्र. ॥ ११ ॥

'इति तृतीयाष्टके षष्ठाध्याये षष्ठो वर्गः'[1] ॥

[२२]

'वामदेवो गौतम ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।'

यन्न इन्द्रो जुजुषे यच्च वष्टि तन्नो महान् करति शुष्म्या चित् ।
ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा बिभ्रदेति ॥ १ ॥

यत् । नः । इन्द्रः । जुजुषे । यत् । च । वष्टि । तत् । नः । महान् । करति । शुष्मी । आ । चित् ।
ब्रह्म । स्तोमम् । मघऽवा । सोमम् । उक्था । यः । अश्मानम् । शवसा । बिभ्रत् । एति ॥ १ ॥

वेङ्कट० यदि अस्माकम् इन्द्रः सेवते, यदि च अस्माकं कामयते, तत् अस्माकम् महान् कर्तव्यं करोति, तथा अस्मदर्थं बलयुक्तः च भवति । यः मघवा वज्रम् बलेन धारयन् गच्छति स्तोत्रशस्त्राणि सोमम् चाभिमुखं गच्छति ॥ १ ॥

वृषा वृषन्धिं चतुरश्रिमस्यन्नुग्रो बाहुभ्यां नृतमः शचीवान् ।
श्रिये परुष्णीमुषमाण ऊर्णां यस्याः पर्वाणि सख्याय विव्ये ॥ २ ॥

वृषा । वृषन्धिम् । चतुःऽअश्रिम् । अस्यन् । उग्रः । बाहुऽभ्याम् । नृऽतमः । शचीऽवान् ।
श्रिये । परुष्णीम् । उषमाणः । ऊर्णाम् । यस्याः । पर्वाणि । सख्याय । विव्ये ॥ २ ॥

वेङ्कट० वर्षिता इन्द्रः वर्षितृणां धारकम् चतुष्कोटिम् वज्रम् बाहुभ्याम् प्रेरयन् उद्गूर्णः नेतृतम कर्मवान् परुष्णीम् नदीम् ... 'यस्याः नद्याः'[3] पर्वाणि ... 'विव्ये'[4] ॥ २ ॥

यो देवो देवतमो जायमानो महो वाजेभिर्महद्भिश्च शुष्मैः ।
दधानो वज्रं बाह्वोरुशन्तं द्याममेन रेजयत् प्र भूम ॥ ३ ॥

१-१. नास्ति मूको. २. ओमय° वि° ब° ... ३-३. यस्या नद्या वि° ब°. ४-४. °मध्रवि° वि°.

यः । देवः । देवऽतमः । जायमानः । महः । वाजेभिः । महत्ऽभिः । च । शुष्मैः ।
दधानः । वज्रम् । बाह्वोः । उशन्तम् । द्याम् । अमेन । रेजयत् । प्र । भूम ॥ ३ ॥

वेङ्कट० यः देवानाम् अतिशयेन देवः, जायमान एव महान् अन्नैः मरुद्भिः च शोषकैः तेजोभिः सह प्रादुर्भवति धारयन् बाह्वोः वज्रम् शत्रून् कामयमानम्, स देवः दिवं भूमिं च अमेन बलेन प्र कम्पयति ॥ ३ ॥

विश्वा रोधांसि प्रवतश्च पूर्वीर्द्यौर्ऋष्वाज्जनिमन्रेजत क्षाः ।
आ मातरा भरति शुष्म्या गोर्नृवत्परिज्मन्नोनुवन्त वाताः ॥ ४ ॥

विश्वा । रोधांसि । प्रऽवतः । च । पूर्वीः । द्यौः । ऋष्वात् । जनिमन् । रेजत । क्षाः ।
आ । मातरा । भरति । शुष्मी । आ । गोः । नृऽवत् । परिऽज्मन् । नोनुवन्त । वाताः ॥ ४ ॥

वेङ्कट० विश्वानि रोधांसि महान्ति प्रवणानि च बहूनि जायमाने इन्द्रे महत्त्वात् अरेजन्त, तथा[1] द्यौः च अरेजत[1] पृथिवी च । सोऽयं तेजस्वी सन् द्यावापृथिवी आ[2] बिभर्ति, आ[3] च पूरयति । उदकस्य परितः गन्तरि अस्मिन्[4] इन्द्रे वायवः मनुष्यवत् अत्यन्तं शब्दं कुर्वन्ति यथा राजानं परितो मनुष्या इति ॥ ४ ॥

ता तू त इन्द्र महतो महानि विश्वेष्वित्सवनेषु प्रवाच्या ।
यच्छूर धृष्णो धृषता दधृष्वानहिं वज्रेण शवसाविवेषीः ॥ ५ ॥

ता । तु । ते । इन्द्र । महतः । महानि । विश्वेषु । इत् । सवनेषु । प्रऽवाच्या ।
यत् । शूर । धृष्णो इति । धृषता । दधृष्वान् । अहिम् । वज्रेण । शवसा । अविवेषीः ॥ ५ ॥

वेङ्कट० तानि[5] क्षिप्रं तव इन्द्र! महतः महान्ति कर्माणि अस्माभिः सर्वेषु एव सवनेषु प्रवाच्यानि[*] । यत् हे शूर धर्षित ! धृष्णुना धर्षणशीलेन 'वज्रेण अहिम् अभिभवन् बलेन' त्वं[9] व्याप्तवानसि, तानीति[10] ॥ ५ ॥

[11]इति तृतीयाष्टके षष्ठाध्याये सप्तमो वर्गः[11] ॥

ता तू ते सत्या तुविनृम्ण विश्वा प्र धेनवः सिस्रते वृष्ण ऊध्नः ।
अधा ह त्वद्वृषमणो भियानाः प्र सिन्धवो जवसा चक्रमन्त ॥ ६ ॥

ता । तु । ते । सत्या । तुविऽनृम्ण । विश्वा । प्र । धेनवः । सिस्रते । वृष्णः । ऊध्नः ।
अध । ह । त्वत् । वृषऽमनः । भियानाः । प्र । सिन्धवः । जवसा । चक्रमन्त ॥ ६ ॥

१. नास्ति कर्प. २. महते' ख. ३. नास्ति मूको. ४. नास्ति वि' कर्प. ५. °भिर्गवादि वि' अ'. ६. शब्दं नास्ति वि' अ कर्प. * प्रवाच्यानि कर्प; प्रवाच्यानि वि' अ'. ८-८. नास्ति वि' कर्प. ९. तत् वि' अ' कर्प. १० °तिति वि' अ'. ११-११. नास्ति मूको.

संस्कृत० तानि त्रिषु तव सख्यानि हे बहुधन! शक्तिमन्ति प्रशस्यानि सर्वाणि । वर्षितुः तव वाचानं स्रवन्तः कृत्वा आपः प्रसरन्ति । तदनन्तरम् पुरु हे वर्षितुमनस्क स्वगः सिन्धवः [illegible] प्रवर्धते इति ॥ ६ ॥

अत्राह ते हरिवस्ता उ देवीरवोभिरिन्द्र स्तवन्त स्वसारः ।
यत् सीमनु प्र मुचो बद्बधाना दीर्घामनु प्रसितिं स्यन्दयध्यै ॥ ७ ॥

अत्र । अह । ते । हरिऽवः । ताः । ऊँ इति । देवीः । अवःऽभिः । इन्द्र । स्तवन्त । स्वसारः ।
यत् । सीम् । अनु । प्र । मुचः । बद्बधानाः । दीर्घाम् । अनु । प्रऽसितिम् । स्यन्दयध्यै ॥ ७ ॥

संस्कृत० अत्र एव खलु तव हे हरिवः इन्द्र ! ताः देव्यः मनुष्याणां रक्षणैः इन्द्रैः स्तोतृभिः स्तुता आसन् स्वयं सरणशीला नद्यः, यदा सर्वतः 'परिगृह्य अनुक्रमेण' च मुक्तवानसि बाध्यमानाः दीर्घमार्गं प्रति स्यन्दितुम् इति ॥ ७ ॥

पिपीळे अंशुर्मद्यो न सिन्धुरा त्वा शमी शशमानस्य शक्तिः ।
अस्मद्र्यक् शुशुचानस्य यम्या आशुर्न रश्मिं तुव्योजसं गोः ॥ ८ ॥

पिपीळे । अंशुः । मद्यः । न । सिन्धुः । आ । त्वा । शमी । शशमानस्य । शक्तिः ।
अस्मद्र्यक् । शुशुचानस्य । यम्याः । आशुः । न । रश्मिम् । तुविऽओजसम् । गोः ॥ ८ ॥

संस्कृत० पीडितः सोमस्य अंशुः, तस्य च रसो मदकरः इव सिन्धुः संज्ञातः । अथ आ गच्छतु त्वां प्रवृद्धबलम् अस्मदभिमुखं स्तुतिकर्म शमनशीलं स्तुवतः दीप्यमानस्य यजमानस्य होतुः, यथा क्षिप्रकारी पुरुषः गन्तुरश्वस्य रश्मिम् आयच्छत्येवमिति ॥ ८ ॥

अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा नृम्णानि सत्रा सहुरे सहांसि ।
अस्मभ्यं वृत्रा सुहनानि रन्धि जहि वधर्वनुषो मर्त्यस्य ॥ ९ ॥

अस्मे इति । वर्षिष्ठा । कृणुहि । ज्येष्ठा । नृम्णानि । सत्रा । सहुरे । सहांसि ।
अस्मभ्यम् । वृत्रा । सुऽहनानि । रन्धि । जहि । वधः । वनुषः । मर्त्यस्य ॥ ९ ॥

संस्कृत० हे सहनशील ! अस्माकं वृद्धतमानि प्रशस्यतमानि धनानि बलानि च सत्यमेव कुरु । किञ्च अस्माकम् सुहनानि वृत्राणि शत्रून् वशं नय, जहि च आयुधम् अस्मात् प्रति मनुष्यस्य ॥ ९ ॥

१ °र स्यन्दः मूको. २. सख्य वि° अ° सर्व. ३. शक्ति मूको. ४. °र सल्लत(°रके सर्व.) वि° अ° सर्व. ५ सिन्धवः मूको, सिन्धवः वा क प्रस्तावः. ६-६. 'गृहानुगताणून' वि° अ°. ७. पीडितः वि° अ°. ८. हेतुः मूको. ९. यानस्य° सर्व. १०-१०. शक्ति वि° सर्व.

अस्माकमित्सु शृणुहि त्वमिन्द्रास्मभ्यं चित्राँ उप माहि वाजान् ।
अस्मभ्यं विश्वा इषणः पुरंधीरस्माकं सु मघवन्बोधि गोदाः ॥ १० ॥

अस्माकम् । इत् । सु । शृणुहि । त्वम् । इन्द्र । अस्मभ्यम् । चित्रान् । उप । माहि । वाजान् ।
अस्मभ्यम् । विश्वाः । इषणः । पुरम्ऽधीः । अस्माकम् । सु । मघऽवन् । बोधि । गोऽदाः ॥ १० ॥

वेङ्कट० अस्माकम् एव स्तोत्राणि त्वम् इन्द्र! सुष्ठु शृणुहि, तथा अस्मभ्यम् एव नानारूपाणि अन्नानि च उप माकुरु, तथा अस्मभ्यम् एव प्रेरय सर्वाः प्रज्ञाः, तथा मघवन्! अस्माकम् सुष्ठु गवां दाता भवासीति बुध्यस्व ॥ १० ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

वेङ्कट० ऋ ४, १६, २१ इ. ॥ ११ ॥

[1]इति तृतीयाष्टके षष्ठाध्याये अष्टमो वर्गः[1] ॥

[२३]

[1]वामदेवो गौतम ऋषिः । इन्द्रो देवता, अष्टम्यादित्र्यृचस्य ऋतं वा । त्रिष्टुप् छन्दः[1] ।

कथा महामवृधत्कस्य होतुर्यज्ञं जुषाणो अभि सोममूधः ।
पिबन्नुशानो जुषमाणो अन्धो ववक्ष ऋष्वः शुचते धनाय ॥ १ ॥

कथा । महाम् । अवृधत् । कस्य । होतुः । यज्ञम् । जुषाणः । अभि । सोमम् । ऊधः ।
पिबन् । उशानः । जुषमाणः । अन्धः । ववक्षे । ऋष्वः । शुचते । धनाय ॥ १ ॥

वेङ्कट० कथमिन्द्रः प्रवृद्धिमवर्धयत् । कीदृशं पूजकमिन्द्रः । कस्य वा होतुः यज्ञम् सेवमानः सोमम् अभि गच्छति ऊधसि हविषामिव स्थितम् । सोमम्[2] पिबन् कामयमानः सेवमानः सोऽन्नं[3] ममत्वान् प्रति गच्छति महान् यजमानानाम् दीप्यमानाय[4] धनं दातुम् ॥ १ ॥

को अस्य वीरः सधमादमाप समानंश सुमतिभिः को अस्य ।
कदस्य चित्रं चिकिते कदूती वृधे भुवच्छशमानस्य यज्योः ॥ २ ॥

कः । अस्य । वीरः । सधऽमादम् । आप । सम् । आनंश । सुमतिऽभिः । कः । अस्य ।
कत् । अस्य । चित्रम् । चिकिते । कत् । ऊती । वृधे । भुवत् । शशमानस्य । यज्योः ॥ २ ॥

१-१. नास्ति मूको. २. सोऽयं वि² मपं. ३. सोमम् वि¹ मपं. ४. दीप्यमानाय मूको.

वेङ्कट० कः वीरः इन्द्रस्य सधमाद्यम् आप। इन्द्रेण सह मादयतीत्यर्थः। कः वा इन्द्रस्य सुमतिभिः सङ्गत आसीत्। कदा वा अस्य चित्रम् धनं प्रकाशते। कदा वाऽयमिन्द्रः रक्षणेन वर्धनाय भवति यजमानस्य यज्ञोः ॥ २ ॥

कथा शृणोति हूयमानमिन्द्रः कथा शृण्वन्नवसामस्य वेद ।
का अस्य पूर्वीरुपमातयो ह कथैनमाहुः पपुरिं जरित्रे ॥ ३ ॥

कथा । शृणोति । हूयमानम् । इन्द्रः । कथा । शृण्वन् । अवसाम् । अस्य । वेद ।
काः । अस्य । पूर्वीः । उपऽमातयः । ह । कथा । एनम् । आहुः । पपुरिम् । जरित्रे ॥ ३ ॥

वेङ्कट० कथम् शृणोति हूयमानम् हविः इन्द्रः। कथं वा शृण्वन् अस्य स्तोतुः जानाति रक्षणानि। काः वा अस्य पुरातन्यः स्तुतयः। कथम् वा एनम् आहुः यथाऽयं स्तोत्रे जनाय कामानां पूरयिता भवति ॥ ३ ॥

कथा सबाधः शशमानो अस्य नशदभि द्रविणं दीध्यानः ।
देवो भुवन्नवेदा म ऋतानां नमो जगृभ्वाँ अभि यज्जुजोषत् ॥ ४ ॥

कथा । सऽबाधः । शशमानः । अस्य । नशत् । अभि । द्रविणम् । दीध्यानः ।
देवः । भुवत् । नवेदाः । मे । ऋतानाम् । नमः । जगृभ्वान् । अभि । यत् । जुजोषत् ॥ ४ ॥

वेङ्कट० कथं पीडायुक्तः शशमानः इन्द्रस्य धनम् 'अभि व्याप्नोति' दीप्यमानः। सोऽयं देवः भवेत् ज्ञाता मम सत्यानां वचसाम्, हविः गृहीतवान् मम मां यदि सेवते ॥ ४ ॥

कथा कदस्या उषसो व्युष्टौ देवो मर्तस्य सख्यं जुजोष ।
कथा कदस्य सख्यं सखिभ्यो ये अस्मिन्कामं सुयुजं ततस्रे ॥ ५ ॥

कथा । कत् । अस्याः । उषसः । विऽउष्टौ । देवः । मर्तस्य । सख्यम् । जुजोष ।
कथा । कत् । अस्य । सख्यम् । सखिऽभ्यः । ये । अस्मिन् । कामम् । सुऽयुजम् । ततस्रे ॥ ५ ॥

वेङ्कट० केन प्रकारेण कदा च अस्याः उषसः व्युष्टौ देवः मर्त्यस्य सख्यम् सेवते। कथं वा कदा वा अस्य सख्यम् भवति सखिभ्यः, ये स्तोतारः इन्द्रे अभिलषितम् आत्मनः सुयुक्तम् अकुर्वन् ॥ ५ ॥

इति तृतीयाष्टके षष्ठाध्याये नवमो वर्गः ॥

१. यथा° वि° अ°. २-२. अभि व्या° वि°; नाभि व्याप्नोतीति वि° अ°. ३-३. नास्ति मूको.

किमादमत्रं सख्यं सखिभ्यः कदा नु ते भ्रात्रं प्र ब्रवाम।
श्रिये सुदृशो वपुरस्य सर्गाः स्वर्ण चित्रतममिष आ गोः॥ ६॥

किम्। आत्। अमत्रम्। सख्यम्। सखिऽभ्यः। कदा। नु। ते। भ्रात्रम्। प्र। ब्रवाम।
श्रिये। सुऽदृशः। वपुः। अस्य। सर्गाः। स्वः। न। चित्रऽतमम्। इषे। आ। गोः॥ ६॥

वेङ्कट० किम् तव आगमनसाधनम् सख्यम् भवति सखिभ्यः। आत इति पूरणः[1]। कदा नु ते वयं भ्रातृत्वम् प्र ब्रवाम। अस्य इन्द्रस्य वपुषः[2] सर्गाः शोभनदर्शनाः श्रिये भवन्ति। तथा स्वर्लोक इव [3]विचित्रतमम् अस्य[3] गन्तुः शरीरम् आभिमुख्येन स्तोतृभिरिष्यते॥ ६॥

द्रुहं जिघांसन् ध्वरसमनिन्द्रां तेतिक्ते तिग्मा तुजसे अनीका।
ऋणा चिद्यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो बबाधे॥ ७॥

द्रुहम्। जिघांसन्। ध्वरसम्। अनिन्द्राम्। तेतिक्ते। तिग्मा। तुजसे। अनीका।
ऋणा। चित्। यत्र। ऋणऽया। नः। उग्रः। दूरे। अज्ञाता। उषसः। बबाधे॥ ७॥

वेङ्कट० द्रोग्धारम् हिंसितारम्[4] इन्द्ररहितां सेनां हन्तुमिच्छन् मघवा इन्द्रः तीक्ष्णीकरोति तिग्माः[5] सेनाः शत्रूणां हिंसार्थं, यदा अस्माकम् ऋणानि इन्द्रः[6] ऋणानां यावयिता तद्दूरं प्रक्षिपति, यथा वै उषसः अस्माकं दूरे बाधते अज्ञाताः शत्रुसेना इति॥ ७॥

ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य धीतिर्वृजिनानि हन्ति।
ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः॥ ८॥

ऋतस्य। हि। शुरुधः। सन्ति। पूर्वीः। ऋतस्य। धीतिः। वृजिनानि। हन्ति।
ऋतस्य। श्लोकः। बधिरा। ततर्द। कर्णा। बुधानः। शुचमानः। आयोः॥ ८॥

वेङ्कट० सत्यस्य हि कर्म शोकस्य रोधयित्र्यः बह्व्यः आपः सन्ति। सत्यस्य प्रज्ञा वर्जनीयानि हन्ति[7]। किञ्च सत्यस्य शब्दो महान् बधिरौ कर्णौ तृणत्ति अन्यथा श्रवणात् बोधयन् दीप्यमानः मनुष्यस्य॥ ८॥

ऋतस्य दृळ्हा धरुणानि सन्ति पुरूणि चन्द्रा वपुषे वपूंषि।
ऋतेन दीर्घमिषणन्त पृक्ष ऋतेन गाव ऋतमा विवेशुः॥ ९॥

ऋतस्य। दृळ्हा। धरुणानि। सन्ति। पुरूणि। चन्द्रा। वपुषे। वपूंषि।
ऋतेन। दीर्घम्। इषणन्त। पृक्षः। ऋतेन। गावः। ऋतम्। आ। विवेशुः॥ ९॥

१. ˚आत छ. २. वपुः सर्प. ३-३. विचित्रतमस्य वि॰ अ॰. ४. नास्ति अ॰. ५. अर्थं ति॰ मूको. ६. ˚मानीन्द्रः वि॰; मघवेन्द्र वि॰; सुदानीन्द्रः अ॰ ७. नास्ति वि॰ सर्प. ८. याय॰ मूको.

वेङ्कट० ऋतस्य रसान्युदकानि धारकाणि विद्यन्ते बहूनि आह्लादकानि विश्वरूपाणि[1] कर्माणि दर्शकानि । तथा ऋतस्य ऋतमनुस्यूतम् कर्म गच्छन्ति[2] । तथा ऋतेन एव स्तवम् उदकम् आ वेदयन्ति ॥ ९ ॥

ऋतं येमान ऋतमिद्वनोत्यृतस्य शुष्मस्तुरया उ गव्युः ।
ऋताय पृथ्वी बहुले गभीरे ऋताय धेनू परमे दुहाते ॥ १० ॥

ऋतम् । येमानः । ऋतम् । इत् । वनोति । ऋतस्य । शुष्मः । तुरऽया । ऊँ इति । गव्युः ।
ऋताय । पृथ्वी इति । बहुले इति । गभीरे इति । ऋताय । धेनू इति । परमे इति । दुहाते इति ॥ १० ॥

वेङ्कट० उदकम् नियच्छन् उदकम् एव प्रयच्छति । तथा ऋतस्य शुष्मः बलं स्तोतॄणाम् एव अत्र गा इच्छन् भवति । तथा ऋताय द्यावापृथिव्यौ[3] विस्तीर्णे गम्भीरे च भवतः । तथा ऋताय एव द्यावापृथिवी उत्तमे पयः दुहाते[4] ॥ १० ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

वेङ्कट० ऋ ४,१६,२१ द्र. ॥ ११ ॥

[5]इति तृतीयाष्टके षष्ठाध्याये दशमो वर्गः[5] ॥

[२४]

[6]वामदेवो गौतम ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः, दशमी अनुष्टुप्[6] ।

का सुष्टुतिः शवसः सूनुमिन्द्रमर्वाचीनं राधस आ ववर्तत् ।
ददिर्हि वीरो गृणते वसूनि स गोपतिर्निष्षिधां नो जनासः ॥ १ ॥

का । सुऽस्तुतिः । शवसः । सूनुम् । इन्द्रम् । अर्वाचीनम् । राधसे । आ । ववर्तत् ।
ददिः । हि । वीरः । गृणते । वसूनि । सः । गोऽपतिः । निःऽसिधाम् । नः । जनासः ॥ १ ॥

वेङ्कट० का शोभना स्तुतिः[7] बलस्य पुत्रम् इन्द्रम् धनोन्मुखम् आवर्तयति[8] अस्माकम् । ददिः[9] दानशील हि वीरः स्तुवते यजमानाय धनानि । स हि अस्माकं ... हे जनाः गवां पतिः भविष्यति ॥ १ ॥

१. वचनाय वि° अ°. २. गच्छन्ति क. ३. °रिवं वि° अप. ४. °न्ते वि°. ५-५. नास्ति मूको. ६. नास्ति वि°. ७. °नाले मूको. ८. नास्ति मूको. ९. नास्ति वि° अप.

स इद्धवे॑ हव्यः स ईड्यः स सुष्टुत इन्द्रः सत्यराधाः ।
स याम॒न्ना म॒घवा मर्त्याय ब्रह्मण्य॒ते सुष्व॑ये॒ वरि॑वो धात् ॥ २ ॥

सः । इत्ऽहवे॑ । हव्यः । सः । ईड्यः । सः । सुऽस्तु॒तः । इन्द्रः । सत्यऽराधाः ।
सः । याम॑न् । आ । मघऽवा । मर्त्याय । ब्रह्मण्य॒ते । सुस्व॑ये । वरि॑वः । धात् ॥ २ ॥

वेङ्कट० सः शत्रुहत्ये ह्वातव्यः । सः एव तत्र स्तुत्यः । स[1] सुष्टुतः[2] इन्द्रः सत्यधनः । सः यागमने मघवा मर्त्याय स्तुतिमिच्छते सुन्वते च मर्त्याय धनम् सः ददाति ॥ २ ॥

तमिन्नरो॒ वि ह्व॑यन्ते समी॒के रि॑रि॒क्वांस॑स्त॒न्वः॑ कृण्वत॒ त्राम् ।
मि॒थो यत्त्या॒गमु॒भया॑सो॒ अग्म॒न्नर॑स्तो॒कस्य॒ तन॑यस्य सा॒तौ ॥ ३ ॥

तम् । इत् । नरः॑ । वि । ह्वयन्ते । स॒मऽई॒के । रि॒रि॒क्वांसः॑ । त॒न्वः॑ । कृ॒ण्वत॒ । त्राम् ।
मि॒थः । यत् । त्या॒गम् । उ॒भया॑सः । अग्म॑न् । नरः॑ । तो॒कस्य॑ । तन॑यस्य । सा॒तौ ॥ ३ ॥

वेङ्कट० तम् एव मनुष्याः 'वि ह्वयन्ते' युद्धे अत्यतिरिक्तबलाः[3] सन्तः शरीरस्य त्रातारमेनं कुर्वन्ति, मिथः यत्र त्यागम् उभयेऽपि गच्छन्ति योद्धारो धनं परस्परं प्रयच्छन्ति, नरः तोकस्य[4] तनयस्य च[5] लाभनिमित्तम् तदर्थं ह्वयन्ति इति ॥ ३ ॥

क्र॒तू॒यन्ति॑ क्षि॒तयो॒ योग॑ उग्राशुषा॒णासो॑ मि॒थो अर्ण॑सातौ ।
सं यद्विशोऽव॑वृत्रन्त यु॒ध्मा आदिन्नेम॑ इन्द्रयन्ते अ॒भीके॑ ॥ ४ ॥

क्र॒तु॒ऽयन्ति॑ । क्षि॒तयः॑ । योगे॑ । उ॒ग्र॒ । आ॒शु॒षा॒णासः॑ । मि॒थः । अर्ण॑ऽसातौ ।
सम् । यत् । विशः॑ । अव॑वृत्रन्त । यु॒ध्माः । आत् । इत् । नेमे॑ । इ॒न्द्र॒यन्ते॒ । अ॒भीके॑ ॥ ४ ॥

वेङ्कट० क्रतुं कर्म कर्तुमिच्छन्ति मनुष्याः धनयोगार्थं हे उग्र![6] परस्परं व्याप्नुवानाः युद्धे । यदा योद्धारः प्रजाः प्रवर्तन्ते अनन्तरम् एव नेमे केचित् इन्द्रमिच्छन्ति युद्धे ॥ ४ ॥

आदिद्ध॒ नेम॑ इन्द्रि॒यं य॑जन्त॒ आदित्प॒क्तिः पु॑रो॒ळाशं॑ रिरिच्यात् ।
आदित्सोमो॒ वि प॑पृच्या॒दसु॑ष्वी॒नादिज्जु॑जोष वृष॒भं यज॑ध्यै ॥ ५ ॥

आत् । इत् । ह । नेमे॑ । इ॒न्द्रि॒यम् । य॒ज॒न्ते॒ । आत् । इत् । प॒क्तिः । पु॒रो॒ळाश॑म् । रि॒रि॒च्या॒त् ।
आत् । इत् । सोमः॑ । वि । प॒पृ॒च्या॒त् । असु॑स्वीन् । आत् । इत् । जु॒जो॒ष॒ । वृ॒ष॒भम् । यज॑ध्यै ॥

१. नास्ति वि᳟ मू᳟. २. सुष्टुतः मू᳟. ३-३. नास्ति मू᳟ वि᳟ अ᳟. ४. 'च विलस' वि᳟ अ᳟. ५. तोकस्य अ᳟. ६. नास्ति मू᳟. ७. नास्ति वि᳟ अ᳟.

वेङ्कट० अनन्तरम् एव केचिदिन्द्रस्य सख्यम्[1] गच्छन्ते । अर्थकस्तदाह—अनन्तरम् एव कामिनः पचन् 'पक्तव्यान् पशुपुरोडाशादीन्' इन्द्रियाय प्रयच्छति । ततः सोऽयं कामः स तं यजमानं कामयमानान् वि गृह्णाद् व्यर्थयति । अनन्तरम् एव सेवते अभितारम्[2] इन्द्रं कर्तुम् अवस्थिते[3] युद्धे । तृतीयः पादः पक्तमिति ॥ ५ ॥

'इति तृतीयाष्टके पञ्चाध्याये एकादशो वर्गः' ॥

कृणोत्यस्मै वरिवो य इत्थेन्द्राय सोममुशते सुनोति ।
सध्रीचीनेन मनसाविवेनन्तमित्सखायं कृणुते समत्सु ॥ ६ ॥

कृणोति । अस्मै । वरिवः । यः । इत्था । इन्द्राय । सोमम् । उशते । सुनोति ।
सध्रीचीनेन । मनसा । अविऽवेनन् । तम् । इत् । सखायम् । कृणुते । समत्ऽसु ॥ ६ ॥

वेङ्कट० कृणोति अस्मै धनमर्थम् यः इत्थम् इन्द्राय सोमम् च कामयमानाय सुनोति इन्द्रेण सहागता मनसा तम् एवेन्द्रम् अविकृतम् सुन्तु कामयमानम्[4] सखायम् कृणुते युद्धेषु ॥ ६ ॥

य इन्द्राय सुनवत्सोममद्य पचात्पक्तीरुत भृज्जाति धानाः ।
प्रति मनायोरुचथानि हर्यन्तस्मिन्दधद्वृषणं शुष्ममिन्द्रः ॥ ७ ॥

यः । इन्द्राय । सुनवत् । सोमम् । अद्य । पचात् । पक्तीः । उत । भृज्जाति । धानाः ।
प्रति । मनायोः । उचथानि । हर्यन् । तस्मिन् । दधत् । वृषणम् । शुष्मम् । इन्द्रः ॥ ७ ॥

वेङ्कट० यः एकस्मिन्नेव दिवसे सोमम् इन्द्राय सुनोति, पचति च[5] पक्तव्यानि पुरोडाशादीनि, धानाः च भृज्जति, इन्द्रमेव मनसेच्छतः स्तोत्राणि प्रेप्सन्, तस्मिन् 'प्रति दधाति' वर्षितारम् शुष्मम्[6] इन्द्रः ॥ ७ ॥

यदा समर्यं व्यचेदृघावा दीर्घं यदाजिमभ्यख्यदर्यः ।
अचिक्रदद्वृषणं पत्न्यच्छा दुरोण आ निशितं सोमसुद्भिः ॥ ८ ॥

यदा । सम्ऽअर्यम् । वि । अचेत् । ऋघावा । दीर्घम् । यत् । आजिम् । अभि । अख्यत् । अर्यः ।
अचिक्रदत् । वृषणम् । पत्नी । अच्छ । दुरोणे । आ । निऽशितम् । सोमसुत्ऽभिः ॥ ८ ॥

वेङ्कट० यदा सङ्ग्रामम् वि विनक्ति हिंसाकारः, यदा वा दीर्घम् आजिम् अभिमुख्येन प्रकाशयति स्वामी, तदानीं वर्षितारमिन्द्रं सेना क्रन्दयति स्वकीये गृहे[7] यजमानैः तीक्ष्णीकृतमिति ॥ ८ ॥

1. 'ये न खि' मू[8]. 2-2. 'पक्तव्यम' वि' कप. 3. नास्ति वि'. 4. 'ितार वि' कप. 5-5. नास्ति मूको. 6. 'मान: मूको. 7. नास्ति वि' कप. 8-8. नास्ति वि' कप. 9. नास्ति वि' क'.

भूयसा वस्नमचरत् कनीयोऽविक्रीतो अकानिषं पुनर्यन् ।
स भूयसा कनीयो नारिरेचीद् दीना दक्षा वि दुहन्ति प्र वाणम् ॥ ९ ॥

भूयसा । वस्नम् । अचरत् । कनीयः । अविऽक्रीतः । अकानिषम् । पुनः । यन् ।
सः । भूयसा । कनीयः । न । अरिरेचीत् । दीनाः । दक्षाः । वि । दुहन्ति । प्र । वाणम् ॥ ९ ॥

वेङ्कट० इह कश्चित् भूयसा महार्घेण मूल्येन न्यूनमूल्यम् अचरत् व्यवहरति । पुनश्च अविक्रीतः अयं भूयान् अनुचितमूल्यस्यादिति केतारं अकानिषम् कामयेऽहम् पुनः तस्मिन् गच्छतीति मन्यमानः । स च क्रेता भूयसा विक्रीतं प्रदाय आत्मना वसन् कनीयः पुनः न अरिरेचीत् नाददे । एतस्मिन् विवादपदे निर्धना विक्रेतारः प्रवृद्धबलाः केतारश्च वाणम् इव प्र दुहन्ति आत्मानम् परस्परेण समाकृषन्ति ॥ ९ ॥

क इमं दशभिर्ममेन्द्रं क्रीणाति धेनुभिः । यदा वृत्राणि जङ्घनदथैनं मे पुनर्ददत् ॥ १० ॥

कः । इमम् । दशऽभिः । मम । इन्द्रम् । क्रीणाति । धेनुऽभिः ।
यदा । वृत्राणि । जङ्घनत् । अथ । एनम् । मे । पुनः । ददत् ॥ १० ॥

वेङ्कट० निगदसिद्धा ॥ १० ॥

नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥

नु । स्तुतः । इन्द्र । नु । गृणानः । इषम् । जरित्रे । नद्यः । न । पीपेरिति पीपेः ।
अकारि । ते । हरिऽवः । ब्रह्म । नव्यम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥ ११ ॥

वेङ्कट० ऋ ४,१६,२१ द्र. ॥ ११ ॥

[१]इति तृतीयाष्टके षष्ठाध्याये द्वादशो वर्गः[१] ॥

[२५]

वामदेवो गौतम ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

को अद्य नर्यो देवकाम उशन्निन्द्रस्य सख्यं जुजोष ।
को वा महेऽवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे ॥ १ ॥

कः । अद्य । नर्यः । देवऽकामः । उशन् । इन्द्रस्य । सख्यम् । जुजोष ।
कः । वा । महे । अवसे । पार्याय । सम्ऽइद्धे । अग्नौ । सुतऽसोमः । ईट्टे ॥ १ ॥

१-१. नास्ति मूको.

वेङ्कट० कः अद्य नरहितः देवान् कामयमानः इन्द्रस्य सख्यम् प्रेम्णा सेवते । कः वा महते रक्षणाय पारयितुं समर्थाय समिद्धे अग्नौ सुतसोमः सन् इन्द्रं स्तौति ॥ १ ॥

को नानाम वचसा सोम्याय मनायुर्वा भवति वस्त उस्राः ।
क इन्द्रस्य युज्यं कः सखित्वं को भ्रात्रं वष्टि कवये क ऊती ॥ २ ॥

कः । नानाम । वचसा । सोम्याय । मनाऽयुः । वा । भवति । वस्ते । उस्राः ।
कः । इन्द्रस्य । युज्यम् । कः । सखिऽत्वम् । कः । भ्रात्रम् । वष्टि । कवये । कः । ऊती ॥ २ ॥

वेङ्कट० कः नमनं करोति स्तुत्या सोमार्हाय । कः वा स्तनायुः भवति । स 'पशूनपि वस्ते' गोसंघान् आच्छादयति । कः इन्द्रसम्बन्धयोग्यताम्, कः वा सखित्वम् भ्रातृत्वं वा कामयते कवेरिन्द्रस्य, कः 'वा अवनम् इति' ॥ २ ॥

को देवानामवो अद्या वृणीते क आदित्याँ अदितिं ज्योतिरीट्टे ।
कस्याश्विनाविन्द्रो अग्निः सुतस्यांशोः पिबन्ति मनसाविवेनम् ॥ ३ ॥

कः । देवानाम् । अवः । अद्य । वृणीते । कः । आदित्यान् । अदितिम् । ज्योतिः । ईट्टे ।
कस्य । अश्विनौ । इन्द्रः । अग्निः । सुतस्य । अंशोः । पिबन्ति । मनसा । अविऽवेनम् ॥ ३ ॥

वेङ्कट० कः देवानाम् रक्षणम् अद्य प्रार्थयते । कः वा आदित्यान् अदितिम् च ज्योतिः स्तौति । कस्य वा सम्बन्धिनः सुतस्य अश्विनौ इन्द्रः अग्निः च अंशोः पिबन्ति मनसा अविगतकामे यथा तथा ॥ ३ ॥

तस्मा अग्निर्भारतः शर्म यंसज्ज्योक्पश्यात्सूर्यमुच्चरन्तम् ।
य इन्द्राय सुनवामेत्याह नरे नर्याय नृतमाय नृणाम् ॥ ४ ॥

तस्मै । अग्निः । भारतः । शर्म । यंसत् । ज्योक् । पश्यात् । सूर्यम् । उत्ऽचरन्तम् ।
यः । इन्द्राय । सुनवाम । इति । आह । नरे । नर्याय । नृऽतमाय । नृणाम् ॥ ४ ॥

वेङ्कट० तस्मै अग्निः हविषां वोढा सुखं प्रयच्छति, तथा स एव दीर्घं पश्यति सूर्यम् च उच्चरन्तम्, यः इन्द्राय सुनवाम इति आह नेत्रे नृहिताय नृणाम् अतिशयेन नेत्रे ॥ ४ ॥

न तं जिनन्ति बहवो न दभ्रा उर्वस्मा अदितिः शर्म यंसत् ।
प्रियः सुकृत्प्रिय इन्द्रे मनायुः प्रियः सुप्रावीः प्रियो अस्य सोमी ॥ ५ ॥

---

१. रणाय वि॰ अ॰. २-२. 'नाम 'पि वि॰, नस्तोति वि॰ अ॰. ३. 'मिवां मूको. ४-४. नास्ति मूको, भवान, सम्भवन वा कः प्रस्तावः. ५. नास्ति वि॰ अ॰. ६. नास्ति मूको. ७. वहि वि॰ अ॰ ८. यथा वि॰ अ॰. ९. नास्ति मूको.

न । तम् । जिनन्ति । बहवः । न । दभ्राः । उरु । अस्मै । अदितिः । शर्म । यंसत् ।
प्रियः । सुऽकृत् । प्रियः । इन्द्रे । मनायुः । प्रियः । सुप्रऽअवीः । प्रियः । अस्य । सोमी ॥५॥

वेङ्कट० 'न तम्' हिंसन्ति बहवः, न अपि अल्पाः । तस्मै भूयो बहु अदितिः सुखं यच्छति । प्रियः सुष्ठु कर्मणां कर्ता भवति । प्रिय इन्द्रे मनायुः । प्रियः सुष्ठु प्रकर्षेण रक्षमाणः । प्रियः अस्य सोमवान् ॥ ५ ॥

'इति तृतीयाष्टके सप्तमाध्याये एकादशो वर्गः' ॥

सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते केवलेन्द्रः ।
नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योऽवहन्तेदवाचः ॥ ६ ॥

सुप्रऽअव्यः । प्राशुषाट् । एषः । वीरः । सुस्वेः । पक्तिम् । कृणुते । केवला । इन्द्रः ।
न । असुस्वेः । आपिः । न । सखा । न । जामिः । दुःप्रऽअव्यः । अवऽहन्ता । इत् । अवाचः ॥

वेङ्कट० सुष्ठु प्रकर्षेण रक्षणीयो भवति प्राशुषाट् शीघ्रं शत्रूणामभिभविता । एष वीरः सोमं सुन्वतो यजमानस्य पक्तुः पुरोडाशादीनामेव केवलम् पाकम् कुरुते स्वीकुरुते । न असुस्वेः आपिः, न च सखा, न अपि जामिः । दुःखेन प्रतर्पणीयः अवहन्ता एव भवति अवाचीनस्य पराङ्मुखस्य ॥ ६ ॥

न रेवता पणिना सख्यमिन्द्रोऽसुन्वता सुतपाः सं गृणीते ।
आस्य वेदः खिदति हन्ति नग्नं वि सुष्वये पक्तये केवलो भूत् ॥ ७ ॥

न । रेवता । पणिना । सख्यम् । इन्द्रः । असुन्वता । सुतऽपाः । सम् । गृणीते ।
आ । अस्य । वेदः । खिदति । हन्ति । नग्नम् । वि । सुस्वये । पक्तये । केवलः । भूत् ॥ ७ ॥

वेङ्कट० न धनवताऽपि पणिना सख्यम् इन्द्रः करोति । असुन्वता 'सुतपाः सम्' अस्माकं [illegible] । अस्य धनम् आ खिदति । अनग्नत्वम् [illegible] हन्ति । वि भवति केवलः सुस्वये सोमस्य पक्त्रे पुरोडाशादेः असाधारणः ॥ ७ ॥

इन्द्रं परेऽवरे मध्यमास इन्द्रं यान्तोऽवसितास इन्द्रम् ।
इन्द्रं क्षियन्त उत युध्यमाना इन्द्रं नरो वाजयन्तो हवन्ते ॥ ८ ॥

इन्द्रम् । परे । अवरे । मध्यमासः । इन्द्रम् । यान्तः । अवऽसितासः । इन्द्रम् ।
इन्द्रम् । क्षियन्तः । उत । युध्यमानाः । इन्द्रम् । नरः । वाजऽयन्तः । हवन्ते ॥ ८ ॥

१-१. नास्ति मूको. २. 'बैनः वि' मूको. ३. [illegible] मूको. ४-४. नास्ति मूको. ५. [illegible] वि' मूको.
६. [illegible] मूको. ७. नास्ति वि'. ८. नास्ति वि' मूको ९-९. 'पाका वि' मूको, [illegible] ग्रन्थाया.

वेङ्कट॰ इन्द्रम् एव परे अवरे मध्यमाश्च ह्वयन्ते । इन्द्रम् एव गच्छन्तः[1], तथा युद्धभूमौ वर्तमानाः, ... , ... युध्यमाना च । इन्द्रात् एव नरः वाजं कुर्वाणाः ॥ ८ ॥

'इति तृतीयाष्टके सप्तमाध्याये चतुर्दशो वर्गः' ॥

[२६]

'वामदेवो गौतम ऋषिः, आद्यानां तिसृणाम् इन्द्रो वा । आत्मानं तिसृणाम् इन्द्रः आत्मा वा देवता, शिष्टानां श्येनः । त्रिष्टुप् छन्दः' ।

अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः ।
अहं कुत्समार्जुनेयं न्यृञ्जेऽहं कविरुशना पश्यता मा ॥ १ ॥

अहम् । मनुः । अभवम् । सूर्यः । च । अहम् । कक्षीवान् । ऋषिः । अस्मि । विप्रः ।
अहम् । कुत्सम् । आर्जुनेयम् । नि । ऋञ्जे । अहम् । कविः । उशना । पश्यत । मा ॥ १ ॥

वेङ्कट॰ अहम् एव मन्वादिः अभवम् । अहम् आर्जुनीपुत्रम् कुत्सम् स्वकार्यसमर्थं करोमि । अहम् एव कविः उशना । माम् पश्यत इतीन्द्रस्य वामदेवस्य वा वचनम् ॥ १ ॥

अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय ।
अहमपो अनयं वावशाना मम देवासो अनु केतमायन् ॥ २ ॥

अहम् । भूमिम् । अददाम् । आर्याय । अहम् । वृष्टिम् । दाशुषे । मर्त्याय ।
अहम् । अपः । अनयम् । वावशानाः । मम । देवासः । अनु । केतम् । आयन् ॥ २ ॥

वेङ्कट॰ अहम्[2] धर्मिष्ठाय[3] भूमिम् ददामि । अहम् एव प्रयच्छामि मर्त्याय वृष्टिम् । अहम् एव अपः अनयम् सुखं प्रति कामयमानाः । मम आज्ञाम् देवाः अनु गच्छन्ति ॥ २ ॥

अहं पुरो मन्दसानो व्यैरं नव साकं नवतीः शम्बरस्य ।
शततमं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावम् ॥ ३ ॥

अहम् । पुरः । मन्दसानः । वि । ऐरम् । नव । साकम् । नवतीः । शम्बरस्य ।
शतऽतमम् । वेश्यम् । सर्वऽताता । दिवःऽदासम् । अतिथिऽग्वम् । यत् । आवम् ॥ ३ ॥

वेङ्कट॰ अहम् पुरः मन्दमानः विविधम् ... ईरितवान् नव[4] नवतीः च[5] शम्बरस्य । अथ मम ... पूरणे नगरे सर्वैः ... शततमम् तत् वेश्यम् प्रवेशनम् अभवत् मम । कदा । यदा दिवोदासनामानम् ... अतिथीन् प्रति गन्तारम् अहम् अरक्षम् ॥ ३ ॥

---

१. नास्ति वि॰ अपि, नरो मूको. २. °त्वम् मूको. ३-३. नास्ति मूको. ४. नास्ति वि॰ अ॰.
५. ... ६. नास्ति वि॰ अ॰. ७. ...थिम अ॰.

प्र सु ष विभ्यो मरुतो विरस्तु प्र श्येनः श्येनेभ्य आशुपत्वा ।
अचक्रया यत् स्वधया सुपर्णो हव्यं भरन्मनवे देवजुष्टम् ॥ ४ ॥

प्र । सु । सः । विऽभ्यः । मरुतः । विः । अस्तु । प्र । श्येनः । श्येनेभ्यः । आशुऽपत्वा ।
अचक्रया । यत् । स्वधया । सुऽपर्णः । हव्यम् । भरत् । मनवे । देवऽजुष्टम् ॥ ४ ॥

वेङ्कट० शौनकः—“प्र सु ष विभ्यो मरुतो विरस्तु श्येनस्य” मेन्नक” (बृह ४,१३६) इति । सः श्येन विभ्यः गन्तृभ्योऽपि सुष्ठु हे मरुतः ! प्रगन्ता भवतु, श्येनेभ्यः अपि आशुपतनः श्येनः । चक्ररहितेन अश्वप्रभवेन बलेन यत् सुपर्णः देवैः सेवितं सोमं मनुष्याय आजहार ॥ ४ ॥

भरद् यदि विरतो वेविजानः पथोरुणा मनोजवा असर्जि ।
तूयं ययौ मधुना सोम्येनोत श्रवो विविदे श्येनो अत्र ॥ ५ ॥

भरत् । यदि । विः । अतः । वेविजानः । पथा । उरुणा । मनःऽजवाः । असर्जि ।
तूयम् । ययौ । मधुना । सोम्येन । उत । श्रवः । विविदे । श्येनः । अत्र ॥ ५ ॥

वेङ्कट० भरति यदि पक्षी स्वर्गात् चलन्, पथा विस्तीर्णेन मनोवेगः सृष्टोऽभवत् उद्युक्तोऽभवत् । क्षिप्रम् अगच्छत् सोममयेन मधुना सह, अन्नम् अपि लेभे श्येनः स्वर्गे ॥ ५ ॥

ऋजीपी श्येनो ददमानो अंशुं परावतः शकुनो मन्द्रं मदम् ।
सोमं भरद् दादृहाणो देवावान् दिवो अमुष्मादुत्तरादादाय ॥ ६ ॥

ऋजीपी । श्येनः । ददमानः । अंशुम् । पराऽवतः । शकुनः । मन्द्रम् । मदम् ।
सोमम् । भरत् । दादृहाणः । देवऽवान् । दिवः । अमुष्मात् । उत्ऽतरात् । आऽदाय ॥ ६ ॥

वेङ्कट० ऋजुगामी श्येनः धारयन् अंशुं परावतः शकुनशीलः मदकरम् मदम् सोमम् दिवः आहृतवान् सोमपालकान् पीडयन् देवैस्सहितः दिवः अमुष्मात् उद्गततरात् आदाय ॥ ६ ॥

आदाय श्येनो अभरत् सोमं सहस्रं सवाँ अयुतं च साकम् ।
अत्रा पुरंधिरजहादरातीर्मदे सोमस्य मूरा अमूरः ॥ ७ ॥

आऽदाय । श्येनः । अभरत् । सोमम् । सहस्रम् । सवान् । अयुतम् । च । साकम् ।
अत्र । पुरम्ऽधिः । अजहात् । अरातीः । मदे । सोमस्य । मूराः । अमूरः ॥ ७ ॥

१. नास्ति वि॰ अ॰. २. °नक मूको. ३. °रहस वि॰ अ॰, °रतन वि॰ अ मूको. ४. लि वि॰ अ॰; °ता वि॰ अ मूको. ५. °सुप° मूको.

वेङ्कट० आदाय[1] श्येनः 'मात्रयाम सोमम्' सहस्रम् अयुतम् च सह[2] सोमयागान् । अथ पुरन्धिः[3] अजहात् मत्तवान् सोममदे 'मूरान् अमूरः'[4] ॥ ७ ॥

'इति तृतीयाष्टके चतुर्थाध्याये पञ्चदशो वर्गः'[5] ॥

[२७]

'वामदेवो गौतम ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः'[6] ।

गर्भे॒ नु सन्नन्वे॑षामवेदम॒हं दे॒वानां॒ जनि॑मानि॒ विश्वा॑ ।
श॒तं मा॒ पुर॒ आय॑सीररक्ष॒न्नध॑ श्ये॒नो ज॒वसा॒ निर॑दीयम् ॥ १ ॥

गर्भे॑ । नु । सन् । अनु॑ । ए॒षा॒म् । अ॒वे॒द॒म् । अ॒हम् । दे॒वाना॑म् । जनि॑मानि । विश्वा॑ ।
श॒तम् । मा॒ । पुरः॑ । आय॑सीः । अ॒र॒क्ष॒न् । अध॑ । श्ये॒नः । ज॒वसा॑ । निः । अ॒दी॒य॒म् ॥ १ ॥

वेङ्कट० गर्भे एव सन् अहम् एषाम् देवानाम् दिवि स्थितानां सर्वाणि जन्मानि अनुक्रमेण ज्ञातवानस्मि । शतम् मा पुरः आयस्यः निर्मिताः सोमपालैर्निर्मिताः अरक्षन् । अथ अहं श्येनः[7] प्रविश्य सोमपालान् निर्गतोऽस्मि ॥ १ ॥

न घा॒ स माम॑प॒ जोषं॑ जभारा॒भीमा॑स॒ त्वक्ष॑सा वी॒र्ये॑ण ।
ई॒र्मा पुरं॑धिरजहा॒दरा॑तीरु॒त वातॉं॑ अतर॒च्छूशु॑वानः ॥ २ ॥

न । घ॒ । सः । माम् । अप॑ । जोष॑म् । ज॒भा॒र॒ । अ॒भि । ई॒म् । आ॒स॒ । त्वक्ष॑सा । वी॒र्ये॑ण ।
ई॒र्मा । पुर॑म्ऽधिः । अ॒ज॒हा॒त् । अरा॑तीः । उ॒त । वाता॑न् । अ॒त॒र॒त् । शूशु॑वानः ॥ २ ॥

वेङ्कट० न एव खलु सः सोमपालो निष्काले मां बलेन अपाहृतवान् । अहं[8] पुनरेव अभ्यभवं तत्कर्मणा बलेन । परोक्षः श्येनः । ईरणकुशलः बहुप्रज्ञः शत्रुसंघान् अत्यक्रामत् । अपि च वातान् सोमपालान् अतरत् वर्धमानः ॥ २ ॥

अव॒ यच्छ्ये॒नो अस्व॑नी॒दध॒ द्योर्वि यद्यदि॒ वात॑ ऊ॒हुः पुरं॑धिम् ।
सृ॒जद्यद॑स्मा॒ अव॑ ह क्षि॒पज्ज्यां कृ॒शानु॒रस्ता॒ मन॑सा भुर॒ण्यन् ॥ ३ ॥

अव॑ । यत् । श्ये॒नः । अस्व॑नीत् । अध॑ । द्योः । वि । यत् । यदि॑ । वा॒ । अतः॑ । ऊ॒हुः । पुर॑म्ऽधिम् ।
सृ॒जत् । यत् । अ॒स्मै॒ । अव॑ । ह॒ । क्षि॒पत् । ज्याम् । कृ॒शानुः॑ । अस्ता॑ । मन॑सा । भु॒र॒ण्यन् ॥ ३ ॥

---

१. नास्ति क्ष्म. २. '२ वायसमुद्गम-पीयल्पः प्रकृत पञ्चदशविकल्प सोमे क्ष्म. ३. नास्ति वि' क्ष्म. ४. 'मरा वि' क्ष्म. ५-५. मूरा । मम्' क्ष. ६-६. नास्ति मूको. ७. श्येन वि'' क्ष्म. ८. 'ऋ वि' क्ष्म; 'ऋ वि', चो क्ष.

वेङ्कट० आकाशे शीघ्रगामी श्येनः यदा तत्र अक्रन्दीत्, यदा वा अस्मात् स्वर्गलोकात् पुरन्धिम् इमं विविधमपनीतवान् सोमपालाः, तदा वा अस्मै कृशानुः इषुम् अत्र [illegible] ज्याम् विक्षिपत्। तुमसाकशानुः कृशानुः, वेङ्कटः मनसा तुल्यवेगो गच्छन् [illegible] ॥ ३ ॥

ऋजिप्य ईमिन्द्रावतो न भुज्युं श्येनो जभार बृहतो अधि ष्णोः।
अन्तः पतत्पतत्र्यस्य पर्णमध यामनि प्रसितस्य तद्वेः ॥ ४ ॥

ऋजिप्यः। ईम्। इन्द्रऽवतः। न। भुज्युम्। श्येनः। जभार। बृहतः। अधि। स्नोः।
अन्तरिति। पतत्। पतत्रि। अस्य। पर्णम्। अध। यामनि। प्रऽसितस्य। तत्। वेरिति वेः ॥ ४ ॥

वेङ्कट० ऋजुगामी श्येनः सोमम् इन्द्रवतः यजमानस्य भोजनम् बृहतः सानोः अधि आजहार। द्यावापृथिव्योः अन्तः पपात पतनशीलम् अस्य पर्णम् तदानीं गमने प्रसक्तस्य पक्षिणः ॥ ४ ॥

अध श्वेतं कलशं गोभिरक्तमापिप्यानं मघवा शुक्रमन्धः।
अध्वर्युभिः प्रयतं मध्वो अग्रमिन्द्रो मदाय प्रति धत्पिबध्यै शूरो मदाय प्रति धत्पिबध्यै ॥ ५ ॥

अध। श्वेतम्। कलशम्। गोभिः। अक्तम्। आऽपिप्यानम्। मघऽवा। शुक्रम्। अन्धः।
अध्वर्युऽभिः। प्रऽयतम्। मध्वः। अग्रम्। इन्द्रः। मदाय। प्रति। धत्। पिबध्यै। शूरः। मदाय। प्रति।
धत्। पिबध्यै ॥ ५ ॥

वेङ्कट० अथ सोमात्मकम् श्वेतम् कलशम् गोविकारैः दध्यादिभिः अक्तम् अपयन्तुपरि वर्धमानम् मघवा [illegible] अध्वर्युभिः प्रयतम् मधुरस्य अग्रम् इन्द्रः मदाय पातुं सोमम् प्रति अग्रहीत् शूरः ॥ ५ ॥

इति तृतीयाष्टके पञ्चमाध्याये षोडशो वर्गः ॥

[२८]

वामदेवो गौतम ऋषिः। इन्द्रो देवता। त्रिष्टुप् छन्दः।

त्वा युजा तव तत्सोम सख्य इन्द्रो अपो मनवे सस्रुतस्कः।
अहन्नहिमरिणात्सप्त सिन्धूनपावृणोदपिहितेव खानि ॥ १ ॥

त्वा। युजा। तव। तत्। सोम। सख्ये। इन्द्रः। अपः। मनवे। सऽस्रुतः। करिति कः।
अहन्। अहिम्। अरिणात्। सप्त। सिन्धून्। अप। अवृणोत्। अपिहिताऽइव। खानि ॥ १ ॥

वेङ्कट० त्वया सहायेन तव सख्ये सोम! तदानीम् इन्द्रः अपः मनुष्याय सरणशीलाः अकरोत्।

---

१. नास्ति वि॰. २. [illegible] वि॰ [illegible]. ३. [illegible] मूको. ४. [illegible] वि॰ [illegible]. ५. [illegible] मूको.
६. [illegible] वि॰ [illegible]. ७. [illegible] वि॰ [illegible]. ८-८. नास्ति मूको. ९. [illegible].

अहन् अहिम्, अगमयत् च अप नदीः, अप अवृणोत् खानि पिहितानीव द्वाराणि नदीनां निःसरणमार्गान् ॥ १ ॥

त्वा युजा नि खिदत् सूर्यस्येन्द्रश्चक्रं सहसा सद्य इन्दो ।
अधि ष्णुना बृहता वर्तमानं महो द्रुहो अप विश्वायु धायि ॥ २ ॥

त्वा । युजा । नि । खिदत् । सूर्यस्य । इन्द्रः । चक्रम् । सहसा । सद्यः । इन्दो इति ।
अधि । स्नुना । बृहता । वर्तमानम् । महः । द्रुहः । अप । विश्वऽआयु । धायि ॥ २ ॥

वेङ्कट० त्वया सहायेन प्रावृहत् इन्द्रः सूर्यस्य चक्रम् बलेन सद्यः एव हे सोम! । ततः महता स्नुप्रभवेण पर्वतेन वर्तमानं सर्वतो महतः द्रोग्धुः सूर्यात् अपि इन्द्रेण 'अप अधारि' ॥ २ ॥

अहन्निन्द्रो अदहदग्निरिन्दो पुरा दस्यून् मध्यंदिनादभीके ।
दुर्गे दुरोणे क्रत्वा न यातां पुरू सहस्रा शर्वा नि बर्हीत् ॥ ३ ॥

अहन् । इन्द्रः । अदहत् । अग्निः । इन्दो इति । पुरा । दस्यून् । मध्यंदिनात् । अभीके ।
दुःऽगे । दुरोणे । क्रत्वा । न । याताम् । पुरु । सहस्रा । शर्वा । नि । बर्हीत् ॥ ३ ॥

वेङ्कट० मध्याह्ने इन्द्रः दस्यून् अहन्, अग्निः च तान् अदहत् हे सोम! मध्यंदिनात् पूर्वम् संग्रामे । दुर्गे देशे पर्वतादौ कार्यार्थम् इव गच्छतां पथिकानां पुरूणि सहस्राणि धनुष्मतां शार्ङ्गवत् सहस्राणि हिंसकः इन्द्रः नि बर्हीत् ॥ ३ ॥

विश्वस्मात् सीमधमाँ इन्द्र दस्यून् विशो दासीरकृणोरप्रशस्ताः ।
अबाधेथाममृणतं नि शत्रूनविन्देथामपचितिं वधत्रैः ॥ ४ ॥

विश्वस्मात् । सीम् । अधमान् । इन्द्र । दस्यून् । विशः । दासीः । अकृणोः । अप्रऽशस्ताः ।
अबाधेथाम् । अमृणतम् । नि । शत्रून् । अविन्देथाम् । अपऽचितिम् । वधत्रैः ॥ ४ ॥

वेङ्कट० सर्वस्मात् लोकात् अधमान्[1] इन्द्र! सर्वान् दस्यून् अकृणोः, तथा उपक्षयपरिवर्तिनीः विशः अयज्ञाः[2] कृतवान् । त्वं च सोमश्च बाधेथाम्[3] हिंसितवन्तौ मारितवन्तौ च, अलभेथाम् च पूजाम् शत्रूणां वधैः ॥ ४ ॥

एवा सत्यं मघवाना युवं तदिन्द्रश्च सोमोर्वमश्व्यं गोः ।
आदर्दृतमपिहितान्यश्ना रिरिचथुः क्षाश्चित्ततृदाना ॥ ५ ॥

---

१. मारितवन्तौ मूको. २. मारितं वि° कर्प. ३. °ष्मत् ... ४-४. ... वि° कर्प. ५. °मिव मूको. ६. जलमाद् वि° कर्प. ७. ... वि° कर्प.

एव । सत्यम् । मघऽवाना । युवम् । तत् । इन्द्रः । च । सोम । ऊर्वम् । अश्व्यम् । गोः ।
आ । अदर्दृतम् । अपिऽहितानि । अश्ना । रिरिचथुः । क्षाः । चित् । ततृदाना ॥ ५ ॥

वेङ्कट० एवम् सत्यम् धनवन्तौ! युवां तत् कृतवन्तौ इन्द्रः च सोम! 'ऊर्वं च' गोः अपि अश्वसमूहम् गमनात्मकम्, आ अदर्दृतम् च अपिहितद्वाराण् मेघान्। ततृदानौ यज्ञौ पृथिवीं 'अद्भ्यः रिरिचथुः' मेघात् विध्यन्तौ ॥ ५ ॥

'इति तृतीयाष्टके षष्ठाध्याये सप्तदशो वर्गः' ॥

[२९]

'वामदेवो गौतम ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः' ।

आ नः स्तुत उप वाजेभिरूती इन्द्र याहि हरिभिर्मन्दसानः ।
तिरश्चिदर्यः सवना पुरूण्याङ्गूषेभिर्गृणानः सत्यराधाः ॥ १ ॥

आ । नः । स्तुतः । उप । वाजेभिः । ऊती । इन्द्र । याहि । हरिऽभिः । मन्दसानः ।
तिरः । चित् । अर्यः । सवना । पुरूणि । आङ्गूषेभिः । गृणानः । सत्यऽराधाः ॥ १ ॥

वेङ्कट० 'उप आ याहि' अश्वैः मन्दमानः स्तुतः अस्माकम् अन्नैः सह रक्षणार्थम्। तिर इति प्राप्तकालनाम[4] (निघ० ३.२०), प्राप्तकालानि सवनानि सर्वाणि स्वामी स्तोत्रैः स्तूयमानः सत्यधन ॥ १ ॥

आ हि ष्मा याति नर्यश्चिकित्वान् हूयमानः सोतृभिरुप यज्ञम् ।
स्वश्वो यो अभीरुर्मन्यमानः सुष्वाणेभिर्मदति सं ह वीरैः ॥ २ ॥

आ । हि । स्म । याति । नर्यः । चिकित्वान् । हूयमानः । सोतृऽभिः । उप । यज्ञम् ।
सुऽअश्वः । यः । अभीरुः । मन्यमानः । सुस्वानेभिः । मदति । सम् । ह । वीरैः ॥ २ ॥

वेङ्कट० आ हि स्म गच्छति नृहितः प्राज्ञः सोतृभिः[5] हूयमानः यज्ञम् उप। स्वश्वः यः निर्भयः मन्यमानः सोमसुद्भिः वीरैः सह मदति ॥ २ ॥

श्रावयेदस्य कर्णा वाजयध्यै जुष्टामनु प्र दिशं मन्दयध्यै ।
उद्वावृषाणो राधसे तुविष्मान् करन्न इन्द्रः सुतीर्थाभयं च ॥ ३ ॥

श्रवय । इत् । अस्य । कर्णा । वाजयध्यै । जुष्टाम् । अनु । प्र । दिशम् । मन्दयध्यै ।
उत्ऽववृषाणः । राधसे । तुविष्मान् । करत् । नः । इन्द्रः । सुऽतीर्था । अभयम् । च ॥ ३ ॥

१-१ नास्ति मूको. २. °र्वो वि° अ° ३-३. °मालिरिरिचतुः वि° अ°; °चतु. ... ४. °प्रवाति वि° अ° ५. °सोतृभिः वि° अ° ६. °माद्य वि° अ°; °मोद्य वि° अ° ...

वेङ्कट० आगत एव इन्द्रस्य कर्माणि वक्तुम् । हे स्तोतः ! त्वया मेधाविनः प्रियम् माहात्म्यं प्रकर्षेण अनु भावय । सोऽयम् उद्गच्छताम् अभावे बहवानाम् करोतु अस्मान् इन्द्रः शोभनस्थानान्, अभयम् च करोतु ॥ ३ ॥

अच्छा यो गन्ता नाधमानमूती इत्था विप्रं हवमानं गृणन्तम् ।
उप त्मनि दधानो धुर्याशून्त्सहस्राणि शतानि वज्रबाहुः ॥ ४ ॥

अच्छ । यः । गन्ता । नाधमानम् । ऊती । इत्था । विप्रम् । हवमानम् । गृणन्तम् ।
उप । त्मनि । दधानः । धुरि । आशून् । सहस्राणि । शतानि । वज्रऽबाहुः ॥ ४ ॥

वेङ्कट० अभि गन्ता यः याचमानं रक्षणार्थम् इत्थं मेधाविनं ह्वयन्तं स्तुवन्तं च ... उप आत्मनि स्वरथधुरि अश्वान् नियुञ्जन्[1] दधानः सहस्राणि शतानि च वज्रबाहुः[2] ॥ ४ ॥

त्वोतासो मघवन्निन्द्र विप्रा वयं ते स्याम सूरयो गृणन्तः ।
भेजानासो बृहद्दिवस्य राय आकाय्यस्य दावने पुरुक्षोः ॥ ५ ॥

त्वाऽऊतासः । मघऽवन् । इन्द्र । विप्राः । वयम् । ते । स्याम । सूरयः । गृणन्तः ।
भेजानासः । बृहत्ऽदिवस्य । रायः । आऽकाय्यस्य । दावने । पुरुऽक्षोः ॥ ५ ॥

वेङ्कट० त्वया रक्षिताः[3] हे मघवन् इन्द्र ! विप्राः वयम् च त्वदीयाः स्याम प्राज्ञाः[4] स्तुवन्तः भजमानाः महादीप्तिम् धनम् सर्वत्र कमनीयम् दानाय बहुभिः सेवितम् ॥ ५ ॥

[5]इति तृतीयाष्टके षष्ठाध्याये अष्टादशो वर्गः[5] ॥

[३०]

[6]वामदेवो गौतम ऋषिः । इन्द्रो देवता, नवमीदशम्येकादशीनाम् इन्द्रोषसौ ।
गायत्री छन्दः, अष्टमीचतुर्विंश्यौ त्रिष्टुभौ[6] ।

नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन् । नकिरेवा यथा त्वम् ॥ १ ॥

नकिः । इन्द्र । त्वत् । उत्ऽतरः । न । ज्यायान् । अस्ति । वृत्रऽहन् । नकिः । एव । यथा । त्वम् ॥

वेङ्कट० न कश्चित् हे वृत्रहन्[1] इन्द्र ! त्वत्तः उत्तरकालीनः विद्यते, न च पूर्वकालीनः[7] विद्यते, नापि समः ॥ १ ॥

सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः । सत्रा महाँ असि श्रुतः ॥ २ ॥

१. ... मूको. २. ... वि॰ मूको. ३. ... वि॰ मूको. ४. ... मूको. ५-५. नास्ति मूको. ६. नास्ति मूको. ७. नास्ति वि॰ ... मूको; ... विद्यते न च पूर्वकालीनः वि॰ मूको.

सत्रा। ते। अनु। कृष्टयः। विश्वाः। चक्राऽइव। वावृतुः। सत्रा। महान्। असि। श्रुतः॥ २॥

वेङ्कट० सत्यमेव तव प्रजा विश्वानि च भूतानि अनुवर्तन्ते कुर्वन्ति चक्राणीव रथम्। सत्यमेव महान् असि विश्रुतः॥ २॥

विश्वे चनेदना त्वा देवास इन्द्र युयुधुः। यदहा नक्तमातिरः॥ ३॥

विश्वे। चन। इत्। अना। त्वा। देवासः। इन्द्र। युयुधुः। यत्। अहा। नक्तम्। आ। अतिरः॥ ३॥

वेङ्कट० 'सर्वे हि एव' देवा अनेनेव' वधेन हे इन्द्र! त्वां योधयामासुः, यदा' त्वं सूर्यस्य चक्राहरणेन रात्रेः निरन्धकारः अहानि रात्रीः' च आ अतिरः विनाशितवानसि। 'सूर्यमुदये उपकल्प' भवति अर्थः'॥ ३॥

यत्रोत बाधितेभ्यश्चक्रं कुत्साय युध्यते। मुषाय इन्द्र सूर्यम्॥ ४॥

यत्र। उत। बाधितेभ्यः। चक्रम्। कुत्साय। युध्यते। मुषाय। इन्द्र। सूर्यम्॥ ४॥

वेङ्कट० यत्र बाधितेभ्यः कुत्ससैनिकेभ्यः कुत्साय च युध्यते रक्षणाय हे इन्द्र! सूर्यस्य चक्रम् अमुष्णः॥ ४॥

यत्र देवाँ ऋघायतो विश्वाँ अयुध्य एक इत्। त्वमिन्द्र वनूँरहन्॥ ५॥

यत्र। देवान्। ऋघायतः। विश्वान्। अयुध्यः। एकः। इत्। त्वम्। इन्द्र। वनून्। अहन्॥ ५॥

वेङ्कट० यस्मिन् युद्धे देवान् बाधमानान् सर्वान् एकः एव अयुध्यः, त्वम् इन्द्र! तान् हिंसितॄन् हतवानसि॥ ५॥

'इति तृतीयाष्टके षष्ठाध्याये एकोनविंशो वर्गः' ॥

यत्रोत मर्त्याय कमरिणा इन्द्र सूर्यम्। प्रावः शचीभिरेतशम्॥ ६॥

यत्र। उत। मर्त्याय। कम्। अरिणाः। इन्द्र। सूर्यम्। प्र। आवः। शचीभिः। एतशम्॥ ६॥

वेङ्कट० हे इन्द्र! यस्मिन् अपि युद्धे मर्त्याय सूर्यम् बाधितवानसि, यत्र च प्रकर्षेण' रक्षितवानसि कर्मभिः एतशम् ऋषिम्, तदानीं च युयुत्सुः॥ ६॥

किमादुतासि वृत्रहन्मघवन्मन्युमत्तमः। अत्राह दानुमातिरः॥ ७॥

किम्। आत्। उत। असि। वृत्रऽहन्। मघऽवन्। मन्युमत्ऽतमः। अत्र। अह। दानुम्। आ। अतिरः॥

१-१. °वेङ्कटेश्वर वि' अ°. २. °नेन क°. ३. यदा अ°. ४. 'हि वि'' अ° इ. ५-५ 'सूर्यमेक' वि' 'मेदन्येक' वि'. ६. तव वि'. ७-७ नास्ति मूको. ८. नास्ति वि' अर्थ.

वेङ्कट० हे वृत्रहन् मघवन्! यदि त्वं मन्युमान् भवसि कुरुषि, तदानीम् एव असुरं विनाशयसीति समुदायार्थः। किम् इति प्रश्नविशेषार्थः ॥ ७ ॥

एतद् घेदुत वीर्यमिन्द्र चकर्थ पौंस्यम्। स्त्रियं यद् दुर्हणायुवं वधीर्दुहितरं दिवः ॥८॥

एतत्। घ। इत्। उत। वीर्यम्। इन्द्र। चकर्थ। पौंस्यम्।
स्त्रियम्। यत्। दुःऽहनायुवम्। वधीः। दुहितरम्। दिवः ॥ ८ ॥

वेङ्कट० एतत् खलु अपि च वीर्यम् इन्द्र! कृतवानसि पुंस्त्वात्मकम्, स्त्रियम् यत् त्वं दुर्हणे प्रजापतिमिच्छन्तीम् उषसम् अवधीः ॥ ८ ॥

दिवश्चिद् घा दुहितरं महान् महीयमानाम्। उषासमिन्द्र सं पिणक् ॥ ९ ॥

दिवः। चित्। घ। दुहितरम्। महान्। महीयमानाम्। उषसम्। इन्द्र। सम्। पिणक् ॥ ९ ॥

वेङ्कट० दिवः खलु दुहितरम् महान् त्वम् महीयमानाम् अपि, उषसम् इन्द्र! सम् चूर्णितवानसि ॥ ९ ॥

अपोषा अनसः सरत् संपिष्टादह बिभ्युषी। नि यत् सीं शिश्नथद् वृषा ॥ १० ॥

अप। उषाः। अनसः। सरत्। सम्ऽपिष्टात्। अह। बिभ्युषी। नि। यत्। सीम्। शिश्नथत्। वृषा ॥ १० ॥

वेङ्कट० अप असरत् उषाः इन्द्रेण संपिष्टात्[1] शकटात् बिभ्युषी। यदा एनम्[2] इन्द्रः परिगृह्य नितराम् हिंसितवान् ॥ १० ॥

'इति तृतीयाष्टके षष्ठाध्याये त्रिंशो वर्गः' ॥

एतदस्या अनः शये सुसंपिष्टं विपाश्या। ससार सीं परावतः ॥ ११ ॥

एतत्। अस्याः। अनः। शये। सुऽसंपिष्टम्। विऽपाशि। आ। ससार। सीम्। पराऽवतः ॥ ११ ॥

वेङ्कट० 'एतत् अस्याः' विशीर्णम् अनः शेते सुष्ठु चूर्णितम् पाशविनिर्मुक्तविशिष्टं च। तदिदं दूरात् देशात् प्रभवे प्रति आ ससार। सीम् इति पूरणम्। अत्र यास्क:— 'अपासरदुषा'। अनसः संपिष्टात्तस्माद् बिभ्युषी। अनो वायुरनितेः। अपि वोपमार्थे स्यात्। अनस इव शकटादिव[3]। अनः शकटम्। आनद्धमस्मिंश्चीवरम्। अनितेर्वा स्यात् जीवनकर्मणः। उपजीवन्त्येनत्[4]। मेघोऽप्यन एतस्मादेव। यदि वा विपाशि नदी। एतदस्याः अनः आशये 'सुसंपिष्टम् इतरदिव'। विपाशि विमुक्तपाशि' (या ११ ४७-४८) इति ॥ ११ ॥

---

१. संपिष्टात् मूको. २. एनाम् वि' अ'. ३-३. नास्ति मूको. ३-४ त्वनसः वि' अपं. ५. 'विति मूको. ६ 'नद वि'' अ' दवे. ७-७. 'इमिव मूको

उत सिन्धुं विबाल्यं वितस्थानामधि क्षमि । परि ष्ठा इन्द्र मायया ॥ १२ ॥

उत । सिन्धुम् । विऽबाल्यम् । विऽतस्थानाम् । अधि । क्षमि । परि । स्थाः । इन्द्र । मायया ॥ १२ ॥

वेङ्कट० अपि च सिन्धुं विबाल्यम् प्रकर्षेण पृथिव्यां सर्वतः वितिष्ठमानां पर्यस्थापयः इन्द्र ! कर्मणा ॥ १२ ॥

उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनम् । पुरो यदस्य संपिणक् ॥ १३ ॥

उत । शुष्णस्य । धृष्णुऽया । प्र । मृक्षः । अभि । वेदनम् । पुरः । यत् । अस्य । सम्ऽपिणक् ॥ १३ ॥

वेङ्कट० 'अपि च' शुष्णस्य' धर्षणशीलः त्वं धनं प्रकर्षेणाभिमृष्टवानसि । 'यत् अस्य' पुरः सम्पूर्णितवानसि ॥ १३ ॥

उत दासं कौलितरं बृहतः पर्वतादधि । अवाहन्निन्द्र शम्बरम् ॥ १४ ॥

उत । दासम् । कौलिऽतरम् । बृहतः । पर्वतात् । अधि । अव । अहन् । इन्द्र । शम्बरम् ॥ १४ ॥

वेङ्कट० अपि च दासम् कुलितरस्यापत्यम्' महतः पर्वतात् अधि अधः तथा अवधीतवानसि इन्द्र ! शम्बरम् ॥ १४ ॥

उत दासस्य वर्चिनः सहस्राणि शताऽवधीः । अधि पञ्च प्रधीँरिव ॥ १५ ॥

उत । दासस्य । वर्चिनः । सहस्राणि । शता । अवधीः । अधि । पञ्च । प्रधीन्ऽइव ॥ १५ ॥

वेङ्कट० अपि च असुरस्य वर्चिनाम्नः' सहस्राणि शतानि चानुचराणाम् अवधीः पञ्च च प्रधीनिव परितः स्थितान् ॥ १५ ॥

"इति तृतीयाष्टके षष्ठाध्याये एकविंशो वर्गः" ॥

उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः । उक्थेष्विन्द्र आभजत् ॥ १६ ॥

उत । त्यम् । पुत्रम् । अग्रुवः । पराऽवृक्तम् । शतऽक्रतुः । उक्थेषु । इन्द्रः । आ । अभजत् ॥ १६ ॥

वेङ्कट० अपि च तम् पुत्रम् अग्रुवः परावृक्तम् नाम शतक्रतुः इन्द्रः उक्थेषु आ अभजत् । परावृक्तेन परावृक्तः ॥ १६ ॥

उत त्या तुर्वशायदू अस्नातारा शचीपतिः । इन्द्रो विद्वाँ अपारयत् ॥ १७ ॥

---

१. नास्ति वर्ध. २. नास्ति वि'. ३. 'भिवाद् वि' ... ४. [illegible] वि' ... ५-५. नास्ति वि' ... ६. नास्ति वि'. ७-७. पश्च वि'. ८. '[illegible]' वि' ... ९. [illegible] वि' ... १०-१०. नास्ति मूको

उत । त्या । तुर्वशायदू इति । अस्नातारा । शचीऽपतिः । इन्द्रः । विद्वान् । अपारयत् ॥ १७ ॥

वेङ्कट० अपि च तौ तुर्वशं यदुं च नद्यामभिषिक्तौ पितृशापात् शचीपतिः इन्द्रः जानन् अपारयत् कृतवान् राज्यार्हाविति ॥ १७ ॥

उत त्या सद्य आर्या सरयोरिन्द्र पारतः । अर्णाचित्ररथावधीः ॥ १८ ॥

उत । त्या । सद्यः । आर्या । सरयोः । इन्द्र । पारतः । अर्णाचित्ररथा । अवधीः ॥ १८ ॥

वेङ्कट० अपि च[1] तौ इन्द्र![2] सद्य एव राजानौ सरय्वोः नद्याः पारे अर्णं चित्ररथं च हतवानसि ॥ १८ ॥

अनु द्वा जहिता नयोऽन्धं श्रोणं च वृत्रहन् । न तत् ते सुम्नमष्टवे ॥ १९ ॥

अनु । द्वा । जहिता । नयः । अन्धम् । श्रोणम् । च । वृत्रऽहन् । न । तत् । ते । सुम्नम् । अष्टवे ॥ १९ ॥

वेङ्कट० 'हे वृत्रहन्!' 'अनु अनयः'[3] द्वौ त्यक्तौ अन्धम् चक्षुर्हीनम् श्रोणम् पराङ्गम् च । न तत् तव सुखम् अन्येनाप्तुं शक्यं देवेन मनुष्येण ॥ १९ ॥

शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत् । दिवोदासाय दाशुषे ॥ २० ॥

शतम् । अश्मन्ऽमयीनाम् । पुराम् । इन्द्रः । वि । आस्यत् । दिवःऽदासाय । दाशुषे ॥ २० ॥

वेङ्कट० शिलामयीनाम् पुराम् शतम् इन्द्रः व्यस्तवान् दिवोदासाय यजमानाय हविर्दत्तवते[5] ॥ २० ॥

'इति तृतीयाष्टके षष्ठाध्याये द्वाविंशो वर्गः' ॥

अस्वापयद् दभीतये सहस्रा त्रिंशतं हथैः । दासानामिन्द्रो मायया ॥ २१ ॥

अस्वापयत् । दभीतये । सहस्रा । त्रिंशतम् । हथैः । दासानाम् । इन्द्रः । मायया ॥ २१ ॥

वेङ्कट० दभीतिनिमित्तं असुराणाम् त्रिंशतम् सहस्राणि हननैः सुप्तान् अस्वापयत् इन्द्रः कर्मणा ॥ २१ ॥

स घेदुतासि वृत्रहन्त्समान इन्द्र गोपतिः । यस्ता विश्वानि चिच्युषे ॥ २२ ॥

सः । घ । इत् । उत । असि । वृत्रऽहन् । समानः । इन्द्र । गोऽपतिः । यः । ता । विश्वानि । चिच्युषे ॥ २२ ॥

वेङ्कट० सः खलु असि वृत्रहन् इन्द्र! सर्वेषां साधारणः गोपतिः, यः त्वं तानि विश्वानि असुरपुराणि च्यावयसि ॥ २२ ॥

उत नूनं यदिन्द्रियं करिष्या इन्द्र पौंस्यम् । अद्या नकिष्टदा मिनत् ॥ २३ ॥

१. नास्ति वि² अपा. २. नास्ति मूको. ३-३. नास्ति मूको. ४-४. मन्दकृणौ मूको; मन्दमदकृणौ वि अ सहलाविः. ५. शवीय° मूको.

उत । नूनम् । यत् । इन्द्रियम् । करिष्याः । इन्द्र । पौंस्यम् । अद्य । नकिः । तत् । आ । मिनत् ॥२३॥

वेङ्कट० यदपि च पुरा मनुष्येभ्यो पुंस्त्वकरं कृतवानसि इन्द्र![1], तत् त्वदीयं न कश्चिद् अद्य[2] हिनस्ति, इन्द्रसदृशानि अद्यापि तथानुवर्तन्ते ॥ २३ ॥

वामंवामं त आदुरे देवो ददात्वर्यमा । वामं पूषा वामं भगो वामं देवः करूळती ॥२४॥

वामम्ऽवामम् । ते । आऽदुरे । देवः । ददातु । अर्यमा ।
वामम् । पूषा । वामम् । भगः । वामम् । देवः । करूळती ॥ २४ ॥

वेङ्कट० वननीयं[3] धनं तव आदरणे(?)[4] भवति अर्यमादिः देवः प्रशस्यम् ददातु । कृत्तदन्तः पूषा करूळती । पुनर्भग्नदन्त विशेषणमर्यमादेरिति[5] ॥ २४ ॥

'इति तृतीयाष्टके षष्ठाध्याये त्रयोविंशो वर्गः'[6] ।

[३१]

'वामदेवो गौतम ऋषिः । इन्द्रो देवता । गायत्री छन्दः, तृतीया पादनिचृत्'[7] ।

कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ १ ॥

कया । नः । चित्रः । आ । भुवत् । ऊती । सदाऽवृधः । सखा । कया । शचिष्ठया । वृता ॥१॥

वेङ्कट० केन अस्माकं रक्षणेन पूजनीय इन्द्र आभिमुख्येन प्राप्नुयात् अस्माकं सदा वर्धयिता सखा, केन च अतिशयेन कर्मवता गमनेन ॥ १ ॥

कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृळ्हा चिदारुजे वसु ॥ २ ॥

कः । त्वा । सत्यः । मदानाम् । मंहिष्ठः । मत्सत् । अन्धसः । दृळ्हा । चित् । आऽरुजे । वसु ॥२॥

वेङ्कट० कः त्वा मदहेतुभूतानां मध्ये सत्यभूतः अतिशयेन महान् मादयेत् । अन्नस्य सम्बन्धिनां दृढानि अपि धनानि स्तोतृभ्यो दानाय आरोढुं महत्त्वम् मत्सत् इति ॥ २ ॥

अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिः ॥ ३ ॥

अभि । सु । नः । सखीनाम् । अविता । जरितॄणाम् । शतम् । भवासि । ऊतिऽभिः ॥ ३ ॥

वेङ्कट० "अभि भवसि" सुष्ठु अस्माकं सखीनां रक्षकः स्तोतॄणां रक्षणप्रकारैः बहुभिर् शतम् ॥३॥

१. नास्ति मूको. २. अन्यः वि' अ', म-न्यः ... ३. [illegible] ४. द्र० ६,१४८] ५. विशेषेण [illegible] ६-६. नास्ति मूको. ७. नाभि' [illegible]

अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः । नियुद्भिश्चर्षणीनाम् ॥ ४ ॥

अभि । नः । आ । ववृत्स्व । चक्रम् । न । वृत्तम् । अर्वतः । नियुत्ऽभिः । चर्षणीनाम् ॥ ४ ॥

वेङ्कट० अभि आ वर्तस्व अस्मान् चक्रम् इव परिवृत्तम् अश्वात् मनुष्याणां प्रत्यागमनार्थैरश्वैः ॥ ४ ॥

प्रवता हि क्रतूनामा हा पदेव गच्छसि । अभक्षि सूर्ये सचा ॥ ५ ॥

प्रऽवता । हि । क्रतूनाम् । आ । ह । पदाऽइव । गच्छसि । अभक्षि । सूर्ये । सचा ॥ ५ ॥

वेङ्कट० आरम्भेण हि कर्मणाम्¹ आगच्छसि मार्गेणेव । सेव्यते सूर्ये उदिते सह त्वया ॥ ५ ॥

"इति तृतीयाष्टके पञ्चमाध्याये चतुर्विंशो वर्गः" ॥

सं यत्त इन्द्र मन्यवः सं चक्राणि दधन्विरे । अध त्वे अध सूर्ये ॥ ६ ॥

सम् । यत् । ते । इन्द्र । मन्यवः । सम् । चक्राणि । दधन्विरे । अध । त्वे इति । अध । सूर्ये ॥ ६ ॥

वेङ्कट० सम्² तव इन्द्र² क्रोधाः इव सन्दधिरे, चक्रस्य बलानि अध त्वयि वा विद्यते सूर्ये वा ॥ ६ ॥

उत स्मा हि त्वामाहुरिन्मघवानं शचीपते । दातारमविदीधयुम् ॥ ७ ॥

उत । स्म । हि । त्वाम् । आहुः । इत् । मघऽवानम् । शचीऽपते । दातारम् । अविऽदीधयुम् ॥

वेङ्कट० अपि च स्म हि त्वाम् आहुः धनिनम् शचीपते । दातारम् दीप्यमानम् ॥ ७ ॥

उत स्मा सद्य इत्परि शशमानाय सुन्वते । पुरू चिन्मंहसे वसु ॥ ८ ॥

उत । स्म । सद्यः । इत् । परि । शशमानाय । सुन्वते । पुरु । चित् । मंहसे । वसु ॥ ८ ॥

वेङ्कट० अपि च स्म सद्यः एव³ शशमानाय सुन्वते । बहु एव धनं प्रयच्छसि ॥ ८ ॥

नहि ष्मा ते शतं चन राधो वरन्त आमुरः । न च्यौत्नानि करिष्यतः ॥ ९ ॥

नहि । स्म । ते । शतम् । चन । राधः । वरन्ते । आऽमुरः । न । च्यौत्नानि । करिष्यतः ॥ ९ ॥

वेङ्कट० न खलु स्म तव शतं धनं सर्वतो मूढाः जनाः वारयन्ति, न च बलानि करिष्यतः ॥ ९ ॥

अस्माँ अवन्तु ते शतमस्मान्त्सहस्रमूतयः । अस्मान्विश्वा अभिष्टयः ॥ १० ॥

अस्मान् । अवन्तु । ते । शतम् । अस्मान् । सहस्रम् । ऊतयः । अस्मान् । विश्वाः । अभिष्टयः ॥

१ 'त्या वि¹ मं'. २-२. नास्ति मूको. ३. नास्ति वि¹ मं'.

वेङ्कट० अस्मान् रक्षन्तु तव द्वारः महतश्च रक्षणानि, तथा विश्वानि अस्मदीयानि च ॥ १० ॥

'इति तृतीयाष्टके षष्ठाध्याये पञ्चविंशो वर्गः' ॥

अस्माँ इहा वृणीष्व सख्याय स्वस्तये। महो राये दिवित्मते ॥ ११ ॥

अस्मान्। इह। वृणीष्व। सख्याय। स्वस्तये। महः। राये। दिवित्मते ॥ ११ ॥

वेङ्कट० अस्मान् इह आवृणीष्व सख्याय अविनाशाय च महते धनाय च दीप्तिमते ॥ ११ ॥

अस्माँ अविड्ढि विश्वहेन्द्र राया परीणसा। अस्मान् विश्वाभिरूतिभिः ॥१२॥

अस्मान्। अविड्ढि। विश्वहा। इन्द्र। राया। परीणसा। अस्मान्। विश्वाभिः। ऊतिऽभिः ॥

वेङ्कट० अस्मान् रक्ष सर्वदा इन्द्र! धनेन परितो महता विश्वैश्च रक्षणैः ॥ १२ ॥

अस्मभ्यं ताँ अपा वृधि व्रजाँ अस्तेव गोमतः। नवाभिरिन्द्रोतिभिः ॥ १३ ॥

अस्मभ्यम्। तान्। अप। वृधि। व्रजान्। अस्ताऽइव। गोऽमतः। नवाभिः। इन्द्र। ऊतिऽभिः ॥

वेङ्कट० अस्मदर्थम् तान् गोभिः सहितान् व्रजान् अपा वृधि अस्ता इव नवैः इन्द्र! मरुद्भिः सह ॥ १३ ॥

अस्माकं धृष्णुया रथो द्युमाँ इन्द्रानपच्युतः। गव्युरश्वयुरीयते ॥ १४ ॥

अस्माकम्। धृष्णुऽया। रथः। द्युऽमान्। इन्द्र। अनपऽच्युतः। गव्युः। अश्वऽयुः। ईयते ॥ १४ ॥

वेङ्कट० अस्माकम् धृष्णु रथ दीप्तिमान् इन्द्र! शत्रुभिः अनपच्युतः गाः अश्वांश्चेच्छन् गच्छति ॥ १४ ॥

अस्माकमुत्तमं कृधि श्रवो देवेषु सूर्य। वर्षिष्ठं द्यामिवोपरि ॥ १५ ॥

अस्माकम्। उत्ऽतमम्। कृधि। श्रवः। देवेषु। सूर्य। वर्षिष्ठम्। द्याम्ऽइव। उपरि ॥ १५ ॥

वेङ्कट० अस्माकम् उत्तमम् यशः कृधि देवेषु हे सूर्यवीर्य! वृद्धतमम् द्युलोकम् इव उपरि स्थितम् ॥ १५ ॥

'इति तृतीयाष्टके षष्ठाध्याये षड्विंशो वर्गः' ॥

[३२]

'वामदेवो गौतम ऋषिः। इन्द्रो देवता, अन्त्ययोरिन्द्राश्वौ। गायत्री छन्दः'।

आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि। महान् महीभिरूतिभिः ॥ १ ॥

आ। तु। नः। इन्द्र। वृत्रऽहन्। अस्माकम्। अर्धम्। आ। गहि। महान्। महीभिः। ऊतिऽभिः ॥ १ ॥

१-१. नास्ति मूको. २ नास्ति खपे. ३ उपरत् वि' खपे.

वेङ्कट॰ आ गच्छ क्षिप्रम् अस्माकम् हे इन्द्र वृत्रहन्! 'वृधः स्मभिः' अर्धम् महद्भिः। अस्माकम् इति पूरणम् ॥ १ ॥

भूर्मिश्चिद् घासि तूतुजिरा चित्र चित्रिणीष्वा । चित्रं कृणोष्यूतये ॥ २ ॥

भूर्मिः । चित् । घ । असि । तूतुजिः । आ । चित्र । चित्रिणीषु । आ । चित्रम् । कृणोषि । ऊतये ॥ २ ॥

वेङ्कट॰ भ्रमणशीलः खलु असि हिंसकः, स त्वम् 'चित्र' चित्रवतीषु प्रजासु' चित्रम् धनम् आ कुरुषे रक्षणाय ॥ २ ॥

दभ्रेभिश्चिच्छशीयांसं हंसि व्राधन्तमोजसा । सखिभिर्ये त्वे सचा ॥ ३ ॥

दभ्रेभिः । चित् । शशीयांसम् । हंसि । व्राधन्तम् । ओजसा । सखिऽभिः । ये । त्वे इति । सचा ॥ ३ ॥

वेङ्कट॰ क्षुद्रैः अपि त्वम् अभिभवन्तम् हंसि वर्धमानं बलेन मरुद्भिः', ये च त्वयि सह वसन्ति ॥ ३ ॥

वयमिन्द्र त्वे सचा वयं त्वाभि नोनुमः । अस्माँअस्माँ इदुदव ॥ ४ ॥

वयम् । इन्द्र । त्वे इति । सचा । वयम् । त्वा । अभि । नोनुमः । अस्मान्ऽअस्मान् । इत् । उत् । अव ॥ ४ ॥

वेङ्कट॰ वयम् हे इन्द्र! त्वयि समवेताः, वयम् त्वाम् अभि स्तुमः, अस्मान् एव त्वं सर्वदा रक्ष ॥ ४ ॥

स नश्चित्राभिरद्रिवोऽनवद्याभिरूतिभिः । अनाधृष्टाभिरा गहि ॥ ५ ॥

सः । नः । चित्राभिः । अद्रिऽवः । अनवद्याभिः । ऊतिऽभिः । अनाधृष्टाभिः । आ । गहि ॥ ५ ॥

वेङ्कट॰ सः अस्मान् चित्रैः मरुद्भिः अवद्यरहितैः शत्रुभिरनाधृष्टैः आ गच्छ हे वज्रिन्! ॥ ५ ॥

'इति तृतीयाष्टके चतुर्थाध्याये सप्तविंशो वर्गः' ॥

भूयामो षु त्वावतः सखाय इन्द्र गोमतः । युजो वाजाय घृष्वये ॥ ६ ॥

भूयामो इति । सु । त्वाऽवतः । सखायः । इन्द्र । गोऽमतः । युजः । वाजाय । घृष्वये ॥ ६ ॥

वेङ्कट॰ हे इन्द्र! त्वत्सदृशस्य गोमतः सुष्ठु सखायः भूयास्म' सङ्ग्रामे सहायाः शत्रूणां घर्षणशीलाय ॥ ६ ॥

त्वं ह्येक ईशिष इन्द्र वाजस्य गोमतः । स नो यन्धि महीमिषम् ॥ ७ ॥

त्वम् । हि । एकः । ईशिषे । इन्द्र । वाजस्य । गोऽमतः । सः । नः । यन्धि । महीम् । इषम् ॥

वेङ्कट॰ निगदसिद्धा ॥ ७ ॥

१-१. वेदेरमद्भः वि° अप, वेदे° वि° अ°; वेदः मूको. २. भूता° वि° अ° क कर्म. ३. नास्ति वि°. ४-४. नास्ति मूको. ५. मूकोस्य क वस्तुतः.

न त्वा वरन्ते अन्यथा यद् दित्ससि स्तुतो मघम्। स्तोतृभ्य इन्द्र गिर्वणः ॥८॥

न। त्वा। वरन्ते। अन्यथा। यत्। दित्ससि। स्तुतः। मघम्। स्तोतृऽभ्यः। इन्द्र। गिर्वणः ॥

वेङ्कट० न त्वां¹ वारयन्ति अन्यथा कर्तुम्, यदा त्वं दित्ससि स्तुतः धनम् स्तोतृभ्यः हे इन्द्र गिर्वणः ॥ ८ ॥

अभि त्वा गोतमा गिरानूषत प्र दावने। इन्द्र वाजाय घृष्वये ॥ ९ ॥

अभि। त्वा। गोतमाः। गिरा। अनूषत। प्र। दावने। इन्द्र। वाजाय। घृष्वये ॥ ९ ॥

वेङ्कट० अभि अस्तुवन् प्रकर्षेण त्वाम् गोतमाः स्तोत्रेण इन्द्र। दानाय अन्नस्य च घर्षणशीलस्य ॥ ९ ॥

प्र ते वोचाम वीर्या या मन्दसान आरुजः। पुरो दासीरभीत्य ॥ १० ॥

प्र। ते। वोचाम। वीर्या। याः। मन्दसानः। आ। अरुजः। पुरः। दासीः। अभिऽइत्य ॥ १० ॥

वेङ्कट० प्र ब्रवाम तव वीर्याणि, याः पुरः मोदमानः सर्वतो [illegible] दासमनुष्यसम्बन्धिनीः² अभिगम्य, तद्वीर्याणि ॥ १० ॥

³इति तृतीयाष्टके षष्ठाध्याये अष्टाविंशो वर्गः³ ॥

ता ते गृणन्ति वेधसो यानि चकर्थ पौंस्या। सुतेष्विन्द्र गिर्वणः ॥ ११ ॥

ता। ते। गृणन्ति। वेधसः। यानि। चकर्थ। पौंस्या। सुतेषु। इन्द्र। गिर्वणः ॥ ११ ॥

वेङ्कट० तानि ते गृणन्ति मेधाविनः यानि कृतवानसि वीर्याणि सुतेषु हे इन्द्र गिर्वणः ॥ ११ ॥

अवीवृधन्त गोतमा इन्द्र त्वे स्तोमवाहसः। ऐषु धा वीरवद् यशः ॥१२॥

अवीवृधन्त। गोतमाः। इन्द्र। त्वे इति। स्तोमऽवाहसः। आ। एषु। धाः। वीरऽवत्। यशः ॥

वेङ्कट० अवर्धयन् गोतमाः हे इन्द्र! त्वयि स्तोमानां वोढारः। आ धेहि गोतमेषु वीरवत् अन्नम् ॥ १२ ॥

यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम्। तं त्वा वयं हवामहे ॥ १३ ॥

यत्। चित्। हि। शश्वताम्। असि। इन्द्र। साधारणः। त्वम्। तम्। त्वा। वयम्। हवामहे ॥१३॥

वेङ्कट० यत् चित् हि बहूनाम् असि इन्द्र⁴ साधारणः त्वम्⁴ तम् त्वा वयम् हवामहे ॥ १३ ॥

अर्वाचीनो वसो भवास्मे सु मत्स्वान्धसः। सोमानामिन्द्र सोमपाः ॥ १४ ॥

अर्वाचीनः। वसो इति। भव। अस्मे इति। सु। मत्स्व। अन्धसः। सोमानाम्। इन्द्र। सोमऽपाः ॥

1. [illegible] 2. [illegible] 3. [illegible] 4-4. नास्ति मूको.

वेङ्कट० ह्रतोमुख गन्त हे वासविन! अस्मान्। सुष्ठु सुष्वतः सोमिन हे सोमस्य पात इन्द्र! ॥ १४ ॥

अस्माकं त्वा मतीनामा स्तोम इन्द्र यच्छतु। अर्वागा वर्तया हरी ॥ १५ ॥

अस्माकम्। त्वा। मतीनाम्। आ। स्तोमः। इन्द्र। यच्छतु। अर्वाक्। आ। वर्तय। हरी इति ॥ १५ ॥

वेङ्कट० अस्माकम् स्तुतीनाम् त्वाम् स्तोमः इन्द्र! आ गच्छतु। ह्रतोमुखम् आ गमय अश्वौ ॥ १५ ॥

पुरोळाशं च नो घसो जोषयासे गिरश्च नः। वधूयुरिव योषणाम् ॥ १६ ॥

पुरोळाशम्। च। नः। घसः। जोषयासे। गिरः। च। नः। वधूयुःऽइव। योषणाम् ॥ १६ ॥

वेङ्कट० पूर्वम् (ऋ ३.५२.३) गता ॥ १६ ॥

इति तृतीयाष्टके षष्ठाध्याये एकोनत्रिंशो वर्गः ॥

सहस्रं व्यतीनां युक्तानामिन्द्रमीमहे। शतं सोमस्य खार्यः ॥ १७ ॥

सहस्रम्। व्यतीनाम्। युक्तानाम्। इन्द्रम्। ईमहे। शतम्। सोमस्य। खार्यः ॥ १७ ॥

वेङ्कट० युक्तानाम् अश्वानाम् सहस्रम् इन्द्रम् याचामहे। शतम् इमाः सोमस्य खार्यः याचामहे इति ॥ १७ ॥

सहस्रा ते शता वयं गवामा च्यावयामसि। अस्मत्रा राध एतु ते ॥ १८ ॥

सहस्रा। ते। शता। वयम्। गवाम्। आ। च्यावयामसि। अस्मऽत्रा। राधः। एतु। ते ॥ १८ ॥

वेङ्कट० तव वयम् गवाम् सहस्राणि शतानि च आ च्यावयामः[1]। अस्मासु[2] धनम्[3] आगच्छतु तव ॥ १८ ॥

दश ते कलशानां हिरण्यानामधीमहि। भूरिदा असि वृत्रहन् ॥ १९ ॥

दश। ते। कलशानाम्। हिरण्यानाम्। अधि। ईमहि। भूरिऽदाः। असि। वृत्रऽहन् ॥ १९ ॥

वेङ्कट० हिरण्यपूर्णान्[4] दश कलशान् त्वत्तः धारयेम। भूरिदाः असि हि वृत्रहन्! ॥ १९ ॥

भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर। भूरि घेदिन्द्र दित्ससि ॥ २० ॥

भूरिऽदाः। भूरि। देहि। नः। मा। दभ्रम्। भूरि। आ। भर। भूरि। घ। इत्। इन्द्र। दित्ससि ॥ २० ॥

वेङ्कट० सिद्धमेव ॥ २० ॥

भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन्। आ नो भजस्व राधसि ॥ २१ ॥

भूरिऽदाः। हि। असि। श्रुतः। पुरुऽत्रा। शूर। वृत्रऽहन्। आ। नः। भजस्व। राधसि ॥ २१ ॥

१. च्याव° वि°. २. अस्मान् वि°. ३. धनम् वि°. ४. °पूर्णानाम् वि° अपं

वेङ्कट० महतो धनस्य अस्य स्वम् हे शूर इन्द्र! पुरूणि देवेषु शृणुः । तस्मात् आ भज धने ॥ २१ ॥

प्र ते बभ्रू विचक्षण शंसामि गोषणो नपात् । माभ्यां गा अनु शिश्रथः ॥ २२ ॥

प्र । ते । बभ्रू इति । विऽचक्षण । शंसामि । गोऽसनः । नपात् । मा । आभ्याम् । गाः । अनु । शिश्रथः ॥

वेङ्कट० प्र शंसामि तव बभ्रुवर्णावश्वौ हे प्राज्ञ! 'दिव उदकस्य दातुः पुत्र'। मा आभ्याम् अश्वाभ्याम् दत्ताः अनु शिथिलयः । आवयोर्भेदकमसौ ॥ २२ ॥

कनीनकेव विद्रधे नवे द्रुपदे अर्भके । बभ्रू यामेषु शोभेते ॥ २३ ॥

कनीनकाऽइव । विद्रधे । नवे । द्रुऽपदे । अर्भके । बभ्रू इति । यामेषु । शोभेते इति ॥ २३ ॥

वेङ्कट० कन्यके इव स्थिते नवे पादुके स्वकरे स्थिते बभ्रू ... गमनेषु शोभेते अश्वौ । निरुक्तं (४.१५) द्रष्टव्यम् ॥ २३ ॥

अरं म उस्रयाम्णेऽरमनुस्रयाम्णे । बभ्रू यामेष्वस्रिधा ॥ २४ ॥

अरम् । मे । उस्रऽयाम्ने । अरम् । अनुस्रऽयाम्ने । बभ्रू इति । यामेषु । अस्रिधा ॥ २४ ॥

वेङ्कट० वामदेवस्य ह्यानुस्रौ स्तः, तस्मै गच्छते अहिंसितस्य बभ्रू अश्वौ गमनेषु अहिंसितौ' इति पर्याप्तमासताम् । एवं यावास्यां गच्छते ॥

'इति तृतीयाष्टके षष्ठाध्याये त्रिंशो वर्गः' ॥

व्याकरोत् षष्ठमध्यायं तृतीयस्याष्टकस्य सः ।
दुहिता भवगोलस्य सुन्दरी माधवीकलम् ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने तृतीयाष्टके षष्ठोऽध्यायः ॥

— ● —

इति ऋग्वेदे सभाष्ये तृतीयाष्टके षष्ठोऽध्यायः ॥



१. कन्यके वि° कॉ २. अवाभ्यामे वि° कॉ ३. यावाम्ले वि° कर्ण; यामावति. वि° कॉ.
४-४ नास्ति मूको.

'अथ तृतीयाष्टके नवमोऽध्यायः'

वेङ्कट०

'प्र ऋभुभ्यो दूतमिव' व्याचिख्यासति माधवः ।
उपसर्गेषु [illegible] ॥ १ ॥

अन्वयव्यतिरेकाभ्यां प्रकृतेः प्रत्ययस्य च ।
पृथगर्थपरिज्ञानमिति शाब्दिकनिर्णयः ॥ २ ॥

उपसर्गेष्वपि तथा अर्थवृत्ति विनिश्चयः ।
[illegible] व्यक्तमाह पदान्तरैः ॥ ३ ॥

वदन्ति [illegible] उपसर्गान् [illegible] ।
'अर्थानां [illegible]' [illegible] ॥ ४ ॥

[illegible] [illegible] [illegible] [illegible] च ।
[illegible] [illegible] [illegible] [illegible] [illegible] ॥ ५ ॥

[illegible] [illegible] [illegible] [illegible] [illegible] ।
'अपि [illegible] [illegible]' [illegible] [illegible] [illegible] ॥ ६ ॥

[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] ॥ ७ ॥

[illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] ॥ ८ ॥

[illegible] ।
[illegible] [illegible] [illegible] ॥ ९ ॥

[illegible] [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] ॥ १० ॥

[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] ॥ ११ ॥

[illegible]

[illegible] पृथक्साये त्वरी [illegible] ।
[illegible] ॥ १२ ॥

[illegible] ॥ १३ ॥

[illegible] ॥ १४ ॥

[illegible] ॥ १५ ॥

[illegible] ॥ १६ ॥

[illegible] ॥ १७ ॥ इति ॥

[३३]

वामदेवो गौतम ऋषिः । ऋभवो देवता । त्रिष्टुप् छन्दः ।

प्र ऋ॒भुभ्यो॑ दू॒तमि॑व॒ वाच॑मिष्य उप॒स्तिरे॒ श्वैत॑रीं धे॒नुमी॑ळे ।
ये वात॑जूतास्त॒रणि॑भि॒रेवैः॒ परि॒ द्यां स॒द्यो अ॒पसो॑ बभू॒वुः ॥ १ ॥

प्र । ऋ॒भुऽभ्यः॑ । दू॒तम्ऽइ॑व । वाच॑म् । इ॒ष्ये॒ । उ॒प॒ऽस्तिरे॑ । श्वैत॑रीम् । धे॒नुम् । ई॒ळे॒ ।
ये । वात॑ऽजूताः । त॒रणि॑ऽभिः । एवैः॑ । परि॑ । द्याम् । स॒द्यः । अ॒पसः॑ । ब॒भू॒वुः ॥ १ ॥

वेङ्कट० वामदेवः । प्र [illegible] दूतम् इव स्तुतिम् । [illegible] स्तुतिवाचं [illegible] । ये वातप्रेरिताः [illegible] परि [illegible] ॥ १ ॥

य॒दार॒मक्र॑न्नृ॒भवः॑ पि॒तृभ्यां॒ परि॑विष्टी वे॒षणा॑ दं॒सना॑भिः ।
आदिद्दे॒वाना॒मुप॑ स॒ख्यमा॑यन् धीरा॑सः पु॒ष्टिम॑वहन्म॒नायै॑ ॥ २ ॥

१. [illegible] २. [illegible] ३. [illegible] ४-४. [illegible] ५-५. नास्ति मूको. ६. [illegible] ७. नास्ति मूको.

यदा । अरम् । अक्रत । ऋभवः । पितृऽभ्याम् । परिऽविष्टी । वेषणा । दंसनाभिः ।
आत् । इत् । देवानाम् । उप । सख्यम् । आयन् । धीरासः । पुष्टिम् । अवहन् । मनायै ॥२॥

वेङ्कट० यदा अकल्पयन् पितृभ्याम् ऋभवः भोजनेन व्याप्त्या कर्मभिश्च, अनन्तरम् एव देवानाम् सख्यम् उप आयन् प्राज्ञाः, पुष्टिम् च अवहन् स्तुवते स्तोत्रे ॥ २ ॥

पुनर्ये चक्रुः पितरा युवाना सना यूपेव जरणा शयाना ।
ते वाजो विभ्वाँ ऋभुरिन्द्रवन्तो मधुप्सरसो नोऽवन्तु यज्ञम् ॥ ३ ॥

पुनः । ये । चक्रुः । पितरा । युवाना । सना । यूपाऽइव । जरणा । शयाना ।
ते । वाजः । विऽभ्वा । ऋभुः । इन्द्रऽवन्तः । मधुऽप्सरसः । नः । अवन्तु । यज्ञम् ॥ ३ ॥

वेङ्कट० पुनः ये कृतवन्तः पितरौ युवानौ सनातनौ यूपाविव जीर्णौ शयानौ, ते वाजादयः इन्द्रवन्तः सोमं प्रति गच्छन्तः अस्माकम् यज्ञम् आगच्छन्तु ॥ ३ ॥

यत् संवत्समृभवो गामरक्षन् यत् संवत्समृभवो मा अपिंशन् ।
यत् संवत्समभरन् भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः ॥ ४ ॥

यत् । सम्ऽवत्सम् । ऋभवः । गाम् । अरक्षन् । यत् । सम्ऽवत्सम् । ऋभवः । माः । अपिंशन् ।
यत् । सम्ऽवत्सम् । अभरन् । भासः । अस्याः । ताभिः । शमीभिः । अमृतऽत्वम् । आशुः ॥४॥

वेङ्कट० यत् संवत्सरपर्यन्तम्, यद् ऋभवः इत्यर्थे पितरौ गाम् अरक्षन्, यत् च संवत्सरम्¹ विश्वरूप-रूपार्थं मांसम् अपिंशन्, यत् च संवत्सरम् अस्याः गोः भासः अभरन्, तैः कर्मभिः अमृतत्वम् आपन् । 'धेनुः कर्त्व युवशा' (ऋ १.१६१.१०) इत्युक्तम् ॥ ४ ॥

ज्येष्ठ आह चमसा द्वा करेति कनीयान् त्रीन् कृणवामेत्याह ।
कनिष्ठ आह चतुरस्करेति त्वष्ट ऋभवस्तत् पनयद्वचो वः ॥ ५ ॥

ज्येष्ठः । आह । चमसा । द्वा । कर । इति । कनीयान् । त्रीन् । कृणवाम । इति । आह ।
कनिष्ठः । आह । चतुरः । कर । इति । त्वष्टा । ऋभवः । तत् । पनयत् । वचः । वः ॥ ५ ॥

वेङ्कट० ऋभुः आह एकं चमसम् द्वौ करोमि इति, मध्यमः आह² त्रीन् करोमि² इति, तृतीयः आह³ चतुरः करोमि³ इति । हे ऋभवः ! त्वष्टा तत् युष्मद्वचनम् अपूजयत् ॥ ५ ॥

'इति तृतीयाष्टके सप्तमाध्याये प्रथमो वर्गः' ॥

1. नास्ति रुपे. 2. नास्ति मूको. 3-3. नास्ति मूको.

सत्यमूचुर्नर एवा हि चक्रुरनु स्वधामृभवो जग्मुरेताम् ।
विभ्राजमानाँश्चमसाँ अहेवावेनत्त्वष्टा चतुरो ददृश्वान् ॥ ६ ॥

सत्यम् । ऊचुः । नरः । एव । हि । चक्रुः । अनु । स्वधाम् । ऋभवः । जग्मुः । एताम् ।
विऽभ्राजमानान् । चमसान् । अहाऽइव । अवेनत् । त्वष्टा । चतुरः । ददृश्वान् ॥ ६ ॥

वेङ्कट० सत्यमेव नेतारोऽमी स्तवम्[1] ऊचुः । उक्तम् हि तथा अनुष्ठितवन्तः । पश्चात् एताम् स्वधाम् सोमम् ऋभवः अनु अगच्छन् । देवेषु दीप्यमानान् चतुरः चमसान् दिवसानिव अकामयत त्वष्टा पश्यन् ॥ ६ ॥

द्वादश द्यून्यदगोह्यस्यातिथ्ये रणन्नृभवः ससन्तः ।
सुक्षेत्राकृण्वन्ननयन्त सिन्धून्धन्वातिष्ठन्नोषधीर्निम्नमापः ॥ ७ ॥

द्वादश । द्यून् । यत् । अगोह्यस्य । आतिथ्ये । रणन् । ऋभवः । ससन्तः ।
सुऽक्षेत्रा । अकृण्वन् । अनयन्त । सिन्धून् । धन्व । आ । अतिष्ठन् । ओषधीः । निम्नम् । आपः ॥ ७ ॥

वेङ्कट० द्वादश दिवसान् यदा गूहितुमशक्यस्य सवितुः आतिथ्ये अरमन्त[2] स्वपन्तः ऋभवः, तदानीं सवितुः सोमभागिनः क्षेत्राणि अकुर्वन्, नदीश्च अनयन्[3], तदानीं स्थलम्[4] ओषधयः आ अतिष्ठन् निम्नम् आपः । 'उदन्वत्स्वा अकृणोतन' (ऋ १, १६१, ११) इत्युक्तम् ॥ ७ ॥

रथं ये चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपाम् ।
त आ तक्षन्त्वृभवो रयिं नः स्ववसः स्वपसः सुहस्ताः ॥ ८ ॥

रथम् । ये । चक्रुः । सुऽवृतम् । नरेऽस्थाम् । ये । धेनुम् । विश्वऽजुवम् । विश्वऽरूपाम् ।
ते । आ । तक्षन्तु । ऋभवः । रयिम् । नः । सुऽअवसः । सुऽअपसः । सुऽहस्ताः ॥ ८ ॥

वेङ्कट० रथम् ये चक्रुः सुवर्तनं नेतरीन्द्रे स्थितम्, ये च धेनुम् विश्ववेगां नानारूपां बृहस्पतये । ते आ कुर्वन्तु ऋभवः रयिम् अस्माकम् सुरक्षणाः सुकर्माणः सुहस्ताः ॥ ८ ॥

अपो ह्येषामजुषन्त देवा अभि क्रत्वा मनसा दीध्यानाः ।
वाजो देवानामभवत्सुकर्मेन्द्रस्य ऋभुक्षा वरुणस्य विभ्वा ॥ ९ ॥

अपः । हि । एषाम् । अजुषन्त । देवाः । अभि । क्रत्वा । मनसा । दीध्यानाः ।
वाजः । देवानाम् । अभवत् । सुऽकर्मा । इन्द्रस्य । ऋभुक्षाः । वरुणस्य । विऽभ्वा ॥ ९ ॥

१. सत्यं वि' मूको. २. तथा स' वि' मूको. ३. स्वप्न वि'. ४. 'वन्त वि' ५. नास्ति वि' मूको. ६. मङ्गलम् मूको.

वेङ्कट० कर्म हि तेषाम् अजायन्त देवाः दीप्यमानाः प्रज्ञया मनसा च । एवं सन्तः सर्वेषां देवानाम् मुख्याः अभवन्, इन्द्रस्य ज्येष्ठः, वरुणस्य मध्यमः ॥ ९ ॥

ये हरी मेधयोक्था मदन्त इन्द्राय चक्रुः सुयुजा ये अश्वा ।
ते रायस्पोषं द्रविणान्यस्मे धत्त ऋभवः क्षेमयन्तो न मित्रम् ॥ १० ॥

ये । हरी इति । मेधया । उक्था । मदन्तः । इन्द्राय । चक्रुः । सुऽयुजा । ये । अश्वा ।
ते । रायः । पोषम् । द्रविणानि । अस्मे इति । धत्त । ऋभवः । क्षेमऽयन्तः । न । मित्रम् ॥ १० ॥

वेङ्कट० ये इन्द्राय अश्वौ प्रज्ञया स्तोत्रैः मदन्तः चक्रुः ये च शब्दवन्तौ रथे सयुक्तौ, ते यूयम् हे ऋभवः![1] रायः पोषम् द्रविणानि च अस्मभ्यम् धत्त क्षेमं कुर्वन्तः मित्रम् इव ॥ १० ॥

इदाह्नः पीतिमुत वो मदं धुर्न ऋते श्रान्तस्य सख्याय देवाः ।
ते नूनमस्मे ऋभवो वसूनि तृतीये अस्मिन्सवने दधात ॥ ११ ॥

इदा । अह्नः । पीतिम् । उत । वः । मदम् । धुः । न । ऋते । श्रान्तस्य । सख्याय । देवाः ।
ते । नूनम् । अस्मे इति । ऋभवः । वसूनि । तृतीये । अस्मिन् । सवने । दधात ॥ ११ ॥

वेङ्कट० इदानीम् अह्नः 'तृतीये सवने' सोमपीतिं च मदम् च दत्तवन्तः । न हि देवाः श्रमम् सख्याय ऋते भवन्ति । प्रयच्छन्ति श्रान्तस्य फलम्, न वृथा श्रान्तं भवति । ते सम्प्रति अस्मभ्यम् हे ऋभवः! वसूनि अस्मिन् तृतीयसवने प्रयच्छत ॥ ११ ॥

'इति तृतीयाष्टके सप्तमाध्याये द्वितीयो वर्गः' ॥

[३४]

'वामदेवो गौतम ऋषिः । ऋभवो देवता । त्रिष्टुप् छन्दः' ।

ऋभुर्विभ्वा वाज इन्द्रो नो अच्छेमं यज्ञं रत्नधेयोप यात ।
इदा हि वो धिषणा देव्यह्नामधात्पीतिं सं मदा अग्मता वः ॥ १ ॥

ऋभुः । विऽभ्वा । वाजः । इन्द्रः । नः । अच्छ । इमम् । यज्ञम् । रत्नऽधेया । उप । यात ।
इदा । हि । वः । धिषणा । देवी । अह्नाम् । अधात् । पीतिम् । सम् । मदाः । अग्मत । वः ॥ १ ॥

वेङ्कट० ऋभ्वादयः[5] इन्द्रः च अस्माकम् इमम् यज्ञम् अभ्यागच्छत रत्नदानाय । इदानीम् हि वः तृतीयसवने[6] देवी स्तुतिवाक् अह्नाम् विदधाति सोमपानम् । देवैः सम् अगमत वः मदाः ॥ १ ॥

१. क वि' कर्म. २. नास्ति मूको. ३-३. 'तीयस' वि'. ४-४. नास्ति मूको. ५. 'षय वि' स'. ६. 'सीयि द्' वि' कर्म

विदानासो जन्मनो वाजरत्ना उत ऋतुभिर्ऋभवो मादयध्वम् ।
सं वो मदा अग्मत सं पुरंधिः सुवीरामस्मे रयिमेरयध्वम् ॥ २ ॥

विदानासः । जन्मनः । वाजऽरत्नाः । उत । ऋतुऽभिः । ऋभवः । मादयध्वम् ।
सम् । वः । मदाः । अग्मत । सम् । पुरम्ऽधिः । सुऽवीराम् । अस्मे इति । रयिम् । आ । ईरयध्वम् ॥ २ ॥

वेङ्कट० जानन्तः 'प्रादुर्भावकालं हे रमणीयान्नाः' ऋभवः! ऋतुभिः' सहास्मिन् सवने मादयध्वम् । युष्माकं सोमाः मदाः च देवैः सह अग्मत । ते अस्मासु सुपुत्रम्' धनम् आभिमुख्येन' प्रेरयत ॥ २ ॥

अयं वो यज्ञ ऋभवोऽकारि यमा मनुष्वत् प्रदिवो दधिध्वे ।
प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः ॥ ३ ॥

अयम् । वः । यज्ञः । ऋभवः । अकारि । यम् । आ । मनुष्वत् । प्रऽदिवः । दधिध्वे ।
प्र । वः । अच्छ । जुजुषाणासः । अस्थुः । अभूत । विश्वे । अग्रियाः । उत । वाजाः ॥ ३ ॥

वेङ्कट० हे ऋभवः! युष्माकम् अयम्' यज्ञः अस्माभिः कृतः । 'यम् पुराणम्' पूर्वमारभ्य आ दधीध्वे मनाविव मनुष्येषु इव' च । युष्मान् सेवमानाः ऋत्विजः अभि प्र तस्थुः । हे वाजाः! यूयं भवत सर्वे प्रथमस्थानिनः ॥ ३ ॥

अभूदु वो विधते रत्नधेयमिदा नरो दाशुषे मर्त्याय ।
पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय ॥ ४ ॥

अभूत् । ऊँ इति । वः । विधते । रत्नऽधेयम् । इदा । नरः । दाशुषे । मर्त्याय ।
पिबत । वाजाः । ऋभवः । ददे । वः । महि । तृतीयम् । सवनम् । मदाय ॥ ४ ॥

वेङ्कट० अभूत् युष्माकं परिचरते रत्नधानं तृतीयसवने हे नेतारः! दाशुषे' मनुष्याय । पिबत सोमं "हे ऋभवः! हे वाजाः!, दीयते युष्मभ्यं महत् तृतीयम् सवनम् मदाय" ॥ ४ ॥

आ वाजा यातोप न ऋभुक्षा महो नरो द्रविणसो गृणानाः ।
आ वः पीतयोऽभिपित्वे अह्नामिमा अस्तं नवस्वइव ग्मन् ॥ ५ ॥

आ । वाजाः । यात । उप । नः । ऋभुक्षाः । महः । नरः । द्रविणसः । गृणानाः ।
आ । वः । पीतयः । अभिऽपित्वे । अह्नाम् । इमाः । अस्तम् । नवस्वःऽइव । ग्मन् ॥ ५ ॥

१-१. [illegible] वि' मू'. २. ऋतुभिः वि' मू'. ३-३. [illegible] वि' मू'. ४. नास्ति मू. ५. नास्ति मू'. ६-६. नास्ति वि' मू'. ७. नास्ति मूको. ८. अस्मान् वि'' मू'. ९. नास्ति वि'. १०-१०. नास्ति वि' मू'.

वेङ्कट० 'हे वाजाः! हे ऋभवः' अस्माकम् इमं यज्ञम् आ गच्छत । महत् धनं दातारः गृणानाः । युष्माकम् एव सोमाः† अपराह्णे गृहम् इव नवप्रसूताः गावः' ॥ ५ ॥

'इति तृतीयाष्टके सप्तमाध्याये तृतीयो वर्गः' ॥

आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूयमानाः ।
सजोषसः सूरयो यस्य च स्थ मध्वः पात रत्नधा इन्द्रवन्तः ॥ ६ ॥

आ । नपातः । शवसः । यातन । उप । इमम् । यज्ञम् । नमसा । हूयमानाः ।
सऽजोषसः । सूरयः । यस्य । च । स्थ । मध्वः । पात । रत्नऽधाः । इन्द्रऽवन्तः ॥ ६ ॥

वेङ्कट० 'उप आ गच्छत हे बलस्य पुत्राः' इमम् यज्ञम् हविषा हूयमानाः । सहिताः हे सूरयः । यस्य च स्थ सोमस्य, तं सोमं पिबत इन्द्रेण सहिताः रत्नानां दातारः' ॥ ६ ॥

सजोषा इन्द्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः ।
अग्रेपाभिरृतुपाभिः सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः ॥ ७ ॥

सऽजोषाः । इन्द्र । वरुणेन । सोमम् । सऽजोषाः । पाहि । गिर्वणः । मरुत्ऽभिः ।
अग्रेऽपाभिः । ऋतुऽपाभिः । सऽजोषाः । ग्नाःपत्नीभिः । रत्नऽधाभिः । सऽजोषाः ॥ ७ ॥

वेङ्कट० 'वरुणेन मरुद्भिः च सह सन् हे इन्द्र गीर्भिर्वननीय! पिब सोमम् सह †अग्रेपाभिः ऋतुकालं पिबद्भिश्च देवैः सङ्गतः तथा ग्नास्पत्नीभिश्च रत्नानां दात्रीभिः' ॥ ७ ॥

सजोषस आदित्यैर्मादयध्वं सजोषस ऋभवः पर्वतेभिः ।
सजोषसो दैव्येना सवित्रा सजोषसः सिन्धुभी रत्नधेभिः ॥ ८ ॥

सऽजोषसः । आदित्यैः । मादयध्वम् । सऽजोषसः । ऋभवः । पर्वतेभिः ।
सऽजोषसः । दैव्येन । सवित्रा । सऽजोषसः । सिन्धुऽभिः । रत्नऽधेभिः ॥ ८ ॥

वेङ्कट० 'पर्वताः शिलोच्चयाः मदयत च तृतीये सवने ऽस्मदन्नेन' ॥ ८ ॥

ये अश्विना ये पितरा य ऊती धेनुं ततक्षुरृभवो ये अश्वा ।
ये अंसत्रा य ऋधग्रोदसी ये विभ्वो नरः स्वपत्यानि चक्रुः ॥ ९ ॥

ये । अश्विना । ये । पितरा । ये । ऊती । धेनुम् । ततक्षुः । ऋभवः । ये । अश्वा ।
ये । अंसत्रा । ये । ऋधक् । रोदसी इति । ये । विऽभ्वः । नरः । सुऽअपत्यानि । चक्रुः ॥ ९ ॥

१-१. नास्ति वि॰ अप॰.　† °रः स॰ अप॰.　२-२. नास्ति मूको.　३-३. नास्ति वि॰ अप॰
४-४. नास्ति वि॰ अप॰.　†-† °भि नास्ति …के अ॰.

वेङ्कट० 'ये चमसं अश्विनौ रथकरणेन' प्रीणनमकुर्वन्, ये ऊर्ध्वौ पितरौ युवानौ' अकुर्वन्, ये रक्षणार्थं बृहस्पतये धेनुम् अतक्षुः, ये च देवानाम् अश्वाः चमसाः अतक्षुः, ये च देवाना- मिन्द्रस्य मंसतौ अकुर्वन्, ये च 'द्यावापृथिव्यौ ऋद्धं कुर्वन्ति, ये च महान्त' तेजसा शोभनानि कर्माणि रथकरणादीनि चक्रुः' ॥ ९ ॥

ये गोमन्तं वाजवन्तं सुवीरं रयिं धत्थ वसुमन्तं पुरुक्षुम् ।
ते अग्रेपा ऋभवो मन्दसाना अस्मे धत्त ये च रातिं गृणन्ति ॥ १० ॥

ये । गोऽमन्तम् । वाजऽवन्तम् । सुऽवीरम् । रयिम् । धत्थ । वसुऽमन्तम् । पुरुऽक्षुम् ।
ते । अग्रेऽपाः । ऋभवः । मन्दसानाः । अस्मे इति । धत्त । ये । च । रातिम् । गृणन्ति ॥ १० ॥

वेङ्कट० ये यूयं गवादियुक्तं धनं प्रयच्छथ कामविनृत्युत्तमयुक्तम् बहुशब्दम्, ते अग्रे पातारः हे ऋभवः! मोदमानाः अस्मभ्यं प्रयच्छत' । ये च अन्ये देवाः धनम् उच्चारयन्ति ॥ १० ॥

नापाभूत न वोऽतीतृषामानिःशस्ता ऋभवो यज्ञे अस्मिन् ।
समिन्द्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः ॥ ११ ॥

न । अप । अभूत । न । वः । अतीतृषाम । अनिःऽशस्ताः । ऋभवः । यज्ञे । अस्मिन् ।
सम् । इन्द्रेण । मदथ । सम् । मरुत्ऽभिः । सम् । राजऽभिः । रत्नऽधेयाय । देवाः ॥ ११ ॥

वेङ्कट० न अपगताः अभवत, न वयं युष्मान् तृषितान् कुर्मः । न यूयम् ऋभवः! अस्मिन् यज्ञे नि शस्ताः', अपि त्वन्तर्भूता एव । तथा सति इन्द्रेण मरुद्भिः च सम् मदथ राजभिश्च रत्नानि दातुम् हे देवाः ॥ ११ ॥

"इति तृतीयाष्टके सप्तमाध्याये चतुर्थो वर्गः" ॥

[३५]

"वामदेवो गौतम ऋषिः । ऋभवो देवता । त्रिष्टुप् छन्दः" ।

इहोप यात शवसो नपातः सौधन्वना ऋभवो माप भूत ।
अस्मिन्हि वः सवने रत्नधेयं गमन्त्विन्द्रमनु वो मदासः ॥ १ ॥

इह । उप । यात । शवसः । नपातः । सौधन्वनाः । ऋभवः । मा । अप । भूत ।
अस्मिन् । हि । वः । सवने । रत्नऽधेयम् । गमन्तु । इन्द्रम् । अनु । वः । मदासः ॥ १ ॥

वेङ्कट० इह उप गच्छत हे शवसः पुत्राः' इति बलवत्तया... । हे सुधन्वनः पुत्राः ऋभवः! मा च

१-१. नास्ति वि° कोशे. २. नास्ति मूको. ३-३. "ऊर्ध्वौ पितरौ वि° कोशे; "पितरौ युवानौ वि°. ४. ... वि° कोशे. ५. ... वि° कोशे. ६. निःशस्ताः क. ७-७. नास्ति मूको.

अप गच्छत[1] । अभिषुत हि तृतीयसवने वः रत्नदानं सोमरूपः । युष्माकं सोमाः[2] इन्द्रम् अनु गच्छन्तु ॥ १ ॥

आगन्नृभूणामिह रत्नधेयमभूत् सोमस्य सुषुतस्य पीतिः ।
सुकृत्यया यत् स्वपस्यया चँ एकं विचक्र चमसं चतुर्धा ॥ २ ॥

आ । अगन् । ऋभूणाम् । इह । रत्नऽधेयम् । अभूत् । सोमस्य । सुऽसुतस्य । पीतिः ।
सुऽकृत्यया । यत् । सुऽअपस्यया । च । एकम् । विऽचक्र । चमसम् । चतुःऽधा ॥ २ ॥

वेङ्कट० आ गच्छतु[3] ऋभूणाम् तृतीयसवने रत्नदानम् । भवतु च सोमस्य सुष्ठु सुतस्य पीतिः । यस्मात् यूयं सुकर्मणा शोभनकर्मेच्छया[4] च एकम् सन्तम् चमसम् विकृतवन्तः स्थ चतुर्धा ॥ २ ॥

व्यकृणोत चमसं चतुर्धा सखे वि शिक्षेत्यब्रवीत ।
अथैत वाजा अमृतस्य पन्थां गणं देवानामृभवः सुहस्ताः ॥ ३ ॥

वि । अकृणोत । चमसम् । चतुःऽधा । सखे । वि । शिक्ष । इति । अब्रवीत ।
अथ । ऐत । वाजाः । अमृतस्य । पन्थाम् । गणम् । देवानाम् । ऋभवः । सुऽहस्ताः ॥ ३ ॥

वेङ्कट० [5]वि अकृणोत एकम् चमसम् चतुर्धा[6], सखे! सखे! देवेभ्यस्त्वमस्मिमम् च देहि इति अब्रवीत । अथ प्राप्तवन्तः स्थ हे वाजाः ! अमृतत्वप्राप्तेः पन्थानम् देवगणम् ऋभवः ! सुहस्ताः[7] ॥ ३ ॥

किम्मयः स्विच्चमस एष आस यं काव्येन चतुरो विचक्र ।
अथा सुनुध्वं सवनं मदाय पात ऋभवो मधुनः सोम्यस्य ॥ ४ ॥

किम्ऽमयः । स्वित् । चमसः । एषः । आस । यम् । काव्येन । चतुरः । विऽचक्र ।
अथ । सुनुध्वम् । सवनम् । मदाय । पात । ऋभवः । मधुनः । सोम्यस्य ॥ ४ ॥

वेङ्कट० किंनिमित्तः[1] स्वित् एषः चमसः अभूत्, यम् कविकर्मणा चतुरः विचक्र[2] । अपि च सम्प्रति सुनुध्वम् ऋभूणाम् मदाय तृतीयम् सवनम् । पिबत यूयं च हे ऋभवः ! सोमस्य मधु ॥ ४ ॥

शच्याकर्त पितरा युवाना शच्याकर्त चमसं देवपानम् ।
शच्या हरी धनुतरावतष्टेन्द्रवाहावृभवो वाजरत्नाः ॥ ५ ॥

१. गच्छ° मूको. गच्छत वि° अ° ल. २. °अत्र वि° मूको; °म: वि° अ° ल. ३. °च्छतु मूको. ४. °नेच्छया वि° मूको. ५. नास्ति वि° मूको. ६. °केन निर्मितः वि°. ७. नास्ति वि°[12] अ° ल; °सहस्ताः मूको.

शच्या । अकर्त । पितरा । युवाना । शच्या । अकर्त । चमसम् । देवऽपानम् ।
शच्या । हरी इति । धनुऽतरौ । अतष्ट । इन्द्रऽवाहौ । ऋभवः । वाजऽरत्नाः ॥ ५ ॥

वेङ्कट० प्रज्ञया कृतवन्तः पितरौ युवानौ जीर्णौ तथा चमसम् च चतुर्विधं देवानां सोमपानसाधनम् । अश्वौ च गन्तृतरौ इन्द्रस्य कृतवन्तः स्थ हे ऋभवः रमणीयान्नाः ! ॥ ५ ॥

'इति तृतीयाष्टके सप्तमाध्याये पञ्चमो वर्गः ।' ॥

यो वः सुनोत्यभिपित्वे अह्नां तीव्रं वाजासः सवनं मदाय ।
तस्मै रयिमृभवः सर्ववीरमा तक्षत वृषणो मन्दसानाः ॥ ६ ॥

यः । वः । सुनोति । अभिऽपित्वे । अह्नाम् । तीव्रम् । वाजासः । सवनम् । मदाय ।
तस्मै । रयिम् । ऋभवः । सर्वऽवीरम् । आ । तक्षत । वृषणः । मन्दसानाः ॥ ६ ॥

वेङ्कट० यः वः सुनाति अपराह्णे तीव्ररसं सोमं हे वाजाः ! मदाय । तस्मै इति स्पष्टम् ॥ ६ ॥

प्रातः सुतमपिबो हर्यश्व माध्यंदिनं सवनं केवलं ते ।
समृभुभिः पिबस्व रत्नधेभिः सखीँर्याँ इन्द्र चकृषे सुकृत्या ॥ ७ ॥

प्रातरिति । सुतम् । अपिबः । हरिऽअश्व । माध्यंदिनम् । सवनम् । केवलम् । ते ।
सम् । ऋभुऽभिः । पिबस्व । रत्नऽधेभिः । सखीन् । यान् । इन्द्र । चकृषे । सुऽकृत्या ॥ ७ ॥

वेङ्कट० चकृषे कृतवानसि । शिष्टं स्पष्टम् ॥ ७ ॥

ये देवासो अभवता सुकृत्या श्येना इवेदधि दिवि निषेद ।
ते रत्नं धात शवसो नपातः सौधन्वना अभवतामृतासः ॥ ८ ॥

ये । देवासः । अभवत । सुऽकृत्या । श्येनाःऽइव । इत् । अधि । दिवि । निऽसेद ।
ते । रत्नम् । धात । शवसः । नपातः । सौधन्वनाः । अभवत । अमृतासः ॥ ८ ॥

वेङ्कट० श्येनाः इव शीघ्रगामिनः सन्तः स्वर्गस्य उपरि निषण्णाः स्थ । अमृताश्च अभवत हतसोमाः । शिष्टं स्पष्टम् ॥ ८ ॥

यत् तृतीयं सवनं रत्नधेयमकृणुध्वं स्वपस्या सुहस्ताः ।
तदृभवः परिषिक्तं व एतत् सं मदेभिरिन्द्रियेभिः पिबध्वम् ॥ ९ ॥

१-१. नास्ति मूको.

यत् । तृतीयम् । सवनम् । रत्नऽधेयम् । अकृणुध्वम् । सुऽअपस्या । सुऽहस्ताः ।
तत् । ऋभवः । परिऽसिक्तम् । वः । एतत् । सम् । मदेभिः । इन्द्रियेभिः । पिबध्वम् ॥ ९ ॥

वेङ्कट० यत् यूयम् तृतीयम् सवनम् रत्नधानम् अकृणुध्वम् शोभनानि शोभनेन कर्मणा हे सुहस्ताः!, तत् तृतीयं सवनम् ऋभवः! युष्माकं मदाय परितः सिक्तम्। यूयम् इन्द्रयुक्ताः सोमस्य पानं कुरुत ॥ ९ ॥

इति तृतीयाष्टके सप्तमाध्याये षष्ठो वर्गः ॥

[३६]

वामदेवो गौतम ऋषिः। ऋभवो देवता। आद्या जगती छन्दः, नवमी त्रिष्टुप्।

अनश्वो जातो अनभीशुरुक्थ्यो३ रथस्त्रिचक्रः परि वर्तते रजः।
महत् तद् वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च पुष्यथ ॥ १ ॥

अनश्वः । जातः । अनभीशुः । उक्थ्यः । रथः । त्रिऽचक्रः । परि । वर्तते । रजः ।
महत् । तत् । वः । देव्यस्य । प्रऽवाचनम् । द्याम् । ऋभवः । पृथिवीम् । यत् । च । पुष्यथ ॥

वेङ्कट० अश्वप्रग्रहाभ्यां वर्जितः सः यः 'जातः स्तुत्यः', सः त्रिभिश्चक्रैर्युक्तः सन् परि वर्तते लोकम् अश्विभ्यां भवद्भिः कृतः। महत् च तत् वः देवत्वस्य प्रवचनीयं कर्म, यत् द्याम् च पृथिवीम् च उदकसंयोगिनीं पुष्यथ हे ऋभवः! ॥ १ ॥

रथं ये चक्रुः सुवृतं सुचेतसोऽविह्वरन्तं मनसस्परि ध्यया।
ताँ ऊ न्वस्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि ॥ २ ॥

रथम् । ये । चक्रुः । सुऽवृतम् । सुऽचेतसः । अविऽह्वरन्तम् । मनसः । परि । ध्यया ।
तान् । ऊम् इति । नु । अस्य । सवनस्य । पीतये । आ । वः । वाजाः । ऋभवः । वेदयामसि ॥२॥

वेङ्कट० 'रथम् ये' चक्रुः सुवर्तनं सुज्ञानाः अकुटिलीभवन्तम् मनसः ध्यानेन। परिः पञ्चम्यर्थं स्पष्टीकरोति। तान् क्षिप्रम् अस्य सवनस्य पानाय च आ वेदयामः, पिबन्त्विति हे वाजेन ऋभुणा च संयुक्ताः! ॥ २ ॥

तद् वो वाजा ऋभवः सुप्रवाचनं देवेषु विभ्वो अभवन्महित्वनम्।
जिव्री यत् सन्ता पितरा सनाजुरा पुनर्युवाना चरथाय तक्षथ ॥ ३ ॥

---

१. नास्ति वि² कपं. २-२. नास्ति मूको. ३. ... मूको. ४. नास्ति वि² अ²
५-५. नास्ति वि².

तत् । वः । वाजाः । ऋभवः । सुऽप्रवाचनम् । देवेषु । विऽभ्वः । अभवत् । महिऽत्वनम् ।
जिव्री इति । यत् । सन्ता । पितरा । सनाऽजुरा । पुनः । युवाना । चरथाय । तक्षथ ॥ ३ ॥

वेङ्कट० तत् वः हे वाजाः ![1] हे ऋभवः ! सुष्ठु प्रवचनीयम् देवेषु अभवत् महत्त्वम् हे विभ्वः !, जीर्णौ[2] यत् सन्तौ पितरौ दीर्घकालजीर्णौ पुनः युवानौ चरणार्थं कृतवन्तः स्थ ॥ ३ ॥

एकं वि चक्र चमसं चतुर्वयं निश्चर्मणो गामरिणीत धीतिभिः ।
अथा देवेष्वमृतत्वमानश श्रुष्टी वाजा ऋभवस्तद् वं उक्थ्यम् ॥ ४ ॥

एकम् । वि । चक्र । चमसम् । चतुःऽवयम् । निः । चर्मणः । गाम् । अरिणीत । धीतिऽभिः ।
अथ । देवेषु । अमृतऽत्वम् । आनश । श्रुष्टी । वाजाः । ऋभवः । तत् । वः । उक्थ्यम् ॥ ४ ॥

वेङ्कट० एकम् वि चक्र चमसम् चतुर्व्यूहम् । चर्मणः च गाम् निष्कृतवन्तः कर्मभिः । अथ देवेषु अमृतत्वम् व्याप्नुथ[3] । हे वाजाः ! हे ऋभवः ! तत् वः क्षिप्रं स्तोतव्यम् ॥ ४ ॥

ऋभुतो रयिः प्रथमश्रवस्तमो वाजश्रुतासो यमजीजनन् नरः ।
विभ्वतष्टो विदथेषु प्रवाच्यो यं देवासोऽवथा स विचर्षणिः ॥ ५ ॥

ऋभुतः । रयिः । प्रथमश्रवःऽतमः । वाजऽश्रुतासः । यम् । अजीजनन् । नरः ।
विभ्वऽतष्टः । विदथेषु । प्रऽवाच्यः । यम् । देवासः । अवथ । सः । विऽचर्षणिः ॥ ५ ॥

वेङ्कट० ऋभुतः ऋभुभ्यः धनं अतिशयितयशस्कम्[4] प्रथमम् भूयते । तथा वाजेन श्रूयमाणाः ऋभवः नेतारः यम्[5] रयिम् उत्पादयन्ति, स च तथा विभ्वना कृतः रयिः विदथेषु प्रवचनीयः । यम् हे ऋभवः ! रक्षथ, सः "विद्रष्टा भवति पुत्रः"[5] ॥ ५ ॥

"इति तृतीयाष्टके सप्तमाध्याये सप्तमो वर्गः"[6] ॥

स वाज्यर्वा स ऋषिर्वचस्यया स शूरो अस्ता पृतनासु दुष्टरः ।
स रायस्पोषं स सुवीर्यं दधे यं वाजो विभ्वाँ ऋभवो यमाविषुः ॥ ६ ॥

सः । वाजी । अर्वा । सः । ऋषिः । वचस्यया । सः । शूरः । अस्ता । पृतनासु । दुस्तरः ।
सः । रायः । पोषम् । सः । सुऽवीर्यम् । दधे । यम् । वाजः । विऽभ्वा । ऋभवः । यम् । आविषुः ॥ ६ ॥

वेङ्कट० सः अश्वः गन्ता, सः ऋषिः भवति स्तोत्रेण, सः शूरः इषूणाम् अस्ता । पृतनासु दुस्तरः भवति, सः रायः पोषम् सुवीर्यम् च धत्ते, यम् वाजः विभ्वा च रक्षतः, यम् च सर्वे ऋभवः ॥ ६ ॥

---

1. °जा च वि° अर्थ. 2. जीर्णौ अ°. 3. व्याप्नुथ° क. 4. नास्ति वि° अ°. 5-5. नास्ति वि° अर्थ. 6-6. नास्ति मूको.

श्रेष्ठं वः पेशो अधि धायि दर्शतं स्तोमो वाजा ऋभवस्तं जुजुष्टन ।
धीरासो हि ष्ठा कवयो विपश्चितस्तान्व एना ब्रह्मणा वेदयामसि ॥ ७ ॥

श्रेष्ठम् । वः । पेशः । अधि । धायि । दर्शतम् । स्तोमः । वाजाः । ऋभवः । तम् । जुजुष्टन । धीरासः । हि । स्थ । कवयः । विपःऽचितः । तान् । वः । एना । ब्रह्मणा । आ । वेदयामसि ॥

वेङ्कट० प्रशस्यतमं दर्शनीयं रूपम् वः शरीरेषु अधि अधायि, स्तोत्रं च अयं युष्माकं क्रियते, हे वाजाः ! ऋभवः ! तम् सेवध्वम् । धीराः हि भवथ यूयं 'क्रान्तप्रज्ञाः प्राज्ञाः' । तान् युष्मान् अनेन स्तोत्रेण प्रज्ञापयामः ॥ ७ ॥

यूयमस्मभ्यं धिषणाभ्यस्परि विद्वांसो विश्वा नर्याणि भोजना ।
द्युमन्तं वाजं वृषशुष्ममुत्तममा नो रयिमृभवस्तक्षता वयः ॥ ८ ॥

यूयम् । अस्मभ्यम् । धिषणाभ्यः । परि । विद्वांसः । विश्वा । नर्याणि । भोजना । द्युऽमन्तम् । वाजम् । वृषऽशुष्मम् । उत्ऽतमम् । आ । नः । रयिम् । ऋभवः । तक्षत । आ । वयः ॥

वेङ्कट० यूयम् अस्मभ्यम् स्तोतृभ्यः धनानि जानन्तः विश्वानि नृहितानि भोजनानि कुरुत । दीप्तिमत् अन्नम् वृषभबलम् उत्तमम् रयिम् च अस्मभ्यम् हे ऋभवः ! आ तक्षत आयुश्च ॥ ८ ॥

इह प्रजामिह रयिं रराणा इह श्रवो वीरवत्तक्षता नः ।
येन वयं चितयेमात्यन्यान्तं वाजं चित्रमृभवो ददा नः ॥ ९ ॥

इह । प्रऽजाम् । इह । रयिम् । रराणाः । इह । श्रवः । वीरऽवत् । तक्षत । नः । येन । वयम् । चितयेम । अति । अन्यान् । तम् । वाजम् । चित्रम् । ऋभवः । ददः । नः ॥ ९ ॥

वेङ्कट० रममाणाः यूयम् अस्मिन् यज्ञे प्रजाम् रयिम् वीरवत् अन्नं च कुरुत । येन अन्नेन वयम् अन्यान् अति[2] ज्ञायेमहि । तम् अन्नम् चायनीयम् हे ऋभवः ! दत्त नः ॥ ९ ॥

[1]इति तृतीयाष्टके सप्तमाध्याये अष्टमो वर्गः[1] ॥

[३७]

[3]वामदेवो गौतम ऋषिः । ऋभवो देवता । त्रिष्टुप् छन्दः, अन्त्यास्तिस्रोऽनुष्टुभः[3] ।

उप नो वाजा अध्वरमृभुक्षा देवा यात पथिभिर्देवयानैः ।
यथा यज्ञं मनुषो विक्ष्वा३सु दधिध्वे रण्वाः सुदिनेष्वह्नाम् ॥ १ ॥

१-१. ऋभ्र मन्ना. क. २. अति वि' अ'; मति वि' लप. ३-३. नास्ति मूको.

उप । नः । वाजाः । अध्वरम् । ऋभुक्षाः । देवाः । यात । पथिऽभिः । देवऽयानैः ।
यथा । यज्ञम् । मनुषः । विक्षु । आसु । दधिध्वे । रण्वाः । सुऽदिनेषु । अह्नाम् ॥ १ ॥

वेङ्कट० उप 'यात अस्मदध्वरम्' हे वाजाः ! हे ऋभवः ! [illegible] देवयानैः । यथा यज्ञम् मनोः प्रजापतेः [illegible] आसु प्रजासु धारयथ हे रमणीयाः ! अह्नाम् सुदिनत्वे सति । [illegible] कर्माधिकरणत्वात् । [illegible] ॥ १ ॥

ते वो हृदे मनसे सन्तु यज्ञा जुष्टासो अद्य घृतनिर्णिजो गुः ।
प्र वः सुतासो हरयन्त पूर्णाः क्रत्वे दक्षाय हर्षयन्त पीताः ॥ २ ॥

ते । वः । हृदे । मनसे । सन्तु । यज्ञाः । जुष्टासः । अद्य । घृतऽनिर्निजः । गुः ।
प्र । वः । सुतासः । हरयन्त । पूर्णाः । क्रत्वे । दक्षाय । हर्षयन्त । पीताः ॥ २ ॥

वेङ्कट० ते युष्माकम् यज्ञाः मनसे हृदयाय च प्रियाः सन्तु [illegible] । अद्य [illegible] गच्छन्तु । प्र [illegible] युष्मभ्यं सोमाः पूर्णाः प्रज्ञानाय बलाय च । पीताः युष्मान् हर्षयन्त्वाम् ॥ २ ॥

त्र्युदायं देवहितं यथा वः स्तोमो वाजा ऋभुक्षणो ददे वः ।
जुह्वे मनुष्वदुपरासु विक्षु युष्मे सचा बृहद्दिवेषु सोमम् ॥ ३ ॥

त्रिऽउदायम् । देवऽहितम् । यथा । वः । स्तोमः । वाजाः । ऋभुक्षणः । ददे । वः ।
जुह्वे । मनुष्वत् । उपरासु । विक्षु । युष्मे इति । सचा । बृहत्ऽदिवेषु । सोमम् ॥ ३ ॥

वेङ्कट० तृतीयसवने [illegible] यथा वः देवैर्निहितम्, यथा च हे वाजाः ! ऋभवः ! स्तोमः [illegible], तथाहम् जुहे युष्मासु सोमम् बृहद्दीप्तिषु [illegible] । यथा मनुः [illegible] निहितवान् तद्वदिति ॥ ३ ॥

पीवोअश्वाः शुचद्रथा हि भूतायःशिप्रा वाजिनः सुनिष्काः ।
इन्द्रस्य सूनो शवसो नपातोऽनु वश्चेत्यग्रियं मदाय ॥ ४ ॥

पीवःऽअश्वाः । शुचत्ऽरथाः । हि । भूत । अयःऽशिप्राः । वाजिनः । सुऽनिष्काः ।
इन्द्रस्य । सूनो इति । शवसः । नपातः । अनु । वः । चेति । अग्रियम् । मदाय ॥ ४ ॥

वेङ्कट० [illegible] दीप्तरथाः हि भवत[1] हिरण्मयशिरस्त्राणाः हे वाजिनः ! शोभननिष्काः । निष्कः[2] [illegible] । हे इन्द्रस्य [illegible] ! शवसः नपातः ! इति [illegible] । [illegible] । युष्माकं मुख्यं हविः अनु [illegible] मदाय ॥ ४ ॥

ऋभुमृभुक्षणो रयिं वाजे वाजिन्तमं युजम् । इन्द्रस्वन्तं हवामहे सदासातममश्विनम् ॥५॥

१-१ [illegible] वि॰ [illegible] २. [illegible] वि॰ [illegible] ३. [illegible] मूको. ४ [illegible] वि॰ [illegible] ५. [illegible] वि॰ [illegible] ६. [illegible] वि॰.

ऋभुम् । ऋभुक्षणः । रयिम् । वाजे । वाजिन्ऽतमम् । युजम् ।
इन्द्रस्वन्तम् । हवामहे । सदाऽसातमम् । अश्विनम् ॥ ५ ॥

वेङ्कट० दीप्तम्¹ हे ऋभवः! धनम् हवामहे। वाजे च सौधन्वने वाजिनतमेन च सहायभूतम् इन्द्रेण सहितं हवामहे सर्वदा ... दीप्यमानम् ऋभुभिः² अश्ववन्तम् ॥ ५ ॥

'इति तृतीयाष्टके सप्तमाध्याये नवमो वर्गः' ॥

सेदृ॑भवो॒ यम॑वथ यू॒यमिन्द्र॑श्च॒ मर्त्य॑म्। स धी॒भिर॑स्तु॒ सनि॑ता मे॒धसा॑ता॒ सो अर्व॑ता ॥६॥

सः । इत् । ऋभवः । यम् । अवथ । यूयम् । इन्द्रः । च । मर्त्यम् ।
सः । धीभिः । अस्तु । सनिता । मेधऽसाता । सः । अर्वता ॥ ६ ॥

वेङ्कट० सः एव भवति हे ऋभवः!, यम् रक्षथ मर्त्यम् यूयम् इन्द्रः च। सः³ कर्मभिः⁴ अस्तु सम्भक्ता यज्ञे ... हविषां दाता, अश्वेन च ॥ ६ ॥

वि नो॑ वाजा ऋभुक्षणः प॒थश्चि॑तन॒ यष्ट॑वे ।
अ॒स्मभ्यं॑ सूरयः स्तु॒ता विश्वा॒ आशा॑स्तरी॒षणि॑ ॥ ७ ॥

वि । नः । वाजाः । ऋभुक्षणः । पथः । चितन । यष्टवे ।
अस्मभ्यम् । सूरयः । स्तुताः । विश्वाः । आशाः । तरीषणि ॥ ७ ॥

वेङ्कट० हे वाजाः! ऋभवः! अस्माकं यागाय मार्गान् वि चिनुत। अस्मभ्यम्⁵ हे प्राज्ञाः⁶ ऋभवः! स्तुताः सर्वाः आशाः तरणनिमित्तं कुर्वन्तु ॥ ७ ॥

तं नो॑ वाजा ऋभुक्षण॒ इन्द्र॒ नास॑त्या र॒यिम् ।
सम॑श्वं॑ चर्ष॒णिभ्य॒ आ पु॒रु श॑स्त म॒घत्त॑ये ॥ ८ ॥

तम् । नः । वाजाः । ऋभुक्षणः । इन्द्र । नासत्या । रयिम् ।
सम् । अश्वम् । चर्षणिऽभ्यः । आ । पुरु । शस्त । मघत्तये ॥ ८ ॥

वेङ्कट० हे वाजादयः! अस्मभ्यम् तम् रयिम् सम्प्रयच्छत। तथा धनदानाय ... प्रजाभ्यः ... अश्वम् ... ॥ ८ ॥

'इति तृतीयाष्टके सप्तमाध्याये दशमो वर्गः' ॥

[३८]

'वामदेवो गौतम ऋषिः। दधिका देवता, आद्याया द्यावापृथिवी। त्रिष्टुप् छन्दः' ॥

उ॒तो हि वां॑ दा॒त्रा सन्ति॒ पूर्वा॒ या पू॒रुभ्य॑स्त्र॒सद॑स्युर्नितो॒शे ।
क्षे॒त्रा॒सां द॑दथुरुर्व॒रा॒सां घ॒नं दस्यु॑भ्यो अ॒भिभू॑तिमु॒ग्रम् ॥ १ ॥

१. ऋभु दी° वि¹. २. दध° वि² अर्थ. ३-३. नास्ति मूको. ४. नास्ति अर्थ. ५. अस्मभ्यं वि¹ अर्थ. ६. नास्ति मूको.

उतो इति । हि । वाम् । दात्रा । सन्ति । पूर्वा । या । पूरुऽभ्यः । त्रसदस्युः । निऽतोशे ।
क्षेत्रऽसाम् । ददथुः । उर्वराऽसाम् । घनम् । दस्युऽभ्यः । अभिऽभूतिम् । उग्रम् ॥ १ ॥

वेङ्कट० अपि च हे द्यावापृथिवी! युवयोः दानानि सन्ति पूर्वाणि, यानि क्षेमे दुर्भिक्षे मनुष्येभ्यः त्रसदस्युः । निधायायां युवां क्षेत्रदानम् ददथुः, एवम् उर्वरादानं च, हननम् दस्युभ्यः अभिभावुकम् उद्गूर्णम् ॥ १ ॥

उत वाजिनं पुरुनिष्षिध्वानं दधिक्रामु ददथुर्विश्वकृष्टिम् ।
ऋजिप्यं श्येनं प्रुषितप्सुमाशुं चर्कृत्यमर्यो नृपतिं न शूरम् ॥ २ ॥

उत । वाजिनम् । पुरुनिःऽसिध्वानम् । दधिऽक्राम् । ऊं इति । ददथुः । विश्वऽकृष्टिम् ।
ऋजिप्यम् । श्येनम् । प्रुषितऽप्सुम् । आशुम् । चर्कृत्यम् । अर्यः । नृऽपतिम् । न । शूरम् ॥ २ ॥

वेङ्कट० अपि च वाजिनम् बहूनां निषेद्धारम् यः ददाति दधत् क्रामति तम् ददथुः विश्वस्य कर्मणः कर्तारम् ऋजुगामिनम् गन्तारम् पुषद्वर्णम् व्यापकम् शुभं पुनः प्रशंस्यम् । राजा यथा शूरम् नृणां पतिं राष्ट्राय प्रयच्छति ॥ २ ॥

यं सीमनु प्रवतेव द्रवन्तं विश्वः पूरुर्मदति हर्षमाणः ।
पड्भिर्गृध्यन्तं मेधयुं न शूरं रथतुरं वातमिव ध्रजन्तम् ॥ ३ ॥

यम् । सीम् । अनु । प्रवताऽइव । द्रवन्तम् । विश्वः । पूरुः । मदति । हर्षमाणः ।
पट्ऽभिः । गृध्यन्तम् । मेधऽयुम् । न । शूरम् । रथऽतुरम् । वातम्ऽइव । ध्रजन्तम् ॥ ३ ॥

वेङ्कट० यम् अनु मदति प्रवणेषूदकमिव द्रवन्तम् सर्वः हृष्यन् मनुष्यः पादैः गमनमभिकाङ्क्षन्तम् मेधाभिकाङ्क्षिणम् इव शूरम् रथम् त्वरयन्तम् वातम् इव गच्छन्तम् ॥ ३ ॥

यः स्मारुन्धानो गध्या समत्सु सनुतरश्चरति गोषु गच्छन् ।
आविर्ऋजीको विदथा निचिक्यत्तिरो अरतिं पर्याप आयोः ॥ ४ ॥

यः । स्म । आऽरुन्धानः । गध्या । समत्ऽसु । सनुऽतरः । चरति । गोषु । गच्छन् ।
आविःऽऋजीकः । विदथा । निऽचिक्यत् । तिरः । अरतिम् । परि । आपः । आयोः ॥ ४ ॥

वेङ्कट० य खलु सङ्ग्रामेषु सर्वतो निरुन्धन् अभिकाङ्क्षणीयानि सनुतरः चरति गोनिमित्तम् गच्छन्, आविर्भूतकुटिलगतिः यागस्थानानि नियमेन जानन् 'मनुष्यस्य अरतिम्' परि तिरः करोति गच्छन् ॥ ४ ॥

१ निर्घो° क. २ कम° वि° क इवं ३ °भूत° इति° इवं ४ ४. मनुष्यहानि वि° क इवं.

उत स्मैनं वस्त्रमथिं न तायुमनु क्रोशन्ति क्षितयो भरेषु ।
नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथम् ॥ ५ ॥

उत । स्म । एनम् । वस्त्रऽमथिम् । न । तायुम् । अनु । क्रोशन्ति । क्षितयः । भरेषु ।
नीचा । अयमानम् । जसुरिम् । न । श्येनम् । श्रवः । च । अच्छ । पशुऽमत् । च । यूथम् ॥ ५ ॥

वेङ्कट० 'अपि च स्म एनम्' वस्त्रमाथिनम् (ऋ. सं॰ ४, २ ८) इव स्तेनम् अनु क्रोशन्ति क्षितयः सङ्ग्रामेषु, नीचैः अयमानम् क्षुधा हिंसितम् इव श्येनम्, धनम् पशुमत् यूथम् च प्रति ॥ ५ ॥

'इति तृतीयाष्टके सप्तमाध्याये षष्ठादशो वर्गः'।

उत स्मासु प्रथमः सरिष्यन् नि वेवेति श्रेणिभी रथानाम् ।
स्रजं कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत् किरणं ददश्वान् ॥ ६ ॥

उत । स्म । आसु । प्रथमः । सरिष्यन् । नि । वेवेति । श्रेणिऽभिः । रथानाम् ।
स्रजम् । कृण्वानः । जन्यः । न । शुभ्वा । रेणुम् । रेरिहत् । किरणम् । ददश्वान् ॥ ६ ॥

वेङ्कट० अपि च स्म आसु सेनासु प्रथमः सरिष्यन् रथानाम् पङ्क्तिः सह न्यक्' गच्छति पार्श्वयोः अनुष्याणां श्रेणिम्' कुर्वन् राजा इव शोभनः सङ्ग्रामोत्थम्' रेणुम्' लिहन् किरम् दीप्तिम् प्रयच्छन् ॥ ६ ॥

उत स्य वाजी सहुरिर्ऋतावा शुश्रूषमाणस्तन्वा समर्ये ।
तुरं यतीषु तुरयन्नृजिप्योऽधि भ्रुवोः किरते रेणुमृञ्जन् ॥ ७ ॥

उत । स्यः । वाजी । सहुरिः । ऋतऽवा । शुश्रूषमाणः । तन्वा । सऽमर्ये ।
तुरम् । यतीषु । तुरयन् । ऋजिप्यः । अधि । भ्रुवोः । किरते । रेणुम् । ऋञ्जन् ॥ ७ ॥

वेङ्कट० अपि च सः वाजी सहनवान् सत्यकर्मा मनुष्यान् वपुषा सङ्ग्रामे' शुश्रूषमाणः तूर्णम् गच्छन्तीषु सेनासु त्वरयन् ऋजुगामी मनुष्यान् भ्रुवोः अधि रेणुम् उत्किरति प्रयुञ्जन् प्रसाधयन्' ॥ ७ ॥

उत स्मास्य तन्यतोरिव द्योरृघायतो अभियुजो भयन्ते ।
यदा सहस्रमभि षीमयोधीद् दुर्वर्तुः स्मा भवति भीम ऋञ्जन् ॥ ८ ॥

उत । स्म । अस्य । तन्यतोःऽइव । द्योः । ऋघायतः । अभिऽयुजः । भयन्ते ।
यदा । सहस्रम् । अभि । सीम् । अयोधीत् । दुःऽवर्तुः । स्म । भवति । भीमः । ऋञ्जन् ॥ ८ ॥

---

१. नास्ति वि' कपं. २-२. नास्ति मूको. ३. त्यक् वि' अ'. ४. 'शीम वि' कपं. ५. 'मानं ति' कपं. ६. कनर वि' अ'. ७. नास्ति क कप. ८. साम' वि' अ'.

वेङ्कट० अपि च अस्य अश्वस्य इव दीप्तस्य हिंसतः 'अभियोक्तु' बिभ्यति । यथा महान्तम् महान्तो सर्वेत्र. अयोधीत्' कुर्वाणेऽश्वम सर्वान् तेन तम प्रसाधयन् ॥ ८ ॥

उत स्मास्य पनयन्ति जना जूतिं कृष्टिप्रो अभिभूतिमाशोः ।
उतैनमाहुः समिथे वियन्तः परा दधिक्रा असरत्सहस्रैः ॥ ९ ॥

उत । स्म । अस्य । पनयन्ति । जनाः । जूतिम् । कृष्टिऽप्रः । अभिऽभूतिम् । आशोः ।
उत । एनम् । आहुः । समऽइथे । विऽयन्तः । परा । दधिऽक्राः । असरत् । सहस्रैः ॥ ९ ॥

वेङ्कट० अपि च अस्य स्तुवन्ति जनाः वेगम् अभिभवितारं मनुष्याणां पूरयितुः अश्वस्य । अपि च एनम् आहुः सङ्ग्रामे गच्छन्तः, परा सरति पराक्रमैः देशान् सहस्रैः अश्वोऽयमिति ॥ ९ ॥

आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान ।
सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि ॥ १० ॥

आ । दधिऽक्राः । शवसा । पञ्च । कृष्टीः । सूर्यःऽइव । ज्योतिषा । अपः । ततान ।
सहस्रऽसाः । शतऽसाः । वाजी । अर्वा । पृणक्तु । मध्वा । सम् । इमा । वचांसि ॥ १० ॥

वेङ्कट० आ तनोति अश्वः बलेन सूर्यः इव तेजसा अपः पञ्च जनान् । शतसहस्रयोर्दाता बलवान् गन्ता अस्माकम् इमानि स्तोत्राणि मधुना सम् पर्चयतु ॥ १० ॥

'इति तृतीयाष्टके सप्तमाध्याये द्वादशो वर्गः' ॥

[३९]

'वामदेवो गौतम ऋषिः । दधिक्रा देवता । त्रिष्टुप् छन्दः, षष्ठी अनुष्टुप्' ।

आशुं दधिक्रां तमु नु ष्टवाम दिवस्पृथिव्या उत चर्किराम ।
उच्छन्तीर्मामुषसः सूदयन्त्वति विश्वानि दुरितानि पर्षन् ॥ १ ॥

आशुम् । दधिऽक्राम् । तम् । ऊं इति । नु । स्तवाम । दिवः । पृथिव्याः । उत । चर्किराम ।
उच्छन्तीः । माम् । उषसः । सूदयन्तु । अति । विश्वानि । दुःऽइतानि । पर्षन् ॥ १ ॥

वेङ्कट० आशुम् अश्वम् तम् एव क्षिप्रम् स्तवाम, द्यावापृथिव्योः सुखेन वर्तितुं यम् कर्तव्यं तम् पुनःपुनः कुर्मः । उच्छन्त्यः माम् उषसः कर्माणि प्रेरयन्तु, विश्वानि च दुरितानि अति नयन्तु ॥ १ ॥

१-१. 'धोरन्तु' इति वि'; नास्ति अ'. २. 'दोधतो वि'' अ; 'धोधा अ'। 'धोधि क्षयः मन्तुः वा स निरुक्तेः ३. 'नत्व न वि'. ४-४. नास्ति मूको.

महश्चर्कर्म्यर्वतः क्रतुप्रा दधिक्राव्णः पुरुवारस्य वृष्णः ।
यं पूरुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा ततुरिम् ॥ २ ॥

महः । चर्कर्मि । अर्वतः । क्रतुऽप्राः । दधिऽक्राव्णः । पुरुऽवारस्य । वृष्णः ।
यम् । पूरुऽभ्यः । दीदिऽवांसम् । न । अग्निम् । ददथुः । मित्रावरुणा । ततुरिम् ॥ २ ॥

वेङ्कट० महतः पुनःपुनः[1] करोमि स्तुतिम् विक्रान्तस्य च[2] अश्वस्य, यज्ञस्य कर्मणां पूरयिता दधिक्राव्णः 'बहूनां वरणीयस्य' सेक्तुः । यम्[3] मनुष्येभ्यः दीप्यमानम् इव अग्निम् शत्रूणामभिभवितारं ददथुः हे मित्रावरुणौ ! तारकम् ॥ २ ॥

यो अश्वस्य दधिक्राव्णो अकारीत्समिद्धे अग्ना उषसो व्युष्टौ ।
अनागसं तमदितिः कृणोतु स मित्रेण वरुणेना सजोषाः ॥ ३ ॥

यः । अश्वस्य । दधिऽक्राव्णः । अकारीत् । सम्ऽइद्धे । अग्नौ । उषसः । विऽउष्टौ ।
अनागसम् । तम् । अदितिः । कृणोतु । सः । मित्रेण । वरुणेन । सऽजोषाः ॥ ३ ॥

वेङ्कट० यः अश्वस्य दधिक्राव्णः कर्म करोति अग्नौ समिद्धे उषसि, तम् अनपराधं पृथिवी करोतु । सः मित्रावरुणाभ्याम् अहोरात्राधिपतिभ्यां सङ्गतो भवतु ॥ ३ ॥

दधिक्राव्ण इष ऊर्जो महो यदमन्महि मरुतां नाम भद्रम् ।
स्वस्तये वरुणं मित्रमग्निं हवामह इन्द्रं वज्रबाहुम् ॥ ४ ॥

दधिऽक्राव्णः । इषः । ऊर्जः । महः । यत् । अमन्महि । मरुताम् । नाम । भद्रम् ।
स्वस्तये । वरुणम् । मित्रम् । अग्निम् । हवामहे । इन्द्रम् । वज्रऽबाहुम् ॥ ४ ॥

वेङ्कट० अश्वस्य[4] सर्वैः स्तूयमानस्य सर्वान् ऊर्जयतः यदा महतः, स्तुमः मरुताम् च नाम भजनीयम्, तदानीमिन्द्रादींश्च स्वस्तये[5] हवामहे इति । देवैः सहाश्वं च कीर्तयति ॥

इन्द्रमिवेदुभये वि ह्वयन्त उदीराणा यज्ञमुपप्रयन्तः ।
दधिक्रामु सूदनं मर्त्याय ददथुर्मित्रावरुणा नो अश्वम् ॥ ५ ॥

इन्द्रम्ऽइव । इत् । उभये । वि । ह्वयन्ते । उत्ऽईराणाः । यज्ञम् । उपऽप्रयन्तः ।
दधिऽक्राम् । ऊँ इति । सूदनम् । मर्त्याय । ददथुः । मित्रावरुणा । नः । अश्वम् ॥ ५ ॥

१. नास्ति वि[?] ... २. च वि[?]; नास्ति मू. ३-३. 'यामाश्व' वि मूको. ४. अश्व. क मूको. ५. नास्ति मूको.

वेङ्कट० इन्द्रम् इव [illegible] उभये [illegible]. [illegible] महान्तो पुत्रार्थम् [illegible] यज्ञम् च प्रकाशम् [illegible]। दधिक्रावाणम् [illegible] हे मित्रावरुणौ! [illegible] ॥ ५ ॥

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥ ६ ॥

दधिऽक्राव्णः । अकारिषम् । जिष्णोः । अश्वस्य । वाजिनः ।
सुरभि । नः । मुखा । करत् । प्र । नः । आयूंषि । तारिषत् ॥ ६ ॥

वेङ्कट० दधिक्राव्णः[1] करोमि [illegible] जयशीलस्य अश्वस्य बलवतः । सुरभीणि अस्माकम् मुखानि करोतु, प्रतरतु[2] च अस्माकम् आयूंषि ॥ ६ ॥

'इति चतुर्थाष्टके सप्तमाध्याये त्रयोविंशो वर्गः' ॥

[४०]

'वामदेवो गौतम ऋषिः । दधिक्रा देवता, पञ्चम्या सूर्यः । जगती छन्दः, आद्या त्रिष्टुप्' ।

दधिक्राव्ण इदु नु चर्किराम विश्वा इन्मामुषसः सूदयन्तु ।
अपामग्नेरुषसः सूर्यस्य बृहस्पतेराङ्गिरसस्य जिष्णोः ॥ १ ॥

दधिऽक्राव्णः । इत् । ऊं इति । नु । चर्किराम । विश्वाः । इत् । माम् । उषसः । सूदयन्तु ।
अपाम् । अग्नेः । उषसः । सूर्यस्य । बृहस्पतेः । आङ्गिरसस्य । जिष्णोः ॥ १ ॥

वेङ्कट० दधिक्राव्णः एव [illegible] विकिराम । सर्वाः एव उषसः माम् [illegible] प्रेरयन्तु । [illegible][3] च [illegible] कर्माणि ॥ १ ॥

सत्वा भरिषो गविषो दुवन्यसच्छ्रवस्यादिष उषसस्तुरण्यसत् ।
सत्यो द्रवो द्रवरः पतङ्गरो दधिक्रावेषमूर्जं स्वर्जनत् ॥ २ ॥

सत्वा । भरिषः । गोऽइषः । दुवन्यऽसत् । श्रवस्यात् । इषः । उषसः । तुरण्यऽसत् ।
सत्यः । द्रवः । द्रवरः । पतङ्गरः । दधिऽक्रावा । इषम् । ऊर्जम् । स्वः । जनत् ॥ २ ॥

वेङ्कट० गमनशीलः भरणशीलः गवामेष्टा परिचरणकुशले सीदन् [illegible] उषसः [illegible] सीदन् । सत्यवदः द्रवणशीलः द्रवरः[4] च पतन् गमनवान् क्षिप्रगामी दधिक्रावा अन्नं[5] रसं च सर्वम् जनयति ॥ २ ॥

१. नास्ति वि[१] मूको. २. प्रतरतु च मूको. ३-३. नास्ति मूको. ४. [illegible] वि[१] [illegible]; [illegible] मूको. ५. [illegible] वि[१] [illegible]; [illegible] वि[१] [illegible]. ६. नास्ति वि[१] मूको.

उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः ॥ ३ ॥

उत । स्म । अस्य । द्रवतः । तुरण्यतः । पर्णम् । न । वेः । अनु । वाति । प्रगर्धिनः ।
श्येनस्यऽइव । ध्रजतः । अङ्कसम् । परि । दधिऽक्राव्णः । सह । ऊर्जा । तरित्रतः ॥ ३ ॥

वेङ्कट० अपि च स्म अस्य द्रवतः त्वरमाणस्य अनुगमम् उभयपार्श्वस्थं कल्याणिकम् पर्णम् इव पक्षिणः परि अनु गच्छति अत्यन्तमभिकाङ्क्षमाणस्य गमनम् श्येनस्य इव गच्छतः पर्णम् दधिक्राव्णः सह बलेन तरतः ॥ ३ ॥

उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि ।
क्रतुं दधिक्रा अनु संतवीत्वत् पथामङ्कांस्यन्वापनीफणत् ॥ ४ ॥

उत । स्यः । वाजी । क्षिपणिम् । तुरण्यति । ग्रीवायाम् । बद्धः । अपिऽकक्षे । आसनि ।
क्रतुम् । दधिऽक्राः । अनु । सम्ऽतवीत्वत् । पथाम् । अङ्कांसि । अनु । आऽपनीफणत् ॥ ४ ॥

वेङ्कट० अपि च स वाजी अश्वारोहस्य क्षेपणम् अनु तूर्णमश्नुते बध्यमानः ग्रीवायाम् बद्धः कक्षयोः आस्ये च । गमनकर्म सन्तन्वन् दधिक्राः मार्गाणाम्[1] कुटिलानि[2] अनु आपनीफणत्[3] गच्छति । मांसिकर्मसु पठितः फणिः ॥ ४ ॥

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥ ५ ॥

हंसः । शुचिऽसत् । वसुः । अन्तरिक्षऽसत् । होता । वेदिऽसत् । अतिथिः । दुरोणऽसत् ।
नृऽसत् । वरऽसत् । ऋतऽसत् । व्योमऽसत् । अप्ऽजाः । गोऽजाः । ऋतऽजाः । अद्रिऽजाः । ऋतम् ॥ ५ ॥

वेङ्कट० सौरी । 'हंसः सूर्यः', वसुः वायुः, होता अग्निः अतिथिः च । महानात्मैकस्त्रिधा[4] स्थितः[4] । ब्राह्मणम् — एष वै हंसः शुचिषत् (ऐब्रा ४,२०.) इति ॥ ५ ॥

[5]इति तृतीयाष्टके सप्तमाध्याये चतुर्दशो वर्गः[5] ॥

[४१]

[6]वामदेवो गौतम ऋषिः । इन्द्रावरुणौ देवता । त्रिष्टुप् छन्दः[6] ।

इन्द्रा को वां वरुणा सुम्नमाप स्तोमो हविष्माँ अमृतो न होता ।
यो वां हृदि क्रतुमाँ अस्मदुक्तः पस्पर्शदिन्द्रावरुणा नमस्वान् ॥ १ ॥

१. नास्ति वि' अ. २. मार्गा- लपं; मार्गा वि'. ३. °णम् वि' लपं. ४-४. °त्मा नैक° वि' लपं, °त्मनैक° वि' अ'; °त्मवनैक° अ. ५-५. नास्ति मूको. ६. °ऋषिर्बामिश्रा वि' लपं. ७. नास्ति वि'.

इन्द्रा॑ । कः । वा॒म् । व॒रु॒णा॒ । सु॒म्नम् । आ॒प॒ । स्तोमः॑ । ह॒विष्मा॑न् । अ॒मृतः॑ । न । होता॑ ।
यः । वा॒म् । हृ॒दि । क्रतु॑ऽमान् । अ॒स्मत् । उ॒क्तः । प॒स्पर्श॑त् । इ॒न्द्रा॒व॒रु॒णा॒ । नम॑स्वान् ॥ १ ॥

वेङ्कट० हे इन्द्रावरुणौ! कीदृशः युवयोः सुखं प्राप्नोति स्तोमः हविषा युक्तः अमृत इव होता भक्तिः, यः युवयोः हृदये स्तोमः कर्मवान् अस्माभिः उक्तः स्पृशति हे इन्द्रावरुणौ!। अभिप्रेता हविष्मान् स्तुतिः इत्यर्थः स्पृशति, तद्वत् स्पृशतीति ॥ १ ॥

इन्द्रा॑ ह॒ यो वरु॑णा च॒क्र आ॒पी दे॒वौ मर्तः॑ स॒ख्याय॒ प्रय॑स्वान् ।
स ह॑न्ति वृ॒त्रा स॑मि॒थेषु॒ शत्रू॒नवो॑भिर्वा म॒हद्भिः॒ स प्र शृ॑ण्वे ॥ २ ॥

इन्द्रा॑ । ह॒ । यः । वरु॑णा । च॒क्रे । आ॒पी इति॑ । दे॒वौ । मर्तः॑ । स॒ख्याय॑ । प्रय॑स्वान् ।
सः । ह॒न्ति॒ । वृ॒त्रा । स॒म्ऽइ॒थेषु॑ । शत्रू॑न् । अवः॑ऽभिः । वा॒ । म॒हत्ऽभिः॑ । सः । प्र । शृ॒ण्वे॒ ॥ २ ॥

वेङ्कट० यः इन्द्रावरुणौ बन्धू करोति देवौ मनुष्यः सख्याय च करोति अन्नवान्, सः हन्ति उपद्रवाणि सङ्ग्रामेषु च शत्रून्, रक्षणैः च महद्भिः स प्र श्रूयते ॥ २ ॥

इन्द्रा॑ ह॒ रत्नं॒ वरु॑णा॒ धेष्ठे॒त्था नृभ्यः॑ शशमा॒नेभ्य॒स्ता ।
यदी॒ सखा॑या स॒ख्याय॒ सोमैः॑ सु॒तेभिः॑ सुप्र॒यसा॑ मा॒दयै॑ते ॥ ३ ॥

इन्द्रा॑ । ह॒ । रत्न॑म् । वरु॑णा । धेष्ठा॑ । इ॒त्था । नृऽभ्यः॑ । श॒श॒मा॒नेभ्यः॑ । ता ।
यदि॑ । सखा॑या । स॒ख्याय॑ । सोमैः॑ । सु॒तेभिः॑ । सु॒ऽप्र॒यसा॑ । मा॒दयै॑ते॒ इति॑ ॥ ३ ॥

वेङ्कट० इन्द्रावरुणौ युवाम् दातृतमौ रत्नम् दातारौ इत्थम् नृभ्यः शशमानेभ्यः तौ। यदि इति स्पष्टम् ॥ ३ ॥

इन्द्रा॑ यु॒वं व॑रुणा दि॒द्युम॑स्मि॒न्नोजि॑ष्ठमुग्रा॒ नि व॑धिष्टं॒ वज्र॑म् ।
यो नो॑ दु॒रेवो॑ वृ॒कति॑र्द॒भीति॒स्तस्मि॑न्मिमाथाम॒भिभू॒त्योजः॑ ॥ ४ ॥

इन्द्रा॑ । यु॒वम् । व॒रु॒णा॒ । दि॒द्युम् । अ॒स्मि॒न् । ओजि॑ष्ठम् । उ॒ग्रा॒ । नि । व॒धि॒ष्ट॒म् । वज्र॑म् ।
यः । नः॒ । दुः॒ऽएवः॑ । वृ॒कतिः॑ । द॒भीतिः॑ । तस्मि॑न् । मि॒मा॒था॒म् । अ॒भिऽभू॑ति । ओजः॑ ॥ ४ ॥

वेङ्कट० हे इन्द्रावरुणौ! युवाम् आयुधम् ओजस्वितमम् अस्मिन् शत्रौ हे उद्गूर्णौ! नि पातयतम्। यः नः दुरागमनः स्तेनः हिंसकः, तस्मिन् कुरुतम् अभिभवितृ बलम् ॥ ४ ॥

१. °रौ मूको. २. द्र. वेप ३.४ √ स्पृश् इत्यत्र; °स्पृशम् वि° म°; °स्पृशम् म° मूको°. ३. कर्मसु वि° म° ल° अ°. ४. नास्ति वि° अ° ल° म°. ५. °भावितृ वि° अ°.

इन्द्रा युवं वरुणा भूतमस्या धियः प्रेतारा वृषभेव धेनोः ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥ ५ ॥

इन्द्रा । युवम् । वरुणा । भूतम् । अस्याः । धियः । प्रेतारा । वृषभाऽइव । धेनोः ।
सा । नः । दुहीयत् । यवसाऽइव । गत्वी । सहस्रऽधारा । पयसा । मही । गौः ॥ ५ ॥

वेङ्कट० इन्द्रावरुणौ! युवाम् अस्य कर्मणः प्रीणयितारौ भवतम् वृषभाविव धेनोः । तद् कर्म अस्माकं दुग्धाम्[1], यथा यवसानि गत्वा महती सहस्रधारा पयसा गौः दुग्धे ॥ ५ ॥

"इति तृतीयाष्टके सप्तमाध्याये पञ्चदशो वर्गः" ॥

तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये ।
इन्द्रा नो अत्र वरुणा स्यातामवोभिर्दस्मा परितक्म्यायाम् ॥ ६ ॥

तोके । हिते । तनये । उर्वरासु । सूरः । दृशीके । वृषणः । च । पौंस्ये ।
इन्द्रा । नः । अत्र । वरुणा । स्याताम् । अवःऽभिः । दस्मा । परिऽतक्म्यायाम् ॥ ६ ॥

वेङ्कट० पुत्रे हिते सुखकरे पौत्रे क्षेत्रेषु सूर्यस्य दर्शने युद्धे च [illegible] तत्र सर्वत्र इन्द्रावरुणौ भवताम् नः रक्षणैः दर्शनीयौ [illegible] ॥ ६ ॥

युवामिद्ध्यवसे पूर्व्याय परि प्रभूती गविषः स्वापी ।
वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शम्भू ॥ ७ ॥

युवाम् । इत् । हि । अवसे । पूर्व्याय । परि । प्रभूती इति प्रऽभूती । गोऽइषः । स्वापी इति सुऽआपी । वृणीमहे । सख्याय । प्रियाय । शूरा । मंहिष्ठा । पितराऽइव । शम्भू इति शम्ऽभू ॥ ७ ॥

वेङ्कट० युवाम् एव हि रक्षणाय पुरातनाय परि वृणीमहे प्रभूतौ [illegible][2] इन्द्रावरुणौ सोमवन्तम्, सख्याय च प्रियाय शूरौ दातृतमौ पितराविव सुखस्य भावयितारौ ॥ ७ ॥

ता वां धियोऽवसे वाजयन्तीराजिं न जग्मुर्युवयूः सुदानू ।
श्रिये न गाव उप सोममस्थुरिन्द्रं गिरो वरुणं मे मनीषाः ॥ ८ ॥

ताः । वाम् । धियः । अवसे । वाजऽयन्तीः । आजिम् । न । जग्मुः । युवऽयूः । सुदानू इति सुऽदानू ।
श्रिये । न । गावः । उप । सोमम् । अस्थुः । इन्द्रम् । गिरः । वरुणम् । मे । मनीषाः ॥ ८ ॥

---

१. [illegible] २-२. नास्ति मूको. ३. [illegible] मूको.

वेङ्कट० तानि' वाम् कर्माणि [illegible] गृहम् इव गच्छन्ति हे सोमपातारौ'। यथा [illegible] उपतिष्ठन्ति', एवम् इन्द्रावरुणौ मदीयाः गिरः [illegible] च उपतिष्ठन्ति ॥ ८॥

इमा इन्द्रं वरुणं मे मनीषा अग्मन्नुप द्रविणमिच्छमानाः।
उपेमस्थुर्जोष्टार इव वस्वो रघ्वीरिव श्रवसो भिक्षमाणाः॥ ९॥

इमाः। इन्द्रम्। वरुणम्। मे। मनीषाः। अग्मन्। उप। द्रविणम्। इच्छमानाः।
उप। ईम्। अस्थुः। जोष्टारःऽइव। वस्वः। रघ्वीःऽइव। श्रवसः। भिक्षमाणाः॥ ९॥

वेङ्कट० मदीया' इमा मनीषा' धनम् इच्छमाना उप गच्छन्ति इन्द्रावरुणौ। 'उप अस्थुः' एनौ धनस्य जोष्टार इव याचकाः' आत्मीयं [illegible] इव च प्रजाः अन्नम् भिक्षमाणाः ॥ ९॥

अश्व्यस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम।
ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचन्ताम्॥ १०॥

अश्व्यस्य। त्मना। रथ्यस्य। पुष्टेः। नित्यस्य। रायः। पतयः। स्याम।
ता। चक्राणा। ऊतिऽभिः। नव्यसीभिः। अस्मऽत्रा। रायः। निऽयुतः। सचन्ताम्॥ १०॥

वेङ्कट० अश्वसङ्घस्य आत्मनैव रथसङ्घस्य पुष्टेः च नित्यस्य च धनस्य पतयः स्याम। तौ कुर्वाणौ रक्षाभिः नवतराभिः अस्मदभिमुखानि धनानि नियुतः च अस्मान् सचन्ताम् ॥ १०॥

आ नो बृहन्ता बृहतीभिरूती इन्द्र यातं वरुण वाजसातौ।
यद्दिद्यवः पृतनासु प्रक्रीळान्तस्य वां स्याम सनितार आजेः॥ ११॥

आ। नः। बृहन्ता। बृहतीभिः। ऊती। इन्द्र। यातम्। वरुण। वाजऽसातौ।
यत्। दिद्यवः। पृतनासु। प्रऽक्रीळान्। तस्य। वाम्। स्याम। सनितारः। आजेः॥ ११॥

वेङ्कट० आ यातम् अस्मान् महान्तौ महतीभिः रक्षाभिः हे इन्द्रावरुणौ' सङ्ग्रामे। यदि दीप्यमाना योद्धारः पृतनासु प्रक्रीडन्ति, युवयोः त्वरया वयम् तस्य सङ्ग्रामस्य सम्भक्तारः स्याम ॥ ११॥

'इति तृतीयाष्टके सप्तमाध्याये षोडशो वर्गः'।

[४२]

'त्रसदस्युः पौरुकुत्स्य ऋषिः। त्रसदस्युर्देवता, अन्त्यानां चतसृणाम् इन्द्रावरुणौ। त्रिष्टुप् छन्दः'।

मम द्विता राष्ट्रं क्षत्रियस्य विश्वायोर्विश्वे अमृता यथा नः।
क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः॥ १॥

१ तौ मूको. २. 'इदं मूको. ३. नास्ति वि'. ४-४ उपेमस्थु वि' ह. ५ [illegible] मूको. ६-६. नास्ति मूको.

मम । द्विता । राष्ट्रम् । क्षत्रियस्य । विश्वऽआयोः । विश्वे । अमृताः । यथा । नः ।
क्रतुम् । सचन्ते । वरुणस्य । देवाः । राजामि । कृष्टेः । उपमस्य । वव्रेः ॥ १ ॥

वेङ्कट० त्रसदस्युः पौरुकुत्स्यः । पदार्थाः तस्य आत्मसंस्तवः । मम द्विधा भवति राष्ट्रम् क्षत्रियस्य पृथिव्यां दिवि चेन्द्ररूपेण सर्वस्य देवस्य राष्ट्रम्. सर्वे देवाः यथा अस्माकं वशवर्तिनो भवन्ति । एतदेवाह– क्रतुम् इति । वरुणभूतस्य मम 'कर्म सेवन्ते' 'देवाः वरुणमनुतिष्ठन्ति', तथैव-रूपं भवामि कृष्टेः अन्तिमभूतस्य 'पृथिव्यां वर्तमानस्य' मनुष्यादस्मत्युभयस्य तत एव प्रीणीतेति ॥ १ ॥

अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयन्त ।
क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥ २ ॥

अहम् । राजा । वरुणः । मह्यम् । तानि । असुर्याणि । प्रथमा । धारयन्त ।
क्रतुम् । सचन्ते । वरुणस्य । देवाः । राजामि । कृष्टेः । उपमस्य । वव्रेः ॥ २ ॥

वेङ्कट० अहम् राजा वरुणः भवामि, मह्यम् तानि पुरातनानि असुरवधनिमित्तानि कर्माणि सर्वे देवा अधारयन्त । वहनोत्क्षेपणादिकं ममाज्ञया अनुतिष्ठन्ति । तदेवोक्तम्– क्रतुम् इति ॥ २ ॥

अहमिन्द्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमेके ।
त्वष्टेव विश्वा भुवनानि विद्वान्त्समैरयं रोदसी धारयं च ॥ ३ ॥

अहम् । इन्द्रः । वरुणः । ते इति । महिऽत्वा । उर्वी इति । गभीरे इति । रजसी इति । सुमेके इति सुऽमेके ।
त्वष्टाऽइव । विश्वा । भुवनानि । विद्वान् । सम् । ऐरयम् । रोदसी इति । धारयम् । च ॥ ३ ॥

वेङ्कट० अहम् इन्द्रः च वरुणः च भवामि, ते एव द्यावापृथिव्यौ माहात्म्येन उर्वी गम्भीरे शोभमाने । यथा त्वष्टा विद्वान् सर्वाणि भूतानि प्रकम्पयति धारयति च, तद्वदहमपीति ॥ ३ ॥

अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य ।
ऋतेन पुत्रो अदितेरृतावोत त्रिधातु प्रथयद्वि भूम ॥ ४ ॥

अहम् । अपः । अपिन्वम् । उक्षमाणाः । धारयम् । दिवम् । सदने । ऋतस्य ।
ऋतेन । पुत्रः । अदितेः । ऋतऽवा । उत । त्रिऽधातु । प्रथयत् । वि । भूम ॥ ४ ॥

१. नास्ति स सर्व. २. एतदाह वि° भ°. ३-३. °स्ते° वि° भ°. ४-४. देवानुतिष्ठन्तु° (°भि° मूर्ध) मूको, देवा अनुकुर्वन्°, देवा अनुकुर्वन्° भा स मस्ताये. ५. °ः स मप. ६-६. नास्ति वि° मूर्ध. ७. °माद् ५° स मस्ताम. ८. नास्ति वि° स मूर्ध.

वेङ्कट० अहम् अपः सिञ्चामि आदित्यम्, अन्तरिक्षलोकम् 'धारयम् उदकस्य' धारयामि । अथ प्रत्यक्षमाह । अदितेः पुत्रः ऋतवान् यज्ञेन उदकेन वा त्रिधातु भूमिं विस्तारितवान् । त्रिधातुः पृथिवी भवति । 'तिस्रो भूमीः' (ऋ २,२७,८) इति मन्त्रः ॥ ४ ॥

मां नरः स्वश्वा वाजयन्तो मां वृताः समरणे हवन्ते ।
कृणोम्याजिं मघवाहमिन्द्र इयर्मि रेणुमभिभूत्योजाः ॥ ५ ॥

माम् । नरः । सुऽअश्वाः । वाजयन्तः । माम् । वृताः । सम्ऽअरणे । हवन्ते ।
कृणोमि । आजिम् । मघऽवा । अहम् । इन्द्रः । इयर्मि । रेणुम् । अभिभूतिऽओजाः ॥ ५ ॥

वेङ्कट० 'माम् नरः' शोभनाश्वाः बलिनं कुर्वन्तः हवन्ते, माम् एव सङ्ग्रामे शत्रुभिः वृताः । करोमि युद्धम् अहम् मघवा इन्द्रः सन्, प्रेरयामि च युद्धे रेणुम् अभिभावुकबलः ॥ ५ ॥

"इति तृतीयाष्टके सप्तमाध्याये सप्तदशो वर्गः" ॥

अहं ता विश्वा चकरं नकिर्मा दैव्यं सहो वरते अप्रतीतम् ।
यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी अपारे ॥ ६ ॥

अहम् । ता । विश्वा । चकरम् । नकिः । मा । दैव्यम् । सहः । वरते । अप्रतिऽइतम् ।
यत् । मा । सोमासः । ममदन् । यत् । उक्था । उभे इति । भयेते इति । रजसी इति । अपारे इति ॥ ६ ॥

वेङ्कट० अहम् तानि वृत्रवधादीनि सर्वाणि कर्माणि कृतवानस्मि । न[1] 'कश्चित् माम् दैवमपि बलम् शत्रुभिरप्रतिगतम्' वारयति[2] । यदा[3] माम् सोमाः मादयन्ति, यदा[4] च उक्थानि, तदा उभे अपि लोकौ महतो बिभ्यतः अपर्यन्तपारे । इन्द्रावरुणात्मानमजानीतो नूनं कदाचिदात्मानं प्रशशंसतुरिति ॥ ६ ॥

विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः ।
त्वं वृत्राणि शृण्विषे जघन्वान्त्वं वृताँ अरिणा इन्द्र सिन्धून् ॥ ७ ॥

विदुः । ते । विश्वा । भुवनानि । तस्य । ता । प्र । ब्रवीषि । वरुणाय । वेधः ।
त्वम् । वृत्राणि । शृण्विषे । जघन्वान् । त्वम् । वृतान् । अरिणाः । इन्द्र । सिन्धून् ॥ ७ ॥

वेङ्कट० तस्य तव हे इन्द्र ! विश्वानि कर्माणि जानन्ति[5] भूतानि । तानि च हे विधातः[6] वरुणाय सखये प्र ब्रवीषि । त्वम् वृत्राणि हतवान् श्रूयसे । त्वम् वृत्रेण वृतान् इन्द्र ! निरगमयः सिन्धून्[7] ॥ ७ ॥

१-१. मादयन्तुः मूको. २. त्रिधातु वि[8]. ३-३. नास्ति वि. ४-४. नास्ति मूको. ५. नास्ति वि[9]. ६. नास्ति मूको. ७. धा[10] हपं. ८. यदा मूको. ९. जानन्ति वि[11] हपं

अस्माकमत्र पितरस्त आसन्त्सप्त ऋषयो दौर्गहे बध्यमाने ।
त आयजन्त त्रसदस्युमस्या इन्द्रं न वृत्रतुरमर्धदेवम् ॥ ८ ॥

अस्माकम् । अत्र । पितरः । ते । आसन् । सप्त । ऋषयः । दौःऽगहे । बध्यमाने ।
ते । आ । अयजन्त । त्रसदस्युम् । अस्याः । इन्द्रम् । न । वृत्रऽतुरम् । अर्धऽदेवम् ॥ ८ ॥

वेङ्कट० 'अस्माकम् अस्मिन् लोके ये पितरः आसन् सप्त ऋषयः दुर्गहकुलजाते मयि शत्रुभिः बध्यमाने । ...न्द्रस्य माहात्म्यमिदम् । अथेन्द्राभिवृद्धिं मम् ते आ अयजन्त' तत्र त्रसदस्युम् अस्याः पृथिव्याः इन्द्रम् इव वृत्राणां हन्तारम् अर्धदेवम् इन्द्रस्य स्थाने त्रसदस्युश्च । ...मिन्द्रविहितमयजन्तेति ॥ ८ ॥

पुरुकुत्सानी हि वामदाशद्धव्येभिरिन्द्रावरुणा नमोभिः ।
अथा राजानं त्रसदस्युमस्या वृत्रहणं ददथुरर्धदेवम् ॥ ९ ॥

पुरुऽकुत्सानी । हि । वाम् । अदाशत् । हव्येभिः । इन्द्रावरुणा । नमःऽभिः ।
अथ । राजानम् । त्रसदस्युम् । अस्याः । वृत्रऽहनम् । ददथुः । अर्धऽदेवम् ॥ ९ ॥

वेङ्कट० त्रसदस्योर्माता पुरुकुत्सस्य स्त्री वाम् हि दानं कृतवती हे इन्द्रावरुणौ हविर्भिः नमस्कारैश्च युक्ता । तौ युवां प्रीतौ त्रसदस्युम् राजानम् वृत्राणां हन्तारम् अर्धदेवम् अस्याः पृथिव्याः ददथुः ॥९॥

राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुमिन्द्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् ॥ १० ॥

राया । वयम् । ससऽवांसः । मदेम । हव्येन । देवाः । यवसेन । गावः ।
ताम् । धेनुम् । इन्द्रावरुणा । युवम् । नः । विश्वाहा । धत्तम् । अनपऽस्फुरन्तीम् ॥ १० ॥

वेङ्कट० हे इन्द्रावरुणौ! त्वां भजमानाः 'वयम् धनेन' मदेम, यथा हव्येन देवाः मदन्ति यवसेन च गावः । तदर्थं ताम् धेनुम् हे इन्द्रावरुणौ! युवाम् अस्मभ्यं दत्तम् सर्वदा अनपस्फुरन्तीम् गुणवतीमिति ॥१०॥

'इति तृतीयाष्टके सप्तमाध्याये अष्टादशो वर्गः' ॥

[४३]

'पुरुमीळ्हाजमीळ्हौ सौहोत्रावृषी । अश्विनौ देवता । त्रिष्टुप् छन्दः' ।

क उ श्रवत्कतमो यज्ञियानां वन्दारु देवः कतमो जुषाते ।
कस्येमां देवीममृतेषु प्रेष्ठां हृदि श्रेषाम सुष्टुतिं सुहव्याम् ॥ १ ॥

१-१. नास्ति वि᳚ कपे. २. नास्ति कपं. ३. मामकम वि᳚. या वि᳚ अ᳚. ४. ता वि᳚ अ.
५. नतः वि᳚ अ᳚. ६-६. पदध᳚ वि᳚ कपं. ७. अंतस कपे. ८. अप्सरसु᳚ कपं. ९-९. नास्ति मूको.

कः । ऊँ इति । श्रवत् । कतमः । यज्ञियानाम् । वन्दारुः । देवः । कतमः । जुषाते ।
कस्य । इमाम् । देवीम् । अमृतेषु । प्रेष्ठाम् । हृदि । श्रेषाम । सुऽस्तुतिम् । सुऽहव्याम् ॥ १ ॥

वेङ्कट० पुरुमीळ्हाजमीळ्हौ[1] सौहोत्रौ । कः कतमः वा[2] शृणोति देवमध्ये स्तोत्रम् । कतमः देव सेवते । कस्य इमाम् देवेषु देवमध्ये प्रियतमाम् हृदये श्लेषयेम शोभनां स्तुतिम् हविर्युक्ताम् ॥ १ ॥

को मृळाति कतम आगमिष्ठो देवानामु कतमः शंभविष्ठः ।
रथं कमाहुर्द्रवदश्वमाशुं यं सूर्यस्य दुहितावृणीत ॥ २ ॥

कः । मृळाति । कतमः । आगमिष्ठः । देवानाम् । ऊँ इति । कतमः । शम्ऽभविष्ठः ।
रथम् । कम् । आहुः । द्रवत्ऽअश्वम् । आशुम् । यम् । सूर्यस्य । दुहिता । अवृणीत ॥ २ ॥

वेङ्कट० कः सुखयति । को वा आगन्तृतमः देवानाम् मध्ये । कतमः वा अत्यन्तं सुखमुत्पादयति । कम् वा रथम् आहुः क्षिप्राश्वम् क्षिप्रगामिनम्[3], यम्[4] रथम् अश्विनोः स्वभूतम् सूर्यस्य दुहिता स्वयंवरे अवृणीत । तथाऽश्विनावेव मृळयितारावित्यादि द्रष्टव्यम् ॥ २ ॥

मक्षू हि ष्मा गच्छथ ईवतो द्यूनिन्द्रो न शक्तिं परितक्म्यायाम् ।
दिव आजाता दिव्या सुपर्णा कया शचीनां भवथः शचिष्ठा ॥ ३ ॥

मक्षु । हि । स्म । गच्छथः । ईवतः । द्यून् । इन्द्रः । न । शक्तिम् । परिऽतक्म्यायाम् ।
दिवः । आऽजाता । दिव्या । सुऽपर्णा । कया । शचीनाम् । भवथः । शचिष्ठा ॥ ३ ॥

वेङ्कट० शीघ्रम् हि स्म युवाम् गच्छथः [5]गमनवतः प्रादुर्भूतान् दिवसान्, यथा इन्द्रः रात्र्यां शक्तिम् अधितिष्ठति । दिवः आजातौ दिवि भवौ सुपतनौ कया स्तुत्या कर्मणाम् अधीत भवथः[6] कर्मवत्तमौ[7] ॥ ३ ॥

का वां भूदुपमातिः कया न आश्विना गमथो हूयमाना ।
को वां महश्चित् त्यजसो अभीक उरुष्यतं माध्वी दस्रा न ऊती ॥ ४ ॥

का । वाम् । भूत् । उपऽमातिः । कया । नः । आ । अश्विना । गमथः । हूयमाना ।
कः । वाम् । महः । चित् । त्यजसः । अभीके । उरुष्यतम् । माध्वी इति । दस्रा । नः । ऊती ॥ ४ ॥

वेङ्कट० 'किम् कमनम् युवयोः उपमानं स्तोत्रम् । कया उपमित्या अस्मान् आहूयमानौ "आ गच्छथः" हे अश्विनौ' । कः वाम् महतः धनत्यागस्य समीपे भवति अस्मान् रक्षतम् मधुमता गमनेन हे दर्शनीयौ ॥ ४ ॥

---

१. 'पौरुकुत्सौ त्रि°' मू°; 'पौर' मूपं. २. नास्ति वि° मूपं. ३. °रम आह मूको. ४. ने मूको. ५-५. नास्ति वि° मूपं. † अन्तः वि° मू°. ६-६. नास्ति वि° मूपं ७-७. वाम° वि° अ मूपं; वा° वि° मू°.

उरु वां रथः परि नक्षति द्यामा यत् समुद्रादभि वर्तते वाम् ।
मध्वा माध्वी मधु वां प्रुषायन् यत् सीं वां पृक्षो भुरजन्त पक्वाः ॥ ५ ॥

उरु । वाम् । रथः । परि । नक्षति । द्याम् । आ । यत् । समुद्रात् । अभि । वर्तते । वाम् ।
मध्वा । माध्वी इति । मधु । वाम् । प्रुषायन् । यत् । सीम् । वाम् । पृक्षः । भुरजन्त । पक्वाः ॥५॥

वेङ्कट० महान् युवयोः रथः द्याम् परि गच्छति यदा अन्तरिक्षात् अभि आ वर्तते मनुष्यान् प्रति । वाम् इति पूरणम् । यदा युवयोः हे माध्वी! पक्वाः हृदयग्राः अन्नं भरन्ति, तदानीं मधुमन्तौ मधुना सहावितरं मधु सिञ्चन्ति ॥ ५ ॥

सिन्धुर्ह वां रसया सिञ्चदश्वान् घृणा वयोऽरुषासः परि ग्मन् ।
तदू षु वामजिरं चेति यानं येन पती भवथः सूर्यायाः ॥ ६ ॥

सिन्धुः । ह । वाम् । रसया । सिञ्चत् । अश्वान् । घृणा । वयः । अरुषासः । परि । ग्मन् ।
तत् । ऊँ इति । सु । वाम् । अजिरम् । चेति । यानम् । येन । पती इति । भवथः । सूर्यायाः ॥६॥

वेङ्कट० समुद्रः स्वभूतया नद्या युवयोः अश्वान् अभिषिञ्चत् । दीप्त्या युक्ताः युवयोः हृदयङ्गमाः आरोचमानाः परि गच्छन्ति । तत् युवयोः सुष्ठु ज्ञायते क्षिप्रम् यानम् । येन इति स्पष्टम् ॥ ६ ॥

इहेह यद् वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥ ७ ॥

इहऽइह । यत् । वाम् । समना । पपृक्षे । सा । इयम् । अस्मे इति । सुऽमतिः । वाजऽरत्ना ।
उरुष्यतम् । जरितारम् । युवम् । ह । श्रितः । कामः । नासत्या । युवद्रिक् ॥ ७ ॥

वेङ्कट० इह च इह च यत् वाम् समना सोम्या समानी सम्पृक्ता भवति, तत् सा इयम् अस्माकम् सुमतिः स्तुतिः हे रमणीयधनौ!' भवति । रक्षतं स्तोतारं युवां खलु । हे नासत्यौ! कामः 'युवाम् अभिगच्छन्' प्रतिगच्छन् भवति ॥ ७ ॥

'इति तृतीयाष्टके सप्तमाध्याये एकोनत्रिंशो वर्गः' ॥

[४४]

'पुरुमीळ्हाजमीळ्हौ सौहोत्रौ ऋषी । अश्विनौ देवता । त्रिष्टुप् छन्दः' ।

तं वां रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं गोः ।
यः सूर्यां वहति वन्धुरायुर्गिर्वाहसं पुरुतमं वसूयुम् ॥ १ ॥

१. यदा क्ष स्था. २. °स्वा मूको. ३-३. नास्ति° वि' क' कम, भवति मा° वि', भवतः यु' ख. ४-४. नास्ति मूको.

तम् । वाम् । रथम् । वयम् । अद्य । हुवेम । पृथुऽज्रयम् । अश्विना । सम्ऽगतिम् । गोः ।
यः । सूर्याम् । वहति । वन्धुरऽयुः । गिर्वाहसम् । पुरुऽतमम् । वसुऽयुम् ॥ १ ॥

वेङ्कट० तम् युवयोः रथम् वयम् अद्य ह्वयाम पृथुवेगम् हे अश्विनौ! सङ्गमनम् उदकस्य । यः सूर्यां दुहितरम् वहति बन्धुरवान् तं गिरां वोढारं महत्तमम् धनानीच्छन्तं ह्वयाम[1] ॥ १ ॥

युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः ।
युवोर्वपुरभि पृक्षः सचन्ते वहन्ति यत्ककुहासो रथे वाम् ॥ २ ॥

युवम् । श्रियम् । अश्विना । देवता । ताम् । दिवः । नपाता । वनथः । शचीभिः ।
युवोः । वपुः । अभि । पृक्षः । सचन्ते । वहन्ति । यत् । ककुहासः । रथे । वाम् ॥ २ ॥

वेङ्कट० युवाम् श्रियम् हे अश्विनौ! देवपुत्रौ[2] 'देवतानां मध्ये' ताम् भजथः कर्मभिः । युवयोः शरीरम् अन्नान्यभि[2] सेवन्ते, वहन्ति यदि महान्तः रथे वाम् ॥ २ ॥

को वामद्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः ।
ऋतस्य वा वनुषे पूर्व्याय नमो येमानो अश्विना ववर्तत् ॥ ३ ॥

कः । वाम् । अद्य । करते । रातऽहव्यः । ऊतये । वा । सुतऽपेयाय । वा । अर्कैः ।
ऋतस्य । वा । वनुषे । पूर्व्याय । नमः । येमानः । अश्विना । आ । ववर्तत् ॥ ३ ॥

वेङ्कट० कः वाम् अद्य करोति दत्तहविष्कः रक्षणाय सोमपानाय च स्तोत्रैः, यज्ञस्य वा सम्भजन् युवयोः पुरातनाय नमः नियच्छन् अश्विनौ[3] आ वर्तयति अभिमुखम् ॥ ३ ॥

हिरण्ययेन पुरुभू रथेनेमं यज्ञं नासत्योप यातम् ।
पिबाथ इन्मधुनः सोम्यस्य दधथो रत्नं विधते जनाय ॥ ४ ॥

हिरण्ययेन । पुरुभू इति पुरुऽभू । रथेन । इमम् । यज्ञम् । नासत्या । उप । यातम् ।
पिबाथः । इत् । मधुनः । सोम्यस्य । दधथः । रत्नम् । विधते । जनाय ॥ ४ ॥

वेङ्कट० हिरण्मयेन[4] रथेन बहुषु भवन्तौ । सिद्धं स्पष्टम् ॥ ४ ॥

आ नो यातं दिवो अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन ।
मा वामन्ये नि यमन्देवयन्तः सं यद्ददे नाभिः पूर्व्या वाम् ॥ ५ ॥

१. भाङ्ग' वि'. २-२. नास्ति वि' अपे. ३. नास्ति मूको. ४. नास्ति वि' अपे.

आ । नः । यातम् । दिवः । अच्छ । पृथिव्याः । हिरण्ययेन । सुऽवृता । रथेन ।
मा । वाम् । अन्ये । नि । यमन् । देवऽयन्तः । सम् । यत् । ददे । नाभिः । पूर्व्या । वाम् ॥५॥

वेङ्कट० निम्नगामायाः दिवः आ यातम् अस्मान् प्रति हिरण्मयेन सुवर्तनेन रथेन । मा युवाम् अन्ये नि यच्छन्तु यजमानाः । यस्मात्[1] अस्माभिः प्रथममेव युवयोः अन्तिकसाधनं स्तोत्रम् [illegible] ॥ ५ ॥

नू नो रयिं पुरुवीरं बृहन्तं दस्रा मिमाथामुभयेष्वस्मे ।
नरो यद् वामश्विना स्तोममावन्त्सधस्तुतिमाजमीळ्हासो अग्मन् ॥ ६ ॥

नु । नः । रयिम् । पुरुऽवीरम् । बृहन्तम् । दस्रा । मिमाथाम् । उभयेषु । अस्मे इति ।
नरः । यत् । वाम् । अश्विना । स्तोमम् । आवन् । सधऽस्तुतिम् । आजऽमीळ्हासः । अग्मन् ॥

वेङ्कट० 'हे दस्रौ!' क्षिप्रम् अस्माकम् पुत्रवीरम् महान्तम् रयिम् कुरुतम् । तथापि 'हे अश्विनौ!' उभयेषु अस्मासु पुरुमीळ्हाजमीळ्हेषु मनुष्या युवयोः क्रियमाणमिदं स्तोत्रं सुष्टुतया यदा गच्छन्ति, तदानीमजमीळ्हाः पुरुमीळ्हाश्च सह स्थित्वा स्तुतिम् गच्छन्ति सधस्तुतिमिच्छन्ति ॥ ६ ॥

इहेह यद् वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥ ७ ॥

इहऽइह । यत् । वाम् । समना । पपृक्षे । सा । इयम् । अस्मे इति । सुऽमतिः । वाजऽरत्ना ।
उरुष्यतम् । जरितारम् । युवम् । ह । श्रितः । कामः । नासत्या । युवद्रिक् ॥ ७ ॥

वेङ्कट० ऋ ४,४३,७ द्र. ॥ ७ ॥

[2]इति तृतीयाष्टके सप्तमाध्याये त्रिंशो वर्गः[2] ॥

[४५]

'वामदेवो गौतम ऋषिः । अश्विनौ देवता । जगती छन्दः, सप्तमी त्रिष्टुप्' ।

एष स्य भानुरुदियर्ति युज्यते रथः परिज्मा दिवो अस्य सानवि ।
पृक्षासो अस्मिन्मिथुना अधि त्रयो दृतिस्तुरीयो मधुनो वि रप्शते ॥ १ ॥

एषः । स्यः । भानुः । उत् । इयर्ति । युज्यते । रथः । परिऽज्मा । दिवः । अस्य । सानवि ।
पृक्षासः । अस्मिन् । मिथुना । अधि । त्रयः । दृतिः । तुरीयः । मधुनः । वि । रप्शते ॥ १ ॥

१. यस्मात् वि° भ°.   २-२. नास्ति मूको.

वेङ्कट० वामदेवः । सः एषः सूर्यः उत् एति । युज्यते च रथः परिज्मा अस्य दिवः अस्य समुच्छ्रिते देशे । अश्विनोरस्मिन् रथे व्याप्यमानेऽङ्गाने त्रिविधानि अन्नानि संश्लिष्टानि च भान्ति, तथा मधुनः पूर्णो भस्त्रा च वि राजते ॥ १ ॥

उद्वां पृक्षासो मधुमन्त ईरते रथा अश्वास उषसो व्युष्टिषु ।
अपोर्णुवन्तस्तम आ परीवृतं स्वर्ण शुक्रं तन्वन्त आ रजः ॥ २ ॥

उत् । वाम् । पृक्षासः । मधुऽमन्तः । ईरते । रथाः । अश्वासः । उषसः । विऽउष्टिषु ।
अपऽऊर्णुवन्तः । तमः । आ । परिऽवृतम् । स्वः । न । शुक्रम् । तन्वन्तः । आ । रजः ॥ २ ॥

वेङ्कट० उत् गच्छन्ति युवयोः अन्नादीनि प्राप्तः मधुसंयुक्तानि रथाः अश्वाः च वाम्, अपगमयन्तः परिवृत्य स्थितम्, उदकम् इव निर्मलं ज्योतिः सर्वतः विस्तारयन्तः इति ॥ २ ॥

मध्वः पिबतं मधुपेभिरासभिरुत प्रियं मधुने युञ्जाथां रथम् ।
आ वर्तनिं मधुना जिन्वथस्पथो दृतिं वहेथे मधुमन्तमश्विना ॥ ३ ॥

मध्वः । पिबतम् । मधुऽपेभिः । आसऽभिः । उत । प्रियम् । मधुने । युञ्जाथाम् । रथम् ।
आ । वर्तनिम् । मधुना । जिन्वथः । पथः । दृतिम् । वहेथे इति । मधुऽमन्तम् । अश्विना ॥ ३ ॥

वेङ्कट० हे अश्विनौ ! सोमम् पिबतम् सोमपैः आस्यैः । अपि च प्रियम् रथम् सोमपानार्थम् युञ्जाथाम् । आ सिञ्चतं मार्गम् वर्तनिम् गमनमार्गम् पथश्चित्रम् मधुना, मधुपूर्णं च दृतिम् कृत्वा वहतम् इति ॥ ३ ॥

हंसासो ये वां मधुमन्तो अस्रिधो हिरण्यपर्णा उहुव उषर्बुधः ।
उदप्रुतो मन्दिनो मन्दिनिस्पृशो मध्वो न मक्षः सवनानि गच्छथः ॥ ४ ॥

हंसासः । ये । वाम् । मधुऽमन्तः । अस्रिधः । हिरण्यऽपर्णाः । उहुवः । उषःऽबुधः ।
उदऽप्रुतः । मन्दिनः । मन्दिऽनिस्पृशः । मध्वः । न । मक्षः । सवनानि । गच्छथः ॥ ४ ॥

वेङ्कट० अश्वाः ये युवयोः मधुमन्तः अहिंसिताः हिरण्यपक्षाः वोढारः उषर्बुधः उदकस्य गमयितारः मादयितारः मदकरस्य सोमस्य स्प्रष्टारस्तैः मधुनि इव मक्षिकाः सवनानि गच्छथः ॥ ४ ॥

१. नास्ति वि॰. २. नास्ति वि॰ अ॰. ३-३. रथा इति मूको. ४. °युना दृ॰ वि॰ अर्प. ५-५. नास्ति मूको. ६. °यतः मूको. ७. °त ल अर्प. ८. °गोभिः वि॰ अ॰; °भेरे वि॰ अ॰. ९. उत्पात वि॰, वधेन अर्प. १०-१०. मधुनीव वि॰ अ॰; मधुनि वि॰ अर्प. ११. °लीव मूको.

स्वध्वरासो मधुमन्तो अग्नय उस्रा जरन्ते प्रति वस्तोरश्विना ।
यन्निक्तहस्तस्तरणिर्विचक्षणः सोमं सुषाव मधुमन्तमद्रिभिः ॥ ५ ॥

सुऽअध्वरासः । मधुऽमन्तः । अग्नयः । उस्रा । जरन्ते । प्रति । वस्तोः । अश्विना ।
यत् । निक्तऽहस्तः । तरणिः । विऽचक्षणः । सोमम् । सुसाव । मधुऽमन्तम् । अद्रिऽभिः ॥५॥

वेङ्कट० शोभनयज्ञाः सोमवन्तः यजमानानाम् इतुन्त्र्याग्नयः अग्नयः अश्विनौ गत्वा अहि प्रति स्तुवन्ति, यदि निर्णिक्तहस्तः क्षिप्रकारी यजमानः सोमम् रसवन्तम् ग्रावभिः सुनोति ॥ ५ ॥

आकेनिपासो अहभिर्दविध्वतः स्वर्ण शुक्रं तन्वन्त आ रजः ।
सूरश्चिदश्वान्युयुजान ईयते विश्वाँ अनु स्वधया चेतथस्पथः ॥ ६ ॥

आकेऽनिपासः । अहऽभिः । दविध्वतः । स्वः । न । शुक्रम् । तन्वन्तः । आ । रजः ।
सूरः । चित् । अश्वान् । युयुजानः । ईयते । विश्वान् । अनु । स्वधया । चेतथः । पथः ॥६॥

वेङ्कट० आसवे प्रातःसवने निपतन्तः पातारः दिवसेभ्यः ... उदकम् इव निर्मलं तेजः कुर्वाणाः गच्छन्ति । ... सूर्यः अपि ... सह स्वार्थे नियुञ्जानः गच्छति । तौ युवां सर्वान् मार्गान् ... सह गच्छन्तौ अनुक्रमेण जानीथो ... पार्थिवान् ॥ ६ ॥

प्र वामवोचमश्विना धियंधा रथः स्वश्वो अजरो यो अस्ति ।
येन सद्यः परि रजांसि याथो हविष्मन्तं तरणिं भोजमच्छ ॥ ७ ॥

प्र । वाम् । अवोचम् । अश्विना । धियम्ऽधाः । रथः । सुऽअश्वः । अजरः । यः । अस्ति ।
येन । सद्यः । परि । रजांसि । याथः । हविष्मन्तम् । तरणिम् । भोजम् । अच्छ ॥ ७ ॥

वेङ्कट० प्र अवोचम् हे अश्विनौ!, कर्मणां विधाता युवयोः, यः रथः स्वश्वः अजरः विद्यते, येन समानेऽहनि सर्वान् लोकान् परि गच्छथः हविष्मन्तम् क्षिप्रकारिणं यजमानं प्रति, तमिति ॥ ७ ॥

[1]इति तृतीयाष्टके सप्तमाध्याये एकविंशो वर्गः ॥

[४६]

[3]वामदेवो गौतम ऋषिः । इन्द्रवायू देवता, आद्यायाः वायुः । गायत्री छन्दः[3] ।

अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु । त्वं हि पूर्वपा असि ॥ १ ॥

---

१. प्रतिवि° वि°. २. नास्ति वि° अ° ग्रन्थे. ३-३. नास्ति मूको.

अग्रम् । पिब । मधूनाम् । सुतम् । वायो इति । दिविष्टिषु । त्वम् । हि । पूर्वऽपाः । असि ॥ १ ॥

वेङ्कट० अग्रम् पिब सोमानाम् सुतम् हे वायो! दिवसस्थागमनेषु प्रातः । त्वम्[1] हि पूर्वं पिबसि ॥ १ ॥

शतेना नो अभिष्टिभिर्नियुत्वाँ इन्द्रसारथिः । वायो सुतस्य तृम्पतम् ॥ २ ॥

शतेन । नः । अभिष्टिऽभिः । नियुत्वान् । इन्द्रऽसारथिः । वायो इति । सुतस्य । तृम्पतम् ॥ २ ॥

वेङ्कट० बहुभिः आगमनैः अस्माकम् नियुत्वान् इन्द्रसारथिः वायुः सोमेन तृप्यतु । प्रत्यक्षमाह— हे वायो! त्वं चेन्द्रश्च सोमेन तृप्यतम् इति ॥ २ ॥

आ वां सहस्रं हरय इन्द्रवायू अभि प्रयः । वहन्तु सोमपीतये ॥ ३ ॥

आ । वाम् । सहस्रम् । हरयः । इन्द्रवायू इति । अभि । प्रयः । वहन्तु । सोमऽपीतये ॥ ३ ॥

वेङ्कट० हे इन्द्रवायू! अस्माकमन्नार्थं बहवः अश्वाः वाम् सोमपीतये आ वहन्तु इति ॥ ३ ॥

रथं हिरण्यवन्धुरमिन्द्रवायू स्वध्वरम् । आ हि स्थाथो दिविस्पृशम् ॥ ४ ॥

रथम् । हिरण्यऽवन्धुरम् । इन्द्रवायू इति । सुऽअध्वरम् । आ । हि । स्थाथः । दिविऽस्पृशम् ॥ ४ ॥

वेङ्कट० हे इन्द्रवायू! रथम् हिरण्यवन्धुरम्[2] शोभनयज्ञहेतुम् आ तिष्ठथः हि दीप्तेः स्प्रष्टारम् ॥ ४ ॥

रथेन पृथुपाजसा दाश्वांसमुप गच्छतम् । इन्द्रवायू इहा गतम् ॥ ५ ॥

रथेन । पृथुऽपाजसा । दाश्वांसम् । उप । गच्छतम् । इन्द्रवायू इति । इह । आ । गतम् ॥ ५ ॥

वेङ्कट० निगदव्याख्याता ॥ ५ ॥

इन्द्रवायू अयं सुतस्तं देवेभिः सजोषसा । पिबतं दाशुषो गृहे ॥ ६ ॥

इन्द्रवायू इति । अयम् । सुतः । तम् । देवेभिः । सऽजोषसा । पिबतम् । दाशुषः । गृहे ॥ ६ ॥

वेङ्कट० निगदव्याख्याता ॥ ६ ॥

इह प्रयाणमस्तु वामिन्द्रवायू विमोचनम् । इह वां सोमपीतये ॥ ७ ॥

इह । प्रऽयानम् । अस्तु । वाम् । इन्द्रवायू इति । विऽमोचनम् । इह । वाम् । सोमऽपीतये ॥ ७ ॥

वेङ्कट० निगदव्याख्याता ॥ ७ ॥

'इति तृतीयाष्टके सप्तमाध्याये द्वाविंशो वर्गः'[3] ॥

---

१. त्व हि मू'. २. 'स्वर्णं मनु' वि' लपे; हिरण्मय° वि' क; 'स्वरुमनु' मू'. ३ ३. नास्ति मूको.

[४७]

'वामदेवो गौतम ऋषिः । इन्द्रवायू देवता, प्रथमाया वायुः । अनुष्टुप् छन्दः'।

वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥ १ ॥

वायो इति । शुक्रः । अयामि । ते । मध्वः । अग्रम् । दिविष्टिषु ।
आ । याहि । सोमऽपीतये । स्पार्हः । देव । नियुत्वता ॥ १ ॥

वेङ्कट० हे वायो! शुक्रवर्णस्त्वमसि । प्रेरयामि तुभ्यमेव सोमस्य अग्रम् दिवसस्यागमनेषु । त्वम् आ गच्छ सोमपानाय स्पृहणीयः हे देव! नियुत्वता रथेन ॥ १ ॥

इन्द्रश्च वायवेषां सोमानां पीतिमर्हथः ।
युवां हि यन्तीन्दवो निम्नमापो न सध्र्यक् ॥ २ ॥

इन्द्रः । च । वायो इति । एषाम् । सोमानाम् । पीतिम् । अर्हथः ।
युवाम् । हि । यन्ति । इन्दवः । निम्नम् । आपः । न । सध्र्यक् ॥ २ ॥

वेङ्कट० निगदसिद्धा ॥ २ ॥

वायविन्द्रश्च शुष्मिणा सरथं शवसस्पती ।
नियुत्वन्ता न ऊतय आ यातं सोमपीतये ॥ ३ ॥

वायो इति । इन्द्रः । च । शुष्मिणा । सऽरथम् । शवसः । पती इति ।
नियुत्वन्ता । नः । ऊतये । आ । यातम् । सोमऽपीतये ॥ ३ ॥

वेङ्कट० निगदसिद्धा ॥ ३ ॥

या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।
अस्मे ता यज्ञवाहसेन्द्रवायू नि यच्छतम् ॥ ४ ॥

याः । वाम् । सन्ति । पुरुऽस्पृहः । निऽयुतः । दाशुषे । नरा ।
अस्मे इति । ताः । यज्ञऽवाहसा । इन्द्रवायू इति । नि । यच्छतम् ॥ ४ ॥

वेङ्कट० निगदसिद्धा ॥ ४ ॥

'इति तृतीयाष्टके सप्तमाध्याये त्रयोविंशो वर्गः' ॥

१-१. नास्ति मूको. २. [illegible] ३. [illegible]

[४८]

'वामदेवो गौतम ऋषिः । वायुः देवता । अनुष्टुप् छन्दः' ।

विहि होत्रा अवीता विपो न रायो अर्यः ।
वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥ १ ॥

विहि । होत्राः । अवीताः । विपः । न । रायः । अर्यः ।
वायो इति । आ । चन्द्रेण । रथेन । याहि । सुतस्य । पीतये ॥ १ ॥

वेङ्कट० कामयस्व स्तुतिवाचः असंश्रिता अन्यत्र, विप्रस्य इव यजमानस्य धनानि स्वामी त्वम्। वायो! इति स्पष्टम् ॥ १ ॥

निर्युवाणो अशस्तीर्नियुत्वाँ इन्द्रसारथिः ।
वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥ २ ॥

निःऽयुवानः । अशस्तीः । नियुत्वान् । इन्द्रऽसारथिः ।
वायो इति । आ । चन्द्रेण । रथेन । याहि । सुतस्य । पीतये ॥ २ ॥

वेङ्कट० पृथक् कुर्वन् बाधाः । शिष्टं स्पष्टम् ॥ २ ॥

अनु कृष्णे वसुधिती येमाते विश्वपेशसा ।
वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥ ३ ॥

अनु । कृष्णे इति । वसुधिती इति वसुऽधिती । येमाते इति । विश्वऽपेशसा ।
वायो इति । आ । चन्द्रेण । रथेन । याहि । सुतस्य । पीतये ॥ ३ ॥

वेङ्कट० अनु नियच्छतः कृष्णवर्णा रात्रिः, विश्वरूपमहश्च निहितार्थविभवे वायुम् । अवशिष्टं स्पष्टम् ॥ ३ ॥

वहन्तु त्वा मनोयुजो युक्तासो नवतिर्नव ।
वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥ ४ ॥

वहन्तु । त्वा । मनःऽयुजः । युक्तासः । नवतिः । नव ।
वायो इति । आ । चन्द्रेण । रथेन । याहि । सुतस्य । पीतये ॥ ४ ॥

वेङ्कट० मनोवेगाः रथे युक्ताः नव नवतिः वाहकाः त्वाम् वहन्तु ॥ ४ ॥

वायो शतं हरीणां युवस्व पोष्याणाम् ।
उत वा ते सहस्रिणो रथ आ यातु पाजसा ॥ ५ ॥

१-१. नास्ति मूको.

वायो इति । शतम् । हरीणाम् । युवस्व । पोष्याणाम् ।
उत । वा । ते । सहस्रिणः । रथः । आ । यातु । पाजसा ॥ ५ ॥

वेङ्कट० वायो! शतम् अश्वानां पोषणनिमित्तानां रथे नियोजय । अपि वा तव सहस्राश्वयुक्तोऽस्य तैः सर्वैर्युक्तो रथः आ गच्छतु बलेन ॥ ५ ॥

[१]इति तृतीयाष्टके सप्तमाध्याये चतुर्विंशो वर्गः[१] ।

[४९]

[२]वामदेवो गौतम ऋषिः । इन्द्राबृहस्पती देवता । गायत्री छन्दः[२] ।

इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती । उक्थं मदश्च शस्यते ॥ १ ॥

इदम् । वाम् । आस्ये । हविः । प्रियम् । इन्द्राबृहस्पती इति । उक्थम् । मदः । च । शस्यते ॥ १ ॥

वेङ्कट० इदम् हविः हूयते युवयोः आस्ये, तथा मदकरः सोमः[३] उक्थम् च शस्यते । अवशिष्टो वर्गः स्पष्टः ॥ १ ॥

अयं वां परि षिच्यते सोम इन्द्राबृहस्पती । चारुर्मदाय पीतये ॥ २ ॥

अयम् । वाम् । परि । सिच्यते । सोमः । इन्द्राबृहस्पती इति । चारुः । मदाय । पीतये ॥ २ ॥

वेङ्कट० स्पष्टम् ॥ २ ॥

आ न इन्द्राबृहस्पती गृहमिन्द्रश्च गच्छतम् । सोमपा सोमपीतये ॥ ३ ॥

आ । नः । इन्द्राबृहस्पती इति । गृहम् । इन्द्रः । च । गच्छतम् । सोमऽपा । सोमऽपीतये ॥ ३ ॥

वेङ्कट० स्पष्टम् ॥ ३ ॥

अस्मे इन्द्राबृहस्पती रयिं धत्तं शतग्विनम् । अश्वावन्तं सहस्रिणम् ॥ ४ ॥

अस्मे इति । इन्द्राबृहस्पती इति । रयिम् । धत्तम् । शतऽग्विनम् । अश्वऽवन्तम् । सहस्रिणम् ॥ ४ ॥

वेङ्कट० स्पष्टम् ॥ ४ ॥

इन्द्राबृहस्पती वयं सुते गीर्भिर्हवामहे । अस्य सोमस्य पीतये ॥ ५ ॥

इन्द्राबृहस्पती इति । वयम् । सुते । गीःऽभिः । हवामहे । अस्य । सोमस्य । पीतये ॥ ५ ॥

वेङ्कट० स्पष्टम् ॥ ५ ॥

१-१. नास्ति वि[१]. २-२. नास्ति मूको. ३. नास्ति मूको.

सोममिन्द्राबृहस्पती पिबतं दाशुषो गृहे । मादयेथां तदोकसा ॥ ६ ॥

सोमम् । इन्द्राबृहस्पती इति । पिबतम् । दाशुषः । गृहे । मादयेथाम् । तत्ऽओकसा ॥ ६ ॥

वेङ्कट० यजमानगृहे समवेतौ तदोकसाविति ॥ ६ ॥

'इति तृतीयाष्टके सप्तमाध्याये पञ्चविंशो वर्गः' ॥

[५०]

'वामदेवो गौतम ऋषिः । बृहस्पतिर्देवता, अन्त्ययोरिन्द्राबृहस्पती ।
त्रिष्टुप् छन्दः, दशमी जगती' ।

यस्तस्तम्भ सहसा वि ज्मो अन्तान् बृहस्पतिस्त्रिषधस्थो रवेण ।
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम् ॥ १ ॥

यः । तस्तम्भ । सहसा । वि । ज्मः । अन्तान् । बृहस्पतिः । त्रिऽसधस्थः । रवेण ।
तम् । प्रत्नासः । ऋषयः । दीध्यानाः । पुरः । विप्राः । दधिरे । मन्द्रऽजिह्वम् ॥ १ ॥

वेङ्कट० यः[1] पृथिव्याः पर्यन्तान्[1] बलेन विविधं स्तब्धवान् बृहस्पतिः त्रिस्थानः गर्जितरवेण सहितः, तम् पुराणाः दीप्यमानाः ऋषयः[2] मेधाविनः पुरः दधिरे मोदनवाचम् ॥ १ ॥

धुनेतयः सुप्रकेतं मदन्तो बृहस्पते अभि ये नस्ततस्रे ।
पृषन्तं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिम् ॥ २ ॥

धुनऽइतयः । सुप्रऽकेतम् । मदन्तः । बृहस्पते । अभि । ये । नः । ततस्रे ।
पृषन्तम् । सृप्रम् । अदब्धम् । ऊर्वम् । बृहस्पते । रक्षतात् । अस्य । योनिम् ॥ २ ॥

वेङ्कट० धूननपरगमनाः[3] शोभनप्रज्ञानं माम् मदन्तः, हे बृहस्पते! ये अभि गच्छन्ति मेघाः । वर्षकत्वशात् । सिञ्चन्तं सर्पणशीलम् अहिंसितम् महान्तम् बृहस्पते! रक्ष रक्षतात् अस्य मेघस्य उदक-निःसरणमार्गम् ॥ २ ॥

बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षेदुः ।
तुभ्यं खाता अवता अद्रिदुग्धा मध्वः श्चोतन्त्यभितो विरप्शम् ॥ ३ ॥

बृहस्पते । या । परमा । पराऽवत् । अतः । आ । ते । ऋतऽस्पृशः । नि । सेदुः ।
तुभ्यम् । खाताः । अवताः । अद्रिऽदुग्धाः । मध्वः । श्चोतन्ति । अभितः । विऽरप्शम् ॥ ३ ॥

१-१. नास्ति मूको. २. सं मूको. ३. °न्तान् वि° कपं, पर्यन्तानर्यन्तान् अ° ४. धुनम° वि° कपं

वेङ्कट० बृहस्पते । य, परमा देवाः ... आ नि षेदुः ... । ... सूपाः ... प्रेरयन्ति स्तुतिमन्तं त्वां प्रति ॥ ३ ॥

बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ।
सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमांसि ॥ ४ ॥

बृहस्पतिः । प्रथमम् । जायमानः । महः । ज्योतिषः । परमे । विऽओमन् ।
सप्तऽआस्यः । तुविऽजातः । रवेण । वि । सप्तऽरश्मिः । अधमत् । तमांसि ॥ ४ ॥

वेङ्कट० बृहस्पतिः प्रथमः प्रारम्भे प्रादुर्भवन् महतः ज्योतिषः स्थाने परमे व्योमनि दिवि सप्तमुखः बहुजनकः शब्देन महता वि धमति तमांसि सप्तरश्मिः । सादृशी चास्य तनुरस्त्यादित्य- गन्तव्यम् ॥ ४ ॥

स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ।
बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥ ५ ॥

सः । सुऽस्तुभा । सः । ऋक्वता । गणेन । वलम् । रुरोज । फलिऽगम् । रवेण ।
बृहस्पतिः । उस्रियाः । हव्यऽसूदः । कनिक्रदत् । वावशतीः । उत् । आजत् ॥ ५ ॥

वेङ्कट० सः शोभनस्तुतिकेन ऋग्भिर्युक्तेन गणेन बलम् असुरम् हिंसितवान् मेघाकारम् शब्देन । बृहस्पतिः उस्रियाः हविषः प्रेरयित्रीः[1] शब्दं कुर्वन् कामयमानाः पणिभ्यः तत् आजत् ॥ ५ ॥

[2]इति तृतीयाष्टके सप्तमाध्याये षड्विंशो वर्गः[3] ॥

एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।
बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ॥ ६ ॥

एव । पित्रे । विश्वऽदेवाय । वृष्णे । यज्ञैः । विधेम । नमसा । हविःऽभिः ।
बृहस्पते । सुऽप्रजाः । वीरऽवन्तः । वयम् । स्याम । पतयः । रयीणाम् ॥ ६ ॥

वेङ्कट० एवं पालयित्रे सर्वेषां देवाय वृष्णे यज्ञैः नमस्कारेण हविर्भिश्च परिचरणं कुर्मः । शिष्टं स्पष्टम् ॥ ६ ॥

---

१. °स्वास्त्याते मूको. २. योद्धमाम् मूको. ३. नास्ति वि॰ अ॰ ४. °विशोस्य वि॰ अ॰. ५-५. नास्ति मूको.

स इद् राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण ।
बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वन्दते पूर्वभाजम् ॥ ७ ॥

सः । इत् । राजा । प्रतिऽजन्यानि । विश्वा । शुष्मेण । तस्थौ । अभि । वीर्येण ।
बृहस्पतिम् । यः । सुऽभृतम् । बिभर्ति । वल्गुऽयति । वन्दते । पूर्वऽभाजम् ॥ ७ ॥

संस्कृत० स एव राजा प्रतिजनपदप्रादुर्भूतानि सर्वाणि[1] बलानि शोषकेण वीर्येण अभि तिष्ठति, यः राजा बृहस्पतेः ब्राह्मणस्य पुरोधानद्वारेण सुभृतम् बिभर्ति स्तौति नमस्करोति च पूर्वमेव भजमानम् मुख्यम् ॥ ७ ॥

स इत् क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीम् ।
तस्मै विशः स्वयमेवा नमन्ते यस्मिन् ब्रह्मा राजनि पूर्व एति ॥ ८ ॥

सः । इत् । क्षेति । सुऽधितः । ओकसि । स्वे । तस्मै । इळा । पिन्वते । विश्वऽदानीम् ।
तस्मै । विशः । स्वयम् । एव । नमन्ते । यस्मिन् । ब्रह्मा । राजनि । पूर्वः । एति ॥ ८ ॥

संस्कृत० स एव निवसति सुप्रीतः स्वस्मिन् स्थाने, तस्मै एव पृथिवी सर्वदा कामान् पिन्वते[2], तस्मै एव मनुष्या जानपदाः स्वयम् एव नमनं कुर्वन्ति, यस्मिन् राजनि बृहस्पतिभूतः पुरोधा ब्राह्मणः कर्मणामग्रे गच्छति ॥ ८ ॥

अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या ।
अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवन्ति देवाः ॥ ९ ॥

अप्रतिऽइतः । जयति । सम् । धनानि । प्रतिऽजन्यानि । उत । या । सऽजन्या ।
अवस्यवे । यः । वरिवः । कृणोति । ब्रह्मणे । राजा । तम् । अवन्ति । देवाः ॥ ९ ॥

संस्कृत० शत्रुभिरप्रतिगतः सम्[3] जयति[3] [illegible] धनानि प्रतिजनपदानि[4] यानि च [illegible][5] । रक्षणमिच्छते यः राजा धनम् करोति पुरोधसे, तम् रक्षन्ति देवाः ॥ ९ ॥

इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन् यज्ञे मन्दसाना वृषण्वसू ।
आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम् ॥ १० ॥

इन्द्रः । च । सोमम् । पिबतम् । बृहस्पते । अस्मिन् । यज्ञे । मन्दसाना । वृषण्वसू इति वृषणऽवसू ।
आ । वाम् । विशन्तु । इन्दवः । सुऽआभुवः । अस्मे इति । रयिम् । सर्वऽवीरम् । नि । यच्छतम् ॥ १० ॥

१. नास्ति मूको. २. पिबते मूको. ३. भवति मूको. ४. [illegible] वि' छपे. ५. [illegible] वि' छपे.

वेङ्कट० बृहस्पते ! त्वम् इन्द्रः च सोमं पिबतम् अस्मिन् यज्ञे हे वृषण्वसू ! मोदमानौ । स्वाभ-
वनाः सोमाः आ विशन्तु वाम् । अस्मासु धनं सर्ववीरैर्युक्तम् नि यच्छताम् ॥ १० ॥

बृह॑स्पत इन्द्र॒ वर्ध॑तं नः॒ सचा॒ सा वां॑ सुम॒तिर्भू॑त्व॒स्मे ।
अ॒वि॒ष्टं धियो॑ जिगृ॒तं पुरं॑धीर्जज॒स्तम॒र्यो व॒नुषा॒मरा॑तीः ॥ ११ ॥

बृह॑स्पते । इन्द्र॑ । वर्ध॑तम् । नः॒ । सचा॑ । सा । वा॒म् । सु॒ऽम॒तिः । भू॒तु॒ । अ॒स्मे इति॑ ।
अ॒वि॒ष्टम् । धियः॑ । जि॒गृ॒तम् । पुर॑म्ऽधीः । ज॒ज॒स्तम् । अ॒र्यः । व॒नुषा॑म् । अरा॑तीः ॥ ११ ॥

वेङ्कट० हे इन्द्राबृहस्पती ! वर्धयतम् अस्मान्, सा युवयोः सुमतिः अस्मासु सम्पूर्णा[1] भवतु, रक्षतम्
कर्माणि, प्रकाशयतं प्रज्ञाः, उपक्षपयतम् पापिमृणां धनानि अभयस्कन्दीः शत्रुभूताः प्रजाः ॥ ११ ॥

[2]इति तृतीयाष्टके सप्तमाध्याये सप्तविंशो वर्गः[3] ॥

अष्टकस्य तृतीयस्य माधवः सुन्दरीसुतः ।
व्याख्यत् सप्तममध्यायमित्थं श्रीवेङ्कटात्मजः ॥

इति [4]वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने तृतीयाष्टके सप्तमोऽध्यायः[5] ॥

—*—

इति ऋग्वेदे सभाष्ये तृतीयाष्टके सप्तमोऽध्यायः ॥



---

१. संपूर्णा मूको. २-३. नास्ति मूको. ४-५. श्रीवेङ्कटमाधवाचार्यस्य कृतावृग्वेदव्याख्ये वि.

अथ तृतीयाष्टकेऽष्टमोऽध्यायः

वेङ्कट०

'इदम् त्यत् पुरतमम्'¹ इत्यादिकमथाधि माधव ।
उपसर्गेषु वक्तव्यमनुक्तं सम्प्रदर्शयन् ॥ १ ॥

आकारोऽधिपरी चोभौ स्पष्टीकुर्वन्ति कारके ।
अपादानाधिकरणे 'धन्वोऽधि'², 'दिवस्परि'³ ॥ २ ॥

आकारो 'दिव आजाता'⁴ इत्यत्रे चापि पूरणः ।
सुं च 'ओ षु णः'⁵ इत्यादौ केचिदिच्छन्ति पूरणम् ॥ ३ ॥

अमी त्रिषूपसर्गेषु निपाताः प्रतिरूपकाः ।
भवेयुरुपसर्गा वा किं नु ते संशयात्मका ॥ ४ ॥

'इन्द्र नेदस्य दर्शतः'⁶, 'आ याहि पूर्वीरति'⁷ च ।
आकारौ पूरणावाहुर्बहवः सन्ति तादृशाः ॥ ५ ॥

'यस्ते गभस्ति आ भरम्'⁸, 'इमे सोमास इन्दवः'⁹ ।
'नि नो होता वरेण्यः'¹⁰, 'प्र वह्निर्नो हविषः स्यात'¹¹ ॥ ६ ॥

'आप्ते यथा ऋतस्य'¹², 'विश्वा यद्वर्षणीभिः'¹³ ।
'अपो वो अस्मे स्वयशोभिः'¹⁴, 'अनुष्वधं स्वरान्यम्'¹⁵ ॥ ७ ॥

'प्र वैष्णवं यशस्तः सम'¹⁶, 'सुचिवत्सानी रत्न आ'¹⁷ ।
आक्षिप्यन्ते क्रियास्तत्र सर्वेष्वेषूपसर्गतः¹⁸ ॥ ८ ॥

अन्यत्रैवं च कुर्वन्ति केऽपी धातुमपि क्वचित् ।
'विश्वमुग्रासि रोहितम्'¹⁹, 'आ नो भज परमेषु'²⁰ ॥ ९ ॥

'आकी सूर्यस्य²¹ रोचनात्'²², आगतादिति गम्यते ।
तस्मादाकारसदृशं निपातं ते विदुर्बुधाः ॥ १० ॥

---

१. मो ऋग्वेदभाष्ये वेङ्कटमाधवाचार्यकृतौ भाष्ये नवमाष्टकसंख्यायिका वर्ग. २. ऋ १,३३,४. ३. ऋ १,१३१,१०. ४. ऋ ५,४२,३. ५. ऋ १,३८,६. ६. ऋ ३ ४४,२. ७. ॰रिति वेङ्कटा. ८ ऋ ३,४१,२. ९. ऋ १,४,४. १०. ऋ १,१६,६. ११. ऋ १,२६,२. १२. ऋ १,३३,५. १३. ऋ १,४३,६. १४. ऋ १,८३,१. १५ ऋ १,१२१,८ १६. ऋ १,८०,१. १७. ऋ १०,४६,१०. १८. ऋ १,१४३,७. १९ ॰षेषु निहा वेङ्कटा. २०. ऋ १,४९,४. २१. ऋ १,१४,५. २२. सूर्यः स वेङ्कटा. २३. ऋ १,१४,६.

विभक्त्यर्थेषु च समस्ता उपसर्गसमन्वयात् ।
'अवं नो हेळो वरुण'[2], 'मन्वानो हि मा' यज्ञेति'[4] ॥ ११ ॥

अवपूर्वो विभागार्थोऽवसी[5] नन्वीर्यस्थोः ।
'राध्याँश्चिद्भ्यो अवो तिं'[6] इति विभागार्थस्वथा इति ॥ १२ ॥

व्यवधाने[7] विरोधर्मा उपसर्गः पृथग्विधाः ।
'आराभिरिन्द्र मार्गमेव'[8], 'सोम प्र तिरन्तु आयुः'[9] ॥ १३ ॥

नाव्यवहितान्द्रष्टुमशिरपदे च दुरोऽन्वय ।
'दुर्गाः'[10] 'दुवाँ ईशानो तिं'[11] इति कृताकर्तर्यनोऽन्वयः ॥ १४ ॥

तृतीयस्त्वाष्टकस्यैवमध्यायादिषु दर्शितः ।
उपसर्गनिपातार्थाः सर्वे वेङ्कटमाधवः ॥ १५ ॥

[५१]

[12]वामदेवो गौतम ऋषिः । उषाः देवता । त्रिष्टुप् छन्दः[12] ।

इदमु त्यत् पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात् ।
नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय ॥ १ ॥

इदम् । ऊं इति । त्यत् । पुरुऽतमम् । पुरस्तात् । ज्योतिः । तमसः । वयुनऽवत् । अस्थात् ।
नूनम् । दिवः । दुहितरः । विऽभातीः । गातुम् । कृणवन् । उषसः । जनाय ॥ १ ॥

वेङ्कट० वामदेवः । तत् एतत् बहुतमं प्राच्याम् ज्योतिः, तमसः सकाशात्[13] प्रज्ञानवत्
आविरभवत् । नूनम् दिवः दुहितरः व्युच्छन्त्यः मार्गम् कुर्वन्ति उषसः मनुष्याय ॥ १ ॥

अस्थुरु चित्रा उषसः पुरस्तान्मिता इव स्वरवोऽध्वरेषु ।
व्यू व्रजस्य तमसो द्वारोच्छन्तीरव्रञ्छुचयः पावकाः ॥ २ ॥

अस्थुः । ऊं इति । चित्राः । उषसः । पुरस्तात् । मिताःऽइव । स्वरवः । अध्वरेषु ।
वि । ऊं इति । व्रजस्य । तमसः । द्वारा । उच्छन्तीः । अव्रन् । शुचयः । पावकाः ॥ २ ॥

---

१. अत्र वेङ्कट० २. ऋ १,२४,१४ ३. नास्ति वि[3] मूले. ४. ऋ १,१२३,४. ५. 'जोषिष' वि[1] अव ६. ऋ १,१४८,७. ७. व्यवधाने वि[1,2] मूले ... ८. ऋ १,११,७. ९. ऋ १०,१०७,२. १०. ऋ १,५८,८; दुर्गा वि[1,2] मूले ११. ऋ १०,१०९,४. १२-१२. नास्ति मूको. १३. °द् सकाशात् वि[1] मूके.

वेङ्कट० तिष्ठन्ति चित्रवर्णाः उषसः प्राच्याम् दिशि इव स्वरवः यूपाः यज्ञेषु, वि वृण्वन्ति अन्धकारस्य तमसः द्वाराणि स्तुवन्त्यः दीप्ताः शोधयित्र्यः ॥ २ ॥

उच्छन्तीरद्य चितयन्त भोजान्राधोदेयायोषसो मघोनीः ।
अचित्रे अन्तः पणयः ससन्त्वबुध्यमानास्तमसो विमध्ये ॥ ३ ॥

उच्छन्तीः । अद्य । चितयन्त । भोजान् । राधःऽदेयाय । उषसः । मघोनीः ।
अचित्रे । अन्तरिति । पणयः । ससन्तु । अबुध्यमानाः । तमसः । विऽमध्ये ॥ ३ ॥

वेङ्कट० व्युच्छन्त्यः अद्य बोधयन्तु भोजयितॄन् धनदानाय धनदानाय उषसः धनवत्यः । चित्ररहिते अप्रज्ञायमानसर्वपदार्थे अन्तः सुप्ताः 'स्वपन्तु अबुध्यमानाः' तमसः विमध्ये अत्यन्ततमसि ॥ ३ ॥

कुविद्स देवीः सनयो नवो वा यामो बभूयादुषसो वो अद्य ।
येना नवग्वे अङ्गिरे दशग्वे सप्तास्ये रेवती रेवदूष ॥ ४ ॥

कुवित् । सः । देवीः । सनयः । नवः । वा । यामः । बभूयात् । उषसः । वः । अद्य ।
येन । नवऽग्वे । अङ्गिरे । दशऽग्वे । सप्तऽआस्ये । रेवतीः । रेवत् । ऊष ॥ ४ ॥

वेङ्कट० बहु सः हे देव्यः! पुरातनः नूतनः वा यामः भवतु हे उषसः युष्माकम् अद्य । येन नवग्वे दशग्वे अङ्गिरसि सप्तास्ये व्युच्छथ युष्मे हे धनवत्यः! धनयुक्तम् तत्र विवासितवत्यः ॥ ४ ॥

यूयं हि देवीरृतयुग्भिरश्वैः परिप्रयाथ भुवनानि सद्यः ।
प्रबोधयन्तीरुषसः ससन्तं द्विपाच्चतुष्पाच्चरथाय जीवम् ॥ ५ ॥

यूयम् । हि । देवीः । ऋतयुक्ऽभिः । अश्वैः । परिऽप्रयाथ । भुवनानि । सद्यः ।
प्रऽबोधयन्तीः । उषसः । ससन्तम् । द्विऽपात् । चतुःऽपात् । चरथाय । जीवम् ॥ ५ ॥

वेङ्कट० यूयम् हि हे देव्यः! सत्यार्थैः युक्तैः अश्वैः परिगच्छथ सद्यः एव सर्वाणि भुवनानि प्रबोधयन्त्यः उषसः! स्वपन्तम् द्विपात् चतुष्पात् च सर्वं च जीवम् चरणाय ॥ ५ ॥

'इति तृतीयाष्टके अष्टमाध्याये प्रथमो वर्गः' ॥

---

१. नास्ति वपं. २. नास्ति उषसः मूको. ३-३. स्वपन्तु° वि° वपं, स्वपन्तु° वि° अ° ऊ. ४. नास्ति वि° अ° वपं. ५ नास्ति वि°. ६-६. नास्ति मूको.

क्वं स्विदासां कतमा पुराणी यया विधाना विदधुर्ऋभूणाम् ।
शुभं यच्छुभ्रा उषसश्चरन्ति न वि ज्ञायन्ते सदृशीरजुर्याः ॥ ६ ॥

क्वं । स्वित् । आसाम् । कतमा । पुराणी । यया । विऽधाना । विऽदधुः । ऋभूणाम् ।
शुभम् । यत् । शुभ्राः । उषसः । चरन्ति । न । वि । ज्ञायन्ते । सऽदृशीः । अजुर्याः ॥ ६ ॥

वेङ्कट० क्व स्वित् इदानीम् आसाम् सा भवति कतमा च सा पुराणतमा, यया उषसा देवाः ऋभूणां विधानस्थानि कर्माणि विदधुः । शुभम् यदा शोभमानाः उषसः चरन्ति, तदानीं समानाकाराः पृथक् न वि ज्ञायन्ते अव्यवहिताः । 'सदृशीरद्य सदृशीरिदु श्वः' (ऋ १,१२३,८) इत्युक्तम् ॥ ६ ॥

ता घा ता भद्रा उषसः पुरासुरभिष्टिद्युम्ना ऋतजातसत्याः ।
यास्वीजानः शशमान उक्थैः स्तुवञ्छंसन्द्रविणं सद्य आप ॥ ७ ॥

ताः । घ । ताः । भद्राः । उषसः । पुरा । आसुः । अभिष्टिऽद्युम्नाः । ऋतजातऽसत्याः ।
यासु । ईजानः । शशमानः । उक्थैः । स्तुवन् । शंसन् । द्रविणम् । सद्यः । आप ॥ ७ ॥

वेङ्कट० ताः खलु भजनीयाः उषसः पुरा बभूवुः अन्वेषणीयदीप्तयः यज्ञार्थं ऋतजाताः सत्याः । यासु इति स्पष्टम् । पुनः ताः इति पूरणम्[२] ॥ ७ ॥

ता आ चरन्ति समना पुरस्तात्समानतः समना पप्रथानाः ।
ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरन्ते ॥ ८ ॥

ताः । आ । चरन्ति । समना । पुरस्तात् । समानतः । समना । पप्रथानाः ।
ऋतस्य । देवीः । सदसः । बुधानाः । गवाम् । न । सर्गाः । उषसः । जरन्ते ॥ ८ ॥

वेङ्कट० ताः आ चरन्ति समानमेव प्राच्याम्[३] समाने काले समानम् प्रथमानाः । सत्यम् स्थानम् ऋतस्य गवाम् इव सर्गाः देव्यः उषसः स्तूयन्ते । यथा विसृष्टा गावः आगच्छन्ति, एवमागच्छन्ति ॥ ८ ॥

ता इन्न्वेव समना समानीरमीतवर्णा उषसश्चरन्ति ।
गूहन्तीरभ्वमसितं रुशद्भिः शुक्रास्तनूभिः शुचयो रुचानाः ॥ ९ ॥

ताः । इत् । नु । एव । समना । समानीः । अमीतऽवर्णाः । उषसः । चरन्ति ।
गूहन्तीः । अभ्वम् । असितम् । रुशत्ऽभिः । शुक्राः । तनूभिः । शुचयः । रुचानाः ॥ ९ ॥

---

१. नास्ति वि' कोशे. २. पूरणः वि'. ३. प्राच्या वि' कोशे.

वेङ्कट० नराः शिप्रम् एव समाने रूपम् 'समानाः समानवर्णाः' उषसः तन्वा विभातापवमानाः महत् यशः शुक्रैस्तेजोभिः शुक्लवर्णाः तनुभिः दीप्यमानाः रोचमानाः ॥ ९ ॥

रयिं दिवो दुहितरो विभातीः प्रजावन्तं यच्छतास्मासु देवीः ।
स्योनादा वः प्रतिबुध्यमानाः सुवीर्यस्य पतयः स्याम ॥ १० ॥

रयिम् । दिवः । दुहितरः । विऽभातीः । प्रजाऽवन्तम् । यच्छत । अस्मासु । देवीः ।
स्योनात् । आ । वः । प्रतिऽबुध्यमानाः । सुऽवीर्यस्य । पतयः । स्याम ॥ १० ॥

वेङ्कट० रयिम् हे दिवः दुहितरः! प्रजावन्तम् प्रयच्छत अस्मासु हे देव्यः! सुखात् स्योनात् युष्मत् प्रतिबुध्यमानाः वयम् सुखं युष्मान् भवेम प्रतिबोधयन्तः शोभनस्य वीर्यस्य धनस्य पतयः स्याम ॥ १० ॥

तद् वो दिवो दुहितरो विभातीरुप ब्रुव उषसो यज्ञकेतुः ।
वयं स्याम यशसो जनेषु तद् द्यौश्च धत्तां पृथिवी च देवी ॥ ११ ॥

तत् । वः । दिवः । दुहितरः । विऽभातीः । उप । ब्रुवे । उषसः । यज्ञऽकेतुः ।
वयम् । स्याम । यशसः । जनेषु । तत् । द्यौः । च । धत्ताम् । पृथिवी । च । देवी ॥ ११ ॥

वेङ्कट० तत् वः हे दिवः दुहितरः! व्युच्छन्तीः उप ब्रुवे हे उषसः! यज्ञो यस्य प्रज्ञापकः । अस्य किमिच्छतः—वयम् स्याम यशस्विनः जनेषु तत् अस्मभ्यं द्यावापृथिवी च प्रयच्छताम् ॥ ११ ॥

'इति तृतीयाष्टके अष्टमाध्याये द्वितीयो वर्गः' ॥

[५२]

'वामदेवो गौतम ऋषिः । उषा देवता । गायत्री छन्दः' ।

प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः । दिवो अदर्शि दुहिता ॥ १ ॥
प्रति । स्या । सूनरी । जनी । विऽउच्छन्ती । परि । स्वसुः । दिवः । अदर्शि । दुहिता ॥ १ ॥

वेङ्कट० एषा उषाः कर्मणां नेत्री व्युच्छन्ती रात्रेः परि दिवः दुहिता पुरः अदर्शि ॥ १ ॥

अश्वेव चित्रारुषी माता गवामृतावरी । सखाभूदश्विनोरुषाः ॥ २ ॥
अश्वाऽइव । चित्रा । अरुषी । माता । गवाम् । ऋतऽवरी । सखा । अभूत् । अश्विनोः । उषाः ॥ २ ॥

१-१. 'समानयो नरस्य' वि' कपं, 'समानो नभोन' वि' अ', समानाः समानवर्णाः क. २. स्वात मूको. ३. नास्ति स कपं. ४-४. नास्ति मूको. ५. नास्ति वि' कपं.

वेङ्कट० अनेन क्रिया रोचमाना रश्मीनाम् माता ... सखा अभूत् अश्विनोः उषाः ॥ २ ॥

उत सखास्यश्विनोरुत माता गवामसि । उतोषो वस्व ईशिषे ॥ ३ ॥

उत । सखा । असि । अश्विनोः । उत । माता । गवाम् । असि । उत । उषः । वस्वः । ईशिषे ॥ ३ ॥

वेङ्कट० निगदसिद्धा ॥ ३ ॥

यावयद्द्वेषसं त्वा चिकित्वित् सूनृतावरि । प्रति स्तोमैरभुत्स्महि ॥ ४ ॥

यवयत्ऽद्वेषसम् । त्वा । चिकित्वित् । सूनृताऽवरि । प्रति । स्तोमैः । अभुत्स्महि ॥ ४ ॥

वेङ्कट० पृथक्क्रियमाणशत्रुकां त्वां चिकितुषीम् हे सूनृतावति उषः! स्तोत्रैः प्रति बोधयामः ॥ ४ ॥

प्रति भद्रा अदृक्षत गवां सर्गा न रश्मयः । ओषा अप्रा उरु ज्रयः ॥ ५ ॥

प्रति । भद्राः । अदृक्षत । गवाम् । सर्गाः । न । रश्मयः । आ । उषाः । अप्राः । उरु । ज्रयः ॥ ५ ॥

वेङ्कट० प्रति दृश्यन्ते रश्मयः विसृष्टाः इव गावः । ... उरु ... आ पूरयतु ॥ ५ ॥

आपप्रुषी विभावरि व्यावर्ज्योतिषा तमः । उषो अनु स्वधामव ॥ ६ ॥

आऽपप्रुषी । विभाऽवरि । वि । आवः । ज्योतिषा । तमः । उषः । अनु । स्वधाम् । अव ॥ ६ ॥

वेङ्कट० आपूरयन्ती हे विभावरि उषः! वि वारयसि ज्योतिषा तमः । सा त्वम् अन्नम् प्रति आगच्छ ॥ ६ ॥

आ द्यां तनोषि रश्मिभिरान्तरिक्षमुरु प्रियम् । उषः शुक्रेण शोचिषा ॥ ७ ॥

आ । द्याम् । तनोषि । रश्मिऽभिः । आ । अन्तरिक्षम् । उरु । प्रियम् । उषः । शुक्रेण । शोचिषा ॥ ७ ॥

वेङ्कट० ¹आ तनोषि रश्मिभिः¹ दिवम्, आ तनोषि च अन्तरिक्षम् विस्तीर्णम् प्रियम् ... हे उषः! इति ॥ ७ ॥

²इति तृतीयाष्टके अष्टमाध्याये तृतीयो वर्गः² ॥

[५३]

वामदेवो गौतम ऋषिः । सविता देवता । जगती छन्दः ॥

तद्देवस्य सवितुर्वार्यं महद्वृणीमहे असुरस्य प्रचेतसः ।
छर्दिर्येन दाशुषे यच्छति त्मना तन्नो महाँ उदयान्देवो अक्तुभिः ॥ १ ॥

१-१. नास्ति वि° अ°. * नास्ति वि° अ°. २-२. नास्ति मूको.

तत् । देवस्य । सवितुः । वार्यम् । महत् । वृणीमहे । असुरस्य । प्रऽचेतसः ।
छर्दिः । येन । दाशुषे । यच्छति । त्मना । तत् । नः । महान् । उत् । अयान् । देवः । अक्तुऽभिः ॥

वेङ्कट० तत् देवस्य सवितुः[1] वरणीयम् महत् वृणीमहे प्राज्ञस्य सुमतेः तेजः । येन तेजसा आत्मनैव यजमानाय धनं प्रयच्छति, 'तत् तेजः महान् सविता अस्माकम् उत् यच्छतु रात्रिभिः'[1] ॥ १ ॥

दिवो धर्ता भुवनस्य प्रजापतिः पिशङ्गं द्रापिं प्रति मुञ्चते कविः ।
विचक्षणः प्रथयन्नापृणन्नुर्वजीजनत् सविता सुम्नमुक्थ्यम् ॥ २ ॥

दिवः । धर्ता । भुवनस्य । प्रजाऽपतिः । पिशङ्गम् । द्रापिम् । प्रति । मुञ्चते । कविः ।
विऽचक्षणः । प्रथयन् । आऽपृणन् । उरु । अजीजनत् । सविता । सुम्नम् । उक्थ्यम् ॥ २ ॥

वेङ्कट० 'दिवः धर्ता'[2] प्रजापतिः भुवनस्य पिशङ्गवर्णं तेजोरूपं कवचम् प्रति मुञ्चते क्रान्तप्रज्ञः । विद्वान् सर्वं । [illegible] प्रथयन् उरु अन्तरिक्षम् आ पूरयन् अस्माकम् प्रशस्यम् धनम् जनयतु ॥ २ ॥

आप्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे ।
प्र बाहू अस्राक् सविता सवीमनि निवेशयन् प्रसुवन्नक्तुभिर्जगत् ॥ ३ ॥

आ । अप्राः । रजांसि । दिव्यानि । पार्थिवा । श्लोकम् । देवः । कृणुते । स्वाय । धर्मणे ।
प्र । बाहू इति । अस्राक् । सविता । सवीमनि । निऽवेशयन् । प्रऽसुवन् । अक्तुऽभिः । जगत् ॥ ३ ॥

वेङ्कट० दैव्यान् पार्थिवांश्च लोकान् तेजसा आ पूरयति । श्लोकम् देवः आत्मस्वामिकाय मनुष्याय कर्मणे अनुशासनं करोति, प्रकीर्तयति[3] । सविता सृजति बाहू प्रसवार्थम् निवेशयन् प्रसुवन् च [illegible] रश्मिभिः जगत् ॥ ३ ॥

अदाभ्यो भुवनानि प्रचाकशद् व्रतानि देवः सविताऽभि रक्षते ।
प्रास्राग् बाहू भुवनस्य प्रजाभ्यो धृतव्रतो महो अज्मस्य राजति ॥ ४ ॥

अदाभ्यः । भुवनानि । प्रऽचाकशत् । व्रतानि । देवः । सविता । अभि । रक्षते ।
प्र । अस्राक् । बाहू इति । भुवनस्य । प्रऽजाभ्यः । धृतऽव्रतः । महः । अज्मस्य । राजति ॥ ४ ॥

वेङ्कट० अहिंस्यः भुवनानि प्रकाशयन् कर्माणि देवः सविता 'अभि रक्षते । प्र सृजति बाहू लोकस्य सर्वाभ्यः प्रजाभ्यः । तदर्थं धृतकर्मा महतः गृहस्य दिवः ईश्वरो भवति' ॥ ४ ॥

१. नास्ति वि° मूको. २-२. नास्ति वि° मूको. ३-३ नास्ति वि° मूको.

त्रिर॒न्तरि॑क्षं सवि॒ता म॑हित्व॒ना त्री रजां॑सि परि॒भूस्त्रीणि॑ रोच॒ना ।
ति॒स्रो दिवः॑ पृथि॒वीस्ति॒स्र इ॑न्वति त्रि॒भिर्व्र॒तैर॒भि नो॑ रक्षति॒ त्मना॑ ॥ ५ ॥

त्रिः । अ॒न्तरि॑क्षम् । स॒वि॒ता । म॒हि॒ऽत्व॒ना । त्री । रजां॑सि । प॒रि॒ऽभूः । त्रीणि॑ । रो॒च॒ना ।
ति॒स्रः । दिवः॑ । पृ॒थि॒वीः । ति॒स्रः । इ॒न्व॒ति॒ । त्रि॒ऽभिः । व्र॒तैः । अ॒भि । नः॒ । र॒क्ष॒ति॒ । त्मना॑ ॥५॥

वेङ्कट० 'त्रीणि अन्तरिक्षाणि सविता महत्त्वेन' त्रीणि पार्थिवानि' लोकानि' परिभवति' 'त्रीणि च' दिव्यानि (अपि)' । प्रकाशमन्तरस्थानि । तिस्रः दिवः तिस्रः च पृथिवीः व्याप्नोति, त्रिभिः च कर्मभिः अस्मान् अपि रक्षति स्वयमेव ॥ ५ ॥

बृ॒हत्सु॑म्नः प्रसवी॒ता नि॒वेश॑नो॒ जग॑तः स्था॒तुरु॒भय॑स्य॒ यो व॒शी ।
स नो॑ दे॒वः स॑वि॒ता शर्म॑ यच्छत्व॒स्मे क्षया॑य त्रि॒वरू॑थ॒मंह॑सः ॥ ६ ॥

बृ॒हत्ऽसु॑म्नः । प्र॒ऽस॒वी॒ता । नि॒ऽवेश॑नः । जग॑तः । स्था॒तुः । उ॒भय॑स्य । यः । व॒शी ।
सः । नः॒ । दे॒वः । स॒वि॒ता । शर्म॑ । य॒च्छ॒तु॒ । अ॒स्मे इति॑ । क्षया॑य । त्रि॒ऽवरू॑थम् । अंह॑सः ॥६॥

वेङ्कट० महासुखः प्रेरयिता निवेशयिता' जङ्गमस्य स्थावरस्य च उभयस्य यः स्वामी सः नः देवः सविता सुखम् प्रयच्छतु अस्मभ्यम् ओकसे 'निवासाय त्रिगुणम्', अपि पापस्य निवारणाय, शान्तिकुर्वन् सर्वतोऽपि ॥ ६ ॥

आग॑न्दे॒व ऋ॒तुभि॒र्वर्ध॑तु॒ क्षयं॒ दधा॑तु नः सवि॒ता सु॑प्र॒जामिष॑म् ।
स नः॑ क्ष॒पाभि॒रह॑भिश्च जिन्वतु प्र॒जाव॑न्तं र॒यिम॒स्मे समि॑न्वतु ॥ ७ ॥

आ । अ॒ग॒न् । दे॒वः । ऋ॒तुऽभिः॑ । वर्ध॑तु । क्षय॑म् । दधा॑तु । नः॒ । स॒वि॒ता । सु॒ऽप्र॒जाम् । इष॑म् ।
सः । नः॒ । क्ष॒पाभिः॑ । अह॑ऽभिः । च॒ । जि॒न्व॒तु॒ । प्र॒जाऽव॑न्तम् । र॒यिम् । अ॒स्मे इति॑ । सम् । इ॒न्व॒तु॒ ॥७॥

वेङ्कट० आ गच्छतु देव ऋतुभिः वर्धयतु च क्षयम्, दधातु च अस्मभ्यम् सविता शोभनप्रजम् अन्नम् । सः अस्मान् अहोभिः 'रात्रिभिः च' प्रीणयतु', प्रजावन्तम् रयिम् अस्मासु सम् गमयतु ॥ ७ ॥

"इति तृतीयाष्टके चतुर्थाध्याये चतुर्थो वर्गः" ॥

[५४]

"वामदेवो गौतम ऋषिः । सविता देवता । जगती छन्दः, अन्त्यायाः त्रिष्टुप्" ।

अभू॑द्दे॒वः स॑वि॒ता वन्द्यो॒ नु न॑ इ॒दानी॒मह्न॑ उप॒वाच्यो॒ नृभिः॑ ।
वि यो रत्ना॒ भज॑ति मान॒वेभ्यः॒ श्रेष्ठं॑ नो॒ अत्र॒ द्रवि॑णं॒ यथा॒ दध॑त् ॥ १ ॥

१-१. नास्ति वि' अ'. २. °दान मूको. ३. नास्ति वि' अ' छर्प. ४. °ति च वि' अर्प. ५-५. नास्ति वि' अर्प. ६. नास्ति मूको. ७. निवेशयिता वि' अ' अर्प. ८-८. निवासाय त्रिगु° मूको. ९-९. नास्ति वि'. १०. प्रीणयतु मूको. ११-११. नास्ति मूको.

अभूत् । देवः । सविता । वन्द्यः । नु । नः । इदानीम् । अह्नः । उपऽवाच्यः । नृऽभिः ।
वि । यः । रत्ना । भजति । मानवेभ्यः । श्रेष्ठम् । नः । अत्र । द्रविणम् । यथा । दधत् ॥ १ ॥

वेङ्कट० अभवत् देवः सविता वन्दनीयः क्षिप्रम् अस्माकम् अस्मिन् काले अह्नः उपस्तोतव्यः मनुष्यैः । यः रत्नानि वि भजते मनुष्येभ्यः, सविताऽस्मभ्यमपि सः[1] यथा श्रेष्ठम् धनम् ददाति तृतीये सवने प्रयच्छति तथोपवाच्यः ॥ १ ॥

देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमम् ।
आदिद् दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥ २ ॥

देवेभ्यः । हि । प्रथमम् । यज्ञियेभ्यः । अमृतऽत्वम् । सुवसि । भागम् । उत्ऽतमम् ।
आत् । इत् । दामानम् । सवितः । वि । ऊर्णुषे । अनूचीना । जीविता । मानुषेभ्यः ॥ २ ॥

वेङ्कट० देवेभ्यः हि प्रथमम् यज्ञियेभ्यः अमृतत्वम् प्रयच्छसि भागधेयम् उत्तमम् । अनन्तरम् एव आच्छादितारम् अन्धकारम्[2] हे सवितः ![3] अपावृणोषि, तथा[3] अनूचीनानि जीवितानि मनुष्येभ्यः प्रयच्छसि ॥ २ ॥

अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता ।
देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ॥ ३ ॥

अचित्ती । यत् । चकृम । दैव्ये । जने । दीनैः । दक्षैः । प्रऽभूती । पुरुषत्वता ।
देवेषु । च । सवितः । मानुषेषु । च । त्वम् । नः । अत्र । सुवतात् । अनागसः ॥ ३ ॥

वेङ्कट० अज्ञानेन यत् पापम् दैव्ये जने दीनैः बलैः प्रभावेन पौरुषेण वा कर्तव्यम् देवेषु मनुष्येषु च अतिक्रमणात्मकम् कृतवन्तः वयम्[4] अनागस्त्वाय अस्मान् प्रसुवेति । यथा अपापाः स्याम तथा कुर्विति ॥ ३ ॥

न प्रमिये सवितुर्दैव्यस्य तद् यथा विश्वं भुवनं धारयिष्यति ।
यत् पृथिव्या वरिमन्ना स्वङ्गुरिर्वर्ष्मन् दिवः सुवति सत्यमस्य तत् ॥ ४ ॥

न । प्रऽमिये । सवितुः । दैव्यस्य । तत् । यथा । विश्वम् । भुवनम् । धारयिष्यति ।
यत् । पृथिव्याः । वरिमन् । आ । सुऽअङ्गुरिः । वर्ष्मन् । दिवः । सुवति । सत्यम् । अस्य । तत् ॥ ४ ॥

वेङ्कट० न प्रमातुं शक्यम् सवितुः देवस्य[5] तत् कर्म, येन कर्मणा सर्वमपीदम् भुवनम् धारयिष्यति धारयति च । यत् पृथिव्याः विस्तृते देशे शोभनाङ्गुलिकः[6] सविता प्रसौति, यच्च दिवः उच्छ्रिते, सत्यम् तत् अस्य कर्म ॥ ४ ॥

---

१. नास्ति मूको. २. नास्ति वि' अ' ३. नास्ति वि' अप' ४. °मे मूको. ५. देवस्य अप'.
६. शोभनाङ्गुलिकः वि', शोभनाङ्गुलीयकः अप'

इन्द्रज्येष्ठान् बृहद्भ्यः पर्वतेभ्यः क्षयाँ एभ्यः सुवसि पस्त्यावतः ।
यथायथा पतयन्तो वियेमिर एवैव तस्थुः सवितः सवाय ते ॥ ५ ॥

इन्द्रऽज्येष्ठान् । बृहत्ऽभ्यः । पर्वतेभ्यः । क्षयान् । एभ्यः । सुवसि । पस्त्यऽवतः ।
यथाऽयथा । पतयन्तः । विऽयेमिरे । एव । एव । तस्थुः । सवितरिति । सवाय । ते ॥ ५ ॥

वेङ्कट० इन्द्रप्रमुखैर्देवैः युक्तान् एभ्यः महद्भ्यः पर्वतेभ्यः गृहयुक्तान् क्षयान् प्रसुवसि । किं च यथायथा पतयन्तः मनुष्याः कर्माणि विविधं यच्छन्ति तथातथा हे सवितः! तव अनुज्ञायै एव तिष्ठन्ति ॥ ५ ॥

ये ते त्रिरहन्त्सवितः सवासो दिवेदिवे सौभगमासुवन्ति ।
इन्द्रो द्यावापृथिवी सिन्धुरद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥ ६ ॥

ये । ते । त्रिः । अहन् । सवितरिति । सवासः । दिवेऽदिवे । सौभगम् । आऽसुवन्ति ।
इन्द्रः । द्यावापृथिवी इति । सिन्धुः । अत्ऽभिः । आदित्यैः । नः । अदितिः । शर्म । यंसत् ॥ ६ ॥

वेङ्कट० प्रातः मध्यन्दिने सायम् इति ये ते त्रयः सवाः अस्मभ्यं सौभाग्यम् आसुवन्ति, तैः सहेन्द्रादयः सरस्वती च अद्भिः आदित्यैः सह अदितिः च अस्मभ्यं सुखं यच्छतु ॥ ६ ॥

'इति तृतीयाष्टके अष्टमाध्याये पञ्चमो वर्गः' ॥

[५५]

'वामदेवो गौतम ऋषिः । विश्वे देवाः देवता । त्रिष्टुप् छन्दः, अष्टमाद्यास्तिस्रो गायत्र्यः' ।

को वस्त्राता वसवः को वरूता द्यावाभूमी अदिते त्रासीथां नः ।
सहीयसो वरुण मित्र मर्तात् को वोऽध्वरे वरिवो धाति देवाः ॥ १ ॥

कः । वः । त्राता । वसवः । कः । वरूता । द्यावाभूमी इति । अदिते । त्रासीथाम् । नः ।
सहीयसः । वरुण । मित्र । मर्तात् । कः । वः । अध्वरे । वरिवः । धाति । देवाः ॥ १ ॥

वेङ्कट० कः वः रक्षिता हे वसवः!, कः वा अन्यस्मात् । हे द्यावाभूमी! अदिते! रक्षतम् अस्मान् । तथा हे वरुण मित्र! अभिभवितुः मनुष्यात् अस्मान् रक्षतम् । हे विश्वे देवाः! कः वः यज्ञे पूजां धारयति ॥ १ ॥

प्र ये धामानि पूर्व्याण्यर्चान् वि यदुच्छान् वियोतारो अमूराः ।
विधातारो वि ते दधुरजस्रा ऋतधीतयो रुरुचन्त दस्माः ॥ २ ॥

१. °ह्यमनेभ्य वि° मूको. २. त्रयो मूको. ३-३. नास्ति मूको. ४. द्यावाभूमी वि° मू°.

प्र । ये । धामानि । पूर्व्याणि । अर्चान् । वि । यत् । उच्छान् । विऽयोतारः । अमूराः ।
विऽधातारः । वि । ते । दधुः । अजस्राः । ऋतऽधीतयः । रुरुचन्त । दस्माः ॥ २ ॥

वेङ्कट० प्र अर्चन्ति ये पूर्व्याणि धामानि, वि उच्छन्ति यदा[1] पृथक्कर्तारः पापस्य अमूढाः, विधातारः ते वि दधुः अजस्राः यज्ञम्, सत्यकर्माणः ते दीप्यन्ते दर्शनीयाः ॥ २ ॥

प्र पस्त्या॒मदि॑तिं॒ सिन्धु॑म॒र्कैः स्व॒स्तिमी॑ळे स॒ख्याय॑ दे॒वीम् ।
उ॒भे यथा॑ नो॒ अह॑नी नि॒पात॑ उ॒षासा॒नक्ता॑ कर॒ताम॑दब्धे ॥ ३ ॥

प्र । पस्त्याम् । अदितिम् । सिन्धुम् । अर्कैः । स्वस्तिम् । ईळे । सख्याय । देवीम् ।
उभे इति । यथा । नः । अहनी इति । निऽपातः । उषसानक्ता । करताम् । अदब्धे इति ॥ ३ ॥

वेङ्कट० प्र स्तौमि गृहहिताम् अदितिम् स्यन्दमानाम्[2] स्वस्तिम् च देवीम् स्तोत्रैः सख्यसिद्ध्यर्थम् । उभये यथा अस्मान् अहोरात्रे निपातेन रक्षतः अहोरात्रे एवम् अहिंसिते कर्म कुरुताम् ॥ ३ ॥

व्य॑र्य॒मा वरु॑णश्चेति॒ पन्था॑मि॒षस्पति॑ः सुवि॒तं गा॒तुम॒ग्निः ।
इन्द्रा॑विष्णू नृ॒वदु॒ षु स्तवा॑ना॒ शर्म॑ नो यन्त॒मम॑वद्वरू॒थम् ॥ ४ ॥

वि । अर्यमा । वरुणः । चेति । पन्थाम् । इषः । पतिः । सुवितम् । गातुम् । अग्निः ।
इन्द्राविष्णू इति । नृऽवत् । ऊं इति । सु । स्तवाना । शर्म । नः । यन्तम् । अमऽवत् । वरूथम् ॥ ४ ॥

वेङ्कट० वि चिनोति पन्थानम् अर्यमा वरुणः च अस्माकम्, तथा अन्नपतिः शोभनमार्गम्[3] अग्निः । हे इन्द्राविष्णू! स्तूयमानौ बलवत् वरणीयं गृहम् अस्मभ्यम् मनुष्ययुक्तं सुष्ठु दत्तम् ॥ ४ ॥

आ पर्व॑तस्य म॒रुता॒मवां॑सि दे॒वस्य॑ त्रा॒तुर॑व्रि॒ भग॑स्य ।
पात् पति॒र्जन्या॒दंह॑सो नो मि॒त्रो मि॒त्रिया॑दु॒त न॑ उरुष्येत् ॥ ५ ॥

आ । पर्वतस्य । मरुताम् । अवांसि । देवस्य । त्रातुः । अव्रि । भगस्य ।
पात् । पतिः । जन्यात् । अंहसः । नः । मित्रः । मित्रियात् । उत । नः । उरुष्येत् ॥ ५ ॥

वेङ्कट० आ वृणे मेघस्य मरुताम् च रक्षणानि तथा देवस्य त्रातुः भगस्य । रक्षतु पालयिता इन्द्रः जनभवात् उपद्रवात् अस्मान्, मित्रः च मित्रभवात् उपद्रवात् अस्मान् रक्षेत् ॥ ५ ॥

[4]इति तृतीयाष्टके अष्टमाध्याये षष्ठो वर्गः[4] ॥

---

१. यदा वि° अ°. २. स्यन्दनी° मूको. ३. शोभनमार्गम्° वि°. ४-४ नास्ति मूको.

नू रोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः ।
समुद्रं न संचरणे सनिष्यवो घर्मस्वरसो नद्यो अप व्रन् ॥ ६ ॥

नु । रोदसी इति । अहिना । बुध्न्येन । स्तुवीत । देवी इति । अप्येभिः । इष्टैः ।
समुद्रम् । न । सम्ऽचरणे । सनिष्यवः । घर्मऽस्वरसः । नद्यः । अप । व्रन् ॥ ६ ॥

वेङ्कट० क्षिप्रम् हे द्यावापृथिवी देव्यौ! अहिना बुध्न्येन देवेन सह [illegible], तथा अस्माभिर्यष्टव्यैः प्रियैर्देवैः सह । यथा समुद्रम् संचरणे धनकामा लिप्सवो गच्छन्त्येवं घर्मस्वरसा नद्यः अप गच्छन्तु यथाकामं वहन्तु ॥ ६ ॥

देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
नहि मित्रस्य वरुणस्य धासिमर्हामसि प्रमियं सान्वग्नेः ॥ ७ ॥

देवैः । नः । देवी । अदितिः । नि । पातु । देवः । त्राता । त्रायताम् । अप्रऽयुच्छन् ।
नहि । मित्रस्य । वरुणस्य । धासिम् । अर्हामसि । प्रऽमियम् । सानु । अग्नेः ॥ ७ ॥

वेङ्कट० गतः पूर्वार्धः (ऋ १।१०६,७) । नहि वयं मित्रावरुणयोः अन्नं अहिंसितुम् [illegible], तथा अग्नेश्च समुच्छ्रितम् हविः ॥ ७ ॥

अग्निरीशे वसव्यस्याग्निर्महः सौभगस्य । तान्यस्मभ्यं रासते ॥ ८ ॥

अग्निः । ईशे । वसव्यस्य । अग्निः । महः । सौभगस्य । तानि । अस्मभ्यम् । रासते ॥ ८ ॥

वेङ्कट० वसुनो धनस्य महतः सौभाग्यस्य च ईश्वरः अग्निः । तानि धनानि अस्मभ्यं प्रयच्छतु ॥ ८ ॥

उषो मघोन्या वह सूनृते वार्या पुरु । अस्मभ्यं वाजिनीवति ॥ ९ ॥

उषः । मघोनि । आ । वह । सूनृते । वार्या । पुरु । अस्मभ्यम् । वाजिनीऽवति ॥ ९ ॥

वेङ्कट० पुरूणि धनानि हे उषः मघवति! अस्मभ्यम् आ भर । [illegible] ॥ ९ ॥

तत् सु नः सविता भगो वरुणो मित्रो अर्यमा । इन्द्रो नो राधसा गमत् ॥ १० ॥

तत् । सु । नः । सविता । भगः । वरुणः । मित्रः । अर्यमा । इन्द्रः । नः । राधसा । आ । गमत् ॥ १० ॥

वेङ्कट० सवित्रादिः तत् धनम् अस्मभ्यम् सुष्ठु प्रयच्छन्तु । इन्द्रः अस्मान् धनेन आ गच्छतु ॥ १० ॥

[2] इति तृतीयाष्टके अष्टमाध्याये सप्तमो वर्गः [3] ॥

---

१. क्षिप्रं च विं ख कं. २-३. नास्ति मूको.

[५६]

¹वामदेवो गौतम ऋषिः । द्यावापृथिवी देवता । त्रिष्टुप् छन्दः, पञ्चम्यादिद्व्यन्त्यास्तिस्रो गायत्र्यः ।

मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयद्भिरर्कैः ।
यत् सीं वरिष्ठे बृहती विमिन्वन् रुवद्धोक्षा पप्रथानेभिरेवैः ॥ १ ॥

मही इति । द्यावापृथिवी इति । इह । ज्येष्ठे इति । रुचा । भवताम् । शुचयत्ऽभिः । अर्कैः ।
यत् । सीम् । वरिष्ठे इति । बृहती इति । विऽमिन्वन् । रुवत् । ह । उक्षा । पप्रथानेभिः । एवैः ॥ १ ॥

वेङ्कट० महती द्यावापृथिव्यौ इह श्रेष्ठे दीप्त्या शुचयद्भिः अर्चनीयैः सह भवताम् । यदा अनयोः वरिष्ठे महती परिच्छिन्दन् शब्दं करोति वर्षेण प्रथमानैः गमनैः सह ॥ १ ॥

देवी देवेभिर्यजते यजत्रैरमिनती तस्थतुरुक्षमाणे ।
ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री शुचयद्भिरर्कैः ॥ २ ॥

देवी इति । देवेभिः । यजते इति । यजत्रैः । अमिनती इति । तस्थतुः । उक्षमाणे इति ।
ऋतवरी इत्यृतऽवरी । अद्रुहा । देवपुत्रे इति देवऽपुत्रे । यज्ञस्य । नेत्री इति । शुचयत्ऽभिः । अर्कैः ॥ २ ॥

वेङ्कट० देवनशीले देवैः यष्टव्ये यजनीयैः अहिंसन्त्यौ² तस्थतुः सिञ्चन्त्यौ³ उदकवत्यौ अद्रोग्ध्र्यौ⁴ देवाः पुत्राः ययोः ते⁵ यज्ञस्य नेत्र्यौ दीप्यमाने⁶ अर्कैः ॥ २ ॥

स इत् स्वपा भुवनेष्वास य इमे द्यावापृथिवी जजान ।
उर्वी गभीरे रजसी सुमेके अवंशे धीरः शच्या समैरत् ॥ ३ ॥

सः । इत् । सुऽअपाः । भुवनेषु । आस । यः । इमे इति । द्यावापृथिवी इति । जजान ।
उर्वी इति । गभीरे इति । रजसी इति । सुमेके इति सुऽमेके । अवंशे । धीरः । शच्या । सम् । ऐरत् ॥ ३ ॥

वेङ्कट० सः एव सुकर्मा भुवनेषु अभवत्, यः इमे द्यावापृथिव्यौ जजान । विस्तीर्णे गम्भीरे द्यावापृथिव्यौ शोभनरूपे¹ स धीरः, अवंशे अन्तरिक्षे कर्मणा ॥ ३ ॥

नू रोदसी बृहद्भिर्नो वरूथैः पत्नीवद्भिरिषयन्ती सजोषाः ।
उरूची विश्वे यजते नि पातं धिया स्याम रथ्यः सदासाः ॥ ४ ॥

नु । रोदसी इति । बृहत्ऽभिः । नः । वरूथैः । पत्नीवत्ऽभिः । इषयन्ती इति । सऽजोषाः ।
उरूची इति । विश्वे इति । यजते इति । नि । पातम् । धिया । स्याम । रथ्यः । सदाऽसाः ॥

१ १ नास्ति मूको. २ °मन्ती मूको. ३ °शयो वि°. ४ °मनो मूको. ५. नास्ति मूको.
६. हांसमाने क.

वेङ्कट० प्रियं हे द्यावापृथिवी! महद्भिः अस्मद्गृहे, यशोयुक्तैः अन्नं कुर्वाणा स्तुते उरुत्वमन्न्वस्मै स्यात् महत्त्वं निरतं स्वलतम् । हविर्भिः वये कर्मणा सदा सकलफलाय स्यात ॥ ४ ॥

प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे । शुची उप प्रशस्तये ॥ ५ ॥

प्र । वाम् । महि । द्यवी इति । अभि । उपऽस्तुतिम् । भरामहे । शुची इति । उप । प्रऽशस्तये ॥५॥

वेङ्कट० प्र भरामहे वाम् अभि द्यावापृथिव्यौ महतीम् उपस्तुतिम् दीप्यमाने उप प्रशंसितुम् ॥ ५ ॥

पुनाने तन्वा मिथः स्वेन दक्षेण राजथः । ऊह्याथे सनादृतम् ॥ ६ ॥

पुनाने इति । तन्वा । मिथः । स्वेन । दक्षेण । राजथः । ऊह्याथे इति । सनात् । ऋतम् ॥६॥

वेङ्कट० आत्मनी शरीरेण पुनाने उद्वहतम् च यज्ञम् स्वेन बलेन राजथः, वहथ च चिरात्प्रारब्धं यज्ञम् ॥ ६ ॥

मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम् । परि यज्ञं नि षेदथुः ॥ ७ ॥

मही इति । मित्रस्य । साधथः । तरन्ती इति । पिप्रती इति । ऋतम् । परि । यज्ञम् । नि । सेदथुः ॥

वेङ्कट० महती[1] मित्रस्य[2] यज्ञं साधयथः, तरन्त्यौ मित्रं पूरयन्त्यौ परि नि षेदथुः च तस्य यज्ञम् ॥ ७ ॥

'इति तृतीयाष्टके अष्टमाध्याये अष्टमो वर्गः' ॥

[५७]

'वामदेवो गौतम ऋषिः । प्रथमादितृतीयान्तानां क्षेत्रपतिर्देवता, चतुर्थ्याः शुनः, पञ्चम्यष्टम्योः शुनासीरौ, षष्ठीसप्तम्योः सीता । अनुष्टुप् छन्दः, पञ्चमी पुरउष्णिक्, द्वितीयातृतीयाष्टम्यस्त्रिष्टुभः' ।

क्षेत्रस्य पतिना वयं हितेनेव जयामसि । गामश्वं पोषयित्न्वा स नो मृळातीदृशे ॥१॥

क्षेत्रस्य । पतिना । वयम् । हितेनऽइव । जयामसि ।
गाम् । अश्वम् । पोषयित्नु । आ । सः । नः । मृळाति । ईदृशे ॥ १ ॥

वेङ्कट० 'क्षेत्रस्य पतिना वयम् सुहितेनेव जयामः गाम् अश्वम् पोषयित्नु[4] आऽऽहर' इति यास्कः (१०,१४)। मधुपतयो वा आकारः । "'स नो मृळातीदृशे' धनेन वा धनेन वा"[5] इति यास्कः (१०,१४) ॥ १ ॥

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ।
मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु ॥ २ ॥

१. नास्ति वि¹ लपे. २. नास्त्यो क प्रस्ताव. २-३. नास्ति मूको ४. पुत्रं पोषयित्नु वि¹.
५. या दृशेन धनस्य धनेन वि¹ अ¹, ना दृशेन क लपे.

क्षेत्र॑स्य । प॒ते॒ । मधु॑ऽमन्तम् । ऊ॒र्मिम् । धे॒नुःऽइ॑व । पयः॑ । अ॒स्मासु॑ । धु॒क्ष्व॒ ।
म॒धु॒ऽश्चुत॑म् । घृ॒तम्ऽइ॑व । सुऽपू॑तम् । ऋ॒तस्य॑ । नः॒ । पत॑यः । मृ॒ळ॒य॒न्तु॒ ॥ २ ॥

वेङ्कट० हे क्षेत्रस्य पते! मधुमन्तम् ऊर्मिम् [illegible] यथा धेनुः पयः दुग्धे एवम् अस्मासु [illegible] । मधुश्चुतम् ऊर्मिम् घृतमिव सुपूतम् अस्मासु धुक्ष्व । [illegible] पतयः अस्मान् मृळयन्तु [illegible][3] । निरुक्तं द्रष्टव्यम् (या १०, १६) ॥ २ ॥

मधु॑मती॒रोष॑धी॒र्द्याव॒ आपो॒ मधु॑मन्नो भवत्व॒न्तरि॑क्षम् ।
क्षेत्र॑स्य॒ पति॒र्मधु॑मान्नो अ॒स्त्वरि॑ष्यन्तो॒ अन्वे॑नं चरेम ॥ ३ ॥

मधु॑ऽमतीः । ओष॑धीः । द्यावः॑ । आपः॑ । मधु॑ऽमत् । नः॒ । भ॒व॒तु॒ । अ॒न्तरि॑क्षम् ।
क्षेत्र॑स्य । पतिः॑ । मधु॑ऽमान् । नः॒ । अ॒स्तु॒ । अरि॑ष्यन्तः । अनु॑ । ए॒न॒म् । च॒रे॒म॒ ॥ ३ ॥

वेङ्कट० एते सर्वे अस्माकं मधुमन्तः भवन्तु । वयम् अनु चरेम क्षेत्रस्य पतिम् अहिंस्यमानाः ॥ ३ ॥

शु॒नं वा॒हाः शु॒नं नरः॑ शु॒नं कृ॑षतु॒ लाङ्ग॑लम् ।
शु॒नं व॑र॒त्रा ब॑ध्यन्तां शु॒नमष्ट्रा॒मुदि॑ङ्गय ॥ ४ ॥

शु॒नम् । वा॒हाः । शु॒नम् । नरः॑ । शु॒नम् । कृ॒ष॒तु॒ । लाङ्ग॑लम् ।
शु॒नम् । व॒र॒त्राः । ब॒ध्य॒न्ता॒म् । शु॒नम् । अष्ट्रा॑म् । उत् । इ॒ङ्ग॒य॒ ॥ ४ ॥

वेङ्कट० सुखम् अश्वाः [illegible] बलीवर्दाः कृषन्तु । तथा कीनाशाः नरः सुखम् एव कृषन्तु 'शुनम् कृषतु' [illegible] । तथा वरत्राः च सुखम् [illegible] बध्यन्ताम् च सुखम् भवतु । हे कीनाश! त्वम् अष्ट्राम् च सुखम् एव उत् इङ्गय इति [illegible] । शुनः देवता मन्त्रस्य । तत सुखम् । भवति हि क्षेत्रकर्षणे सुखमिति ॥ ४ ॥

शुना॑सीराावि॒मां वाचं॑ जुषेथां॒ यद्दि॒वि च॒क्रथुः॒ पयः॑ । तेने॒मामुप॑ सिञ्चतम् ॥ ५ ॥

शुना॑सीरौ । इ॒माम् । वाच॑म् । जु॒षे॒था॒म् । यत् । दि॒वि । च॒क्रथुः॑ । पयः॑ । तेन॑ । इ॒माम् । उप॑ । सि॒ञ्च॒त॒म् ॥ ५ ॥

वेङ्कट० इन्द्रः शुनरूपेण परिणमति, वायुः सीररूपो भवति । हे शुनासीरौ! स्तुतिम् इमाम् सेवेथाम् । यत् युवाम् अन्तरिक्षे देवताभूतौ उदकम् चक्रथुः, तेन भूमिम् उप सिञ्चतम् ॥ ५ ॥

अ॒र्वाची॑ सुभगे भव॒ सीते॒ वन्दा॑महे त्वा ।
यथा॑ नः सु॒भगास॑सि॒ यथा॑ नः सु॒फलास॑सि ॥ ६ ॥

१. नास्ति वि॰ कप. २ देवाः ल. ३-३ नास्ति मूको.

अर्वाची । सुऽभगे । भव । सीते । वन्दामहे । त्वा ।
यथा । नः । सुऽभगा । असंसि । यथा । नः । सुऽफला । असंसि ॥ ६ ॥

वेङ्कट० हे सुभगे सीते! अभिमुखी भव, वन्दामहे त्वा वयम्, यथा नः सुभगा भवसि, यथा च सुफला भाग्यहेतुः ॥ ६ ॥

इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥ ७ ॥

इन्द्रः । सीताम् । नि । गृह्णातु । ताम् । पूषा । अनु । यच्छतु ।
सा । नः । पयस्वती । दुहाम् । उत्तराम्ऽउत्तराम् । समाम् ॥ ७ ॥

वेङ्कट० इन्द्रः सीताम् पृथिव्याम् नि गृह्णातु । ताम् सीताम् पूषा अनु नियच्छतु । सा सीता पयस्वती दुग्धाम् अस्मभ्यम् उत्तरम् संवत्सरम् [illegible] ॥ ७ ॥

शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ॥ ८ ॥

शुनम् । नः । फालाः । वि । कृषन्तु । भूमिम् । शुनम् । कीनाशाः । अभि । यन्तु । वाहैः ।
शुनम् । पर्जन्यः । मधुना । पयःऽभिः । शुनासीरा । शुनम् । अस्मासु । धत्तम् ॥ ८ ॥

वेङ्कट० फालाः सीराग्राणि सुखम् अस्माकम् भूमिम् वि कृषन्तु । सुखम् एव कृषमाणाः कीनाशाः अभिगच्छन्तु वाहैः सह । सुखम् पर्जन्यः मधुरेण सारेण अभिवर्षतु । हे शुनासीरौ! युवां च सुखम् अस्मासु धत्तम् इति । अत्र बृहद्देवता—

"'शुनं वाहाः' 'शुनं नरः'" इत्यृगुक्ता ॥
वायुं शुनं 'शुनं वृषभं' सीरः शुनासीरौ [illegible] ।
"शुनासीरौ [illegible] [illegible] ॥
शुनासीरौ [illegible] ।
'शुनं नः फालाः' [illegible] 'शुनं कीनाशाः' [illegible] ॥
[illegible] ।
"[illegible]" (बृहद्दे ५, [illegible]) इति ॥

"इति तृतीयाष्टके अष्टमाध्याये नवमो वर्गः" ॥

१. [illegible] २. नास्ति मूको. ३. [illegible] मूको. ४. [illegible] ५-५. [illegible] ६-६. [illegible] मूको. ७-७. [illegible] मूको. ८. [illegible] मूको. ९-९. [illegible] मूको. १०. [illegible] मूको. ११. [illegible] मूको. १२. [illegible] मूको. १३-१३. [illegible] मूको. १४-१४. नास्ति मूको.

[५८]

[1]वामदेवो गौतम ऋषिः । अग्निर्देवता, सूर्यो वा आपो वा गावो वा घृतस्तुतिर्वा ।
त्रिष्टुप् छन्दः, एकादशी जगती[1] ।

समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ १ ॥

समुद्रात् । ऊर्मिः । मधुऽमान् । उत् । आरत् । उप । अंशुना । सम् । अमृतऽत्वम् । आनट् ।
घृतस्य । नाम । गुह्यम् । यत् । अस्ति । जिह्वा । देवानाम् । अमृतस्य । नाभिः ॥ १ ॥

वेङ्कट० [2]कात्यायन — 'समुद्रादेकादशाग्नेयं सौर्यं वाऽऽपं वा गव्यं वा घृतस्तुतिर्वा' (ऋ.अ. ४,४,५८ इति[2]) । समुद्रात् ऊर्मिः मधुमान् उदकमात् उ.म. अग्निरादित्यो वा उत् आरत् उद्गात् । सोऽयम् ... अमृतत्वम् मनुष्यान् अमरत्वम् प्रापयति[3] । [4]तथा घृतस्य नाम यत् गुह्यं नाम भवति तदहं कीर्तयामि । तदाह — 'घृतम् जिह्वा भवति । असौ हि देवानां होमः आदित्ये वा अमृतस्य च स्थाने भवतीति'[4] ॥ १ ॥

वयं नाम प्र ब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥ २ ॥

वयम् । नाम । प्र । ब्रवाम । घृतस्य । अस्मिन् । यज्ञे । धारयाम । नमःऽभिः ।
उप । ब्रह्मा । शृणवत् । शस्यमानम् । चतुःऽशृङ्गः । अवमीत् । गौरः । एतत् ॥ २ ॥

वेङ्कट० [5]'जिह्वा देवानामि'तीदम् नाम घृतस्य वयं प्र ब्रवाम, अस्मिन् यज्ञे धारयाम च स्तुतिभिः नमोभिः । उप शृणोति ब्रह्मा शस्यमानं नाम । तदिदं नाम चतुःशृङ्गः 'गौरः' वमति प्रकाशयति[5] ॥ २ ॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥ ३ ॥

चत्वारि । शृङ्गा । त्रयः । अस्य । पादाः । द्वे इति । शीर्षे इति । सप्त । हस्तासः । अस्य ।
त्रिधा । बद्धः । वृषभः । रोरवीति । महः । देवः । मर्त्यान् । आ । विवेश ॥ ३ ॥

वेङ्कट० [6]अस्य[6] गौरस्य चत्वारि शृङ्गाणि भवन्ति, त्रयः च पादाः, द्वे च शीर्षे, सप्त च हस्तासः [7]अस्य । स शब्दम् त्रिधा बद्धः वृषभः शब्दं करोति । सोऽयं 'महान् देवः' मनुष्यान् आ विवेश[7]

१-१. नास्ति मूको. २-२. नास्ति वि॰ अ॰. † नास्ति वि॰ लपं. ३. प्रकाशयति वि॰ लपं. ४-४. नास्ति वि॰ लपं. † नास्ति क. ५-५. नास्ति वि॰ अप. ६. नास्ति वि॰ अ॰. ७-७. नास्ति वि॰ लपं.

इति । [illegible] इन्द्र इति [illegible] ... त्रिधा हद इति मन्त्र[illegible] ... 'महो देवो' [illegible] (गु. ब्रा १३.७) ॥ ३ ॥

त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः ॥ ४ ॥

त्रिधा । हितम् । पणिऽभिः । गुह्यमानम् । गवि । देवासः । घृतम् । अनु । अविन्दन् ।
इन्द्रः । एकम् । सूर्यः । एकम् । जजान । वेनात् । एकम् । स्वधया । निः । ततक्षुः ॥ ४ ॥

वेङ्कट० त्रिधा हितम् पणिभिः [illegible] गवि [illegible] घृतम् [illegible] देवाः अनु अविन्दन् । तस्य घृतस्य एकम् अंशम् इन्द्र जनयति, द्वितीयम् [illegible] । [illegible] कुर्वन्ति । [illegible] ॥ ४ ॥

एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥ ५ ॥

एताः । अर्षन्ति । हृद्यात् । समुद्रात् । शतऽव्रजाः । रिपुणा । न । अवऽचक्षे ।
घृतस्य । धाराः । अभि । चाकशीमि । हिरण्ययः । वेतसः । मध्ये । आसाम् ॥ ५ ॥

वेङ्कट० एताः गच्छन्ति हृद्यात् अन्तरिक्षात् शतमार्गाः [illegible] रिपुणा न [illegible] । ताः एताः घृतस्य धाराः अभि पश्यामि । तासाम् मध्ये हिरण्मयः [illegible] वेतसः तिष्ठति इति वैद्युतमग्निमादित्यं वा आहेति ॥ ५ ॥

इति तृतीयाष्टके अष्टमाध्याये दशमो वर्गः ॥

सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥ ६ ॥

सम्यक् । स्रवन्ति । सरितः । न । धेनाः । अन्तः । हृदा । मनसा । पूयमानाः ।
एते । अर्षन्ति । ऊर्मयः । घृतस्य । मृगाःऽइव । क्षिपणोः । ईषमाणाः ॥ ६ ॥

वेङ्कट० समीचीनं समुद्रात् स्रवन्ति नद्यः इव वाचः [illegible] । अन्तः [illegible] मनसा हृदयेन च

१ १. [illegible]   २. [illegible]   ३. [illegible] मूको.   ४. [illegible]
५. [illegible] मूको.   ६. [illegible]

पूज्यमानाः क्षायमाणा[1] । प्रकारान्तरेणाह — एते मन्त्राग्नि [illegible] [illegible][2] 'सीदन्, [illegible] इव शुद्धस्पीयाद् अपाद्य पवमानाः[4] ॥ ६ ॥

सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ ७ ॥

सिन्धोःऽइव । प्रऽअध्वने । शूघनासः । वातऽप्रमियः । पतयन्ति । यह्वाः ।
घृतस्य । धाराः । अरुषः । न । वाजी । काष्ठाः । भिन्दन् । ऊर्मिऽभिः । पिन्वमानः ॥ ७ ॥

वेङ्कट० नद्याः इव अध्वनः प्रारम्भे पतनदेशे शूघनासः शीघ्रं गन्तारः[3] शुधिन्यां वातवेगेनेतस्ततः[4] प्रक्षिप्यमाणाः पतन्ति महत्यः घृतस्य धाराः । प्रेरयति[5] वारोचमानः इव अश्वः दिशो सेवकपीयुताः भिन्दन् अपाद् ऊर्मिभिः पिन्वमानः ॥ ७ ॥

अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥ ८ ॥

अभि । प्रवन्त । समनाऽइव । योषाः । कल्याण्यः । स्मयमानासः । अग्निम् ।
घृतस्य । धाराः । सम्ऽइधः । नसन्त । ताः । जुषाणः । हर्यति । जातऽवेदाः ॥ ८ ॥

वेङ्कट० यास्कः — 'अभिनमन्त[6] समनसः इव योषाः । समनं समननाद्वा संमाननाद्वा[7] कल्याण्यः स्मयमानासः । अग्निमित्यभिमतम् । घृतस्य धाराः समिधो नसन्त । [illegible] [illegible] ताः जुषाणो[8] हर्यति जातवेदाः हर्यतिः प्रेप्साकर्मा विहर्यतीति[9] (नि ७,१७) । [illegible] -[illegible] गच्छन्ति समनस्काः इव स्त्रियः कल्याण्यः स्मयमानाः आत्मनः [illegible] घृतस्य[10] धाराः समिध इव अग्निम् । ताः प्रीयमाणाः कामयते जातवेदाः ॥ ८ ॥

कन्याइव वहतुमेतवा उ अञ्ज्यञ्जाना अभि चाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते ॥ ९ ॥

कन्याःऽइव । वहतुम् । एतवै । ऊँ इति । अञ्जि । अञ्जानाः । अभि । चाकशीमि ।
यत्र । सोमः । सूयते । यत्र । यज्ञः । घृतस्य । धाराः । अभि । तत् । पवन्ते ॥ ९ ॥

---

१. [illegible] वि[1] अ[1] ख. २ '[illegible] धारा [illegible]' वि[1] अपं. ३-३ नास्ति वि[1] [illegible]. ४ [illegible] वि[1] [illegible]; [illegible] वि[1] अ[1]. ५ [illegible] वि[1] [illegible]. ६ [illegible] वि[1] [illegible]. ७. [illegible] मूको. ८. [illegible] वि[1] [illegible]; [illegible] वि[1]. ९. [illegible] वि[1] अ[1]. १०-१० '[illegible] [illegible] [illegible]' वि[1], '[illegible] [illegible]' अ[1]. ११-११. '[illegible]' वि[1] अ[1]. १२. नास्ति वि[1] अ[1].

वेङ्कट० युवता[1] इव भर्तारम् एते शरीरम् अलङ्कुर्वाणाः घृतस्य धाराः अभि पश्यामि । यत्र यागः सिध्यते, यत्र चान्यद् हविस्तो, तत्र घृतस्य धाराः अभि गच्छन्ति ॥ ९ ॥

अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥ १० ॥

अभि । अर्षत । सुऽस्तुतिम् । गव्यम् । आजिम् । अस्मासु । भद्रा । द्रविणानि । धत्त ।
इमम् । यज्ञम् । नयत । देवता । नः । घृतस्य । धाराः । मधुऽमत् । पवन्ते ॥ १० ॥

वेङ्कट० अभि गच्छत सुस्तोत्रं गोहितं[2] गमनशीलमाजिम् । अस्मासु च भजनीयानि धनानि धत्त । तथा इमम् यज्ञम् नयत देवतासु अस्माकम् । घृतस्य धाराः इमाः मधुयुक्तं क्षरन्ति । पादश्चतुर्थः परोक्ष इति ॥ १० ॥

धामन्ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम् ॥ ११ ॥

धामन् । ते । विश्वम् । भुवनम् । अधि । श्रितम् । अन्तरिति । समुद्रे । हृदि । अन्तः । आयुषि ।
अपाम् । अनीके । सम्ऽइथे । यः । आऽभृतः । तम् । अश्याम । मधुऽमन्तम् । ते । ऊर्मिम् ॥ ११ ॥

वेङ्कट० हे अग्ने सूर्य! यत् तव तेजसि विश्वम् भूतजातम् अधि श्रितम् । स त्वम् अन्तरिक्षस्य अन्तः वर्तसे । तथा मनुष्ये च हृदि अन्तः वर्तसे । अपाम् सङ्घे सङ्ग्रामे[3] यः आहृतः, तम् मधुमन्तम् उदकसङ्घातं त्वत्तः वयं लभेमहि ॥ ११ ॥

[4]इति तृतीयाष्टके सप्तमाध्याये एकादशो वर्गः[4] ॥

भावयन्परिमाणकमस्माकं सूक्तजप्रसा ।
शौनकोऽप्याह बहुधा वामदेवः प्रसीदतु ॥ इति ॥

—❀—

इति ऋग्वेदे सभाष्ये चतुर्थं मण्डलं समाप्तम् ॥



१. युवतय. मूको. २. °हित वि° लर्प. ३. सङ्ग्रामे वि° अ°. ४-४ नास्ति मूको.

शोधपत्रम्[1]

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
११५३	१७	यथोऽपर ..१०)	यथेऽपरिमितम् (तु. काठ २, ८, २, ६)
११५४	६	हविषाम्	हविषा
११५५	१४	देव।[1]	× ×
„	१६	विंवतुः	विंवृतः
„	२६	१. नास्ति मूको.	× ×
११६१	१५	श्रान्ते	श्मस्यै
११६७	११	पुऽमन्तम्	पुऽमन्तम्
११७२	१७	°होमा°	°होमा°
११७५	६	वर्धयन्ति	वर्धयन्ति
११७८	१६	वलवत्तमम् ।	। बलवत्तमम्
११८२	२१	सुमसौ°	सुमसौ°
११९५	१५	पुनिह्य[1]	× ×
„	२५	नास्ति वि° स लर्ध	पुनिह्य वि° स°
११९७	६	। विद्रुतः	विद्रुतः ।
११९८	७	गात_नो	गातुक्नो
१२०१	२०	उनो	उनो
१२०२	६	हरी	हरी
„	२०	पुम्बा°	पुम्बा°
१२०३	१८	महस्वं°	महस्वं°
१२०४	२०	अर्णः ऽनृतम्	अर्णः ऽनृतम्
१२०५	१२	सौवश्व्यस्यत्रोः	सौवश्व्यस्य सत्रो
१२१०	३	°रसोदाय	°रमसिनोदाय
१२१६	१८	नस्य	नस्य
१२१७	१९	अपहर्तुं साम् इव ।	अपहर्तुम् । आ वि
„	„	सोम्यः°	सोम्यः° ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१२१९	१	प्रमृतिम्	प्रमृतिम्
„	९	धरम्	धरम्
„	१४	मद्द्विषो	मद् द्विषो
१२२१	१६	प्ररन्तुः	परन्तु
१२३१	१०	सपर्यसा	सुपर्यन्ता
१२३३	२४	ते न	ते
१२३४	११	सप्तो	सप्तो
१२३५	२०	प्रियस्यं	प्रियस्यं
१२४०	१९	मन्रेन्	मन्रेन्
१२४१	२०	हर्षीऽकस्तः	हर्षीऽकस्तः
१२४२	१६	एनी	एनो
१२४५	२१	भ्रहे	प्रहे
१२४८	१	सुंस	सुंसे
१२४८	१	विनोसमम्	विद्यामेषम्
१२५२	२	°रापसः	°रापस°
१२५६	४	गिरः	गिरः
१२५९	१३	समुच्छितं	समुच्छितं
१२६९	२०	प्ररयेषे	नरयेषे
१२७०	१०	रुप्याऽव	रुप्याऽव
„	१५	प्रथी	। प्रथी
१२७५	२०	विऽचर्षणि:	विऽचर्षणि:
१२८१	१८	°मागझेति	°मागच्छेति
१२८३	६	नयः । उद्°	नय उद्
„	७	°मे स°	°मे । स°
„	२९	सुऽपत्नी इर्ति सुपत्नी	सुपत्नी इति सुऽपत्नी
१२८४	११	(?)	× ×
१२८७	१०	मनु°	मनु°

1. ×एतच्चिह्नमात्र पाठो नेष्टः ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१२९६	१८	तनूनपात्	तनूनपात्	१३९०	९	प्रदिवो	प्रदिवो
१२९७	२०	°ते इति	°ते इति	१३९१	१८	अंशुः	अंशुः
१३०२	१९	°षस् स°	°षम् । स°	१३९२	३	सर्मा	सर्मा
१३०५	१७	ऋतऽवरी	ऋतवरी	१३९३	१६	°ऽक्तो	°ऽक्तो
		इत्यृतवरी	इत्यृतऽवरी	१३९६	८	समृते इति	समृते इति
१३११	१०	वेरिति	वेरिति	१३९७	१५	वर्धितः	वर्धितः
१३२२	८	देवा_	देवासः	१३९७	१३	°पिन्वो	°पिन्वी
१३२३	१	हकारी	सहकारी	१३९९	२२	°स्पहताम्	°स्पहताम्
,,	१५	साक°	साक°	१४१२	१३	पञ्चमशम्	पञ्चमेशम्
१३३४	१५	वपो	वपो	१४१६	७	सर्वन्	सर्धुन्
,,	१६	अभि°	अभि°	१४१८	१२	वनुर्गृणः	वनुर्गृणः
,,	२०	इत्यमनीस	इत्येनीस	१४१९	७	ऋक्णाम्	ऋक्णाम्
१३३७	१५	अभ्युयम्	अभ्युयम्	१४२२	१५	अभिमातिऽ°	अभिमातिऽ°
१३३८	७	स्वधांऽवः	स्वधाऽवः	१४२६	१४	वृत्रहा	[illegible]
१३४५	११	इष्यसे	इष्यसे	१४२९	८	तुन्वंम्	तन्वंम्
१३४६	११	अभिः	अभिः	१४४१	७	°सूर्वे ऽ स्नीरक्षम्	°सूर्वे ऽन्वारिक्षम्
१३५१	१९	मातुः°	मातुः°	१४४३	१६	हविर्भिर्धा°	हविर्भिर्धा°
१३५३	५	°तुष्टमः	°तुष्टुमः	१४५२	१६	अवृञ्जन्	अवृञ्जन्
१३५४	७	मानाभौ	मानौ	१४५३	२०	इमस्	इमस्
,,	१२	_सुतम्	असुतम्	१४६८	६	मघन्	मघन्
१३५५	२२	गिरः	गिरः	१४७६	२०	पुरुऽस्तुत्	पुरुऽस्तुत्
१३५६	९	तनू ऽ नपात्	तनू ऽनपात्	१४८०	१४	ऋतमां°	ऋतमां°
१३६०	९	ऋषि । इन्द्रोः दे°	ऋषिः । इन्द्रो दे°	१४८१	२१	पुरुऽवार	पुरुऽवार
१३६२	१३	ईदृशे साधो!'	ईदृशे साधो!	१४८२	८	कृणावम्	कृणावम्
१३६५	१६	कीविलः	कीवतः	१४९३	३	समताया	ममताया
१३६७	१५	°कमणे	°कर्मणे	१४९७	२२	अनकेन	अनकेन
१३७०	१२	प्रत्नस्य	प्रत्नस्य	१५०५	११	ऋषे	ऋषे
,,	११	प्रयुष्यं	प्रऽयुष्यं	१५०८	१५	त्वा १ के	त्वा १ के
,,	२२	कुर्वेभिः	कुर्वेभिः	१५०९	२४	न्नर्भम्	न्नर्भम्
१३७९	६	ऊतम्	ऊर्तम्	१५११	२०	वर्कमो	वर्कमो
,,	१४	°ते इति	°ते इति	१५१९	२३	वसुः	वसुः
१३८०	२०	कि मच्छन्	किमिच्छन्	१५२२	४	वर्पः	वर्पः
१३८३	१०	मर्धन्	मर्धन्	१५२६	९	मर्दिताः	मर्दिताः
१३८७	२०	ऋ_ऽयुजो	ऋतऽयुजो	१५२८	१७	मघवा	मघवा
१३८८	२०	सर्मिन्द्र	सर्मिन्द्र	,,	१५	मघवा	मघवा
				,,	१६	अभिपन्नम्	अभिपन्नम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१५३८	८	जिघ्राबाद्	जिघ्राघाद्
१५४३	१०	भुजमर्प°	भुजमर्ध°
१५५२	१५	क्तलत्तु	श्रुतत्तु
१५५७	२	इन्द्र्	इन्द्रे
१५६०	४	भरंद्	भरंत्
१५६३	४	भर्द्दत्वम्	भर्द्दत्वम्
१५७१	२०	भर्वम्नु	भंवम्नु
१५७५	५	गिरश्च	गिरश्च
१५८२	१५	क्षभवो	क्षभवो
१५८८	१०	क्स्तुत°	क्स्तुत°
१५९२	३	रानानिसम्बि	रानानि सम्बि
१५९१	१८	°च्छुंश°	°च्छुंश°
१५९८	१८	द्विषम°	द्विषम°
१५९९	१९	मर्तो इति	मर्तो इति
१६०३	४	भुजंड्देषम्	भुजंड्देषम्
१६०३	७	समिम्भाधि°	समिम्भाधि°
,,	१०	इन्द्रा°	इन्द्रा°
१६१२	१९	इति	इति
,,	,,	चन्द्रेण	चन्द्रेण
१६२५	१७	सुऽप्रजाम्	सुऽप्रजाम्
१६३२	८	भवत	भवतु
१६६१	८	महत्व	महत्वः

